परमपूज्यगच्छाधिपजयकीर्त्तिसूरिविरचित-
दीपिकाटीकासमलङ्कृताः

# उत्तराध्यायाः

## भाग-१



* पूर्वसंस्करणसम्पादकः *
पण्डित हीरालाल हंसराज

* नवीनसंस्करणसम्पादिका *
साध्वी चन्दनबालाश्री

* प्रकाशकः *
भद्रंकर प्रकाशन
अहमदाबाद

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

परमपूज्यगच्छाधिपजयकीर्त्तिसूरिविरचित-
दीपिकाटीकासमलङ्कृताः

# उत्तराध्यायाः

## भाग-१

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

नवीनसंस्करणप्रेरकः

**पंन्यास श्रीवज्रसेनविजयमहाराजः**

**गणिवर्य श्रीनयभद्रविजयमहाराजः**

नवीनसंस्करणसम्पादिका

**साध्वी चन्दनबालाश्री**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

परमपूज्यगच्छाधिपजयकीर्त्तिसूरिविरचित-
दीपिकाटीकासमलङ्कृताः

# उत्तराध्यायाः

## भाग-१

• वृत्तिकारः •

परमपूज्याचार्यवर्यमेरुतुङ्गसूरिशिष्य-
परमपूज्याचार्यवर्यजयकीर्त्तिसूरिमहाराजः

• सम्पादकः •

पण्डित श्रावक हीरालाल हंसराज

• नवीनसंस्करणसम्पादिका •

परमपूज्यव्याख्यानवाचस्पतिआचार्यभगवन्तश्रीमद्विजय-
रामचन्द्रसूरीश्वराणां साम्राज्यवर्ती
परमपूज्यप्रवर्तिनी श्रीरोहिताश्रीजीमहाराजस्य शिष्यरत्ना च
साध्वी चन्दनबालाश्री

• प्रकाशकः •

भद्रंकर प्रकाशन

अहमदाबाद

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

| | | |
|---|---|---|
| ग्रन्थनाम | : | दीपिकाटीकासमलङ्कृता उत्तराध्यायाः भाग-१ |
| वृत्तिकार | : | परमपूज्याचार्यवर्यजयकीर्त्तिसूरिमहाराजः |
| नवीनसंस्करणप्रेरक | : | पंन्यास श्रीवज्रसेनविजयमहाराजः<br>गणिवर्य श्रीनयभद्रविजयमहाराजः |
| नवीनसंस्करणसम्पादिका | : | साध्वीश्रीचन्दनबालाश्री |
| पूर्वसंस्करणप्रकाशक | : | पण्डित हीरालाल हंसराज [जामनगर] |
| नवीनसंस्करणप्रकाशक | : | भद्रंकर प्रकाशन |
| पूर्वसंस्करण | : | वि. सं. १९६६, इ.स. १९०९ |
| नवीनसंस्करण | : | वि. सं. २०६६, इ.स. २००९ |
| मूल्य | : | रु. २००-०० |
| पत्र | : | ४२+३०६ |
| © | : | BHADRANKAR PRAKASHAN, 2009 |

## प्राप्तिस्थान

| | | |
|---|---|---|
| अहमदाबाद | : | भद्रंकर प्रकाशन<br>४९/१, महालक्ष्मी सोसायटी,<br>शाहीबाग, अहमदाबाद-३८०००४<br>फोन : ०७९-२२८६०७८५ |
| अहमदाबाद | : | सरस्वती पुस्तक भंडार<br>हाथीखाना, रतनपोल, अहमदाबाद-३८०००१<br>फोन : ०७९-२५३५६६९२ |
| अक्षरांकन | : | विरति ग्राफिक्स, अहमदाबाद<br>फोन : ०७९-२२६८४०३२ |
| मुद्रक | : | तेजस प्रिन्टर्स, अहमदाबाद<br>फोन : ०७९-२२१७२२७१<br>(मो.) ९८२५३ ४७६२० |

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

# શ્રુતભક્તિ-અનુમોદના

## લાભાર્થી

પરમપૂજ્ય, પરમોપકારી, સુવિશાલગચ્છાધિપતિ, વ્યાખ્યાનવાચસ્પતિ પૂજ્યપાદ આચાર્યભગવંતશ્રીમદ્વિજય રામચંદ્રસૂરીશ્વરજીમહારાજસાહેબના શિષ્યરત્ન અધ્યાત્મયોગી પૂજ્યપાદ પંન્યાસપ્રવર શ્રીભદ્રંકરવિજયજીમહારાજસાહેબના શિષ્યરત્ન હાલારદેશે સદ્ધર્મરક્ષક પૂજ્યપાદ આચાર્યભગવંત શ્રીમદ્વિજય કુંદકુંદસૂરીશ્વરજીમહારાજસાહેબના શિષ્યરત્ન વર્ધમાનતપોનિધિ ૧૦૦+૬૮ ઓળીના આરાધક પૂજ્યપાદ ગણિવર્ય શ્રીનયભદ્રવિજયમહારાજસાહેબના સદુપદેશથી

નવાડીસા–શ્રીસંભવનગર
શ્રાવિકાબહેનોના જ્ઞાનદ્રવ્યની
ઉપજમાંથી ૧૦૦ સેટો છપાવવાનો
લાભ લીધેલ છે.

આપે કરેલી શ્રુતભક્તિની અમો હાર્દિક અનુમોદના કરીએ છીએ અને ભવિષ્યમાં પણ આપ ઉત્તરોત્તર ઉત્તમકક્ષાની શ્રુતભક્તિ કરતાં રહો એવી શુભેચ્છા પાઠવીએ છીએ.

લિ. ભદ્રંકર પ્રકાશન

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

जे किर भवसिद्धिया, परित्तसंसारिया य भविया य ।
ते किर पढंति धीरा, छत्तीसं उत्तरज्झाए ॥१॥
जे हुंति अभवसिद्धा, गंठियसत्ता अणंतसंसारा ।
ते संकिलिट्ठकम्मा, अभव्विया उत्तरज्झाए ॥२॥

[ उत्त. नि./गा.५५७-५५८ ]

"જે ભવસિદ્ધિક, પરિત્તસંસારી, ભિન્નગ્રંથિવાળા, રત્નત્રયના આરાધક ભવ્યજીવો છે, તે ધીરપુરુષો છત્રીશ ઉત્તરાધ્યાયો ભણે છે - વાંચે છે.

જે અભવસિદ્ધિક, ગ્રંથિદેશે રહેલા, અનંતસંસારી, સંક્લિષ્ટકર્મવાળા અભવ્યજીવો છે, તે ઉત્તરાધ્યાયો ભણવા માટે અયોગ્ય છે."

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

# પ્રકાશકીય

## "દુષમકાળ જિનબિંબ જિનાગમ ભવિયણકું આધારા".....!!

આગમગ્રંથોમાં પ્રથમગ્રંથ **'ઉત્તરાધ્યયન'** છે. શ્રી ઉત્તરાધ્યયનસૂત્ર એટલે સાધના-માર્ગનો સંદર્શક એક અદ્‌ભુત ગ્રંથ !! સાધુ-સાધ્વીજી ભગવંતો માટે આચારપાલનનો માર્ગદર્શક ગ્રંથ !! ઉત્તમ પ્રકારના આચારો અને ઉત્તમ પ્રકારના આચારપાલકોના દૃષ્ટાંતોથી ભરપૂર પરમાત્માની દેશનાનો આ ગ્રંથ !!

**'ઉત્તરાધ્યયન'**સૂત્ર ઉપર પૂર્વના મહર્ષિઓએ ઘણી ટીકાઓ રચી છે, તેમાંથી અમારી સંસ્થા દ્વારા અગાઉ **'લક્ષ્મીવલ્લભીય'** ટીકાયુક્ત **ઉત્તરાધ્યયનસૂત્ર** પ્રકાશિત થયેલ છે. ત્યારપછી ભાષાંતર માટે પ્રેરણા થતાં મૂલ, સંસ્કૃતછાયાનુવાદ, ગુર્જરભાષાનુવાદ અને કથાસમેત **ઉત્તરાધ્યયન**સૂત્ર ભાગ ૧-૨ પ્રકાશિત કરવામાં આવેલ છે, ત્યારપછી પરમપૂજ્ય ઉપાધ્યાય શ્રી**કમલવિજયમહારાજ** દ્વારા રચિત અને પરમપૂજ્ય મુનિ શ્રી**જયંતવિજય**મહારાજ દ્વારા સંશોધિત **'સર્વાર્થસિદ્ધિ'** ટીકાયુક્ત **ઉત્તરજ્ઝયણાણિ** ભાગ ૧-૨ પ્રકાશિત કરવામાં આવેલ છે, ત્યારપછી હવે પરમપૂજ્ય આચાર્યવર્ય શ્રી**જયકીર્તિસૂરિ**મહારાજ રચિત **'દીપિકા'**ટીકાયુક્ત **ઉત્તરાધ્યાયાઃ** ભાગ ૧-૨ પ્રકાશિત કરતાં અમે અત્યંત આનંદનો અનુભવ કરીએ છીએ

**'ઉત્તરાધ્યયન'**સૂત્ર ઉપર પરમપૂજ્ય **શાન્ત્યાચાર્ય**મહારાજરચિત **'શિષ્યહિતા'**નામક બૃહટ્ટીકાની રચના થયેલ છે એ બૃહટ્ટીકા અને **'ઉત્તરાધ્યયન'**સૂત્ર ઉપરની નિર્યુક્તિના આધારે, વિધિપક્ષીય પરમપૂજ્ય આચાર્ય **જયકીર્તિસૂરિમહારાજે** **'દીપિકા'**વૃત્તિની રચના કરેલ છે. ઘણા વર્ષો પૂર્વે પંડિત શ્રી**હીરાલાલ હંસરાજ—જામનગર**વાળાએ આ ટીકા પ્રકાશિત કરેલ છે, તે વર્ષો પૂર્વેની પ્રત **કોબા કૈલાસસાગર જ્ઞાનભંડાર**માંથી અત્યંત જીર્ણ-શીર્ણ હાલતમાં પ્રાપ્ત થતાં આ ટીકા પૂ.સાધુ-સાધ્વી ભગવંતોને વાંચન માટે ઉપયોગી બને

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

તે હેતુથી અમારા ઉપકારી પરમપૂજ્ય સુવિશાલગચ્છાધિપતિ આચાર્યભગવંત શ્રીમદ્વિજય **રામચંદ્રસૂરીશ્વરજી**મહારાજના શિષ્યરત્ન અધ્યાત્મયોગી પંન્યાસપ્રવર શ્રી**ભદ્રંકરવિજયજી** ગણિવર્યશ્રીના શિષ્યરત્ન હાલારના હીરલા પરમપૂજ્ય આચાર્યભગવંત શ્રીમદ્વિજય **કુંદકુંદ-સૂરીશ્વરજી**મહારાજના શિષ્યરત્ન પરમપૂજ્ય પંન્યાસ શ્રી**વજ્રસેનવિજયજી**મહારાજની શુભ-પ્રેરણાથી પરમપૂજ્ય વ્યાખ્યાનવાચસ્પતિ **રામચંદ્રસૂરીશ્વરજીમહારાજ**ના સામ્રાજ્યવર્તી તથા પ્રશાંતમૂર્તિ પ્રવર્તિની પૂજ્યસાધ્વીવર્યા શ્રી**રોહિતાશ્રીજી**મહારાજના શિષ્યરત્ના વિદુષી સાધ્વી શ્રી**ચંદનબાલાશ્રીજી** મહારાજે **'દીપિકા'**ટીકાસહિત **ઉત્તરાધ્યાયાઃ** ભાગ ૧-૨ના નવીનસંસ્કરણનું સંપાદન કરેલ છે અને અમારી સંસ્થાને તેના પ્રકાશનનો લાભ આપેલ છે, તે બદલ અમારી સંસ્થા તેમનો ખૂબ ખૂબ આભાર માને છે.

**'દીપિકા'**ટીકાસહિત **ઉત્તરાધ્યાયાઃ** ભાગ ૧-૨ના આ નવીનસંસ્કરણને પ્રકાશિત કરવા માટે પરમપૂજ્ય અચાર્યભગવંત શ્રીમદ્વિજય**રામચંદ્રસૂરીશ્વરજીમહારાજ**ના સામ્રાજ્યવર્તી પરમપૂજ્ય હાલારના હીરલા આચાર્યભગવંત શ્રીમદ્વિજય **કુંદકુંદસૂરિમહારાજ**ના શિષ્યરત્ન વર્દ્ધમાનતપોનિધિ પરમપૂજ્ય ગણિવર્યશ્રી**નયભદ્રવિજયજીમહારાજે ડીસા** જૈનશ્વેતાંબરમૂર્તિપૂજક સંઘને પ્રેરણા કરતાં **ડીસા** શ્રીસંઘતરફથી આ બંને ભાગના પ્રકાશનકાર્ય માટે સંઘના જ્ઞાનદ્રવ્યમાંથી સંપૂર્ણ લાભ લેવામાં આવ્યો છે, તે બદલ અમે પૂજ્ય **ગણિવર્યશ્રી**નો તથા **ડીસા** શ્રીસંઘનો ખૂબ ખૂબ આભાર માનીએ છીએ.

અમે આ તકે વૃત્તિકાર પૂજ્ય**આચાર્યભગવંતશ્રી**નો, પૂર્વે આ **'દીપિકા'**વૃત્તિસહિત **ઉત્તરાધ્યયન** ગ્રંથ પ્રતાકારે પ્રકાશિત કરનાર પંડિત **હીરાલાલ હંસરાજ**નો કોબા **કૈલાસસાગર જ્ઞાનભંડાર**ના ટ્રસ્ટીઓનો તથા નવીનસંસ્કરણના સંપાદિકા **સાધ્વી ભગવંતશ્રી**નો ખૂબ ખૂબ આભાર માનીએ છીએ.

અક્ષરમુદ્રાંકન કાર્ય માટે **વિરતિગ્રાફિક્સ**ના **અખિલેશ મિશ્રા**એ સુંદર કાર્ય કરી આપેલ છે અને પ્રીન્ટીંગના કામ માટે **તેજસ પ્રીન્ટર્સ**ના **તેજસભાઈ**એ ખંતપૂર્વક સુંદર કાર્ય કરી આપેલ છે. તે બદલ અમે તેમનો આભાર માનીએ છીએ.

પ્રાંતે આ ગ્રંથના વાંચન-મનન અને નિદિધ્યાસન દ્વારા આપણા આત્માને જાગૃત કરીને પરમપદને પામનારા બનીએ !!

**— પ્રકાશક**

●●●

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

# ઉત્તરાધ્યયન એક આગમગ્રંથ !!

અનંતકાળચક્ર છે, દરેક કાળચક્રમાં ઉત્સર્પિણી-અવસર્પિણી કાળ હોય છે. તેમાં ત્રીજા અને ચોથા આરામાં તારક શ્રીતીર્થંકર પરમાત્માઓ ઉત્પન્ન થઈને સર્વવિરતિધર્મ અંગીકાર કરીને કેવલજ્ઞાનને પામીને શાસનની સ્થાપના કરે છે અને શાસનની સ્થાપના કરતી વખતે ''**उपन्नेइ वा', विगमेइ वा, धुवेइ वा**'' આ ત્રિપદી દ્વારા પરમાત્મા જે અર્થથી દેશના આપે છે, તેને ગણધરભગવંતો સૂત્રમાં ગૂંથે છે, એ આગમ તરીકે પ્રસિદ્ધ થાય છે.

આ આગમગ્રંથોમાં પ્રથમગ્રંથ **"ઉત્તરાધ્યયન"** છે. આ ગ્રંથ પૂજ્ય સાધુ-સાધ્વીજી ભગવંતોને આરાધનામય સંયમજીવન જીવવા માટે અત્યંત ઉપયોગી ગ્રંથ છે.

**'ઉત્તરાધ્યયન'**સૂત્ર ઉપર પૂર્વના મહર્ષિઓએ ઘણી ટીકાઓ રચી છે, તેમાંથી આ અંચલગચ્છીય પરમપૂજ્ય આચાર્યભગવંત **મેરુતુંગસૂરિમહારાજ**ના શિષ્યરત્ન પરમપૂજ્ય આચાર્યભગવંત **જયકીર્તિસૂરિમહારાજ**રચિત **'દીપિકા'** ટીકા છે. આ **'દીપિકા'** ટીકા સરળ, સુબોધ અને તાત્ત્વિકભાવગર્ભિત છે. આમાં કથાનકો સંક્ષિપ્તમાં સંસ્કૃત ગદ્યભાષામાં છે, જેથી પ્રારંભિક સંસ્કૃતનો અભ્યાસ કરનારા પણ આ ટીકા સરળતાથી વાંચી શકે તેમ છે. આ **'દીપિકા'** ટીકા સહિત **'ઉત્તરાધ્યાયાઃ'** પ્રતાકારે વિ.સં. ૧૯૬૬, ઈ.સ. ૧૯૦૯માં પંડિત **હીરાલાલ હંસરાજે - જામનગરથી** પ્રકાશિત કરેલ. આજથી લગભગ ૧૦૦ વર્ષો પૂર્વે પ્રકાશિત થયેલ આ પ્રત અમને **કોબા શ્રીકૈલાસસાગરજ્ઞાનભંડાર**માંથી પ્રાપ્ત થઈ અને તે પ્રતની હાલત અત્યંત જીર્ણ-શીર્ણ થયેલી જોતાં થયું કે, પૂર્વના મહાપુરુષે આ **'ઉત્તરાધ્યયન'** આગમગ્રંથ ઉપર **'દીપિકા'** ટીકાની રચના કરેલ છે, એ મહાપુરુષની જેમ ટીકા રચવાનું તો સામર્થ્ય નથી પરંતુ એ મહાપુરુષ દ્વારા રચિત આ શ્રુતનો વારસો બીજા ૬૦-૭૦ વર્ષો સુધી જળવાઈ રહે એ ભાવનાથી મેં પોતાની નાદુરસ્ત તબીયતમાં પણ સતત શ્રુતોપાસનામાં લીન રહેતાં સાધ્વીશ્રી**ચંદનબાલાશ્રી**ને શુભપ્રેરણા કરી અને શ્રુતોપાસિકા સાધ્વીશ્રી**ચંદનબાલાશ્રી**એ મારી શુભપ્રેરણાને સહર્ષ ઝીલીને આ નવીનસંસ્કરણના સંપાદકનું

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

કાર્ય કર્યું છે અને આ **'દીપિકા'** ટીકા સહિત **ઉત્તરાધ્યાયાઃ ભાગ ૧-૨/૩૬** અધ્યાયોના વિસ્તૃત દિગ્દર્શન અને ૧૦ પરિશિષ્ટો સાથે **ભદ્રંકરપ્રકાશન**થી પ્રકાશિત થઈ રહેલ છે, તે મારા માટે અતિઆનંદનો વિષય બનેલ છે.

આ નવીનસંસ્કરણના પ્રકાશન કાર્ય માટે સાધ્વીશ્રીની શ્રુતભક્તિથી પ્રેરાઈને શ્રુતપ્રેમી વર્દ્ધમાનતપોનિધિ ગણિવર્ય શ્રી**નયભદ્રવિજયજી**એ **ડીસા** શ્વે.મૂ. શ્રીસંઘને પ્રેરણા કરી અને **ડીસા** શ્રીસંઘે આ ગ્રંથપ્રકાશનકાર્યનો સંઘના જ્ઞાનદ્રવ્યમાંથી સંપૂર્ણ લાભ લીધેલ છે, તે **ડીસા** શ્રીસંઘની શ્રુત પ્રત્યેની પરમોચ્ચભક્તિ સૂચવે છે.

આ ગ્રંથના વાચન, મનન અને નિદિધ્યાસન દ્વારા સમ્યગ્જ્ઞાન, સમ્યગ્દર્શન અને સમ્યક્ચારિત્રરૂપ રત્નત્રયીની પરિણતિને વિકસાવીને આપણે સૌ કોઈ મુક્તિસુખના અર્થી મુમુક્ષુ ભવ્યાત્માઓ નિજસ્વરૂપના ભોગસ્વરૂપ મુક્તિસુખના ભોક્તા બનીએ એ જ એક અંતરની શુભાભિલાષા....!!

**– પંન્યાસ શ્રીવજ્રસેનવિજય**

●●●

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

# [1]સંપાદકીય

**अत्थं भासइ अरहा, सुत्तं गंथंति गणहरा निउणं ।**

**सासणस्स हियट्ठाए, तओ सुत्तं पवत्तेइ ॥**

**[ श्रीभद्रबाहुस्वामी - आवश्यकनिर्युक्ति गा० ९२ ]**

– અર્હતો અર્થ (માત્ર) કહે છે, (નહિ કે દ્વાદશાંગરૂપ સૂત્ર) (અને) ગણધરો સૂત્ર (દ્વાદશાંગરૂપ) નિપુણ (એટલે સૂક્ષ્માર્થ પ્રરૂપક બહુ અર્થવાળું) અથવા નિગુણ (એટલે નિયત-પ્રમાણનિશ્ચિતગુણોવાળું) ગૂંથે છે, તેથી શાસનના હિત માટે સૂત્ર પ્રવર્તે છે.

[મલધારી શ્રીહેમચંદ્રસૂરિકૃત વિશેષાવશ્યકભાષ્ય]

પરમપૂજ્ય આચાર્યભગવંત શ્રી**ઉદયસિંહ**મહારાજ **ધર્મવિધિ**વૃત્તિ(૧૨૮૬)માં મંગલાચરણ કરતાં કહે છે–

**सा जीयाज्जैनी गौः सद्धर्मोलङ्कृतिर्नवरसाढ्या ।**

**त्रिपदान्वितयापि यया भुवनत्रयगोचरोऽव्यापि ॥**

– સદ્ધર્મને અલંકૃત કરનારી, નવરસથી સમૃદ્ધ એવી જૈન ગો(વાણી, ગાય) કે જે ત્રણ પદ (ઉત્પાદ, વ્યય અને ધ્રૌવ્ય એ ત્રણ પદ)થી યુક્ત છતાં (એને ત્રણ પદપગલાં છતાં) ત્રણે જગત્માં વ્યાપ્ત થઈ તે જય પામો.

મલધારી શ્રી**હેમચંદ્રસૂરિ**મહારાજ **ધર્મોપદેશમાલા**નું મંગલાચરણ કરતાં કહે છે–

**वन्दे पादद्वितयं भक्त्या श्रीगौतमादिसूरीणां ।**

**निःशेषशास्त्रगङ्गाप्रवाहहिमवद्गिरिनिभानां ॥**

---

૧. સંપાદકીય આ લખાણમાં જૈનબૃહદ્સાહિત્યનો ઇતિહાસ ભાગ-૩ ગુજરાતી આવૃત્તિ, જૈનસાહિત્યનો સંક્ષિપ્ત ઇતિહાસ નવી આવૃત્તિ અને અંચલગચ્છદિગ્દર્શનમાંથી અમુક લખાણ સાભાર ઉદ્ધૃત કરી સંકલિત કરેલ છે. તથા ભદ્રંકર પ્રકાશનથી પ્રકાશિત ઉત્તરાધ્યયનસૂત્ર ભાષાંતરની આવૃત્તિમાંથી અધ્યયનોનો ટુંક સાર સાભાર લીધેલ છે.

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

– સર્વ શાસ્ત્રરૂપ ગંગાપ્રવાહના હિમવદ્‌ગિરિ જેવા શ્રી **ગૌતમ** આદિ (સુધર્મા, જંબૂ વગેરે) સૂરિઓના ચરણયુગલને ભક્તિથી વંદું છું.

પરમાત્મા **મહાવીરસ્વામી**ના મુખ્ય ૧૧ શિષ્યો હતા. એ 'ગણધર' મુનિઓના ગણના ધારક કહેવાય છે, તે બધા બ્રાહ્મણકુળના હતા. તેમાંના નવ ગણધરો પરમાત્મા મહાવીરસ્વામી હયાતીમાં નિર્વાણ પામ્યા. બાકીના બેમાં એક **ગૌતમ ઇન્દ્રભૂતિ** અને બીજા સુધર્મા એમાંથી **સુધર્મા**સ્વામીએ અંગો આદિ ગૂંથીને પરમાત્માના ઉપદેશને જાળવી રાખ્યો છે.

જૈનશાસનના સૌથી પ્રાચીન ગ્રંથો **'અંગો'** કહેવાય છે. તે બાર છે અને તેમાં બારમું અંગ **'દૃષ્ટિવાદ'** નામે છે, જેમાં ચૌદ પૂર્વોનો સમાવેશ થાય છે તે પાછળથી લુપ્ત થયેલું છે. બાકીના અગિયાર અંગો **આચારાંગ** આદિ અદ્યાવધિ અમુક પ્રમાણમાં ઉપલબ્ધ છે. તે ૧૧ અંગોના નામ આ પ્રમાણે છે–

(૧) આચારાંગ (૨) સૂત્રકૃતાંગ (૩) સ્થાનાંગ (૪) સમવાયાંગ (૫) વ્યાખ્યાપ્રજ્ઞપ્તિ (ભગવતીસૂત્ર) (૬) જ્ઞાતાધર્મકથા (૭) ઉપાસકદશા (૮) અંતકૃદ્દશા (૯) અનુત્તરોપપાતિક (૧૦) પ્રશ્નવ્યાકરણ (૧૧) વિપાકશ્રુત

આ અગિયાર અંગ સિવાય પૂર્વના ક્ષમાશ્રમણોએ ષડ્‌વિધઆવશ્યક, અંગબાહ્ય કાલિકશ્રુત, અંગબાહ્ય ઉત્કાલિત શ્રુત આદિની રચના કરેલ છે.

અંગઆગમ સિવાયના બાર **'ઉપાંગો'** છે તે આ પ્રમાણે–

(૧) ઔપપાતિક(ઉવવાઇ)સૂત્ર (૨) રાયપસેણી (૩) જીવાભિગમ (૪) પ્રજ્ઞાપના (૫) સૂર્યપ્રજ્ઞપ્તિ (૬) જંબૂદ્વીપપ્રજ્ઞપ્તિ (૭) ચંદ્રપ્રજ્ઞપ્તિ (૮) કપ્પિયા (૯) કપ્પવડંસિયા (૧૦) પુપ્ફિયા (૧૧) પુપ્ફચુલિયા (૧૨) વહ્નિદસા

આ સિવાય ચાર **'મૂલસૂત્ર'** છે તે આ પ્રમાણે–

(૧) આવશ્યક, (૨) દશવૈકાલિક, (૩) ઉત્તરાધ્યયન તથા (૪) પિંડનિર્યુક્તિ કે ઓઘનિર્યુક્તિ

આ સિવાય છ **'છેદસૂત્રો'** છે તે આ પ્રમાણે–

(૧) નિશીથ (૨) બૃહત્કલ્પ (૩) વ્યવહાર (૪) દશાશ્રુતસ્કંધ (૫) પંચકલ્પ અને (૬) મહાનિશીથ

આ રીતે જૈનાઆગમ ચાર વર્ગોમાં વિભક્ત છે.

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**પાક્ષિકસૂત્ર**માં કહ્યું છે કે,

नमोऽत्थु ते सिद्ध-बुद्ध-मुत्त-नीरय-निस्संग-माणमुरण-गुणरयणसागरमणन्तमप्पमेय । नमोऽत्थु ते महइमहावीरवद्धमाणसामिस्स । नमोऽत्थु ते भगवओ तिकट्टु ॥ - पाक्षिकसूत्रम्

– સિદ્ધ (કૃતાર્થ), બુદ્ધ, યુક્ત, નિરજ (રજહીનકર્મરહિત), નિઃસંગ, માનને દળી નાંખનાર, ગુણરત્નના સાગર તથા અનંત, અપ્રમેય એવા આપને નમસ્કાર હો ! મહત્-મોક્ષમાં જનાર એવા આપ **મહાવીર વર્ધમાન** સ્વામીને નમસ્કાર હો ! આપ ભગવંતને ત્રણ વાર નમસ્કાર હો !

नमो तेसिं खमासमणाणं जेहिं इमं वाइयं दुवालसंगं गणिपिडगं भगवन्तं ।

नमो तेसिं खमासमणाणं जेहिं इमं वाइयं छव्विहभावस्सयं भगवन्तं ।

नमो तेसिं खमासमणाणं जेहिं इमं वाइयं अंगबाहिरं उक्कालियं भगवन्तं ।

नमो तेसिं खमासमणाणं जेहिं इमं वाइयं अंगबाहिरं कालियं भगवन्तं । - पाक्षिकसूत्रम्

– જેમણે આ ભગવત્-દ્વાદશાંગગણિપિટક સૂત્રાર્થથી વાંચ્યું-વિરચ્યું તે ક્ષમાશ્રમણો ક્ષમાદિગુણપ્રધાન મહાતપસ્વી સ્વગુરુ તીર્થંકર-ગણધરાદિને) નમસ્કાર.

– જેમણે આ ભગવત્-ષડ્વિધ આવશ્યકની વાચના કરી તે ક્ષમાશ્રમણોને નમસ્કાર.

– જેમણે આ ભગવત્ અંગબાહ્ય કાલિકની વાચના કરી તે ક્ષમાશ્રમણોને નમસ્કાર.

– જેમણે આ ભગવત્ અંગબાહ્ય ઉત્કાલિકની વાચના કરી તે ક્ષમાશ્રમણોને નમસ્કાર.

**ઉત્તરજ્ઝયણાણિ**–ઉત્તરાધ્યયનસૂત્ર જૈન આગમોમાં પ્રથમ મૂલસૂત્ર છે. ઉત્તરાધ્યયનસૂત્રના ટીકાગ્રંથો પરથી જાણી શકાય છે કે, પરમાત્મા **મહાવીર**દેવે પોતાના અંતિમ ચાતુર્માસમાં અપાપાપુરીમાં સોળ પ્રહરની છેલ્લી ધર્મદેશના આપી, તેમાં જે વણપૂછ્યા છત્રીસ પ્રશ્નોનાં ઉત્તર આપ્યા, તેનો આ ગ્રંથમાં સંગ્રહ હોવાથી આ ગ્રંથનું નામ **ઉત્તરાધ્યયન** પડ્યું.[२]

નિર્યુક્તિકાર શ્રી**ભદ્રબાહુસ્વામી**મહારાજ આ **ઉત્તરાધ્યયન**સૂત્રનું માહાત્મ્ય બતાવતા કહે છે કે, જે સમ્યગ્દર્શનાદિ ગુણયોગ્ય ભિન્નગ્રંથિવાળા આસન્નસિદ્ધિક ભવ્યજીવો છે તે જ આ છત્રીશ ઉત્તરાધ્યયનો ભણે છે. તેથી શ્રુતજિન વગેરે વડે કહેવાયેલા અનંતગમ-

---

२. "इइ पाउकरे बुद्धे नायए परिनिव्वुए ।
छत्तीसं उत्तरज्झाए भवसिद्धीयसंमए" ॥ – उत्तरा० ३६ । गा० २६८

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

પર્યાયયુક્ત છત્રીશ ઉત્તરાધ્યયનો ઉપધાનાદિ ઉચિત વ્યાપારપૂર્વક યથાયોગ ગુરુના પ્રસાદથી ભણવા જોઈએ.[3]

**શ્રીભદ્રબાહુસ્વામી**મહારાજની **ઉત્તરાધ્યયન–નિર્યુક્તિ** અનુસાર છત્રીશ અધ્યયનોમાંથી કેટલાક અંગગ્રંથોમાંથી લેવામાં આવ્યા છે, કેટલાક જિનભાષિત છે, કેટલાક પ્રત્યેકબુદ્ધો દ્વારા નિરૂપિત છે અને કેટલાંક સંવાદરૂપે કહેવાયેલાં છે.[4]

**ઉત્તરાધ્યયન**સૂત્ર ઉપર બૃહટ્ટીકાકાર વાદિવેતાલ **શ્રીશાન્તિસૂરિ**મહારાજ અનુસાર ઉત્તરાધ્યયનસૂત્રનું પરીષહ નામક બીજું અધ્યયન દૃષ્ટિવાદમાંથી લેવામાં આવ્યું છે, દ્રુમપુષ્પિકા નામક દસમું અધ્યયન મહાવીર પરમાત્માએ પ્રરૂપિત કર્યું છે, કાપિલીયનામક આઠમું અધ્યયન પ્રત્યેકબુદ્ધ કપિલે પ્રતિપાદન કર્યું છે તથા કેશીગૌતમીયનામક ત્રેવીસમું અધ્યયન સંવાદરૂપે પ્રતિપાદિત કરવામાં આવ્યું છે.

**ઉત્તરાધ્યયનસૂત્ર ઉપર નિર્યુક્તિ, ચૂર્ણિ અને વૃત્તિઓની રચના :–**

**ઉત્તરાધ્યયન**સૂત્રની 'મૂલવર્ગ'ની અંદર પરિગણના થાય છે. પરમપૂજ્ય આચાર્યભગવંત **શ્રીભદ્રબાહુસ્વામી**મહારાજે આ ગ્રંથ ઉપર 'નિર્યુક્તિ' લખી છે. પરમપૂજ્ય **શ્રીજિનદાસ**-ગણિમહત્તરે આ ગ્રંથ ઉપર 'ચૂર્ણિ' લખી છે, પરમપૂજ્ય વાદિવેતાળ **શ્રીશાંતિસૂરિ**મહારાજે આ ગ્રંથ ઉપર 'શિષ્યહિતા' નામની બૃહટ્ટીકાની રચના કરી છે, પરમપૂજ્ય આચાર્યભગવંત **શ્રીનેમિચંદ્ર**સૂરિમહારાજે બૃહટ્ટીકાના આધારે આ ગ્રંથ ઉપર 'સુખબોધા' નામની ટીકા રચી છે. પરમપૂજ્ય **શ્રીભાવવિજયજી**મહારાજે આ ગ્રંથ ઉપર ટીકા રચી છે, પરમપૂજ્ય આચાર્ય-ભગવંત **શ્રીલક્ષ્મીવલ્લભ**સૂરિમહારાજે 'લક્ષ્મીવલ્લભા' ટીકા રચી છે. પરમપૂજ્ય ઉપાધ્યાય **શ્રીકમલસંયમવિજય**મહારાજે 'સર્વાર્થસિદ્ધિ' ટીકા રચી છે. પરમપૂજ્ય**જયકીર્તિસૂરિ**મહારાજે 'દીપિકા' નામની ટીકા રચી છે. આ રીતે અનેક આચાર્યભગવંતો અને વિદ્વાનો એ સમયે સમયે આ ગ્રંથ ઉપર ટીકાઓ લખી છે અને આ બધી ટીકાઓ અનેક સંસ્થાઓ દ્વારા અત્યાર સુધી પ્રકાશિત થયેલ છે.

---

३. "जे किर भवसिद्धीया परित्तसंसारिया य जे भव्वा ।
तेकिर पढंति एए छत्तीसं उत्तरज्झाए ॥१॥
तम्हा जिणपन्नत्ते अणंतगम–पज्जवेहि संजुत्ते ।
अज्झाए जहजोगं गुरुप्पसाया अहिज्जेज्जा" ॥२॥ – उत्त० नि० गा० ५५८।५५९

४. "अंगप्पभवा जिणभासिया पत्तेयबुद्धसंवाया ।
बंधे मुक्खे य कया छत्तीसं उत्तरज्झयणा" ॥ – उत्त० नि० गा० ४

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

## પરમપૂજ્ય આચાર્યવર્ય જયકીર્તિસૂરિમહારાજરચિત ઉત્તરાધ્યયનદીપિકાટીકા :-

વિધિપક્ષીય પરમપૂજ્ય આચાર્યવર્ય શ્રી**મેરુતુંગસૂરીશ્વરજી**મહારાજના શિષ્યરત્ન પરમપૂજ્ય ગચ્છાધિપશ્રી**જયકીર્તિસૂરીશ્વરજી**મહારાજે **ઉત્તરાધ્યયન**સૂત્ર ઉપર આ **દીપિકા**વૃત્તિની રચના કરેલ છે.[૫]

પરમપૂજ્ય આ.શ્રી**જયકીર્તિસૂરિ**મહારાજરચિત **ઉત્તરાધ્યયન**સૂત્ર ઉપરની **દીપિકા** વૃત્તિમાં ઉત્તરાધ્યયનનિર્યુક્તિની તપા આવશ્યકનિર્યુક્તિની ઘણી જ ગાથાઓ લેવામાં આવેલ છે. તેમજ એ અરસામાં થઈ ગયેલા પ.પૂ.આ.શ્રી**મેરુતુંગસૂરિ**મહારાજના શિષ્ય (દીપિકાટીકાકારના ગુરુભ્રાતા) પ.પૂ.આ.**માણિક્યશેખરસૂરિ**મહારાજ રચિત આવશ્યકનિર્યુક્તિદીપિકામાંથી પણ અમુક પદાર્થો લીધેલ છે, અને નવતત્ત્વવિવરણગ્રંથમાંથી પણ અમુક પદાર્થ લીધેલ છે અને દીપિકાટીકામાં ઉલ્લેખ પણ કરેલ છે કે આ અંગેનું વિશેષવર્ણન આવશ્યકનિર્યુક્તિદીપિકા, નવતત્ત્વવિવરણમાંથી જોવું.[૬]

## 'દીપિકા'ટીકાકાર પરમપૂજ્ય આચાર્યવર્ય શ્રીજયકીર્તિસૂરિમહારાજનો પરિચય :-

પ્રસ્તુત **દીપિકા**ટીકાકાર પૂ.આ.**જયકીર્તિસૂરિ**મહારાજના શિષ્ય **મેરુતુંગસૂરિ**મહારાજના શિષ્ય છે.[૭] વિક્રમની ૧૫ સદીમાં તેઓ વિદ્યમાન હોવાથી તેમનો સમય ૧૫મી સદીનો કહી શકાય છે.

મરુમંડલઅંતર્ગત તિમિરપુરમાં શ્રીમાલીવંશીય સંઘવી ભૂપાલશ્રેષ્ઠીને ત્યાં તેની પત્ની ભ્રમરાદેની કૂખે સં. ૧૪૩૩માં એમનો જન્મ થયો હતો, એમનું મૂળ નામ દેવકુમાર હતું.

---

૫. संशयान्धतमसापहारिणी, सत्प्रकाशपरमोपकारिणी ।
उत्तराध्ययनदीपिका चिरं, प्रथ्यतां मुनिजनैर्निरन्तरं ॥
गच्छाधिपः श्रीजयकीर्त्तिसूरी-श्वरो विधिपक्षगणप्रहृष्टः ।
सद्भावसारः परमार्थहेतु-मक्लृप्तवान् पुस्तकरत्नमेतत् ॥ [दीपिकाटीकाप्रशस्तिः]

૬. માણિક્યશેખરસૂરિએ આવશ્યકનિર્યુક્તિદીપિકાની ગ્રંથપ્રશસ્તિમાં પોતાના અન્ય ગ્રંથોનો ઉલ્લેખ આ પ્રમાણે કર્યો છે - પિંડનિર્યુક્તિદીપિકા, ઓઘનિર્યુક્તિદીપિકા, ઉત્તરાધ્યયનદીપિકા, આચારાંગદીપિકા અને નવતત્ત્વવિવરણ - વિશેષમાં તેમણે જણાવ્યું છે કે એકકર્તૃત્વથી આ સર્વે ગ્રંથો સહોદરરૂપ છે : एककर्तृतया ग्रन्था अमी अस्याः सहोदराः । [અંચલગચ્છદિગ્દર્શન પૃ. ૨૫૩]

૭. અંચલગચ્છીય મેરુતુંગસૂરિના શિષ્ય જયકીર્તિસૂરિએ વિ.સં. ૧૪૮૩માં એક ચૈત્યની દેરીની પ્રતિષ્ઠા કરાવી હતી : संवत् १४८३ वर्षे प्रथम वैशाख शुद १३ गुरौ श्रीअंचलगच्छे श्रीमेरुतुंगसुरीणां श्रीजयकीर्तिसूरीश्वरसुगुरूपदेशेन........श्रीजिराउलापार्श्वनाथस्य चैत्ये देहरि (३) कारापिता॥ .... । [જૈ.બૃ.સા.ઈ.ગુ.આવૃત્તિ પૃ. ૪૨૩-૪૨૪]

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

બાળક દેવકુમારે સં. ૧૪૪૪માં પૂ.**મેરુતુંગસૂરિ**મહારાજ પાસે વૈરાગ્યપૂર્વક દીક્ષા લીધી અને એ નવોદિત મુનિનું નામ **'જયકીર્તિ'** રાખવામાં આવ્યું. સં. ૧૪૬૭માં ગુરુએ તેમને યોગ્ય જાણીને ખંભાતમાં આચાર્યપદ પ્રદાન કર્યું. સં. ૧૪૭૧ના માગશર પૂર્ણિમાને સોમવારના દિવસે પૂ.**મેરુતુંગસૂરિ**મહારાજનું અણહિલપુર પાટણમાં સ્વર્ગમન થયું, એ પછી એ જ વર્ષમાં પૂ.**જયકીર્તિસૂરિ**મહારાજને ગચ્છાનાયકપદે સ્થાપવામાં આવ્યા હોવાનું ભાવ-સાગરસૂરિ ગુર્વાવલીમાં નોંધે છે.[૮]

આ **ઉત્તરાધ્યયન**સૂત્ર ઉપરની **'દીપિકા'**ટીકા સરળ અને સુબોધ છે, આમ છતાં અનેક તાત્ત્વિકપદાર્થોથી ભરપૂર આ ટીકાની રચના છે, આ **'દીપિકા'** ટીકામાં કથાનકો બધા સંસ્કૃતગદ્યભાષામાં હોવાથી પ્રારંભિક સંસ્કૃતનો અભ્યાસ કરનાર પણ આ ટીકા વાંચી શકે તેવું છે. ટીકામાં અન્ય અન્ય ગ્રંથોના અનેક ઉદ્ધરણો આપેલ છે તે ઉદ્ધરણોના જેટલા સ્થાનો અમને પ્રાપ્ત થયા તે [ ] ચોરસ કૌંસમાં અમે ત્યાં નોંધેલ છે અને ઉદ્ધરણો બધા બોલ્ડ ફોન્ટમાં લીધેલ છે. ટીકામાં અને કથાનકોમાં આવતા વિશેષ નામોને પણ અમે બોલ્ડ ફોન્ટ લીધેલ છે.

આ **દીપિકા**વૃત્તિ સહિત **ઉત્તરાધ્યયન**ની પૂર્વસંપાદિત આવૃત્તિ વિ. સં. ૧૯૬૬, ઈ. સ. ૧૯૦૯માં પંડિત **હીરાલાલ હંસરાજે જામનગર**થી પ્રકાશિત કરેલ છે. ૧૦૦ વર્ષો પૂર્વે પ્રકાશિત થયેલી પ્રતાકાર આવૃત્તિ જૂની લિપિમાં પ્રીન્ટીંગ થયેલ હતી અને અત્યંત અશુદ્ધપ્રત હોવાથી અમે તે તે અશુદ્ધ પાઠોની શુદ્ધિ **ઉત્તરાધ્યયન** બૃહટ્ટીકાના આધારે કરેલ છે. ઉદ્ધરણોમાં પણ પદચ્છેદ વગેરેની ઘણી અશુદ્ધિઓ હોવાથી તે તે ગ્રંથોમાંથી અને બૃહટ્ટીકામાંથી અમે ઉદ્ધરણપાઠોની પણ શુદ્ધિ કરેલ છે. એક સ્થાનમાં ઉદ્ધરણ પાઠ ત્રુટિત-પતિત હોવાથી બૃહટ્ટીકાના આધારે એ સ્થાનાંગસૂત્રના પાઠની અમે પૂર્તિ કરેલ છે અને પ્રતિનો પાઠ ત્યાં નીચે ટિપ્પણીમાં મૂકેલ છે [જુઓ પૃષ્ઠ નં. ૪૩૦] આ સિવાય વિષયાનુક્રમણિકા, ૧થી ૩૬ અધ્યાયોનો વિસ્તૃત વિષયદિગ્દર્શન અને ૧૦ પરિશિષ્ટો અમે તૈયાર કરેલ છે.

**ઉત્તરાધ્યયન**સૂત્ર ઉપરની **'દીપિકા'**વૃત્તિની આ પ્રત અમે **ઉત્તરાધ્યયન**સૂત્ર ઉપરની કમલસંયમીયા **'સર્વાર્થસિદ્ધિ'**વૃત્તિનું સંપાદનકાર્ય કર્યું ત્યારે **કોબા કૈલાસસાગર જ્ઞાનમંદિર**માંથી જોવા માટે મંગાવેલ અને એ પ્રત અત્યંત જીર્ણ-શીર્ણ થઈ ગયેલ હોવાથી

---

૮. મુનિ લાખા 'ગુરુપટ્ટાવલી'માં જયકીર્તિસૂરિ વિષે આ પ્રમાણે નોંધ કરે છે–
૧૨ बारमा गच्छनायक श्री जयकीर्तिसूरि । तिमिरपुरे । श्रेष्ठि भूपाल । भरमादे माता । संवत् १४३३ वर्षे जन्म । सवंत् १४७३ वर्षे गच्छेशपदं श्री पत्ने । संवत् १५०० निर्वाण श्री पत्ने । सर्वायु वर्षे ६८।। [અંચલગચ્છદિગ્દર્શન પૃ. ૨૩૭]

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

પરમપૂજ્ય પંન્યાસપ્રવર શ્રી**વજ્રસેનવિજય**મહારાજસાહેબે આ ઉત્તરાધ્યયન **'દીપિકા'** વૃત્તિનું નવીનસંસ્કરણના સંપાદનકાર્ય કરવા માટે પ્રેરણા કરી એ મુજબ આજે ૧૦૦ વર્ષો પછી આ **'દીપિકા'** ટીકા સહિત **ઉત્તરાધ્યયન**સૂત્ર ભાગ ૧-૨ માં નવીનસંસ્કરણ પ્રકાશિત થઈ શ્રીસંઘના ચરણે અર્પણ કરવામાં આવે છે. જે અમારા માટે અતિ આનંદનો વિષય છે. જો કે આ કાર્યમાં હું તો માત્ર નિમિત્તરૂપ છું. ખાસ તો **વૃત્તિકારશ્રી**એ આ ગ્રંથની રચના કરી અને પંડિત **હીરાલાલ હંસરાજે** આ ગ્રંથની પ્રથમાવૃત્તિ પ્રકાશિત કરી તો આજે ૧૦૦ વર્ષો પછી આ **'દીપિકા'**વૃત્તિ વાંચવાનું સદ્‌ભાગ્ય મને સાંપડ્યું, તેથી આ સઘળું શ્રેયઃ વૃત્તિકાર આચાર્યભગવંતશ્રી અને પંડિતજીના ફાળે જાય છે.

**ઉત્તરાધ્યયનસૂત્ર—૩૬ અધ્યયનો :—**

| | | |
|---|---|---|
| ૧. વિનય અધ્યયન | ૧૩. ચિત્રસંભૂતીય અધ્યયન | ૨૫. યજ્ઞીય અધ્યયન |
| ૨. પરીષહ અધ્યયન | ૧૪. ઈષુકારીય અધ્યયન | ૨૬. સામાચારી અધ્યયન |
| ૩. ચતુરંગીય અધ્યયન | ૧૫. સભિક્ષુ અધ્યયન | ૨૭. ખલુંકીય અધ્યયન |
| ૪. પ્રમાદ- અપ્રમાદ અધ્યયન | ૧૬. બ્રહ્મચર્ય અધ્યયન | ૨૮. મોક્ષમાર્ગગતિ અધ્યયન |
| ૫. અકામમરણ અધ્યયન | ૧૭. પાપશ્રમણીય અધ્યયન | ૨૯. સમ્યક્ત્વપરાક્રમ અધ્યયન |
| ૬. ક્ષુલ્લકનિર્ગ્રંથીય અધ્યયન | ૧૮. સંયતીય અધ્યયન | ૩૦. તપોમાર્ગગતિ અધ્યયન |
| ૭. ઔરભ્રીય અધ્યયન | ૧૯. મૃગાપુત્રીય અધ્યયન | ૩૧. ચરણવિધિ અધ્યયન |
| ૮. કાપિલીયાખ્ય અધ્યયન | ૨૦. મહાનિર્ગ્રન્થીય અધ્યયન | ૩૨. પ્રમાદસ્થાન અધ્યયન |
| ૯. નમિપ્રવ્રજ્યા અધ્યયન | ૨૧. સમુદ્રપાલીય અધ્યયન | ૩૩. કર્મપ્રકૃતિ અધ્યયન |
| ૧૦. દ્રુમપત્રક અધ્યયન | ૨૨. રથનેમીય અધ્યયન | ૩૪. લેશ્યા અધ્યયન |
| ૧૧. બહુશ્રુતપૂજા અધ્યયન | ૨૩. કેશિગૌતમીય અધ્યયન | ૩૫. અણગારમાર્ગગતિ અધ્યયન |
| ૧૨. હરિકેશીય અધ્યયન | ૨૪. પ્રવચનમાતૃ અધ્યયન | ૩૬. જીવાજીવવિભક્તિ અધ્યયન |

**અધ્યયનનો ટૂંકસાર :—**

**૧. વિનય અધ્યયન : ગાથા-૪૮**

ધર્મનું મૂળ વિનય છે અને તે સાધુભગવંતોના જીવનમાં મુખ્ય સ્થાને રહેલો હોય છે તેથી જ ગ્રંથના પ્રારંભમાં કહે છે કે—

**''संजोगाविप्पमुक्कस्स अणगारस्स भिक्खुणो ।**
**विणयं पाउकरिस्सामि, आणुपुव्विं सुणेह मे''** ॥ [उत्त.१/गा.१]

સંયોગોથી સંપૂર્ણ મુક્ત થયેલા અણગાર એવા સાધુના વિનયધર્મને હું અનુક્રમે કહીશ તે તમે સાંભળો.

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

આ અધ્યયનની ૪૮ ગાથાઓમાં વિનીત—અવિનીતનું સ્વરૂપ, વિનીતના ગુણ અને અવિનીતના દોષ અશ્વના દૃષ્ટાંતથી તથા કુલવાલક મુનિના દૃષ્ટાંતથી બતાવેલ છે.

સાધુજીવનની ભિક્ષા—અટન આદિ સર્વ ક્રિયા કરતાં ગુરુનો વિનય કેવી રીતે સાચવવો તે સર્વ વિગતવાર ચંડરુદ્રાચાર્યના શિષ્યના દૃષ્ટાંત દ્વારા જણાવેલ છે.

**૨. પરીષહ અધ્યયન : ગાથા-૪૬**

આ અધ્યનનમાં પરીષહોનું સ્વરૂપ જણાવેલ છે. જેવી રીતે જ્ઞાન મેળવવા માટે વિનય જરૂરી છે તેવી જ રીતે ચારિત્રના પાલનમાં વિનયવાન સાધુએ પરીષહોને સમતાપૂર્વક સહન કરવા જરૂરી છે.

મોક્ષમાર્ગમાં આગળ વધનાર સાધક આત્માએ પરીષહો સહન કરવા માટે કેવા સહિષ્ણુ બનવું જોઈએ તે ૨૨ પરીષહોનું દૃષ્ટાંત સહિત વિવરણ કરીને જણાવેલ છે.

'સહન કરે તે સાધુ' એ સૂત્ર ભગવાને બતાવ્યું છે તેને સાક્ષાત્ કરવા ભૂખ-તૃષા-અપમાન-ઠંડી-ગરમી આદિને સમતાપૂર્વક સહન કરવાં જોઈએ પણ દુઃખરૂપ ન માનવાં જોઈએ. જેથી સાધુની સાધુતાને પ્રગટ કરી શકાય.

**૩. ચતુરંગીય અધ્યયન : ગાથા-૨૦**

આ જીવ ચાર ગતિમાં ભ્રમણ કરે છે તેનાથી બચવા પહેલા પરીષહોને સહન કરીને કર્મક્ષય કરવાની વાત આગળ જણાવીને આ અધ્યયનનો પ્રારંભ કરતાં કહે છે કે,

> **"चत्तारि परमंगाणि दुल्लहाणीह जंतुणो ।**
> **माणुसत्तं सुई श्रद्धा संजमम्मि अ वीरियं"** ॥ [उत्त.३/गा.१]

પ્રાણીઓને મનુષ્યજન્મ, ધર્મનું શ્રવણ, ધર્મ પ્રત્યે શ્રદ્ધા અને ચારિત્રમાં વીર્ય ફોરવવાનું આ ચાર વસ્તુ દુર્લભ છે એમ પરમાત્માએ કહેલ છે.

તેમાં મનુષ્યભવની દુર્લભતા ઉપર ચોલ્લક વગેરે દશ દૃષ્ટાંતો અને શ્રદ્ધાથી ભ્રષ્ટ થયેલ આઠ નિહ્નવોની કથા આપી છે.

મનુષ્યજીવન પ્રાપ્ત થવું દુર્લભ છે તેનાથી દુર્લભ સર્વજ્ઞભગવંતોએ કહેલા તત્ત્વોનો શ્રવણ અવસર છે, તત્ત્વ પ્રત્યે શ્રદ્ધા થવી તે તેનાથી પણ દુર્લભ છે અને તેનાથી દુર્લભ સંયમ માટે પુરુષાર્થ છે.

આ ચાર વાતોની દુર્લભતા સમજીને કર્મક્ષય માટે પુરુષાર્થ કરીને આત્માને ચાર ગતિમાંથી મુક્ત કરી પંચમ ગતિ પ્રાપ્ત કરાવવાની છે.

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

### ૪. પ્રમાદ-અપ્રમાદ અધ્યયન : ગાથા-૧૩

"**अप्पाणुरक्खी व चरऽप्पमत्तो**" । [अ.४/गा.१० चरमपाद]

આત્માનું રક્ષણ કરનાર અપ્રમત્ત બની તું વિચર.

ક્રોધ-માન-માયા-લોભ-મોહ આદિને છોડી વિષયકષાયમાં આસક્ત ન થવું જેથી આપણો આત્મા દુર્ગતિગામી ન બને માટે સતત જાગ્રત-અપ્રમતપણે રહેવાનો ઉપદેશ આ અધ્યયનમાં આપેલ છે. સગા-વ્હાલા, ધન કે મિત્ર કોઈ રોગ-જરા-મૃત્યુથી બચાવવા માટે સમર્થ નથી માટે આત્માનું રક્ષણ કરનાર સંયમધર્મની અપ્રમતપણે આરાધના કરી કર્મનિર્જરા કરી કર્મક્ષય કરવાની ઉત્તમ પ્રેરણા આ અધ્યયનમાં કરી છે.

### ૫. અકામમરણ અધ્યયન : ગાથા-૩૨

આ અધ્યનમાં અકામમરણ અને સકામમરણનું વર્ણન છે. બાલજીવોનું મરણ તે અકામમરણ છે જે ક્રુરકર્મી, કામભોગમાં આસક્ત, અસત્યવાદી, પરલોકને નહિં માનનાર– 'આ ભવ મીઠાં તો પરભવ કોણે દીઠાં' એવી વિચારણાવાળા હોય છે એવા આત્મા મરીને નરક આદિ દુર્ગતિને પામે છે.

પંડિતજીવોનું મરણ તે સકામમરણ છે. ઇન્દ્રિયવિજેતા તથા ચારિત્રવાન જે આત્મા હોય તે પંડિતમરણને પામે છે. ત્રણ પ્રકારના સકામમરણ છે—ભક્તપરિજ્ઞા, ઇંગિની, અને પાદપોપગમન. આ ત્રણમાંથી કોઈ પણ એક મરણને પંડિત આત્માઓ પામે છે.

આમ અકામમરણ, સકામમરણ આદિ સત્તર પ્રકારના મરણોનું વર્ણન આ અધ્યયનમાં કરવામાં આવેલ છે.

### ૬. ક્ષુલ્લકનિર્ગ્રંથીય અધ્યયન : ગાથા-૧૮

"**समिक्खं पंडिए तम्हा पासजाईपहे बहू ।**
**अप्पणा सच्चमेसिज्जा, मित्तिं भूएसु कप्पए**" ॥ [उत्त.६/गा.२]

સમજુ આત્મા પુત્ર-પત્ની આદિના સંબંધોને મોહ બંધનના કારણ જાણીને પોતાના આત્માને સંયમમાં સ્થિર કરે અને જગતમાત્રના જીવો પ્રત્યે મૈત્રીભાવને ધારણ કરે.

હિંસા અદિ પાંચ આશ્રવોના ત્યાગપૂર્વક સંયમના ઉપકરણોનો આસક્તિ વિના ઉપભોગ કરવાનું તથા આહાર-વિહારની મર્યાદાનું પાલન કરવામાં અપ્રમત્તતા રાખવા વગેરેનું વર્ણન છે. આ અધ્યયનમાં સાધુ-સાધ્વીજી મહારાજના સંયમની મુખ્યતા હોવાથી 'ક્ષુલ્લકનિર્ગ્રન્થીય અધ્યયન' નામ આપવામાં આવેલું છે.

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**૭. ઔરભ્રીય અધ્યયન : ગાથા-૩૦**

આ અધ્યયનમાં રસગૃદ્ધિથી આવતા કષ્ટોનું પ્રત્યક્ષ દર્શન કરાવ્યું છે. જેવી રીતે ઘેટાને પૌષ્ટિક ખોરાક અપાય છે ત્યારે ઘેટો તે સરસ ખોરાકના કારણે ખુશ થાય છે હૃષ્ટપુષ્ટ બને છે પણ આ હૃષ્ટપુષ્ટ શરીર કેટલા દિવસ રહેશે ? તેનું પરિણામ શું આવશે તેનો તેને ખ્યાલ નથી પણ જ્યારે તે કપાય છે ત્યારે વેદનાથી તરફડે છે તેવી રીતે આ મોહાધીન જીવ વિષયોમાં (પાંચે ઈન્દ્રિયોના) આસક્ત બનીને શરીરની સારસંભાળ રાખી શરીરને હૃષ્ટપુષ્ટ બનાવે છે પણ તે વિષયોની આસક્તિ તેને નરક આદિ દુર્ગતિમાં લઈ જનારી છે ત્યાં મારું શું થશે ? તેનો ખ્યાલ-વિચાર આવતો નથી અને દુર્ગતિમાં વેદનાથી પીડાય છે, પરંતુ ડાહ્યો માણસ વિષયોમાં અનાસક્ત બનીને સદ્‌ગતિગામી બને છે.

આ અધ્યયનમાં અધર્મને અંગીકાર કરીને ધર્મનો ત્યાગ કરનારાને નરક, તિર્યંચ દુર્ગતિ પ્રાપ્ત થવાના કારણો અને ધર્મને અનુસરીને અધર્મનો ત્યાગ કરનારાને મનુષ્ય-દેવ આદિ સદ્‌ગતિ પ્રાપ્ત થવાના કારણો દર્શાવ્યા છે.

**૮. કાપિલીયાખ્યમધ્યયનમ્ : ગાથા-૨૦**

**"अधुवे असासयम्मि, संसारम्मि दुक्खपउराए ।**
**किं नाम होज्ज तं कम्मयं, जेणाहं दुग्गइ न गच्छेज्जा"** ॥ [उत्त.८/गा.१]

અસ્થિર, અનિત્ય, દુઃખથી ભરપૂર આ સંસારમાં હું શું કરું કે જેથી દુર્ગિતમાં ન જાઉં ?

આ શ્લોકના શબ્દો-ભાવો આપણા હૈયાને હચમચાવી નાખે છે આપણે શું કરવું જોઈએ જેથી દુર્ગતિ દૂર રહે, નજીક ન આવે. આ અધ્યયનમાં કપિલ કેવલીએ પોતાની આત્મકથા દ્વારા ચોરોને પણ અધર્મમાંથી અટકાવી લોભ કેટલો ભયંકર છે તેનું માર્મિક વર્ણન કરેલ છે.

**૯. નમિપ્રવ્રજ્યા અધ્યયન : ગાથા-૬૨**

એકત્વભાવનાથી વૈરાગી બનનારા નમિરાજર્ષિના વૈરાગ્યની પરીક્ષા કરવા માટે બ્રાહ્મણના રૂપે આવેલા ઈન્દ્ર મહારાજાએ આવીને જે પ્રશ્નો પૂછ્યા અને તેના નમિ રાજર્ષિએ જે જવાબો આપ્યા છે તેનું વર્ણન આ અધ્યયનમાં છે.

રાગ-દ્વેષનો ત્યાગ, ધર્મની સ્થિરતા અને સંયમ પ્રત્યેની દઢતા માટેનો ઉપદેશ સૌને ઉપકારી બને તેમ છે. નમિ, કરકંડુ, દ્વિમુખ અને નગ્ગતિ આ ચાર પ્રત્યેકબુદ્ધના સંક્ષિપ્ત જીવનદર્શન કરાવ્યા છે.

**૧૦. દ્રુમપત્રક અધ્યયન : ગાથા-૩૭**

શરીરની નશ્વરતા અને આયુષ્યની ક્ષણભંગુરતા બતાવીને પરમકૃપાળુ પરમાત્માએ

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

પરમવિનયી ગૌતમસ્વામીમહારાજાને દરેક પદાર્થ સમજાવતાં સમજાવતાં–'**समयं गोयम ! मा पमायए**' ।

હે ગૌતમ ! એક સમય પણ પ્રમાદ ન કરીશ એમ વારંવાર કહેલ છે.

અહીં પ્રમાદ એટલે નિદ્રા એટલું જ નહિ પણ જે ઇન્દ્રિયો આદિ મળેલ છે તેને ધર્મ આરાધનામાં ન વાળતાં વિષયસુખોમાં આસક્ત કરવી તે પણ પ્રમાદરૂપે કહેલ છે.

પીપળાના પાનના દૃષ્ટાંત દ્વારા શરીર-ઋદ્ધિ-સમૃદ્ધિ પ્રત્યે આસક્ત બનવા જેવું નથી તે બતાવ્યું છે એટલે પ્રારંભમાં વૃક્ષના પાંદડા દ્વારા ઉપદેશ આપેલ હોવાથી 'દ્રુમપત્ર અધ્યયન' નામ આપ્યું છે.

**૧૧. બહુશ્રુતપૂજા અધ્યયન : ગાથા-૩૨**

ઉપદેશ વિવેકીને આપી શકાય છે અને વિવેક બહુશ્રુતની સેવાથી પ્રાપ્ત થાય છે.

બહુશ્રુતનું કારણ વિનય અને અબહુશ્રુતનું કારણ અવિનય છે. આ વિનય અને અવિનય કેવી રીતે મળે તેના કારણો બતાવીને બહુશ્રુતના આઠ લક્ષણ અને અબહુશ્રુતના ચૌદ લક્ષણ તથા બહુશ્રુતની ૧૫ ઉપમાઓની સુંદર પ્રરૂપણા કરવામાં આવી છે.

આવા બહુશ્રુતોની પૂજા-વિનય-ભક્તિ કરતાં કરતાં આપણામાં પણ વિવેકરૂપી જ્ઞાનદીપક પ્રગટે છે.

**૧૨. તપઃસમૃદ્ધિ (હરિકેશીય) અધ્યયન : ગાથા-૪૭**

**"હરિકેશી મુનિ રાજીયો, ઉપન્યો કુલ ચંડાલ,**
**પણ નિત્ય સુર સેવા કરે, ચારિત્રગુણ અસરાલ."**

આ અધ્યયનમાં હરિકેશી મુનિના ચારિત્રનું વર્ણન કરેલ છે. તે ચંડાલ કુળમાં જન્મવા છતાં ઉત્તમ ગુણધારી મહાત્મા હતા. એક વખત બ્રાહ્મણોના મહોલ્લામાં ચાલતા યજ્ઞમાં પહોંચી ગયા. ત્યારે બ્રાહ્મણોએ તેમની ખૂબ કદર્થના કરી, માર્યા છતાં મહાત્મા ખૂબ જ સમભાવમાં રહ્યા ત્યારે બ્રાહ્મણ પત્નીએ બધાને અટકાવ્યા અને મુનિને ભાવયજ્ઞનું સ્વરૂપ પૂછ્યું ત્યારે હરિકેશી મુનિએ બ્રહ્મચર્ય, તપ અને પાંચ મહાવ્રતોનું સ્વરૂપ સમજાવ્યું અને બધાને બોધ પમાડીને સમ્યગ્ ધર્મમાર્ગમાં જોડ્યા. આમ આ અધ્યનન ખૂબ જ રોચક અને બોધક છે.

**૧૩. ચિત્રસંભૂતીય અધ્યયન : ગાથા-૩૫**

આ અધ્યયનમાં પરસ્પર એકબીજાને સુકૃત અને દુષ્કૃતથી ઉત્પન્ન થતા સુખ અને દુઃખના વિપાકને બતાવતો ચિત્ર અને સંભૂતિ મુનિના ઉત્થાન અને પતનનો પ્રસંગ

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

બતાવવામાં આવ્યો છે. ઉપરની કક્ષામાં પહોંચી ઊંચા સ્થાનમાં રહેલા મહાત્મા સંભૂતિ મુનિના જીવને એક ખરાબ નિમિત્તથી કેવું ભયંકર પરિણામ આવે છે તે બતાવેલ છે.

વંદન માટે આવેલી ચક્રવર્તીની સ્ત્રીના વાળની લટ મહાત્માનાં ચરણને સ્પર્શી અને આખા શરીરમાં ઝણઝણાટી ઉત્પન્ન થઈ અને બસ ત્યાં જ ચારિત્રની પવિત્ર મનોધારા તૂટી—ચારિત્રના પરિણામ તૂટ્યા અને સ્પર્શના વિષયમાં લુબ્ધ બનેલા તે મહાત્માએ રત્નચિંતામણિ સમાન આ ભવમાં કરેલી તપસંયમની સાધનાને કાચના કકડા સમાન ભોગ સુખનાં નિયાણામાં વેંચી સંયમરૂપી અમૂલ્ય રત્ન વેડફી નાખ્યું, મનમાં નિયાણું કર્યું કે ''આ તપ-સંયમના પ્રભાવે આવતા ભવમાં હું ચક્રવર્તી બનું, ઘણી સ્ત્રીઓનો સ્વામી બનું.'' અને તેનાં ફળરૂપે ચક્રવર્તી બન્યા. વિષયોની આસક્તિમાં લુબ્ધ બન્યા અને નિયાણાથી મળેલ આ ચક્રવર્તીપણાનું સુખ તેમના માટે દુર્ગતિદાયક બન્યું. ભાઈ મુનિએ ઘણું સમજાવ્યા છતાં નિકાચિત કર્મના કારણે સમજતા નથી અને ભવભ્રમણ વધારનારા બન્યા તેનું સચોટ દર્શન કરાવેલ છે.

### ૧૪. ઈષુકારીય અધ્યયન : ગાથા-૫૩

નલિનીગુલ્મનામના વિમાનમાંથી ચ્યવીને આવેલા બે જીવો ભૃગુપુરોહિતના બે પુત્રો તરીકે જન્મ્યા છે અને તેઓ જન્મ, જરા અને મરણના ભયથી પીડા પામીને, વિષયો મોક્ષપ્રાપ્તિમાં વિઘ્નભૂત છે એમ જાણીને, વૈરાગ્યની ભાવનાવાળા બનીને, જ્યારે દીક્ષા માટે માતાપિતાની પાસે રજા માંગે છે તે વખતે માતા-પિતા અને બંને પુત્રોનો સંવાદ, પતિ-પત્નીનો સંવાદ, રાજા-રાણીનો સંવાદ થયો છે, તે આપણને પણ સંપૂર્ણ વૈરાગ્યથી વાસિત બનાવી દે એવો જબ્બર સંવાદ છે અને જે મોહમાં મુંઝાયેલા આત્મા છે તેમના મોહનીયનો ક્ષયોપશમ કરાવે તેવો છે. આ છ એ પુણ્યાત્માઓ સંયમગ્રહણ કરીને અનુક્રમે મોક્ષમાં જાય છે.

### ૧૫. સભિક્ષુ અધ્યયન : ગાથા-૧૬

આ અધ્યયનમાં સાધુ-સાધ્વીજી ભગવંતોએ કેવી રીતે સંયમજીવન જીવવું તે આચારો ખૂબ જ માર્મિક રીતે જણાવેલ છે.

સાધુ કેવા હોય ? તેમની જીવનચર્યા કેવી હોય ?

જે સાધુ રાગદ્વેષ વગરના બની, આક્રોશ વગેરે ઉપસર્ગોને સહન કરતા, કોઈપણ વસ્તુ પ્રત્યે આસક્તિ રાખ્યા વિના-ગોચરી-શય્યા-આસન વગેરેનો ઉપયોગ કરતા, શીતોષ્ણ આદિ પરીષહોને સહન કરી નિરતિચાર ચારિત્રનું પાલન કરી, પ્રશંસાને ન ઇચ્છનારા, અભિમાનથી રહિત, વિષયકષાય આદિથી કમલવત્ અલિપ્ત, વિદ્યામંત્ર આદિથી આજીવિકા મેળવવાની ઇચ્છા વિનાના, ગૃહસ્થોના સંગથી રહિત, 'ભિક્ષા મળે તો

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

સંયમવૃદ્ધિ અને ન મળે તો તપોવૃદ્ધિ' એવું ચિંતવનારા-દર્શન-જ્ઞાન-ચારિત્રની સાધનામાં લીન બની બાહ્ય અને અભ્યંતર સર્વ પરિગ્રહથી રહિત અલ્પકષાયવાળા હોય છે તે સાધુ ભિક્ષુ કહેવાય છે.

આ સાધુતાનો આદર્શ વર્તમાનમાં અત્યંત જરૂરી છે માટે આ અધ્યયનના પદાર્થોનો દરરોજ સ્વાધ્યાય કરવા જેવો છે અર્થાત્ સ્વાધ્યાય કરવો જરૂરી છે.

**૧૬. બ્રહ્મચર્યગુપ્તિ અધ્યયન : સૂત્ર-૧૦ ગાથા-૧૭**

બ્રહ્મચર્ય એ સાધુતાનો પ્રાણ છે. બ્રહ્મચર્યથી આશ્રવનો નિરોધ, સંવરનું ગ્રહણ, મન-વચન-કાયાની ગુપ્તિનું પાલન, અપ્રમત્તતા, ઈન્દ્રિયવિજેતા, સમાધિપ્રાપ્તિ આદિ ગુણો પ્રગટે છે.

આ અધ્યયનમાં બ્રહ્મચર્યની સમાધિના દશ સ્થાનો બતાવ્યા છે.

૧. સ્ત્રી, પશુ અને નપુંસક રહિત સ્થાનમાં રહેવું.

૨. એકલી સ્ત્રીઓની પાસે કથા વાતો કરવી નહિ અથવા સ્ત્રી સંબંધી કથા કહેવી નહિ.

૩. સ્ત્રી સાથે એક આસને બેસવું નહી.

૪. સ્ત્રીના અંગોપાંગને ધારી ધારીને જોવા નહી.

૫. ભીંતના આંતરે રહીને ગુપ્તવાતો સાંભળવી નહી.

૬. પૂર્વક્રીડાને યાદ કરવી નહી.

૭. માદક-અતિવિગઈવાળો આહાર કરવો નહી.

૮. અતિમાત્રાએ (અધિક પ્રમાણ) આહાર કરવો નહી.

૯. શરીરની વિભૂષા કરવી નહી.

૧૦. શબ્દાદિ વિષયોમાં અનુરાગવાળા બનવું નહી.

આ દશ સ્થાનોનું વિસ્તારથી વર્ણન કરીને બ્રહ્મચર્યમાં દઢતા કેળવવાનો સુંદર ઉપદેશ આ અધ્યયનમાં આપેલ છે.

**૧૭. પાપશ્રમણીય અધ્યયન : ગાથા-૨૧**

જે સાધુ પાપસ્થાનકોનું પાલન કરે છે તે પાપશ્રમણ કહેવાય છે. જે સાધુ ઝગડો કરે, દશ પ્રકારના યતિધર્મનું પાલન ન કરે, નિદ્રા કરવામાં રક્ત રહે, વડીલો-આચાર્ય આદિની વૈયાવચ્ચ ન કરે, એકેન્દ્રિય આદિ જીવોની વિરાધનામાં પ્રવર્તે, યથાવિધિ પડિલેહણ આદિ ક્રિયા ન કરે તથા ઈર્યાસમિતિનું પાલન ન કરે, ક્રોધ આદિ કષાયોનો ત્યાગ ન કરે, ગુરુના

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

દોષો જુએ, ગુરુની સામું બોલે, જ્ઞાન ન હોવા છતાં કુતીર્થિકો સાથે વાદ-વિવાદમાં પ્રવર્તે, કારણ વિના ઘી-દૂધ વગેરે વિગઈનું વારંવાર સેવન કરે, વ્રત-પચ્ચક્ખાણ ન કરે, પરદર્શનીયો સાથે સંબંધ વધારે, રાગી-શ્રાવકોના ઘરની ગોચરી લાવે તે સાધુને કુશીલ-પાસત્થા જેવા કહ્યા છે. તે વેષધારી સાધુ છે અને વેષની નિંદા કરાવે છે.

આવા સાધુઓને પાપશ્રમણ કહ્યા છે તે સર્વ હકીકત આ અધ્યયનમાં આવતી હોવાથી તેનું પાપશ્રમણીય નામ રાખેલ છે.

**૧૮. સંયતીય અધ્યયન : ગાથા-૫૪**

સંજય નામના રાજા શિકાર માટે ગયા. ત્યાં મૃગોને હણતા હતા ત્યારે કેસર નામના ઉદ્યાનમાં સ્વાધ્યાય-ધ્યાનમાં તત્પર થયેલા મહાત્માને જોયા. અશ્વ પરથી નીચે ઊતરીને વિનય વડે મુનિને વંદન કરી કહ્યું કે હે ભગવન્ ! આ મૃગના વધની મને ક્ષમા કરો. મુનિ મૌન રહ્યા, તેથી રાજા અત્યંત ભયભીત થયો. કેમકે મુનિની તેજોલેશ્યાનો તેને ભય હતો તેથી રાજાએ ફરી મુનિને બોલવા માટે કહ્યું. ત્યારે ધ્યાનથી નિવૃત્ત થઈને મુનિએ કોમળ વચનોથી સંસારની અસારતા—અનિત્યતા, આયુષ્યની વીજળીના ચમકારા જેવી ચંચળતા, ધન-પુત્રાદિની અશરણતા અને વિષ જેવા ભયંકર ભોગના પરિણામો સંબંધી ઉપદેશ આપ્યો. દેશના સાંભળી વૈરાગ્યવાસિત બનીને સંજય રાજાએ ગર્દભાલિ નામના મુનિ પાસે દીક્ષા ગ્રહણ કરી.

ગીતાર્થ બની એકાકી વિહાર કરતા હતા તે દરમ્યાન બીજા રાજર્ષિનો ભેટો થયો અને તે બંને રાજર્ષિની તાત્ત્વિક ચર્ચા થઈ તે ખરેખર ખાસ વાંચવા જેવી છે.

વિશાલ રાજ્યોના ત્યાગ કરનારા અને સંયમ ધર્મને સ્વીકારનારા રાજા—ચક્રવર્તીઓના દૃષ્ટાંતોનું વર્ણન આ અધ્યયનમાં કરવામાં આવેલ છે. આ રીતે આ અધ્યયન ખૂબ જ મનનીય-ચિંતનીય છે.

**૧૯. મૃગાપુત્રીય અધ્યયન : ગાથા-૯૯**

આ અધ્યયનમાં ધન દુઃખને વધારનારું છે અને મમત્વનું બંધન કરાવનારું છે એમ જણાવી મોક્ષને પ્રાપ્ત કરાવનાર દર્શન-જ્ઞાન-ચારિત્રરૂપી ધનને ગ્રહણ કરવાનું મૃગાપુત્રના દૃષ્ટાંત દ્વારા જણાવેલ છે.

સુગ્રીવ નગરના બળભદ્ર રાજાની મૃગારાણીની કુક્ષીએ જન્મેલ બળશ્રી નામનો રાજપુત્ર લોકમાં મૃગાપુત્ર નામે પ્રસિદ્ધ થયો. ભરયુવાનીમાં રાજમહેલના ઝરૂખામાં બેઠેલા રાજકુમારને રાજમાર્ગ ઉપરથી પસાર થતાં જૈન મુનિને જોતાં જ આવું પૂર્વે ક્યાંય જોયું છે

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

એમ વિચારતાં જાતિસ્મરણ જ્ઞાન થયું. અને પૂર્વજન્મમાં લીધેલું સંયમ યાદ આવ્યું, તેથી વૈષયિક સુખોથી વિરક્ત બનેલા મૃગાપુત્રે માતા પિતા પાસે સંયમ માટે રજા માગી.

**''इमं सरीरं अणिच्चं असुई असुइभवे ।**
**असासयावासमिणं दुक्खकेसाण भायणं''** ॥ [अ.१९/गा.१३]

હે માતા પિતા ! આ શરીર અનિત્ય છે. અપવિત્ર એવા શુક્ર અને શોણિતથી ઉત્પન્ન થનારું છે. આ શરીરમાં જીવનો નિવાસ પણ અનિત્ય છે. આ શરીર જન્મ-જરા-મૃત્યુ-જ્વરાદિ રોગોનું સ્થાન તેમ જ ધન-હાનિ, સ્વજન વિયોગ આદિ ક્લેશોનું સ્થાન છે.

આવી અનેક ચોટદાર દલીલો અને સામે માતા-પિતાનો જવાબ આ બંનેના સંવાદના પ્રસંગો વૈરાગ્ય માટે ઉપયોગી છે.

માતાપિતા પુત્રને સંયમ માટે રજા આપે છે અને તે સંયમ ગ્રહણ કરીને કેવું ઉત્કૃષ્ટ સાધુજીવનનું પાલન કરે છે તેનું વર્ણન વાંચીને જીવનને દૃઢ બનાવવાની જરૂર છે.

**''एवं करंति संबुद्धा, पंडिया पवियक्खणा ।**
**विणिवट्टंति भोगेसु, मिआपुत्ते जहा मिसी''** ॥ [अ.१९/गा.९७]

આ રીતે મૃગાપુત્ર મહાત્માનું ઉદાહરણ લઈને બુદ્ધિશાળી પંડિત વિચક્ષણ ઉત્તમ આત્માઓ ધર્મની સત્પ્રવૃત્તિ કરે છે અને ભોગથી પાછાં વળે છે.

આ પ્રથમભાગમાં ઓગણીસ અધ્યયનનું ભાષાંતર હોવાથી ૧૯ અધ્યયનનો ટૂંક સાર આપ્યો છે. બાકી તો આ આગમ ગ્રંથ આત્મસાધનામાં, આત્મદર્શનમાં આગળ વધવા માટે આત્માને અત્યંત ઉપકારક ગ્રંથ છે.

**'દીપિકા'** ટીકામાં આવતા પદાર્થોના (૧થી ૩૬ અધ્યાયોનો) વિસ્તૃતવિષય દિગ્દર્શન આ પ્રથમવિભાગમાં આપવામાં આવેલ હોવાથી આ **'દીપિકા'** ટીકાના પદાર્થોની જાણકારી વાચકવર્ગને સારી રીતે થઈ શકે તેમ છે.

**ઉપકારસ્મૃતિ :–**

પરમપૂજ્ય, વ્યાખ્યાનવાચસ્પતિ **શ્રીરામચંદ્રસૂરીશ્વરજી**મહારાજના શિષ્યરત્ન અધ્યાત્મયોગી પરમપૂજ્ય પંન્યાસપ્રવર **શ્રીભદ્રંકરવિજયજી**મહારાજના શિષ્યરત્ન પરમપૂજ્ય હાલારના હીરલા આચાર્યભગવંત **શ્રીકુંદકુંદસૂરીશ્વરજી**મહારાજના શિષ્યરત્ન પરમપૂજ્ય પંન્યાસપ્રવર **શ્રીવજ્રસેનવિજયજી**મહારાજની પ્રેરણાથી પરમપૂજ્ય આચાર્યભગવંત **જયકીર્તિસૂરીશ્વરજી**મહારાજરચિત આ **'દીપિકા'** ટીકાના નવીનસંસ્કરણ સંપાદન કરવાનું સદ્ભાગ્ય મને સાંપડ્યું તે મારું પરમસદ્ભાગ્ય સમજુ છું અને તે બદલ ઉપકારી પૂ.પંન્યાસજીમહારાજની ખૂબ ખૂબ ઋણી છું. તેમ આ ગ્રંથ પ્રકાશિત કરવા માટે તેઓશ્રીના

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

ગુરુભ્રાતા વર્ધમાનતપોનિધિ પરમપૂજ્ય ગણિવર્યશ્રી **નયભદ્રવિજયમહારાજે** **ડીસા** જૈન શ્વે.મૂ.સંઘને શુભપ્રેરણા કરી અને તેઓશ્રીની શુભપ્રેરણાને ઝીલીને **ડીસા** જૈન શ્વે.મૂ.સંઘે જ્ઞાનદ્રવ્યમાંથી આ ગ્રંથપ્રકાશનનો સંપૂર્ણ લાભ લીધેલ છે અને આવો ઉત્તમ આગમગ્રંથ પ્રકાશિત થયેલ છે તે બદલ તેમની પણ ખૂબ ખૂબ ઋણી છું. જેટલો સમય આ ગ્રંથના પ્રૂફ વાચન આદિ સંપાદન કાર્યમાં મારો પસાર થયો તે દરમ્યાન અતિનિર્મળ અધ્યવસાયોની ધારામાં લીન થવાનું બન્યું છે. નાદુરસ્ત રહેતી તબીયતમાં પણ સ્વ સ્વાધ્યાયના અંગરૂપ શ્રુતોપાસનારૂપે આ ગ્રંથના સંપાદનકાર્યમાં શક્ય શુદ્ધિકરણ કરવા માટે પૂરતી કાળજી લીધી છે. આમ છતાં દૃષ્ટિદોષથી કે અનાભોગાદિથી ક્ષતિઓ રહી હોય તે વિદ્વવજ્જનો સુધારીને વાંચે એવી ખાસ ભલામણ કરું છું.

પરિશિષ્ટો જે તૈયાર કર્યા છે તે કમ્પ્યુટર પદ્ધતિથી કર્યા છે, તેથી તેમાં ક્રમ અંગે આઘું-પાછું જણાય તો તે મુજબ સુધારીને વાંચવા ખાસ સૂચન કરું છું.

પ્રાંતે અંતરની એક જ ભાવના છે કે, આ આગમગ્રંથના ચિંતન, મનન અને નિદિધ્યાસન દ્વારા રત્નત્રયીને આરાધી સાધી આત્માનું મૂળસ્વરૂપ અસંગભાવમાં રહેવાનું છે એ અસંગદશાને પ્રાપ્ત કરી, અપૂર્વકરણ, અનિવૃત્તિકરણ, પ્રાતિભજ્ઞાનની પ્રાપ્તિ, ક્ષપકશ્રેણિ આરોહણ દ્વારા વીતરાગસ્વરૂપને પામી યોગનિરોધ, શૈલેશીકરણ દ્વારા સર્વકર્મ વિનિર્મુક્ત બની આત્માના શુદ્ધ ચૈતન્યસ્વરૂપને-સિદ્ધસ્વરૂપને પ્રાપ્ત કરી અનંતકાળ સુધી નિજ શાશ્વતત સુખના ભોક્તા હું અને સૌ કોઈ લઘુકર્મી ભવ્યજીવો બનીએ એ જ અંતરની શુભકામના....!!

ગ્રંથ સંપાદન—સંશોધનકાર્યમાં અનાભોગથી કે દૃષ્ટિદોષથી જે કોઈ સ્ખલના રહેવા પામી હોય તો તે બદલ ત્રિવિધે ત્રિવિધે મિચ્છા મિ દુક્કડં માંગું છું.

**शिवमस्तु सर्वजगतः**

**– સા. ચંદનબાલાશ્રી**

**એફ-૨ જેઠાભાઈ પાર્ક,**
**નારાયણનગર રોડ,**
**પાલડી, અમદાવાદ-૭**
**આસો સુદ-૧૫, વિ.સં. ૨૦૬૫,**
**રવિવાર, તા. ૪-૧૦-૨૦૦૯.**

●●●

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

# १-३६ अध्यायानां विषयदिग्दर्शनम् ॥


| विषयः | अ. गा. |
|---|---|
| **प्रथमं विनयश्रुतमध्ययनम् ॥** | |
| उत्तराध्ययनशब्दार्थः | १/प्रारम्भे |
| उत्तराध्ययनश्रुतस्कन्धस्य व्याख्या | १/प्रारम्भे |
| विनीतगुणैरेव विनयस्वरूपम् | १/२ |
| अविनयज्ञप्तौ अविनीतस्वरूपम् | १/३ |
| कुलवालकश्रमणकथा | १/३ |
| दृष्टान्तेनऽविनीतदोषाः | १/४-६ |
| विनीतस्वरूपम् | १/७-८ |
| शिक्षणविधिः | १/९ |
| क्रियाविनयः | १/१०-११ |
| ज्येष्ठविनयः | १/१२-१३ |
| चण्डरूद्राचार्यशिष्यदृष्टान्तः | १/१३ |
| गुरुचित्तानुवृत्तियुक्तिः | १/१४ |
| क्रोधाऽसत्यत्वकृतौ दृष्टान्तः | १/१४ |
| आत्मदमने फलम् | १/१५ |
| आत्मदमनं श्रेष्ठः | १/१६ |
| सेचनकदृष्टान्तः | १/१६ |
| गुर्वनुवृत्तिविनयः | १/१७ |
| शुश्रूषणाविनयः | १/१८-१९ |
| प्रतिश्रवणाविधिः | १/२०-२१ |
| पृच्छाविनयस्वरूपम् | १/२२ |
| गुरुविनयः | १/२३ |
| शिष्यस्य वाग्विनयः | १/२४-२५ |
| उपाधिदोषाः | १/२६ |
| स्खलितेषु शिष्यविधिः | १/२७ |
| प्राज्ञाप्राज्ञस्वरूपम् | १/२८-२९ |
| स्थितिविनयः | १/३० |
| भिक्षाविधिः | १/३२-३६ |
| पण्डितबालयोः शिक्षा | १/३७ |
| बालाशयः | १/३८ |
| विनीताशयः | १/३९ |
| विनयतत्त्वम् | १/४०-४१ |
| युगप्रधानोपघातिकुशिष्यदृष्टान्तः | १/४० |
| विनयगुणः | १/४२-४३ |
| सुविनीतलक्षणः | १/४४ |
| विनयश्रुताध्ययननिगमनम् | १/४५ |
| विनयफलम् | १/४६ |
| श्रुतप्राप्तौ ऐहिकामुष्मिकफले | १/४७-४८ |
| **द्वितीयं परीषहाध्ययनम् ॥** | |
| द्वाविंशतिपरीषहनामानि | २/प्रारम्भे |
| परीषहाणां प्रविभक्तिः | २/१ |
| क्षुत्परीषहस्वरूपम् | २/२-३ |
| क्षुत्परीषहे हस्तिमित्रकथा | २/३ |
| तृट्परीषहस्वरूपम् | २/४-५ |
| तृट्परीषहे धनशर्मक्षुल्लकथा | २/५ |
| शीतपरीषहस्वरूपम् | २/६-७ |
| शीते उदाहरणम् | २/७ |
| उष्णपरीषहस्वरूपम् | २/८-९ |
| उष्णे अर्हन्नकमुनिकथा | २/९ |


Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

दंशपरीषहस्वरूपम् २/१०-११
दंशमशके श्रमणभद्रमुनिकथा २/११
अचेलपरीषहस्वरूपम् २/१२-१३
अचेलपरीषहे सोमदेवर्षिकथा २/१३
अरतिपरीषहस्वरूपम् २/१४-१५
अरतिपरीषहे अर्हद्दत्तकथा २/१५
स्त्रीपरीषहस्वरूपम् २/१६-१७
स्त्रीपरीषहसहने स्थूलभद्रकथा २/१७
चर्यापरीषहस्वरूपम् २/१८-१९
चर्यापरीषहे सङ्गमाचार्यदृष्टान्तः २/१९
नैषेधिकीपरीषहस्वरूपम् २/२०-२१
नैषेधिकीपरीषहे कुरुदत्तसुतदृष्टान्तः २/२१
शय्यापरीषहस्वरूपम् २/२२-२३
शय्यापरीषहे सोमदत्त-सोमदेवसाधुदृष्टान्तः २/२३
आक्रोशपरीषहस्वरूपम् २/२४-२५
बालैः सादृश्ये क्षपककथा २/२४
आक्रोशपरीषहेऽर्जुनमालाकारदृष्टान्तः २/२५
वधपरीषहस्वरूपम् २/२६-२७
वधपरीषहे स्कन्धकशिष्यदृष्टान्तः २/२७
याञ्चापरीषहस्वरूपम् २/२८-२९
याञ्चापरीषहे बलभद्रदृष्टान्तः २/२९
अलाभपरीषहस्वरूपम् २/३०-३१
अद्यैवाहं न लभामीति पादे
लौकिकमुदाहरणम् २/३१
अलाभपरीषहे ढण्ढणसुतदृष्टान्तः २/३१
रोगपरीषहस्वरूपम् २/३२-३३
रोगपरीषहे कालवैशिकमुनिदृष्टान्तः २/३३
तृणस्पर्शपरीषहस्वरूपम् २/३४-३५
तृणस्पर्शपरीषहे भद्रर्षिदृष्टान्तः २/३५
मलपरीषहस्वरूपम् २/३६-३७
मलस्याऽपरीषहे इभ्युसुतर्षिदृष्टान्तः २/३७
सत्कारपुरस्कारपरीषहस्वरूपम् २/३८-३९
असत्कारपरीषहस्याऽसहने
सहने च श्राद्ध-साधुदृष्टान्तः २/३९
प्रज्ञापरीषहस्वरूपम् २/४०-४१
प्रज्ञापरीषहे सागरचन्द्रसूरिदृष्टान्तः २/४१
अज्ञानपरीषहस्वरूपम् २/४२-४३
अज्ञानपरीषहेऽशकटापितृसाधुदृष्टान्तः २/४३
ज्ञानपरीषहाऽसहने स्थूलभद्रदृष्टान्तः २/४३
दर्शनपरीषहस्वरूपम् २/४४-४५
दर्शनपरीषहे आषाढसूरिकथा २/४५
द्वितीयाध्ययनार्थोपसंहारः २/४६

तृतीयं चतुरङ्गीयामध्ययनम् ॥

चत्वारि मोक्षस्य परमाङ्गानि दुर्लभानि ३/१
चतुर्भिरङ्गै त्रयोदशभावाः सङ्गृहीताः ३/१
मानुष्यभवदुर्लभतायां दशदृष्टान्तसूचनम्-
चोल्लकदृष्टान्तः [ १ ] ३/१
पाशकदृष्टान्तः [ २ ] ३/१
धान्यदृष्टान्तः [ ३ ] ३/१
द्यूतदृष्टान्तः [ ४ ] ३/१
रत्नदृष्टान्तः [ ५ ] ३/१
स्वप्नदृष्टान्तः [ ६ ] ३/१
चक्रदृष्टान्तः [ ७ ] ३/१
चर्मदृष्टान्तः [ ८ ] ३/१
युगदृष्टान्तः [ ९ ] ३/१
परमाणुदृष्टान्तः [ १० ] ३/१
लब्धेऽपि नृत्वे सिद्धान्तश्रवणे विघ्नाः ३/१
श्रद्धादुर्लभतायां निह्नवक्तव्यता ३/१
जमालिप्रभवाः बहुरता निह्नवाः ३/१
तिष्यगुप्तादुत्पन्नाः जीवप्रदेशाः ३/१
आषाढाज्जाताः अव्यक्ताः ३/१
अश्वमित्राज्जाताः सामुच्छेदाः ३/१
गङ्गसूरेरुत्पन्नाः द्वे क्रिये ३/१
षडुलूकादुत्पन्नाः त्रिराशिवादिनः ३/१
गोष्ठामाहिलादुत्पन्ना अबद्धिकाः ३/१
मानुष्यदुर्लभता ३/२-६


Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

नृत्वाप्तिः ३/७
नृत्वेऽपि श्रुतिदुर्लभता ३/८
श्रुत्याप्त्यामपि श्रद्धादुर्लभा ३/९
संयमवीर्यदुर्लभत्वम् ३/१०
चतुरङ्गफलम् ३/११
चतुरङ्गैहिकफलम् ३/१२
अत्र परत्र च फलायोपदेशः ३/१३
परेषां देहसुखसम्पदे ३/१४-१५
दशभोगाङ्गप्राप्तिः ३/१६-१८
चतुरङ्गी दुर्लभां मत्वा संयमं प्रतिपद्य तपसा धूतकर्मांशः सिद्धो भवति ३/१९-२०

**चतुर्थप्रमादऽप्रमादाख्यध्ययनम् ॥**

असंस्कृतं जीवितं, जरोपनीतस्य नास्ति त्राणम् ४/१
अट्टनो दृष्टान्तः ४/१
किं तव विवेकिनोऽपि प्रमादः ? इति गुरूपदेशः ४/२
मृत्वपायसूचको दृष्टान्तः ४/२
कर्मणामवन्ध्यता ४/३
चौरदृष्टान्तः ४/३
प्रेमत्यागाद्धर्मे एवाऽवहितेन भाव्यम् ४/४
आभीरीव्यञ्चकवणिग्दृष्टान्तः ४/४
वित्तेन त्राणं न लभते इह परत्र प्रमत्तः ४/५
पुरोधपुत्रदृष्टान्तः ४/५
धनाऽसारतां ज्ञात्वा प्रतिबुद्धजीवी स्यात् ४/६
द्रव्यसुप्तेषु प्रतिबुद्धजीवी अगडदत्तदृष्टान्तः ४/६
भारण्डपक्षीवाऽप्रमतश्चर ४/७
मण्डिकचौरदृष्टान्तः ४/७
छन्दःनिरोधेन उपैति मोक्षम् ४/८
अश्वदृष्टान्तः ४/८
आदितोऽपि न प्रमाद्यम् ४/९
प्रागिव पश्चादप्रमत्तता न स्यात् ४/१०
ब्राह्मणीदृष्टान्तः ४/१०
प्रमादत्यागाऽत्यागयोरैहिकदृष्टान्तः ४/१०
प्रमादमूलं रागद्वेषाविति सोपायः तत्त्यागोचितः ४/११-१२
सम्यक्त्वशुद्धिः ४/१३

**पञ्चममकाममरणीयाध्ययनम् ॥**

द्रव्यमरण-भावमरणस्वरूपम् ५/प्रारम्भे
भावमरणप्रकाराः- ५/प्रारम्भे
ओघमरणम्
भवमरणम्
तद्भवमरणम्
सप्तदशमरणानि ५/प्रारम्भे
अकाममरण-सकाममरणे ५/१-२
केषामिदं कियद्वारम् ? ५/३
अकाममरणस्थानस्वरूपम् ५/४-१७
सकाममरणस्थानस्वरूपम् ५/१८-१९
भिक्षुगृह्याद्यन्तरम् ५/२०
पसङ्गतो बालपण्डितमरणम् ५/२१-२४
पण्डितमरणम् ५/२५-२९
शिष्योपदेशः ५/३०
प्रसन्नस्य कृत्यः ५/३१
निगमनम् ५/३२

**षष्ठं क्षुल्लकनिर्ग्रन्थीयमध्ययनम् ॥**

पञ्च निर्ग्रन्थाः ६/प्रारम्भे
पञ्चनिर्ग्रन्थानां स्वरूपम् ६/प्रारम्भे
अज्ञानिनां पण्डितमरणाऽभावः ६/१
ग्राम्यदृष्टान्तः ६/१
ज्ञानिनां कृत्यम् ६/२-४
ज्ञानिकृत्यफलम् ६/५
कर्मभिः पच्यमानस्य धनादि दुःखाद्विमोचने नालम् ६/६
हिंसाश्रवनिरोधः ६/७
शेषाश्रवनिरोधः ६/८
मुक्तिमार्गविचारे कपिलादिप्ररूपणा ६/९-१०

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

| | |
|---|---|
| पण्डितमानिनः बालस्य स्वरूपम् | ६/११ |
| मुक्तिपथद्वेषिणां दोषाः | ६/१२ |
| उपदेशसारः | ६/१३ |
| अप्रमत्तमार्गः | ६/१४ |
| देहपालनेऽपि निस्सङ्गताविधिः | ६/१५ |
| भुक्तशेषं न स्थाप्यम् | ६/१६ |
| अप्रमत्तः सन् भिक्षां गवेषयत् | ६/१७ |
| अध्ययनार्थवक्ता | ६/१८ |
| **सप्तममौरभ्रीयमध्ययनम् ॥** | |
| भोगिकष्टज्ञप्त्यै उरभ्रदृष्टान्तः | ७/१-७ |
| विषयिणामैहिकापायः | ७/८-९ |
| पारलौकिकापायः | ७/१० |
| भोगतुच्छताल्पकालताज्ञप्त्यै काकिण्याम्रदृष्टान्तौ | ७/११-१३ |
| व्यवहारदृष्टान्तः | ७/१४-१५ |
| धर्माधर्मविषयामेनामुपमा | ७/१६ |
| मूलच्छेदमेव स्पष्टयति | ७/१७-१८ |
| मूलप्रवेशिनो युक्तिः | ७/१९-२० |
| लब्धलाभनृयुक्तिः | ७/२१ |
| वणिगदृष्टान्तनिगमनम् | ७/२२ |
| नृसुरसुखमानज्ञप्त्यै कुशाग्रे उदकदृष्टान्तः | ७/२३ |
| कुशाग्रे उदकदृष्टान्तनिगमनम् | ७/२४ |
| कामाऽनिवृत्तस्य दोषः | ७/२५ |
| कामनिवृत्तस्य गुणः | ७/२६-२७ |
| उपदेशः | ७/२८-३० |
| **अष्टमं कापिलीयाध्ययनम् ॥** | |
| कपिलकथा | ८/प्रारम्भे |
| ध्रुवकः | ८/१ |
| ध्रुवकलक्षणम् | ८/१ |
| ध्रुवकेण मुनिकर्म | ८/२-३ |
| ग्रन्थत्यागे गुणः | ८/४ |
| ग्रन्थऽत्यागे दोषः | ८/५ |
| भोगानां प्रायः दुस्त्यजत्वम् | ८/६ |
| मन्दा नरकं गच्छन्ति | ८/७-८ |
| साधुधर्मः | ८/९ |
| प्राणातिपातविरतिः | ८/१० |
| अवन्तीश्राद्धपुत्रदृष्टान्तः | ८/१० |
| एषणासमितिस्वरूपम्, सप्त संसृष्टाद्या शुद्धैषणाः | ८/११ |
| रसाऽगृद्धविधिः | ८/१२ |
| शुद्धैषणाया बाधकाः | ८/१३ |
| शुद्धैषणाबाधकफलम् | ८/१४-१५ |
| लोभार्त्तस्य दुःपूरता | ८/१६ |
| असन्तोषे स्वविदितहेतुः | ८/१७-१९ |
| अध्ययनार्थनिगमनम् | ८/२० |
| **नवमं नमिप्रव्रज्याध्ययनम् ॥** | |
| नमिचरित्रलेशः | ९/प्रारम्भे |
| नमिचरित्रसूत्रार्थः | ९/१-६२ |
| कोलाहलप्रश्नोत्तरः | ९/७-११ |
| अग्निदाहरक्षाप्रश्नोत्तरः | ९/१२-१७ |
| दुर्गादिकारणोक्तिः | ९/१८-२३ |
| प्रासादकारणोक्तिः | ९/२४-२७ |
| चौरनिग्रहोक्तिः | ९/२८-३१ |
| दुर्नमनृपनमनोक्तिः | ९/३२-३७ |
| यज्ञादिकरणोक्तिः | ९/३८-४१ |
| गृहाश्रमस्थापनम् | ९/४२-४४ |
| हिरण्यादिसङ्ग्रहोक्तिः | ९/४५-४९ |
| भोगत्यागोक्तिः | ९/५०-५४ |
| इन्द्रेण नमिगुणस्तवना | ९/५५-५७ |
| गुणैः स्तुत्वा फलेन स्तौति | ९/५८ |
| उपसंहारः | ९/५९-६० |
| स्तूयमानः नमिरुत्कर्षं नाऽऽगात् | ९/६१ |
| नमिवदन्येऽपि स्युः | ९/६२ |
| **दशमं द्रुमपत्रकाध्ययनम् ॥** | |
| शाल-महाशाल-गौतमवक्तव्यता | १०/प्रारम्भे |


Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

| | |
|---|---|
| मनुष्याणां शेषात्मनां च जीवितस्यानित्यत्वम् | १०/१ |
| आयुषोऽनित्यत्वम् | १०/२-३ |
| न पुनर्नृभवं प्राप्तिः | १०/४ |
| नृत्वदुर्लभत्वम् | १०/५-१५ |
| नृत्वाप्तावप्युत्तरोत्तरगुणाप्तिदुरापेता | १०/१६-२० |
| अप्रमादोपदेशः | १०/२१-२६ |
| रोगार्त्ताः | १०/२७ |
| अप्रमादविधिः | १०/२८-२९ |
| वान्तं निषेधयति | १०/३० |
| दर्शनशुद्धिः | १०/३१-३२ |
| प्रमादत्यागोपदेशः | १०/३३-३४ |
| अप्रमादफलम् | १०/३५ |
| निगमनम् | १०/३६-३७ |
| **एकादशं बहुश्रुतपूजाध्ययनम् ॥** | |
| सर्ववाच्यार्थविषयिणश्चोत्कृष्ट-चतुर्दशपूर्विणः | ११/प्रारम्भे |
| भिक्षोराचारम् प्रादुःकरिष्यामि | ११/१ |
| बहुश्रुतस्वरूपम् | ११/२ |
| पञ्चभिः स्थानैः अबहुश्रुतत्वम् | ११/३ |
| अष्टाभिः स्थानैः बहुश्रुतत्वम् | ११/४-५ |
| अविनीतविनीतयोः स्वरूपम् | ११/६ |
| अविनीतस्य चतुर्दशस्थानानि | ११/७-९ |
| विनीतस्थानानि | ११/१०-१३ |
| विनीतः कीदृक् ? | ११/१४ |
| बहुश्रुतस्य स्तवं षोडशदृष्टान्तैः | ११/१५-३० |
| जम्बूवृक्षस्य स्वरूपम् | ११/२७ |
| बहुश्रुतस्वरूपम् | ११/३१ |
| शिष्योपदेशः | ११/३२ |
| **द्वादशं हरिकेशीयाध्ययनम् ॥** | |
| हरिकेशीसम्प्रदायः | १२/प्रारम्भे |
| हरिकेशीमुनिस्वरूपम् | १२/१-४ |
| अनार्यस्य प्रलापाः | १२/५-७ |
| गण्डीतिन्दुकयक्षस्य सान्निध्यः | १२/८ |
| यक्ष-ब्राह्मणानां संवादः | १२/९-३१ |
| मुनि-उपाध्यायचर्चा | १२/३२-४६ |
| निगमनम् | १२/४७ |
| **त्रयोदशं चित्रसम्भूतीयाध्ययनम् ॥** | |
| चित्रसम्भूतसम्प्रदायः | १३/प्रारम्भे |
| ब्रह्मदत्तहिण्डिः | १३/प्रारम्भे |
| हस्तिनागपुरे ब्रह्मदत्त उत्पन्नः | १३/१ |
| ब्रह्मदत्त प्राग्भवे सम्भूतश्चाण्डालः | १३/२ |
| चित्रसम्भूतपूर्वभवाः | १३/३-७ |
| मुनि-चक्रिपरिसंवादः | १३/८-२९ |
| निदानफलम् | १३/३०-३४ |
| चित्रवृत्तान्तः | १३/३५ |
| **चतुर्दशमिषुकारीयाध्ययनम् ॥** | |
| इषुकारवक्तव्यता | १४/प्रारम्भे |
| भृगुपुरोहित-पुरोहितपुत्र-यशा वक्तव्यता | १४/१-५३ |
| अनर्थखनित्वम् | १४/१४ |
| चतुर्णां प्रव्रज्याप्रतिपत्तिः | १४/३७ |
| इषुकारनृपप्रबुद्धः | १४/४९ |
| षडपि परिनिवृत्ताः | १४/५३ |
| **पञ्चदशं सभिक्षुकमध्ययनम् ॥** | |
| रागादिक्षुधाः | १५/प्रारम्भे |
| भिक्षुस्वरूपम् | १५/१-१६ |
| पिण्डविशुद्ध्या सभिक्षुत्वम् | १५/७ |
| मन्त्रादिदोषत्यागः | १५/८ |
| संस्तवत्यागः | १५/१० |
| ग्रासैषणादोषत्यागः | १५/१२ |
| धूमदोषत्यागः | १५/१३ |
| सर्वधर्ममूलसम्यक्त्वस्थैर्यम् | १५/१५ |
| **षोडशं ब्रह्मचर्यसमाधिस्थानाध्ययनम् ॥** | |
| दश ब्रह्मचर्यसमाधिस्थानानि | १६/१-१० सू. |
| दशसमाधिस्थानानां सङ्ग्रहश्लोकाः | १६/१-१३ |


Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सर्वहितोपदेशः १६/१४-१५

ब्रह्ममाहात्म्यम् १६/१६-१७

सप्तदशं पापश्रमणीयाध्ययनम् ॥

ज्ञानविषयपापश्रमणः १७/१-४

दर्शनविषयपापश्रमणः १७/५

चारित्रविषयपापश्रमणः १७/६-१४

तपोविषयपापश्रमणः १७/१५-१७

वीर्याचारविषयपापश्रमणः १७/१८-१९

दोषसेवात्यागयोर्फलम् १७/२०-२१

अष्टादशं संयतीयाध्ययनम् ॥

सञ्जयनृपाय साध्वुपदेशः १८/१-१२

अनित्यत्वं दर्शयति १८/११-१७

सञ्जयराजा निष्क्रान्तः १८/१८-१९

सञ्जयमुनि-क्षत्रियमुनितत्त्वचर्चा १८/२०-३३

३६३पाखण्डिनां स्वरूपम् १८/२३

क्षत्रियमुनिः महापुरुषदृष्टान्तैः सञ्जयमुनिं स्थिरीकरोति १८/३४

भरतदृष्टान्तः १८/३४

सगरचक्रिदृष्टान्तः १८/३५

मघवाचक्रिदृष्टान्तः १८/३६

सनत्कुमारचक्रिदृष्टान्तः १८/३७

शान्तिचक्रि-तीर्थकृत्दृष्टान्तः १८/३८

कुन्थुचक्रि-भगवत्दृष्टान्तः १८/३९

अरचक्रि-तीर्थकृत्दृष्टान्तः १८/४०

महापद्मचक्रिदृष्टान्तः १८/४१

हरिषेणचक्रिदृष्टान्तः १८/४२

जयचक्रिदृष्टान्तः १८/४३

दशार्णभद्रदृष्टान्तः १८/४४

नमिनृपदृष्टान्तः १८/४५

करकण्डुदृष्टान्तः १८/४६-४७

द्विमुखदृष्टान्तः १८/४६-४७

निर्गतिदृष्टान्तः १८/४६-४७

उदायननृपदृष्टान्तः १८/४८

नन्दनबलदृष्टान्तः १८/४९

विजयबलदृष्टान्तः १८/५०

महाबलराजर्षिदृष्टान्तः १८/५१

ज्ञानपूर्वं क्रियाफलमुपदेशः १८/५२-५४

एकोनविंशं मृगापुत्रीयाध्ययनम् ॥

मृगापुत्रराजसुतदृष्टान्तः १९/

भवनिर्वेदस्य हेतुः १९/१५-१८

दृष्टान्तोपन्यासतः स्वाशयं प्रकटीकरणम् १९/१९-२४

मृगापुत्रं प्रति मातापित्रोर्वक्तव्यम् १९/२५-४४

मृगापुत्रस्योत्तरः १९/४५-८३

मृगचर्यायाः स्पष्टीकरणम् १९/८४

मातापितृभ्यामनुज्ञातमृगापुत्रकुमारः उपधिं परित्यजति १९/८५-८८

मृगापुत्रसाधुस्वरूपम् १९/८९-९४

समतायाः स्पष्टीकरणम् १९/९१

मृगापुत्रचारित्रफलम् १९/९५-९६

उपदेशः १९/९७-९८

धनममताधर्मफलम् १९/९९

विंशतितमं महानिर्ग्रन्थीयाध्ययनम् ॥

निर्ग्रन्थद्वाराणि २०/प्रारम्भे

अर्थ-धर्मगतितथ्यानुशिष्टिः २०/१

धर्मकथाख्यानेन शिक्षा २०/२-३४

दीक्षा अनु नाथः २०/३५-३६

अनाथत्वम् २०/३७-५१

चरित्राचारगुणान्वितस्य फलम् २०/५२

उपसंहारः २०/५३-५८

श्रेणिकराजा विमलेन चेतसा धर्मानुरक्तः २०/५८

श्रेणिकस्य वीरनतेरर्वाक् सम्यक्त्वलाभः २०/५९

मुनिरपि विगह इव विप्रमुक्तः वसुधां विहरति २०/६०

एकविंशं समुद्रपालीयमध्ययनम् ॥

समुद्रपालवक्तव्यता २१/१-९


Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सम्बुद्धः परं संवेगमागतः प्राव्राजीत् २१/१०
समुद्रपालभगवत्स्वरूपम् २१/११-१५
समुद्रपालभगवतो गुणोक्तिः २१/१६-२२
समुद्रपालमुनिरनुत्तरज्ञानधरः २१/२३
अनुत्तरज्ञानस्य फलम् २१/२४
द्वाविंशं रथनेमीयमध्ययनम् ॥
अरिष्टनेमिवक्तव्यता २२/१-६
राजीमतीवर्णनम् २२/७-८
अरिष्टनेमेर्विवाहगमनम् २२/९-१३
विवाहमण्डपासन्ने भयभीतान् प्राणान्
दृष्ट्वा नेमिकुमारः सकरुणः २२/१४-१९
सारथिना सत्त्वेषु मोचितेषु अर्हन्
परितोषितः २२/२०
श्रीनेमेः निष्क्रमणं कर्तुं लोकान्तिकदेवाः
समवतीर्णाः २२/२१
भगवान् द्वारिकातो निःक्रम्य रैवते
सहसाम्रवनं सम्प्राप्तः, नृसहस्रेण
श्रामण्यं प्रतिपद्यते २२/२२-२३
पञ्चमुष्टीभिः केशान् लुञ्चते २२/२४
वासुदेवसमुद्रविजयानामाशीर्वादाः २२/२५-२६
रामकेशवदशार्हादयः द्वारिकापूरीं
प्रत्यतिगताः २२/२७
राजीमती जिनस्य प्रव्रज्यां श्रुत्वा शोकेन
समवसृता २२/२८
राजीमतीप्रव्रज्यास्वीकारः २२/२९-३१
राजीमती प्रवजिता सती
बहून् स्वजनान् परिजनान् प्राव्राजयत् २२/३२
राजीमती रैवतं गिरिं प्रति यान्ती
अन्तरा वर्षाभिरुल्ला लयनस्य
स्थिता २२/३३
यथाजाता राजीमतीं दृष्ट्वा
रथनेमिर्भग्नचित्तः २२/३४
भीता राजीमती सङ्गोफं कृत्वा निषीदति २२/३५
कम्पमानां राजीमतीं दृष्ट्वा रथनेमिः
भोगाय प्रार्थ्यते २२/३६-३८
राजीमती आत्मानं संवरेत् २२/३९
राजीमत्या रथनेमेरुपालम्भः २२/४०-४७
अङ्कुशेन यथा नागः पथि व्रजति, तथा
चारित्रधर्मे रथनेमिः सम्प्रतिपतितः २२/४८
अथ रथनेमिः कीदृशः स्थिरः ? २२/४९
रथनेमि-राजीमत्योः क्रियाफलम् २२/५०
भग्नपरिणामतया मा भूद्रथनेमौ
कस्याप्यवज्ञा २२/५१
त्रयोविंशं केशि-गौतमीयमध्ययनम् ॥
केशी-गौतमौ श्रावस्त्यां समागतौ २३/१-९
धर्मविषये उभयोः संशयः २३/१०-१२
आचारप्रणिधिसंशयः २३/१३
उभौ समागमे कृतमती २३/१४
केशीकुमारश्रमणो गौतममागतं दृष्ट्वा
प्रतिरूपां प्रतिपत्तिः २३/१५-१७
तिन्दुकोद्याने उभौ निषण्णौ चन्द्र-
सूर्यसमप्रभौ शोभेते २३/१८
उद्याने पाखण्डा देवा दानवाः बहुजनाश्च
समागमाः २३/१९-२०
तयोर्जल्पः २३/२१-२२
शिक्षापदाख्यव्रताद्यद्वारपृच्छा २३/२३-२८
लिङ्गद्वारपृच्छा २३/२९-३४
शत्रुजयद्वारपृच्छा २३/३५-३९
पाशकर्त्तनद्वारपृच्छा २३/४०-४४
वल्लीतरूत्खननपृच्छा २३/४५-४९
अग्निविध्यापनपृच्छा २३/५०-५४
दुष्टाश्वनिग्रहपृच्छा २३/५५-५९
मार्गपरिज्ञापृच्छा २३/६०-६४
महाश्रोतोवारणपृच्छा २३/६५-६९
संसारपारगमनपृच्छा २३/७०-७४
तमोविघटनपृच्छा २३/७५-७९

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

स्थानद्वारपृच्छा २३/८०-८४
केशिः गौतमं स्तौति २३/८५
प्रश्नोपसंहारः २३/८६-८७
महापुरुषसङ्गफलम् २३/८८
तोषिता पर्षत् सर्वा २३/८९

**चतुर्विंशं प्रवचनमात्रीयमध्ययनम् ॥**

अष्टौ प्रवचनमातरः २४/१-२
द्वादशाङ्गं मातमुच्यते २४/३
इर्यासमितिस्वरूपम् २४/४-८
भाषासमितिस्वरूपम् २४/९-१२
आदाननिक्षेपसमितिस्वरूपम् २४/१३-१४
पारिष्ठासमितिस्वरूपम् २४/१५-१८
उपसंहारः २४/१९
मनोगुप्तिस्वरूपम् २४/२०-२१
वाग्गुप्तिस्वरूपम् २४/२१-२३
कायगुप्तिस्वरूपम् २४/२४-२५
समितिगुप्त्योरन्योऽन्यं विशेषम् २४/२६
प्रवचनमात्राचरणफलम् २४/२७

**पञ्चविंशं यज्ञीयाध्ययनम् ॥**

जयघोष-विजयघोषवक्तव्यता २५/१-५
जयघोषो यतिर्जातः २५/१
ग्रामानुग्रामं विहरन् वाणारसीं पूरीं प्राप्तः २५/२
विजयघोषस्य यज्ञे भिक्षार्थमुपस्थितः २५/६
मुनि-विप्रयोः चर्चा २५/७-१८
को ब्राह्मणः पात्रम् ? २५/१९
कुशलसन्दिष्टस्वरूपम् २५/२०-२९
श्रमण-ब्राह्मण-मुनि-तापसानां स्वरूपम् २५/३१-३२
भोगी भ्रमति संसारे, अभोगी च कर्मलेपाद्विप्रमुच्यते २५/४१
शुष्कार्द्रगोलकदृष्टान्तः २५/४२
द्वार्ष्टान्तिकयोजना २५/४३
जयघोषानगारस्यान्तिके धर्मं श्रुत्वा विजयघोषो निष्क्रान्तः २५/४४
जयघोषविजयघोषौ पूर्वकर्माणि संयमेन तपसा च क्षपयित्वा सिद्धिगतिं प्राप्तौ २५/४५

**षड्विंशं सामाचार्याख्यमध्ययनम् ॥**

दशाङ्गा साधूनां सामाचारी २६/१-९
ओघसामाचारी २६/१०-५२
उत्सर्गिकं दिनकृत्यम् २६/११-१२
पौरुषी कथं ज्ञेया २६/१३-१५
पादोनपौरुषीपरिज्ञानोपायः २६/१६
पादोनपौरुषीयन्त्रम् २६/१६
रात्रिकृत्यम् २६/१७-१८
रात्रिचतुर्भागज्ञानोपायः २६/१९-२०
विशेषतो दिनरात्रिकृत्यम् २६/२१-५२
प्रतिलेखनाविधिः २६/२३-२४
प्रस्फोटनविधिः २६/२५
प्रतिलेखनादोषत्यागः २६/२६-२८
प्रतिलेखनाप्रमत्तमुनिः षड्कायानामपि विराधकः २६/३०
तृतीयपौरुषीकृत्यम् २६/३२
भक्तादिगवेषणाय षट् कारणानि २६/३३
षड्भिः स्थानैः भक्तादिगवेषणं न कुर्यात् २६/३४
षट्स्थानानि २६/३५
भक्तादि गवेषयन् केन विधिना कियत्क्षेत्रे पर्यटेत् २६/३६
चतुर्थीपौरुष्यां निक्षिप्य भाजनं स्वाध्यायं कुर्यात् २६/३७
पौरुषीचतुर्थभागे शेषे शय्यां प्रतिलेखयेत् २६/३८
ततः यत्नवान् साधुः प्रस्त्रवणोच्चारभूमिं प्रतिलेखयेत् २६/३९
सप्तविंशतिमण्डलानि २६/३९


Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

भूमिप्रतिलेखनान्तरं सर्वदु:खविमोक्षणं कायोत्सर्गं कुर्यात् २६/३९
दैवसिकं च पुनरतीचारं चिन्तयेत् २६/४०
पारितकायोत्सर्गो द्वादशावर्त्तवन्दनेन गुरुं वन्दित्वा दैवसिकं त्वतीचारमालोचयेत् २६/४१
अपराधस्थानभ्यो निवृत्य गुरुं वन्दित्वा सर्वदु:खविमोक्षणं कायोत्सर्गं कुर्यात् २६/४२
पारितकार्योत्सर्ग: गुरुं वन्दित्वा स्तुतिमङ्गलं कालं सम्प्रत्युपेक्षते २६/४३
तत: प्रथमायां पौरुष्यां स्वाध्यायं, द्वितीयायां च ध्यानं, तृतीयायां निद्रामोक्षो, चतुर्थ्यां च पुन: स्वाध्यायं कुर्यात् २६/४४-४५
तत आगते कायव्युत्सर्गे सर्वदु:खविमोक्षणे कायोत्सर्गं कुर्यात् २६/४७
रात्रिकोऽतिचारो तत्तृतीयकायोत्सर्गविषयश्चिन्त्यते २६/४८
पारितकायोत्सर्ग: गुरुं वन्दित्वा रात्रिकमतीचारमालोचयेत् २६/४९
तत: प्रतिक्रम्य नि:शल्य: गुरुं वन्दित्वा सर्वदु:खविमोक्षणं कायोत्सर्गं पुन: कुर्यात् २६/५०
कायोत्सर्गे तपो विचिन्तयेत् २६/५१
पारितकायोत्सर्ग: यथाशक्त्या तप: सम्प्रतिपद्येत २६/५२
तथा सिद्धानां संस्तवं, तदनु यत्र चैत्यानि सन्ति तत्र तद्वन्दनं विधेयम् २६/५२
सामाचारीपालनफलम् २६/५३
सप्तविंशं खलुङ्कीयमध्ययनम् ॥
खलुङ्कानां स्वरूपम् २७/प्रारम्भे
विनीतस्वरूपम् २७/१-२
अविनीतस्वरूपम् २७/३-७
दार्ष्टान्तिकयोजना २७/८-१४
गर्गाचार्यविचारणा २७/१५-१६
गुरुणामशठतैव सेव्या २७/१७
अष्टाविंशं मोक्षमार्गीयमध्ययनम् ॥
मोक्षमार्गगतिस्वरूपम् २८/१
चतु:कारणानि २८/२-३
ज्ञानभेदा: २८/४
ज्ञानविषय: २८/५
द्रव्यादीनां लक्षणानि २८/६
द्रव्यभेदा: २८/७-८
षड्द्रव्याणां लक्षणम् २८/९-१०
जीवस्य लक्षणान्तरम् २८/११
पुद्गलानां लक्षणम् २८/१२
पर्यायलक्षणम् २८/१३
दर्शनस्वरूपम् २८/१४-१५
सम्यक्त्वभेदा: २८/१६
निसर्गरुचिव्याख्या २८/१७-१८
उपदेशरुचिव्याख्या २८/१९
आज्ञारुचिव्याख्या २८/२०
सूत्ररुचिव्याख्या २८/२१
बीजरुचिव्याख्या २८/२२
अभिगमरुचिव्याख्या २८/२३
विस्ताररुचिव्याख्या २८/२४
क्रियारुचिव्याख्या २८/२५
सङ्क्षेपरुचिव्याख्या २८/२६
धर्मरुचिव्याख्या २८/२७
सम्यक्त्वलिङ्गानि २८/२८
सम्यक्त्वस्य माहात्म्यम् २८/२९-३०
अष्टधा दर्शनाचारे उत्तरोत्तरगुणाप्ति: २८/३१
चारित्रस्वरूपम् २८/३२-३३
तप:स्वरूपम् २८/३४
मुक्तिमार्गत्वे कस्य कतरो व्यापार: २८/३५


Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

मार्गफलभूता गतिः २८/३६

एकोनत्रिंशं सम्यक्त्वपराक्रमाख्यमध्ययनम् ॥

सम्यक्त्वपराक्रमाध्ययनस्य प्रकाराः २९/१ सू.

संवेगस्य फलम् २९/१

निर्वेदस्य फलम् २९/२

धर्मश्रद्धाफलम् २९/३

गुरुसाधर्मिकशुश्रूषाफलम् २९/४

आलोचनाफलम् २९/५

निन्दनाफलम् २९/६

गर्हाफलम् २९/७

सामायिकफलम् २९/८

चतुर्विंशतिस्तवफलम् २९/९

वन्दनफलम् २९/१०

प्रतिक्रमणफलम् २९/११

कायोत्सर्गफलम् २९/१२

प्रत्याख्यानफलम् २९/१३

स्तवस्तुतिमङ्गलफलम् २९/१४

अन्तक्रियाभाजनं जीवस्तु चतुर्धा-
स्थानाङ्गसूत्रम् २९/१४

कालप्रतिलेखनाफलम् २९/१५

प्रायश्चित्तकरणफलम् २९/१६

क्षामणाफलम् २९/१७

स्वाध्यायफलम् २९/१८

वाचनाफलम् २९/१९

प्रतिपृच्छनाफलम् २९/२०

परावर्त्तनाफलम् २९/२१

अनुप्रेक्षाफलम् २९/२२

धर्मकथाफलम् २९/२३

श्रुताराधनाफलम् २९/२४

एकाग्रमनःसन्निवेशनाफलम् २९/२५

संयमफलम् २९/२६

तपःफलम् २९/२७

व्यवदानफलम् २९/२८

सुखशायिताफलम् २९/२९

अप्रतिबद्धताफलम् २९/३०

विविक्तशयनासनसेवनाफलम् २९/३१

विनिवर्त्तनाफलम् २९/३२

सम्भोगप्रत्याख्यानफलम् २९/३३

उपधिप्रत्याख्यानफलम् २९/३४

आहारप्रत्याख्यानफलम् २९/३५

कषायप्रत्याख्यानफलम् २९/३६

योगप्रत्याख्यानफलम् २९/३७

शरीरप्रत्याख्यानफलम् २९/३८

सहायप्रत्याख्यानफलम् २९/३९

भक्तप्रत्याख्यानफलम् २९/४०

सद्भावप्रत्याख्यानफलम् २९/४१

प्रतिरूपताफलम् २९/४२

वैयावृत्त्यफलम् २९/४३

सर्वगुणसम्पन्नताफलम् २९/४४

वीतरागताफलम् २९/४५

क्षान्तिफलम् २९/४६

मुक्तिफलम् २९/४७

आर्जवफलम् २९/४८

मार्द्दवफलम् २९/४९

भावसत्यफलम् २९/५०

करणसत्यफलम् २९/५१

जोगसत्यफलम् २९/५२

मनोगुप्तताफलम् २९/५३

वाग्गुप्तताफलम् २९/५४

कायगुप्तताफलम् २९/५५

मनःसमाधारणताफलम् २९/५६

वाक्समाधारणाफलम् २९/५७

कायसमधारणाफलम् २९/५८

ज्ञानसम्पन्नताफलम् २९/५९

दर्शनसम्पन्नताफलम् २९/६०

चारित्रसम्पन्नताफलम् २९/६१


Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

| | |
|---|---|
| श्रोत्रेन्द्रियनिग्रहफलम् | २९/६२ |
| चक्षुरिन्द्रियनिग्रहफलम् | २९/६३ |
| घ्राणेन्द्रियनिग्रहफलम् | २९/६४ |
| जिह्वेन्द्रियनिग्रहफलम् | २९/६५ |
| स्पर्शेन्द्रियनिग्रहफलम् | २९/६६ |
| क्रोधविजयफलम् | २९/६७ |
| मानविजयफलम् | २९/६८ |
| मायाविजयफलम् | २९/६९ |
| लोभविजयफलम् | २९/७० |
| प्रेममिथ्यादर्शनविजयफलम् | २९/७० |
| अष्टविधकर्मविमोचनस्वरूपम् क्षपणक्रमः | २९/७१ |
| शैलेश्यकर्मताद्वारस्वरूपम् | २९/७२ |
| सम्यक्त्वपराक्रमाध्ययनस्योपसंहारः | २९/७३ |
| **त्रिंशत्तमं तपोमार्गगत्याख्यमध्ययनम् ॥** | |
| तपोमार्गगतिस्वरूपम् | ३०/१ |
| अनाश्रवः कर्म क्षपयति | ३०/२ |
| अनाश्रवजीवस्य स्वरूपम् | ३०/३ |
| दृष्टान्तद्वारेण कर्मक्षपणस्वरूपम् | ३०/५ |
| भवकोटीनां सञ्चितं कर्म तपसा निर्जीर्यते | ३०/६ |
| तपोभेदाः | ३०/७ |
| बाह्यतपभेदाः | ३०/८ |
| अनशनस्वरूपम् | ३०/९ |
| इत्वरिकं तपः षड्विधम् | ३०/१०-११ |
| मरणकालानशनस्वरूपम् | ३०/१२ |
| सपरिकर्म-अपरिकर्मानशनस्वरूपम् | ३०/१३ |
| ऊनोदरतास्वरूपम् | ३०/१४ |
| द्रव्यावमौदर्यम् | ३०/१५ |
| क्षेत्रावमौदर्यम् | ३०/१६-१८ |
| षड्विधा गोचरभूमिः | ३०/१९ |
| कालावमौदर्यम् | ३०/२०-२१ |
| भावामौदर्यम् | ३०/२२-२३ |
| पर्यवावमौदर्यम् | ३०/२४ |
| भिक्षाचर्यास्वरूपम् | ३०/२५ |
| संस्पृष्टादिसप्तैषणाः | ३०/२५ |
| रसत्यागस्वरूपम् | ३०/२६ |
| कायक्लेशस्वरूपम् | ३०/२७ |
| संलीनतास्वरूपम् | ३०/२८ |
| चतुर्धा संलीनता | ३०/२९ |
| बाह्यतपःफलम् | ३०/३० |
| अभ्यन्तरतपप्रकाराः | ३०/३१ |
| प्रायश्चित्तस्वरूपम् | ३०/३२ |
| दशविधं प्रायश्चितम् | ३०/३२ |
| विनयस्वरूपम् | ३०/३३ |
| वैयावृत्त्यस्वरूपम् | ३०/३४ |
| आर्चायादिदशविधे वैयावृत्त्यम् | ३०/३४ |
| स्वाध्यायस्वरूपम् | ३०/३५ |
| ध्यानस्वरूपम् | ३०/३६ |
| उत्सर्गस्वरूपम् | ३०/३७ |
| तपःफलम् | ३०/३८ |
| **एकत्रिंशत्तमं चरणविधिनामकमध्ययनम् ॥** | |
| चारित्रविधेर्फलम् | ३१/१ |
| असंयमान्निवृत्तिः संयमे प्रवर्त्तनम् | ३१/२ |
| रागद्वेषौ निरुद्धः | ३१/३ |
| दण्ड-गारव-शल्यत्रिकत्यागः | ३१/४ |
| दिव्य-तैरश्च-मानुष्यकोपसर्गसहनम् | ३१/५ |
| विकथा-कषाय-संज्ञा-ध्यानद्विकवर्जनम् | ३१/६ |
| व्रत-इन्द्रियार्थ-समितिक्रियासु यत्नः | ३१/७ |
| लेश्या-षट्काय-षडाहरकारणे यत्नः | ३१/८ |
| पिण्डावग्रह-प्रतिमा-सप्तभयस्थानेषु यत्नः | ३१/९ |
| जात्यादिमदेषु यत्नः | ३१/१० |
| नवब्रह्मगुप्तिषु यत्नः | ३१/१० |
| क्षान्त्यादौ भिक्षुधर्मे यत्नः | ३१/१० |
| एकादशषु उपासकप्रतिमासु यत्नः | ३१/११ |
| भिक्षुणां द्वादशसु प्रतिमासु यत्नः | ३१/११ |
| त्रयोदशसु अनर्थादिषु क्रियासु यत्नः | ३१/१२ |


Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

चतुर्दशसु भूतग्रामेषु यत्नः ३१/१२
पञ्चदशसु परमाधार्मिकेषु परिज्ञानैर्यत्नः ३१/१२
गाथाषोडशकेषु यत्नः ३१/१३
असंयमसप्तदशके यत्नः ३१/१३
ब्रह्मण्यष्टादशभेदे यत्नः ३१/१४
एकोनविंशतिज्ञाताध्ययनेषु यत्नः ३१/१४
विंशत्यसमाधिस्थानेषु यत्नः ३१/१५
दाविंशतिपरीषहेषु यत्नः ३१/१६
त्रयोविंशतिसूत्रकृताध्ययनेषु यत्नः ३१/१७
चतुर्विंशतिदेवेषु यत्नः ३१/१७
पञ्चविंशतिभावनासु यत्नः ३१/१७
षड्विंशतिदशादिषु यत्नः ३१/१७
सप्तविंशत्यनगारगुणेषु यत्नः ३१/१८
अष्टाविंशतिप्रकल्पेषु यत्नः ३१/१८
एकोनत्रिंशत्पापश्रुतप्रसङ्गेषु यत्नः ३१/१९
त्रिंशन्मोहस्थानेषु यत्नः ३१/१९
एकत्रिंशत्सिद्धादिगुणेषु यत्नः ३१/२०
द्वात्रिंशज्जोगसङ्ग्रहेषु यत्नः ३१/२०
त्रयत्रिंशदासातनासु यत्नः ३१/२०
अध्ययननिगमनम् ३१/२१
द्वात्रिंशत्तमं प्रमादस्थानाख्यमध्ययनम् ॥
रागद्वेषसङ्क्षयेण जीवो मोक्षं समुपैति ३२/१-२
गुरुकुलवासे सुप्राप्याणि ज्ञानादीनि ३२/३
समाधिकामो श्रमणोचितक्रियास्वरूपम् ३२/४-५
दुःखहेतुमोहोत्पत्ति-तेषामुन्ममूलनोपायम् ३२/६-९
रसप्रकामे दोषः ३२/११
ब्रह्मचारिणः कर्त्तव्यम् ३२/१२
विविक्तविपर्ययदोषः ३२/१३
स्त्रीसम्पाते कर्तव्यम् ३२/१४
ब्रह्मचर्ये रतानां आर्यध्यानयोग्यम् ३२/१५
विविक्तस्थानवासो मुनीनां प्रशस्यः ३२/१६
मोक्षाधिकाङ्क्षिणोऽपि बालमनोहरा स्त्रियो दुस्तराः ३२/१७
स्त्रीसङ्गातिक्रमे गुणः ३२/१८
रागस्य दुःखहेतुत्वम् ३२/१९
कामगुणा विपाके किम्पाकफलसदृशाः ३२/२०
मनोज्ञामनोज्ञविषयेषु राग-द्वेषाभावः कुर्यात् ३२/२१
चक्षुरिन्द्रियमाश्रित्य त्रयोदश सूत्राणि ३२/२२-३४
श्रोत्रेन्द्रियमाश्रित्य त्रयोदश सूत्राणि ३२/३५-४७
घ्राणेन्द्रियमाश्रित्य त्रयोदश सूत्राणि ३२/४८-६०
रसनेन्द्रियमाश्रित्य त्रयोदश सूत्राणि ३२/६१-७३
स्पर्शेन्द्रियमाश्रित्य त्रयोदश सूत्राणि ३२/७४-८६
मनसः त्रयोदश सूत्राणि ३२/८७-९९
निगमनम् ३२/१००
रागद्वेषरहितस्तु समता ३२/१०१
विकृतिस्वरूपम् ३२/१०२
द्वेष्यः सर्वस्याऽप्रीतिकृत् ३२/१०३
रागद्वेषोद्धरणोपायः ३२/१०४
दोषान्तरकथनम् ३२/१०५
रागद्वेषवतः सकलाप्यनर्थपरम्परा ३२/१०६
उपसंहारः ३२/१०७
वीतरागः कृतसर्वकृत्यः घातिकर्माणि क्षपयति ३२/१०८
ज्ञानावरणादिक्षयात् सर्वं जानाति पश्यति च ३२/१०९
मोक्षगतः कीदृक् ? ३२/११०
अध्ययनार्थनिगमनम् ३२/१११
त्रयस्त्रिंशं कर्मप्रकृतिनामाध्ययनम् ॥
अष्ट कर्माणि ३३/१-३
अष्टकर्मणामुपन्यासक्रमः ३३/३
ज्ञानावरणीयकर्मणो भेदाः ३३/४
दर्शनावरणीयकर्मणो भेदाः ३३/५-६
वेदनीयस्य भेदाः ३३/७
मोहनीयस्य भेदाः ३३/८
दर्शनमोहनीयत्रैविध्यम् ३३/९
चारित्रमोहनीयद्विविधम् ३३/१०
चारित्रमोहनीयस्य भेदाः ३३/११
आयुःकर्म चतुर्विधम् ३३/१२


Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

| | |
|---|---|
| नामकर्म द्विविधम् | ३३/१३ |
| मध्यमविवक्षातः शुभनामकर्मणः सप्तत्रिंशद्भेदाः | ३३/१३ |
| मध्यमविवक्षया अशुभनामकर्मणः चतुस्त्रिंशद्भेदाः | ३३/१३ |
| गोत्रकर्म द्विविधम् | ३३/१४ |
| अन्तरायकर्मणो भेदाः | ३३/१५ |
| कर्मप्रकृतीनां प्रदेशाग्र-क्षेत्र-काल-भावाः | ३३/१६ |
| एकसमयग्राह्यकर्मप्रदेशाग्रः | ३३/१७ |
| क्षेत्रस्वरूपम् | ३३/१८ |
| स्थितिबन्धः | ३३/१९-२३ |
| अनुभागबन्धः | ३३/२४ |
| उपसंहारः | ३३/२५ |
| **चतुस्त्रिंशं लेश्याध्ययनम् ॥** | |
| द्रव्यलेश्या-भावलेश्यास्वरूपम् | ३४/प्रारम्भे |
| लेश्यानामनुभावकथनम् | ३४/१ |
| लेश्यानामादिद्वाराणि | ३४/२ |
| द्वारगाथा | ३४/३ |
| लेश्यानां वर्णाः | ३४/४-९ |
| लेश्यानां रसाः | ३४/११-१५ |
| लेश्यानां गन्धाः | ३४/१६-१७ |
| लेश्यानां स्पर्शाः | ३४/१८-१९ |
| लेश्यानां परिणामाः | ३४/२० |
| लेश्यानां लक्षणानि | ३४/२१-३२ |
| स्थानद्वारम् | ३४/३३ |
| लेश्यानां स्थितिः | ३४/३४-५५ |
| गतिद्वारम् | ३४/५६-६० |
| उपसंहारः | ३४/६१ |
| **पञ्चत्रिंशमनगारमार्गगतिनामकाध्ययनम् ॥** | |
| अनगारमार्गगतिस्वरूपम् | ३५/१-९ |
| आहारविधिः | ३५/१०-११ |
| ज्योतिर्न दीपयेत् | ३४/१२ |
| क्रयविक्रये न करोति | ३५/१३-१५ |
| समुदानमुञ्छमैषयेत् | ३५/१६ |
| यापनार्थं भुञ्जीत | ३५/१७ |
| अर्चनादि न प्रार्थयेत् | ३५/१८ |
| शुक्लध्यानं ध्यायेत् | ३५/१९ |
| मरणे संलेखना | ३५/२० |
| शाश्वतं स्थानं सम्प्राप्तः | ३५/२१ |
| **षट्त्रिंशं जीवाजीवविभक्तिसंज्ञमध्ययनम् ॥** | |
| जीवाऽजीवद्रव्यविभक्त्यधिकारः अष्ट निर्युक्तिगाथा | ३६/प्रारम्भे |
| सूत्रानुगमः | ३६/१ |
| प्रसङ्गत एव लोकालोकविभक्तिः | ३६/२ |
| जीवाऽजीवविभक्तिः | ३६/३ |
| अजीवप्ररूपणा | ३६/४ |
| अरूपिणो दशधा | ३६/५-६ |
| क्षेत्रतोऽरूपिणः | ३६/७ |
| कालतोऽरूपिणः | ३६/८-९ |
| द्रव्यतो रूपिणः प्ररूपणा | ३६/१० |
| रूपिणः लक्षणम् | ३६/११ |
| स्कन्धादीनां कालविभागः | ३६/११-१२ |
| कालद्वारमाश्रित्य स्थितिः | ३६/१३ |
| अन्तरस्वरूपम् | ३६/१४ |
| भावतोऽरूपिणः | ३६/१५ |
| वर्णादीनामुत्तरभेदाः | ३६/१६-४६ |
| वर्णगन्धरसस्पर्शसंस्थानानां ४८२भेदाः | ३६/४६ |
| जीवविभक्तिसम्बन्धः | ३६/४७ |
| द्विविधा जीवाः | ३६/४८ |
| अनेकविधाः सिद्धाः | ३६/४८ |
| सिद्धानामुपाधिभेदतोऽनेकविधत्वम् | ३६/४९ |
| अवगाहनातः क्षेत्रतश्च सिद्धाः | ३६/५० |
| स्त्र्यादिषु क्व कियन्तः सिद्ध्यन्ति ? | ३६/५१-५६ |
| ईषत्प्राग्भारपृथ्वीस्वरूपम् | ३६/५७-६३ |
| सिद्धानामवगाहना | ३६/६४ |
| कालतः प्ररूपणा | ३६/६५ |
| सिद्धानामुपाधिनिरपेक्षस्वरूपम् | ३६/६६ |
| सिद्धानां क्षेत्रस्वरूपम् | ३६/६७ |


Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

| | |
|---|---|
| संसारिण: स्वरूपम् | ३६/६८ |
| संसारिणस्त्रैविध्यम् | ३६/६९ |
| पृथ्वीभेदा: | ३६/७०-७६ |
| सूक्ष्मा: पृथ्वीजीवा: | ३६/७७ |
| पृथ्वीजीवानां कालविभाग: | ३६/७८-७९ |
| पृथ्वीजीवानामायु:स्थिति: | ३६/८०-८१ |
| कालान्तर्गतमेवान्तरम् | ३६/८२ |
| पृथ्वीजीवानां भावत: प्ररूपणा | ३६/८३ |
| अब्जीवानां स्वरूपम् | ३६/८४-९१ |
| वनस्पतिजीवानां भेदा: | ३६/९२-९३ |
| प्रत्येकवनस्पतीनां शरीरा: | ३६/९४-९५ |
| साधारणवनस्पतीनां शरीरा: | ३६/९४-९५ |
| अनन्तकायलक्षणम् | ३६/९९ |
| सूक्ष्मवनस्पतिस्वरूपम् | ३६/१००-१०४ |
| सूक्ष्म-बादरवनस्पतिजीवानाम-सङ्ख्यानन्ता: भेदा: | ३६/१०५ |
| त्रिविधा त्रसा: | ३६/१०६-१०७ |
| तेजोजीवानां स्वरूपम् | ३६/१०८-११६ |
| वायुजीवानां स्वरूपम् | ३६/११७-१२५ |
| उदारत्रसा: | ३६/१२६ |
| द्विन्द्रियवक्तव्यम् | ३६/१२७-१३५ |
| त्रिन्द्रियवक्तव्यम् | ३६/१३६-१४४ |
| चतुरिन्द्रियवक्तव्यम् | ३६/१४५-१५४ |
| पञ्चेन्द्रियजीवा: | ३६/१५५ |
| सप्तधा नैरयिका: | ३६/१५६ |
| नरकपृथ्वीनां स्वरूप-नामानि | ३६/१५७-१५९ |
| नारकानां क्षेत्रविभाग: | ३६/१६० |
| नारकानां कालान्तरम् | ३६/१७० |
| नारकानां सहस्त्रशो भेदा: | ३६/१७१ |
| पञ्चेन्द्रियतिरश्चां भेदा: | ३६/१७२-१७३ |
| जलचराणां स्वरूपम् | ३६/१७४-१८० |
| स्थलचराणां स्वरूपम् | ३६/१८१-१८९ |
| खेचराणां स्वरूपम् | ३६/१९०-१९६ |
| मनुजानां भेदा: | ३६/१९७-१९९ |
| सम्मूर्च्छिममनुजानां स्वरूपम् | ३६/२००-२०१ |
| गर्भजमनुजानां स्वरूपम् | ३६/२०२-२०५ |
| देवानां भेदा: | ३६/२०६-२०७ |
| दशधा भवनवासिन: | ३६/२०८ |
| व्यन्तरनामानि | ३६/२०९ |
| ज्योतिष्का: | ३६/२१० |
| वैमानिका: कल्पोपगता: | ३६/२११-२१३ |
| कल्पातीता देवा: | ३६/२१४ |
| ग्रैवेयका: | ३६/२१५-२१७ |
| अनुत्तरविमानानि | ३६/२१८ |
| देवानां कालविभाग: | ३६/२१९-२२० |
| देवानामायु:स्थिति: | ३६/२२१-२४६ |
| देवानां कायस्थिति: | ३६/२४७ |
| देवानां कालान्तरम् | ३६/२४८-२५० |
| देवानां सहस्त्रशो भेदा: | ३६/२५१ |
| निगमनम् | ३६/२५२ |
| सर्वनयानामनुमते संयमे मुनी रमते | ३६/२५३ |
| बहूनि वर्षाणि श्रामण्यमनुपाल्य क्रमयोगेन मुनिरात्मानं संलिखेत् | ३६/२५४ |
| संलेखनाभेदा: | ३६/२५५ |
| संलेखनाक्रमयोग: | ३६/२५६ |
| संलेखनाया द्वादशमवर्षक्रिया | ३६/२५९ |
| अशुभभावनापरिहारादिज्ञप्ति: | ३६/२६० |
| मिथ्यादर्शनरतानां दुर्लभा बोधि: | ३६/२६१-२६३ |
| सम्यग्दर्शनरतानां सुलभा बोधि: | ३६/२६२ |
| जिनवचनाराधनामाहात्म्यम् | ३६/२६४-२६५ |
| आलोचनाश्रवणार्हाणां स्वरूपम् | ३६/२६६ |
| कन्दर्पादिभावनास्वरूपम् | ३६/२६७ |
| आभियोगीभावनास्वरूपम् | ३६/२६८ |
| किल्बिषीकीभावनास्वरूपम् | ३६/२६९ |
| आसुरीभावनास्वरूपम् | ३६/२७० |
| मोहीभावनास्वरूपम् | ३६/२७१ |
| माहात्म्य: | ३६/२७२ |


• • •

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

# अनुक्रमणिका

## दीपिकाटीकासमलङ्कृता उत्तराध्यायाः

## [ १ ]

## १-१९ अध्यायाः


| विषय | पृष्ठक्रमाङ्कः |
|---|---|
| પ્રકાશકીય | ૭-૮ |
| ઉત્તરાધ્યયન એક આગમગ્રંથ !! | ૯-૧૦ |
| સંપાદકીય | ૧૧-૨૬ |
| १-३६ अध्यायानां विषयदिग्दर्शनम् | २७-४० |
| प्रथमं विनयश्रुतमध्ययनम् | ३-२१ |
| द्वितीयं परीषहाध्ययनम् | २२-५५ |
| तृतीयं चातुरङ्गीयमध्ययनम् | ५६-७१ |
| चतुर्थं प्रमादऽप्रमादाख्यध्ययनम् | ७२-८३ |
| पञ्चममकाममरणीयाध्ययनम् | ८४-९७ |
| षष्ठं क्षुल्लकनिर्ग्रन्थीयमध्ययम् | ९८-१०७ |
| सप्तममौरभ्रीयमध्ययनम् | १०८-११८ |
| अष्टमं कापिलीयाध्ययनम् | ११९-१२८ |
| नवमं नमिप्रव्रज्याध्ययनम् | १२९-१५० |
| दशमं द्रुमपत्रकनामाध्ययनम् | १५१-१६६ |
| एकादशं बहुश्रुतपूजाध्ययनम् | १६७-१७७ |
| द्वादशं हरिकेशीयाध्ययनम् | १७८-१९४ |
| त्रयोदशं चित्रसम्भूतीयाध्ययनम् | १९५-२११ |
| चतुर्दशमिषुकारीयाध्ययनम् | २१२-२२७ |
| पञ्चदशं सभिक्षुकमध्ययनम् | २२८-२३४ |
| षोडशं ब्रह्मचर्यसमाधिस्थानाध्ययनम् | २३५-२४४ |
| सप्तदशं पापश्रमणीयाध्ययनम् | २४५-२५० |
| अष्टादशं संयतीयाध्ययनम् | २५१-२८४ |
| एकोनविंशं मृगापुत्रीयाध्ययनम् | २८५-३०६ |


Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

# उद्धरणस्थानसङ्केतसूचिः

| | |
|---|---|
| अग्निका. | अग्निकारिका [ हरिभद्राष्टक ] |
| आ.नि.सं.गा. | आवश्यकनिर्युक्तिसङ्ग्रहणिगाथा |
| आरा. | आराहणापडागा |
| ओ.नि.<br>ओघ.नि. | ओघनिर्युक्ति |
| उ.<br>उत्त. | उत्तराध्ययन |
| उ.नि.<br>उत्त.नि. | उत्तराध्ययननिर्युक्ति |
| आ.नि. | आवश्यकनिर्युक्तिः |
| उ.प. | उपदेशपद |
| उ.र. | उपदेशरहस्य |
| क.प्रा. | कर्मविपाकाख्य प्रथम प्रा. कर्मग्रन्थ |
| गा.स. | गाथासहस्त्री |
| गु.भा. | गुरुवंदणभाष्य |
| जी.स. | जीवसमास |
| तत्त्वा. | तत्त्वार्थाधिगमसूत्र |
| द.<br>द.वै. | दशवैकालिक |
| द.नि.<br>द.वै.नि. | दशवैकालिकनिर्युक्ति |
| दे.कु. | देहकुलक |
| निशी.भा. | निशीथभाष्य |
| प.व.<br>पञ्च.व. | पञ्चवस्तुक |
| पञ्चा. | पञ्चाशक |
| प्र.र. | प्रशमरति |
| प्र.सा. | प्रवचनसारोद्धार |
| म.प. | मरणसमाधिपयन्ना |
| बृ.सं. | बृहत्सङ्ग्रहणी |
| य.च. | यतिदिनचर्या |
| र.स. | रत्नसञ्चय |
| वि.सा. | विचारसार |
| शा.स. | शास्त्रवार्त्तासमुच्चय |
| श्रा.प्र. | श्रावकप्रज्ञप्ति |
| ष.स. | षड्द्रव्यसङ्ग्रह |
| सं.प्र. | सम्बोधप्रकरण |
| सं.र. | संवेगरंगशाला |

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

दीपिकाटीकासमलङ्कृताः

# उत्तराध्यायाः

[ १ ]

१-१९ अध्यायाः

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

॥ श्रीजिनाय नमः ॥

# ॥ श्रीउत्तराध्ययनदीपिकाटीका ॥

श्री**उत्तराध्ययन**स्य किञ्चिदर्थः कथाश्च लिख्यन्ते—इह **उत्तराध्ययन**शब्दार्थः, उत्तराणि प्रदानानि, पूर्वं श्रीशय्यम्भवं यावच्चतुर्दशपूर्विकाले **आचाराङ्गा**दनुपठ्यमानत्वेन, ततो **दशकालिको**र्ध्वं पठ्यमानत्वेन श्रेष्ठानि अध्ययनानि **उत्तराध्ययना**नि, निर्वाणकाले श्री**वीरे**ण कानिचित् सूत्रतः कानिदिदर्थत उक्तानि, तत्राधीयन्ते अधिगम्यन्ते ज्ञायन्ते विचारा यैरधिकं वा अयनं मार्गो मुक्तेर्येभ्यस्तान्यध्ययनानि **उत्तराध्ययना**नि, **विनयश्रुतादी**नि, श्रुतं च स्कन्धो राशिश्चेति श्रुतस्कन्धः । उत्तराध्ययनानां श्रुतस्कन्ध **उत्तराध्यययनश्रुतस्कन्धः** । इह **उत्तराध्ययनश्रुतस्कन्धानां** शब्दानां नामस्थापनादिभिर्बहुधा निक्षेपो निर्युक्तेर्ज्ञेयः, अध्ययनानां नामानि—

**विनयश्रुत १ परीषह २ चउरङ्गिक ३ असंखेय ४ अकाममरणीय ५ निर्ग्रन्थीय ६ औरभ्र ७ कापिलीय ८ नमिप्रव्रज्या ९ द्रुमपत्रक १० बहुश्रुतपूजा ११ हरिकेशीय १२ चित्रसम्भूतीय १३ इषुकारीय १४ सभिक्षु १५ ब्रह्मचर्यसमाधिस्थान १६ पापश्रमणीय १७ सञ्जयीय १८ मृगापुत्रीय १९ महानिर्ग्रन्थीय २० समुद्रपालीय २१ रथनेमीय २२ केशिगौतमीय २३ प्रवचनमातृ २४ याज्ञीय २५ सामाचारीय २६ खलुङ्कीय २७ मोक्षमार्गगति २८ सम्यक्त्वपराक्रम २९ तपोमार्गगति ३० चरणविधि ३१ प्रमादस्थान ३२ कर्मप्रकृति ३३ लेश्या ३४ अनगारमार्ग ३५ जीवाजीवविभक्तिरिति ३६ षट्त्रिंशत्**, तत्र श्रीधर्मकल्पद्रोर्विनयमूलत्वादादौ **विनय**श्रुताध्ययनमाह **सुधर्म**स्वामी, यतोऽधुना वाचना श्री**वीरे**ण **सुधर्मण** एवानुज्ञाता—

**संजोगा विप्पमुक्कस्स, अणगारस्स भिक्खुणो ।**
**विणयं पाउकरिस्सामि, आणुपुव्विं सुणेह मे ॥१॥**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या**—संयोगनिक्षेपादिविस्तारो निर्युक्तेर्ज्ञेयः, इह तु सूत्रार्थमात्रं, उत्तमपुरुषक्रियैकवचनादनुक्तोऽहं कर्त्ता **प्रादुःकरिष्यामि** प्रकटीकरिष्ये, **विनयं** विशिष्टो विविधो वा नयो नीतिर्विनयः, साधुजनमार्गस्तं विनमनं वा विनतं द्रव्यतो नीचैर्नमनं, भावतः साध्वाचारदाक्ष्यं कस्य विनयं ? साधोः, किं भूतस्य ? **संयोगाद्** द्रव्यतो मात्रादिसंयोगाद् भावतो विषयादिक्लिष्टतरभावसंयोगाच्च, विविधैर्ज्ञानभावनादिप्रकारैः, प्रकर्षेण परीषहोपसर्गादिसहत्वान्मुक्तस्य **विप्रमुक्तस्य**, अविद्यमानमगारमस्येत्यनगारस्य, इह विशेषणरूपोऽनगारशब्दो ज्ञेयः, तत्रागारं द्विधा, द्रव्यभावाभ्यां, आद्यं दृषदाद्यैः कृतं द्रव्यागारं, च अनन्तानुबन्ध्यादिकृतं भावागारं, कषायमोहनीयं यद्वा, 'अणगारस्स भिख्खुणो' त्ति, अस्वेषु भिक्षुरस्वभिक्षुः, अनात्मीयानेव गृहिणोऽन्नादि भिक्ष्यते, न तु स्वजात्यान्, अनागारश्चासास्वभिक्षुश्चा**ऽनगारास्वभिक्षुस्तस्यानुपूर्व्यादिक्रमेण शृणुत** श्रवणं प्रत्यवहिता भवतु, **मम** विनयं विनतं वा प्रादुःकरिष्यतः सतः, अनेन पराङ्मुखमपि धर्मे स्थापयितुर्लाभ एवेति ज्ञेयं ॥ तथेदमध्ययनमधीयानस्याऽविनीतस्यापि विनयोद्भावः स्यात्तत्तद्वाच्यन्योऽर्थो लिख्यते—**भिक्षोः** कषायादिवशेन जीववीर्यहीनस्य शुभफलाऽनाप्त्या भिक्षणशीलस्य **विनयं प्रादुःकरिष्यामि, संयोगेन** कषायादिसम्पर्केणा**ऽविप्रमुक्तस्य** अपरित्यक्तस्य, अणगारस्स त्ति, ऋणं क्लेशकृत्त्वादष्टधा कर्म तत्करोति, गुरूक्ताऽकरणाद्यैश्चिनोति, **ऋणकारस्तस्य** विनयकथनेऽविनयोऽप्युक्तः स्यादिति तद्वाच्यार्थो लिख्यते—विरुद्धो नयो**ऽविनयो**ऽसदाचार**स्तं प्रादुःकरिष्यामि, भिक्षोर**विधिना भक्षणशीलस्य **संयोगाद्विप्रमुक्तस्य**, सम्यग् योगः समाधिः संयोगस्तस्माद्विविधैः परीषहाऽसहनगुरुनियोगाऽसहत्वालस्यादिप्रकारैः प्रकर्षेण मुक्तस्य, शेषं प्राग्वत् ॥१॥

अथ विनयो गुणः, स जीवादभिन्नस्ततो विनीतगुणैरेव विनयस्वरूपमाह—

**आणाणिद्देसकरे, गुरूणमुववायकारए ।**
**इंगियाकारसंपन्ने, से विणीय त्ति वुच्चइ ॥२॥**

**व्याख्या**—आङिति यथास्वभावमर्यादया ज्ञायतेऽर्थोऽनयेत्याज्ञाऽर्हदागमरूपा, तस्या निर्देश उत्सर्गापवादाभ्यां स्वीकारस्तत्करणशीलस्तदनुलोमानुष्ठानः **आज्ञानिर्देशकरः**, यद्वा सौम्येदं कुर्विदं च मा कार्षीरिति गुरुवाग**ेवाज्ञा**, तस्या **निर्देश** इदमित्थमेव करोमीति निश्चयः, **तत्करः**, आज्ञानिर्देशेन वा तरति भवाब्धिमि**त्याज्ञानिर्देश( क )तरः**, इत्थमनन्तपर्यायत्वाद्भगवद्वचनस्य व्याख्याभेदाः स्युः, **गुरूणामा**चार्यादीना**मुपपातो** वा दृग्विषये देशे स्थानं **तत्कारक**स्तत्कर्त्ता, नत्वादेशादिभीत्या दूरस्थायी, इङ्गितं निपुणगम्यं, प्रवृत्तिनिवृत्तिसूचीषत्शिरःकम्पादिः, आकारः स्थूलधीज्ञेयः प्रस्थानादिभावज्ञापको दिगालोकादिः, यतः—

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**अवलोयणं दिसाणं, वियंभणं साडगस्स संठवणं ।**
**आसण सिढिलीकरणं, उट्ठिउकामस्स लिंगाइं ॥१॥ [ ]**

अनयोर्द्वन्द्वे इङ्गिताकारौ, गुरोः सम्यक् प्रकर्षेण जानाति, **इङ्गिताकारसंप्रज्ञः**, यद्वा गुरुभाव-ज्ञानमेवे**ङ्गिताकारस्तेन संपन्नो** युक्तः **स विनीतः** सविनय **इत्युच्यते**ऽर्हदाद्यैः ॥२॥

अविनयज्ञप्तौ अविनीतमाह—

**आणाणिद्देसकरे, गुरूणमणुववायकारए ।**
**पडणीए असंबुद्धे, अविणीए त्ति वुच्चइ ॥३॥**

**व्याख्या—आज्ञाया निर्देशो** भङ्ग**स्तत्करणशीलो गुरूणामनुपपातो** दूरदेशस्थानं **तत्कारकः प्रत्यनीकः** प्रतिकूलवर्ती, **असंबुद्धो** अज्ञाततत्त्वोऽविनीतोऽ**विनयवानित्युच्यते कुलवालक**श्रमणवत् ।

**तत्कथैवं**-एकः क्षुल्लोऽविनीतो गुरुणा ग्रहणासेवनयोः शिक्षयोः प्रेर्यमाण ईर्ष्यां वहन् सिद्धशिलायां गुरुणा सह देवान्नत्वोत्तरन् गुरुहत्यै शिलां लोठितवान्, तां शब्दादायान्ती ज्ञात्वा गुरुः प्रासारयदंह्री, अन्तरा शिलाऽगात्, अक्षतो गुरुर्दुरात्मन् स्त्रीभ्यो विनश्येरिति तं शशाप, स गुरुवाग् मिथ्यास्त्विवति वनं गत्वा तपश्चक्रे, सार्थाद्यागतावभुक्त, नदीकूले आतापायतस्तस्य प्रभावान्नदीपूरमन्यतो व्यूढं, ततः **कूलवालके**ति नामास्याभूत्, इतः **श्रेणिक**सूः **कोणिक**राट् तत्र गतः, भ्रातृ**हल्लविहल्ल**वैरेण ताभ्यामाश्रितां **चेटकराज**स्य **वैशालीं** पुरीं सैन्यैरुरोध सा पुरी श्री**सुव्रत**स्तूपादभङ्गा, तस्मिंस्तां गृहीतुमक्षमे बहुकालं विषण्णो नभोगीरभूत्

**समणे जइकूलवालए, मागहियं गणियं गमिस्सए ।**
**लाया य असोगचंदए, वेसालिं नगरीं गहिस्सए ॥१॥ [ सं.र./१२८३ ]**

**कूणिक**स्तां श्रुत्वा स्वपुरस्थां **मागधिकां** वेश्यामाकार्योचे, कुतोऽपि **कूलवालका**ख्यं श्रमणं लब्ध्वा बुद्ध्या वशीकृत्यात्रानय ? ॥ सा तमानयामीत्युक्त्वा कपटश्राविका भूत्वाऽन्यसाधुभ्यः **कूलवालकं** वनस्थं ज्ञात्वा सार्थेन तत्रागता, तं नत्वोचे, मुनेः सतन्त्राहं तीर्थयात्रार्थं सार्थेन यान्ती वोऽत्र ज्ञात्वा नन्तुमेता, कुरुममानुग्रहं प्रासुकैषणीयान्नादानेनेत्यागृह्य नेपालकमिश्र-मोदकैस्तं प्रत्यलाभयत् । तदशनात्तस्यातिसारोऽभूत्, तयौषधादिनोपचारितो विश्रामणादिनाङ्ग स्पृशन्त्या दक्षया वाग्भिस्तन्मनोऽभेदि, आनीतः **कूणिकान्तं** । राज्ञोक्तस्तथा कुरु यथा **वैशाली** गृह्यते, आमेत्युक्त्वा नैमित्तिकवेषेण तेनान्त**र्विशालीं** गत्वा बम्भ्रम्यता **सुव्रत**स्तूपो दृष्टो ज्ञातं चानेन पुर्यभङ्गा, रोधोद्विग्नलोकैः स पृष्टः, कथं रोधो याति, तेनोचेऽस्य स्तूपस्य भङ्गे, लोकैस्तथा कृते **कूणिके**नादौ निवृत्त्य, ततः पुरी भग्ना, हलैः कृष्टा च ॥३॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

दृष्टान्तेनाऽविनीतदोषमाह–

**जहा सुणी पूतिकन्नी, निक्कसिज्जइ सव्वसो ।**
**एवं दुस्सीलपडिणीए, मुहरी निक्कसिज्जइ ॥४॥**

**व्याख्या–यथा पूतिकर्णी** कुथितसकृमिकर्णा **शूनी** सर्वतः सर्वेभ्यो गोपुरगृहाङ्गणादिभ्यो हतहतेत्यादिलेष्ठ्वादिघातै**र्निष्कास्यते, पूतिकर्णी**ति सर्वाङ्गकुत्साज्ञाप्त्यै, शुनीति स्त्रीदृष्टान्तोक्तिरतिकुत्सार्थं, एवं **दुःशीलो** दुष्टाचारः **प्रत्यनीको मुखारिः**, मुखमेवेह परलोकोपकारितया अरिर्यस्यासौ मुखारिः, मुधा कार्यं विनैवारयोऽस्याऽसौ **मुधारि**रसंबद्धभाषित्वान्मुखरो वा, **निष्कास्यते** सर्वथा कुलगणसङ्घसमवायबहिर्वर्त्ती क्रियते ॥४॥

ननु किमीदृशोऽसावित्याह–

**कणकुंडगं जहित्ताणं, विट्ठं भुंजइ सूयरे ।**
**एवं सीलं जहित्ताणं, दुस्सीले रमई मिए ॥५॥**

**व्याख्या–कणा**स्तण्डुला**स्तेषां कुण्डकं** क्षोदयुतं कुकुशं **हित्वा** त्यक्त्वा शूकरो गर्त्ताशूकरो **विष्टां** भुङ्क्ते, **एवम**विनीतः पुष्टिदायि शोभनं **शीलं** सदाचारं **हित्वा** विवेकगर्हिते **दौःशील्ये रमते**, मृग इव **मृगो**ऽपायाऽज्ञत्वात्, यथा मृगो गीताक्षिप्तो नापायं पश्येत् तथाऽयमपि पुरो दुर्गतिं न पश्येत् ॥५॥

ततः–

**सुणियाऽभावं साणस्स, सूयरस्स नरस्स य ।**
**विणए ठविज्ज अप्पाणं, इच्छंतो हियमप्पणो ॥६॥**

**व्याख्या–शुन्या** इव, **सूकरस्ये**ति दुःशीलासेवनात् **शूकरोपमस्य नरस्य अभाव**मशोभनं भावं, सर्वतो निःकाशनाख्यं श्रुत्वा, **चः** पूर्त्तौ, नञ् कुत्सायामपि, साधु**र्विनये स्थापयेदात्मानं**, आत्मनैव **इच्छन्नात्मनो हितमै**हिकामुष्मिकं च ॥६॥

**तम्हा विणीयमेसिज्जा, सीलं पडिलभे जओ ।**
**बुद्धपुत्ते नियागट्ठी, न निक्कसिज्जइ कण्हुइ ॥७॥**

**व्याख्या–तस्मा**दिति अविनयदोषं ज्ञात्वा **विनयमेषयेत्** कुर्यात्, यतो विनयतः शीलं संयमं **प्रतिलभेत**–आप्नुयात्, **बुधै**रर्हद्भिरक्तं, **निजकं** तत्वत आत्मीयं ज्ञानादि **तदर्थी**, यद्वा बुद्धानां आचार्यादीनां पुत्र इव पुत्रो **बुद्धपुत्रः** साधु**र्नियोगो** मोक्ष**स्तदर्थी** सन् **न निष्कास्यते**–न बहिः क्रियते 'कण्हुइ' **कुतश्चिद्** गणादेः, किन्तु मुख्य एव स्यात् ॥७॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

विनीतस्तु—

**निसंते सियाऽमुहरी, बुद्धाणं अंतिए सया ।**
**अट्ठजुत्ताणि सिखिज्जा, निरट्ठाणि उ वज्जए ॥८॥**

**व्याख्या—नितरां शान्तो**ऽन्तः क्रोधत्यागाद् बहिः प्रशान्ताकारत्वात्, **अमुखारिरमुखरो** वा **बुद्धानामा**चार्यादीनामन्तिके पार्श्वे **सदा अर्थो** हेयादेयरूपस्तेन **युक्तानि, अर्थो** मोक्षो वा तत्र **युक्तानि** सङ्गतान्यागमवचांसि **शिक्षेत, निरर्थानि** डित्थडात्थादीनि साध्वयोग्यानि **वैशेषिकवात्स्यायना**दीनि वा, **तु** पुनः पुन**र्वर्जयेत्** ॥८॥

शिक्षणविधिः—

**अणुसासिओ न कुप्पिज्जा, खंतिं सेविज्ज पंडिए ।**
**खुद्देहिं सह संसग्गीं, हासं कीडं च वज्जए ॥९॥**

**व्याख्या**—पण्डितो**ऽनुशिष्टः** श्रुतशिक्षणे स्खलितादौ गुरुणा खरोक्त्या शिक्षितोऽपि **न कुप्येत, क्षान्तिं** सहनात्मिकां **सेवेत, क्षुद्रै**र्बालैः शीलहीनैर्वा पार्श्वस्थाद्यैः **सह 'संसग्गिं' संसर्गं हास्यं क्रीडां चा**न्त्यक्षरिकाप्रहेलिकाद्यां **वर्जयेत्** ॥९॥

क्रियाविनयमाह—

**मा य चंडालियं कासी, बहुयं मा य आलवे ।**
**कालेण य अहिज्जित्ता, तउ झाइज्ज एक्कओ ॥१०॥**

**व्याख्या—च** अन्यत् चण्डः क्रोधस्तद्वशादलिकं कूटोक्ति**श्चण्डालीकं,** एवं लोभालीकाद्यपि, यद्वा चण्डाले भवं **चाण्डालिकं** हिंसाद्यं घोरं कर्म, यद्वा हे **अचण्ड** सौम्य ! गुरूक्तमागमं वा **अलीकं मा कार्षीः**, जिनोक्ततिलोत्पाटकस्वेच्छालाप**गोशालिक**वत्, बह्वव **बहुकं** घनं आलजालं स्त्र्यादिकथाद्यं कारणे अपि **माचालपेत्** , बह्वालापेऽध्ययनादिक्षतिवातक्षोभादिभावात्, **कालेना**द्यपौरुष्यादिरूपे**णाधीत्य** पृच्छनादि वा कृत्वा, **ततो**ऽध्ययनादनन्तरं **ध्यायेत्** चिन्तयेत् सूत्रार्थौ, **एकको** भावतो रागादिरहितो द्रव्यतो विविक्तशय्यादिसंस्थः ॥१०॥

इत्थमकृत्यत्यागकृत्यविधी उक्तौ, दोषे सति किङ्कार्यमित्याह—

**आहच्च चंडालियं कट्टु, न निन्हविज्ज कयाइ वि ।**
**कडं कडे त्ति भासिज्जा, अकडं नो कडे त्ति य ॥११॥**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या**—**कदाचिच्चाण्डालीकं** वा **कृत्वा** न निह्नवीत मया न कृतमिति नापलपेत, **कदाचिदप,** परैर्ज्ञातोऽज्ञातोऽपि वा चाण्डालीकादि**कृतं सत् कृतमेव भाषेत,** भयलज्जाद्यैर्मया न कृतं इति न भाषेत, **अकृतं नो कृतमित्यकृतमेव भाषेत,** न तु मायोपरोधादिना अन्यथा भाषेत, अतिचारे सति लज्जाद्यकुर्वन् गुर्वन्ते एत्य,

**जह बालो जंपंतो, कज्जमकज्जं च उज्जुयं भणइ ।**

**तं तहा आलोयज्जा, मायामयविप्पमुक्को उ ॥१॥ [ सं.प्र./गा.१५०२ ]**

इत्यादि युक्त्या शल्यं आलोचयेत् ॥११॥

ज्येष्ठविनयमाह—

**मा गलियस्सेव कसं, वयणमिच्छे पुणो पुणो ।**

**कसं व दट्ठुमाइन्ने, पावगं परिवज्जए ॥१२॥**

**व्याख्या**—साधु**र्गलिरश्व** इव **कसं** कशप्रहारमिव **वचनं** प्रवृत्तिनिवृत्तिविषयं उपदेशं गुरोर्मा **इच्छेत् वारं वारं,** यथा गल्यश्वः कशाघातं विना न प्रवर्त्तते निवर्त्तते वा, नैव गुरुवचनमुपेक्ष्यं, किन्तु सुशिष्य **आकीर्णा**श्वो विनीताश्व इव **कशं** चर्मयष्टि**मिव** गुरोराकारादि **दृष्ट्वा पापकं** असदनुष्ठानं **परिवर्जयेत्**, यथा आकीर्णोऽश्वः कशादिनाऽऽरोहकाशयं ज्ञात्वा कशेऽलग्ने इव तदाशयाच्चलेत् वलेत वा, एवं सुशिष्योऽप्याकाराद्यैर्गुर्वाशयं ज्ञात्वा तथानुतिष्ठेत्, माभूद्वागायासो गुरोरिति, 'पावगं पडिवज्जए' इति पाठे पुनातीति **पावकं,** शुभानुष्ठानं **प्रतिपद्येते**त्यर्थः ॥१२॥

यतः—

**अणासवा थूलवया कुसीला, मिउं पि चंडं पकरेंति सीसा ।**

**चित्ताणुया लहु दक्खोववेया, पसायए ते हु दुरासयं पि ॥१३॥**

**व्याख्या**—**अनाश्रवा** गुरुवचस्यस्थिताः, स्थूलमनिपुणं वाचो येषां ते **स्थूलवचसो**ऽविचार्यभाषिणः, **कुशीलाः** कदाचाराः शिष्या **मृदुं** कोमलगिर**मपि** गुरुं **चण्डं** कोपनं खरभाषं वा **प्रकुर्वन्ते,** ये च जात्याश्व इव **चित्तानुगा लघु** शीघ्रं **दाक्ष्येना**ऽविलम्बकारित्वे**नोपपेता** युक्ताः **स्युस्ते** दुःखेनाश्रयमर्हं कोपनत्वाद्यै**र्दुराशयमपि** गुरुं **प्रसादयेयुः** प्रसन्नं कुर्युः, किं पुनरकषायम् ।

**अत्र दृष्टान्तश्चण्डरुद्राचार्यशिष्यः**—अवन्त्यां स्नात्रे उद्याने साधवः समवसृतास्तेषां गुरु**श्चण्डरुद्रा**ख्यः साधूनामूनाधिकानुष्ठानानि पश्यन्नतिरुष्यंस्तददृष्ट्यै आत्महिताय चैकान्ते

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

स्वाध्यायध्यानेऽस्थात्, **अवन्ती**वासी नवोढ इभ्यसूः सकुङ्कुमाङ्गसुवेषो मित्रैः सह युवा साधूपान्तमेत्य हासेन नत्वोचे, भगवन्तो धर्मं ब्रूत, तैः शठोऽमित्युत्तरमदत्वा स्वाध्यायः कृतः, पुनरूचे निर्विण्णोऽहं गृहवासभार्याभ्यां, दीक्षां मह्यं दत्त, साधुभिरुल्लण्ठ इति ज्ञात्वा **चण्डरुद्रो**ऽदर्शि, वयं शिष्याः एषोऽस्मद्गुरुर्दीक्षते, स गुरुं गत्वा नत्वोचे, मां दीक्षध्वं, यथाहं सुखी स्यां, पुनः पुनरुक्ते स्वभावदोषो गुरुरूचे, भस्मानय, एकेन तथाकृते तच्छिरो लुञ्चित्वा दीक्षा ददे, मित्राणि विषण्णान्यूचुर्मित्र नश्य, स भाग्याल्लघुकर्मा कथं कृतलोचः स्ववाचात्तव्रतो यामि गेहमिति,

**छुट्टंति नियलबद्धा, संकलबद्धा य नउलबद्धा य ।**
**मोहनियलेण बद्धा, भवकोडिसए न छुट्टंति ॥१॥**

भावसाधुर्जातः, वयस्या गताः, शिष्यो मा मत्स्वजना एत्य मां व्रतं मोचयन्त्वित्यन्यत्र यामीति गुरुं जगौ, तेन सायं मार्गं प्रतिलिख, प्रत्यूषे याव इत्युक्तः प्रतिलिख्यागात्, प्रत्यूषे द्वौ तस्मिन् पथि प्रस्थितौ, अग्रे याहीत्युक्तः शिष्योऽचलत्, गुरुर्मार्गात् स्खलितः, वेदनावशेन हा दुष्ट शिष्य ! भव्यं किं न मार्गः प्रत्यलेखीति रोषाद्दण्डेनाहत्, शीर्षं स्फुटितं, शिष्यः सम्यक् सहमानो अहोऽहमधन्यो येनामी स्वसाधुमध्ये सुखं तिष्ठन्तो मयेदृग्दुःखं प्रापिताः, कथमस्खलितं नये, समाधिं जनयामीति प्रयत्नेन यान् सुभावात् केवल्यभूत्, प्रातः गुरुः शिष्यशीर्षं स्फुटितं रक्ताक्तं दृष्ट्वा संवेगादहोऽस्य शिष्यस्याप्यद्भुता क्षमा, मम चिरदीक्षितस्य गणिनोऽपीदृग् दोष इति स्वं निन्दन्नाप केवलं, **उत्तराध्ययनलघुवृत्तौ आवश्यकवृत्त्या**दिषु कोऽपि कथाभेदः, आदौ स्वनिन्दया गुरोः केवलं, कालेन शिष्यस्य ॥१३॥

गुरुचित्तानुवृत्तियुक्तिमाह–

**नापुट्ठो वागरे किंचि, पुट्ठो वा नालियं वए ।**
**कोहं असच्चं कुव्विज्जा, धारिज्जापियमप्पियं ॥१४॥**

**व्याख्या–अपृष्टो** गुरुणा कथमिदमित्यजल्पितः किञ्चिदपि स्तोकमपि न **व्यागृणीयात्, पृष्टो वाऽलीकं न वदेत्,** निर्भर्त्सितोऽपि गुरोः क्रोधं तदुक्तकुविकल्पस्फेटनेनाऽसत्यं कुर्यात् ।

**क्रोधाऽसत्यत्वकृतौ दृष्टान्तः**–कस्यापि कुलपुत्रस्य भ्राताऽरिणा हतः, स मात्रोक्तः पुत्र भ्रातृघातिनं हन्धि, तेन स जीवग्राहं बद्ध्वाम्बापार्श्वं नीत्वोक्तो रे भ्रातृघातिन् ! कथं त्वां हन्मीति खड्गमुद्गामितं, स भीतोऽवक् शरणैता यथा हन्यन्ते, ततः सुतोऽम्बास्यं पश्यंस्तया सत्वेनोत्पन्नकृपयोक्तं, पुत्र शरणैता न हन्यते,

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**सरणागयाण विस्संभियाण, पणयाण वसणपत्ताणं ।**
**रोगिय अंजगमाणं, सप्पुरिसा नेव पहरंति ॥१॥**

तेनोचे, अम्ब कथं ? वत्स रोषः सफलो न कार्यः, स तेन मुक्तस्तयोरंह्र्योः पतित्वा क्षमयित्वागात्, एवं क्रोधमसत्यं कुर्यात्, अप्रियं कर्णकटु, गुरुवचः गुणकृत्त्वात् प्रियमिव धारयेत स्थापयेच्चित्ते, यद्वा प्रियं प्रित्युत्पादकं स्तुत्यादि, अप्रियं निन्दादि धारयेत्, न तद्वशगो रागं द्वेषं वा कुर्यात् ।

**अथ तृतीयभूतदृष्टान्तः**—क्वापि पुरोऽशिवोत्पत्तौ त्रयो मान्त्रिका नृपमूचुर्वयमशिवं हन्मः, कथं, एकोऽवक् अस्ति मे भूतं मन्त्रसिद्धं, तन्महारूपं विकृत्य पुरे भ्राम्येत् परं नेक्ष्यं, ईक्षितं रोषादीक्षकं हन्ति, तद् दृष्ट्वा योऽधोमुखस्तिष्ठेत् स रोगान्मुच्यते, राज्ञोचेऽलमेतेनाति-रोषणेन, द्वितीयोऽवक् मम भूतमस्ति, तन्महद्रूपं लम्बोदरविपुलकुक्षिपञ्चशीर्षैकांह्रिबीभत्सं कृत्वाऽट्टहासं मुञ्चद्-गायन्नृत्यद् दृष्ट्वा यो हसेत्तच्छिरः सप्तधा स्यात्, यः सुवागन्धा-द्यैरर्चति सः अरोगी स्यात्, राज्ञोचेऽलमेतेनापि, तृतीयोऽवक् मम श्यामं भूतं प्रियाऽप्रियकृतो दर्शनाद्रुग्भ्यो मोचयति, राज्ञोक्तमेतत्सम्यक्, ततस्तेन भूतेनाशिवं शान्तं तुष्टो राट्, हृष्टाः प्रजाः,पूजितः सर्वैः स मान्त्रिकः, एवं साधुर्मुण्डसमलाङ्गवस्त्राद्यैः क्रूरैर्निन्द्यमानो भक्तैः स्तूयमानः प्रियाप्रिये सहेत, श्रद्धावन्तं लघुकर्माणं कुर्यात्, एवं मनोगुप्त्युक्त्या चारित्रविनय उक्तः ॥१४॥

क्रोधासत्यताकरणादिना आत्मदमने फलमाह—

**अप्पा चेव दमेयव्वो, अप्पा हु खलु दुद्दमो ।**
**अप्पा दंतो सुही होइ, अस्सिं लोए परत्थ य ॥१५॥**

**व्याख्या—आत्मा चैव** रागद्वेषाऽकरणा**द्दमितव्यः**, हुरेवार्थे, **खलु** यस्मा**दात्मैव दुर्दमो** दुर्जयः, **आत्मा** दान्त उपशमं प्रापितोऽस्मिन् लोके परत्र लोके **सुखी भवेत्**, अदान्तात्मानश्चौरपारदारिकाद्या विनश्यन्ति ।

**अत्र चौरदृष्टान्तः**—पल्ल्यां द्वौ बन्धू चौरमुख्यौ, साधवः सार्थेन सार्द्धं तत्रागुः, घनो वर्षितुं लग्नः, चतुर्मासीस्थित्युपाश्रयार्थं तयोः पार्श्वे साधवोऽगुः, तावानन्दितौ भाविभद्रत्वात्, उपाश्रयोऽयाचि, तद्दानफलं उक्तं, ताभ्यां दत्तेऽस्थुश्चतुर्मासीं, विहारं कुर्वद्भिरन्यव्रताऽनर्हयोस्तयोर्निश्यां भोज्यनियमो दत्तः, पालयितव्यो यत्नेन, अन्यदा तौ चौरैः सह धाटीं गतौ, चौरा बहु गोमाहिषमानीय स्वस्थानासन्नमेताः, क्षुधिता एकं महिषं हत्वैके मासं पक्तुं लग्नाः, एके मद्यार्थं गताः, मांसपाचकैर्मन्त्रितं, अर्द्धे मांसे विषं क्षिपामो यथा

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

मद्यार्थगतास्तद्धुक्त्वा म्रियन्ते, घनं गोमाहिषं अस्मद्भागे एति, मद्यार्थगतैरप्यालोच्य मद्यार्द्धे विषं क्षिप्तं, सर्वेऽप्येकत्राऽमिलंस्तावताऽस्तोऽर्कः, तौ द्वौ नियमं स्मृत्वा न भुक्तौ, अन्ये मिथो द्रोहभाजः सर्वे सविषं मद्यमांसं भक्षित्वा मृता दुर्गतिं गताः, तौ इह परत्र सुखिनौ जातौ, एवं जिह्वेन्द्रियदमे सुखं, शेषेन्द्रियदमेष्वेवं सुखं स्यात् ॥१५॥

किं भवेद् यन्नात्मानं दमयेदित्याह–

**वरं मे अप्पा दंतो, संजमेण तवेण य ।**

**माहं परेहिं दमंतो, बंधणेहिं वहेहि य ॥१६॥**

**व्याख्या**–मया **आत्मा** आत्माधारत्वाद्देहो वा **दान्तो** दमं ग्राहितो दुश्चेष्टातो व्यावर्त्तितो वरं श्रेष्ठः, केन **संयमेन** पञ्चाश्रवविरत्यादिना, **तपसा** वाऽनशनादिना, **अहं परैरन्यैर्बन्धनैर्व्र**ध्राद्यै**र्वधै**र्दण्डताडनाद्यै**र्मा दान्तः** खेदितः स्याम् ।

**अत्र सेचनको दृष्टान्तः**–यथा वने हस्तियूथे महति यूथेशो जातान् कलभानऽहन्, तत्रैका करिणी सगर्भा दध्यावथ कलभं जातं रक्षामीति लङ्गमामाऽपासरत्, यूथेशेन प्रतीक्ष्य प्रतीक्ष्य यूथे क्षिप्ता, एवं साऽपसरन्ती दिने दिने विलम्ब्य एकद्वित्र्यहोभिरपि यूथेऽमिलत्, प्रसवकाले ऋष्याश्रमं दृष्ट्वा आलीनाऽसूत कलं, तस्य ऋषिपुत्रैः सह पुष्पाराममसेकात् सेचनकाह्वा कृता, स यौवने यूथं दृष्ट्वा यूथेशं हत्वा स्वयं यूथेशोऽभूत, माऽन्यापि हस्तिन्यत्रैवं कुर्यादिति तं आश्रमं बभञ्ज, ऋषयो रुष्टाः पुष्पफलपूर्णकराः **श्रेणिकं** आगुरूचुश्च, सर्वलक्षण**सेचनको** गन्धेभो वने त्वदर्होऽस्ति, नृपो गजाय वनं ययौ, इभः सुर्याश्रितस्तयाऽवधिज्ञानाद्, ज्ञातं **सेचनकः श्रेणिके**न ग्राह्य एवेति, ततः सुर्योक्तं, 'पुत्र वरं अप्पा दंतो, मा परेहिं दम्मंतो बंधणेहिं' इत्यादि, इभः स्वयं रात्रौ गत्वा राजालानस्तम्भं श्रितः, प्राता राज्ञा स्वर्णहारादिनाऽर्चि, यथास्य स्वयं दमनान्महान् गुणोऽभूत् तथा मुक्त्यर्थिनोऽपि सकामनिर्जरया गुणोऽकामनिर्जरया तु न ॥१६॥

अथ गुर्वनुवृत्तिविनयमाह–

**पडिणीयं च बुद्धाणं, वाया अदुव कम्मुणा ।**

**आवी वा जइ वा रहसे, नेव कुज्जा कयाइ वि ॥१७॥**

**व्याख्या–बुद्धानां** ज्ञाततत्वानां **प्रत्यनीकं** प्रतिकूलं, **चः** पूर्त्तौ, **नैव कुर्यात्**, किं त्वमपि किञ्चिज्जानीषे इत्यादिरूपया **वाचा, अथवा** संस्तारकक्रमकरांह्रिस्पर्शादिना **कर्म्मणा आविर्वा** जनसमक्षं **यदि वा रहस्येव** एकान्ते, एवकारः **'शत्रोरपि गुणा वाच्या दोषा वाच्या गुरोरपि'** इति कुमतिनाशार्थः, **कदाचित्** खरोक्ता**वपि** ॥१७॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

शुश्रूषणाविनयं गाथाभ्यामाह–

**न पक्खओ न पुरओ, नेव किच्चाण पिट्ठओ ।**
**न जुंजे ऊरुणा ऊरुं, सयणे नो पडिस्सुणे ॥१८॥**

**व्याख्या–कृत्याना**माचार्यादीनां **पक्षतो** यमलं दक्षिणे वामे भागे **नो**पविशेत् तत्पङ्क्त्युपवेशनेन साम्यादविनयः स्यात्, गुरोश्च वक्रालोकात् स्कन्धग्रीवादिबाधाभावः, **न पुरतो**ऽग्रत उपविशेत् वन्दारूणां गुर्वास्याऽनीक्षणाद्यैरप्रीतेः, **नैव पृष्ठतः** पृष्टदेशमाश्रित्य, द्वयोर्मुखाऽनीक्षणात्, आसनोपवेशादिनाऽऽत्मीये**नोरुणा** गुरूणा**मूरुं न युज्यान्न** घटयेत्, ऊरुकथनेन शेषाङ्गस्पर्शपरिहारो ज्ञेयः, **शयने** शय्यायां शयित आसीनो वा **न प्रतिश्रुणुयात्**, एवं कुर्म इति न प्रतिजानीयात्, किं तु योजिताञ्जलिः समेत्य पादपतनपूर्वं अनुगृहीतोऽहमिति मन्यमानो भगवन्निच्छामोऽनुशिष्टिमिति वदेत् ॥१८॥

**नेव पल्हत्थियं कुज्जा, पक्खपिंडं व संजए ।**
**पाए पसारिए वावि, न चिट्ठे गुरुणंतिए ॥१९॥**

**व्याख्या–पर्यस्तिकां** जानुजङ्घोपरि वस्त्रवेष्टनेन, **नैवं कुर्यात्, पक्षपिण्डं वा** बाहुद्वयपिण्डात्मकं न कुर्यात्, **पादौ वापि न प्रसारयेत्,** अपेरितस्ततो न विक्षिपेदित्यर्थः, पादौ प्रसारितौ कृत्वा **न तिष्ठेत्, गुरोरन्ते**ऽत्यासन्ने, एवं अवष्टम्भोच्चपदाय च पादादि च न कुर्यात्, किन्तूचितदेशे विधिना तिष्ठेत् ॥१९॥

पुनः प्रतिश्रवणाविधिमाह–

**आयरिएहिं वाहित्तो, तुसिणीओ न कयाइ वि ।**
**पसायपेही नियागट्ठी, उवचिट्ठे गुरुणं सया ॥२०॥**

**व्याख्या–आचार्यैः** उपाध्यायाद्यै**र्व्याहृतः** शब्दितः, **कदाचित्** ग्लानाद्यवस्थाया**मपि तूष्णीको न भवेत्,** प्रसादोऽयं यदन्यसद्भावेऽपि मां दिशन्ति गुरव इति प्रेक्षितुं आलोचयितुं शीलमस्येति **प्रसादप्रेक्षी** प्रसादार्थी वा गुरुपरितोषाभिलाषी **नियोगार्थी उपतिष्ठेत्,** मस्तकेन वन्दे इति वदन् उपसर्पेत् **गुरुं सदा** ॥२०॥

**आलवंते लवंते वा, न निसीइज्ज कयाइ वि ।**
**चइऊण आसणं धीरो, जओ जत्तं पडिस्सुणे ॥२१॥**

**व्याख्या–धीरो** बुद्धिमान् परीषहाक्षोभ्यो वा गुरौ **आलपति** ईषल्लपति, लपतीति वारंवारं **लपति, न निषीदेत् कदाचिदपि** व्याख्यादिना व्याकुलत्वेऽपि **आसनं**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

पादपुञ्छनादि **त्यक्त्वा यतो** यत्नवान्, यद्वा **यत** इति यत्र गुरवस्तत्र गत्वा, 'जत्तं' ति प्राकृतत्वात् बिन्दुलोपे **यद्** गुरवो वदन्ति तत्, यात्रां संयमयात्रां वा कार्यतया **प्रतिश्रुणुयात्** स्वीकुर्यात् ॥२१॥

उक्तः प्रतिश्रवणविधिः, पृच्छाविनयमाह–

**आसणगओ न पुच्छिज्जा, नेव सिज्जागओ कया ।**
**आगम्मुक्कुडूओ संतो, पुच्छिज्जा पंजलीउडो ॥२२॥**

**व्याख्या–आसनगत** आसनासीनः सूत्रादिकं **न पृच्छेत्, नैव शय्यागतः** संस्तारकगतः पृच्छेत्, रोगाद्यवस्थां विना **कदाचिद**पि बहुश्रुतत्वेऽपि संशये पृच्छेत्, नत्ववज्ञया, **आगम्य** गुर्वन्तिकमेत्य **उत्कुडुको (उत्कटिको)** मुक्तासनः, कारणे पादपुञ्छनादिगतः **सन् शान्तो** वा **पृच्छेत्** सूत्रादिकं, **प्राञ्जलिपुटः** कृताञ्जलिः ॥२२॥

गुरुविनयमाह–

**एवं विणयजुत्तस्स, सुत्तं अत्थं च तदुभयं ।**
**पुच्छमाणस्स सीसस्स, वागरेज्ज जहा सुयं ॥२३॥**

**व्याख्या–एव**मुक्तप्रकारेण **विनययुक्तस्य पृच्छतः शिष्यस्य** स्वयं दीक्षितस्योपसंपन्नस्य वा **सूत्रं** **कालिकोत्कालिकादि, अर्थं तदुभयं** सूत्रार्थात्मकं **वा व्यागृणीयात् यथा श्रुतं** गुरुभ्यो यथाऽऽकर्णितं न तु सबुद्ध्यैव ज्ञातम् ॥२३॥

शिष्यस्य वाग्विनयमाह–

**मुसं परिहरे भिक्खू, न य ओहारिणिं वए ।**
**भासादोसं परिहरे, मायं च वज्जए सया ॥२४॥**

**व्याख्या–भिक्षुर्मृषां** भूतनिह्नवादिकं **परिहरेत्, नचावधारिणीं** निश्चयात्मिकां **वदेत्,** गमिष्याम एव आगमिष्याम एव वक्ष्याम एवेति **भाषादोषं** सावद्यानुमोदनाद्यं सर्वं चकारमकाराद्यं च **परिहरेत्, मायां च** क्रोधादींश्च भाषादोषहेतून् **सदा वर्जयेत्** ॥२४॥

किञ्च–

**न लविज्ज पुट्ठो सावज्जं, न णिरट्ठं न मम्मयं ।**
**अप्पणट्ठा परट्ठा वा, उभयस्संतरेण वा ॥२५॥**

**व्याख्या–पृष्टः** सन् **सावद्यं न लपेत्,** तथा पश्चात् सावद्यानुमोदना, भाषादोषः स्वयमेव भाषणे उक्तोऽत्र परप्रश्नेऽप्युक्त इति **न** पौनरुक्त्यं, **निरर्थं** दशदाडिमादि, एष

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

वन्ध्यासूरित्यादि, न **मर्मगं,** त्वं काण इत्यादि जन्मकर्मादि वा, संक्लेशोत्पादकत्वात्, तथा **आत्मार्थं परार्थं उभयार्थं अन्तरेण वा** कार्यं विना वा न लपेत् ॥२५॥

उपाधिदोषांस्त्याजयति—

**समरेसु अगारेसु, संधीसु य महापहे ।**
**एगो एगत्थिए सद्धिं, नेव चिट्ठे न संलवे ॥२६॥**

**व्याख्या—समरेषु** खरकुटीषु, यतः **चूर्णिः "समरं नाम जच्छ लोहकारा हिट्ठा कम्मं करिंति"** एवं नीचास्पदेषु, यद्वा द्रव्यसमरा जनसंहारकारिणो, भावतस्तु रागादिवैरि-व्यापारास्तेषु सत्सु, अत्र भावसमरैरधिकारः, **अगारेषु** गृहेषु, **सन्धिषु** च गृहद्वयान्तरालेषु, **महापथेषु** राजमार्गादौ च, **एक एकया स्त्रिया सार्द्धं नैव तिष्ठेत्,** ऊर्द्ध्वस्थानस्थो न भवेत्, न तया सह **संभाषं कुर्यात्,** एवं द्वयोः साध्वोर्द्वयोः स्त्रियोरपि वक्तुं स्थातुं च न युक्तम् ॥२६॥

स्खलितेषु गुरुभिः शिष्यते शिष्यविधिः—

**जं मे बुद्धाणुसासंति, सीएण फरूसेण वा ।**
**मम लाभो त्ति पेहाए, पयओ तं पडिस्सुणे ॥२७॥**

**व्याख्या—बुधा यन्मां अनुशासन्ति** शिक्षां ग्राहयन्ति **शीतेन** सोपचारवचसा **शीलेन** वेति पाठे, शीलं महाव्रतादि, उपचारात्तज्जनकं वचोऽपि शीलं, यद्वा शीलः समाधौ, ततः **शीलेन** समाधिकृता भद्र ! भवादृशामिदमनर्हमित्यादिना, तथा **परुषेण** कर्क्कशेन वचसा मम **लाभोऽ**प्राप्तार्थप्राप्तिरूपोऽयं, यन्मामनाचारिणममी सदाचारे स्थापयन्तीति **प्रेक्षया** बुद्ध्या **प्रयतः** प्रयत्नवान्, **पदतः** सूत्रपाठाद्वा **तदनुशासनं प्रति-शृणुयात्,** कार्यतयाङ्गीकुर्यात् ॥२७॥

प्राज्ञाप्राज्ञस्वरूपमाह—

**अणुसासणमोवायं, दुक्कडस्स य चोयणं ।**
**हियं तं मन्नई पन्नो, वेसं होइ असाहुणो ॥२८॥**

**व्याख्या—**प्राज्ञ उपाये मृदुपरुषभाषणादौ भव**मौपायं,** यद्वा उप समीपे पतन मुपपातस्तत्र भव**मौपपातं,** गुरुसंस्तारास्तरणविश्रामणादिकृत्यविषय**मनुशासनं,** चान्य-दुःकृतस्य **चोयणं** प्रेरणं, हा किमिदमित्थमाचरितमित्यादि **हितमि**हपरलोकोपकारि **मन्यते।** **तदनुशासनादिरसाधोर**साधुभावस्य **द्वेष्यं** द्वेषोत्पादकं **भवति** ॥२८॥

तथा—

**हियं विगयभया बुद्धा, फरुसं पि अणुसासणं ।**
**वेसं तं होइ मूढाणं खंतिसोहिकरं पयं ॥२९॥**

**व्याख्या—विगतभयाः** सप्तभयरहिता **बुद्धास्तत्वज्ञा हितं** पथ्यं **मन्यन्ते, परुषमपि** कर्क्कशमप्य**नुशासनं** गुरुशिक्षां, यद्वा **हितं** विगतभयाद् **बुद्धा**चार्यादेरुत्पन्नं **परुषमप्यनुशासनं द्वेष्यं** द्वेषकरं **तदनुशासनं मूढानां भवति,** क्षान्तिः क्षमा, शुद्धिर्निर्मलता तत्करं **क्षान्तिशुद्धिकरं** मार्द्दवादिशुद्धिकरं, च **पदं** ज्ञानादिगुणस्थानम् ॥२९॥

ज्ञानस्वरूपमुक्त्वा स्थितिविनयमाह—

**आसणे उवचिट्ठिज्जा, अणुच्चे अकुए थिरे ।**
**अप्पुट्ठाई णिरुट्ठाइ णिसीइज्जप्पकुकुए ॥३०॥**

**व्याख्या—आसनं** पीठादि वर्षासु , ऋतुबद्धे पादपुञ्छनादि, तत्र पीठादा**वुपतिष्ठेत्** उपविशेत् , **अनुच्चे** द्रव्यतो नीचे भावतस्त्वल्पमूल्ये गुर्वासनात् , **अकुचे**ऽस्पन्दमाने तस्य शृङ्गाराङ्गत्वात् , **स्थिरे** समपादस्थिते, अन्यथा सत्त्वविराधनात् 'अप्पुट्ठाई', अल्पमुच्छातुं शीलमस्ये**त्यल्पोत्थायी,** न पुनःपुनरुत्थानशीलः, निमित्तं विना नोत्थानशीलो **निरुत्थायी, निषीदत्** आसीत् **अल्पकुकुचः** करादिभिरल्पमेव चलन् , यद्वा अल्पं करचरणभ्रूभ्रमणाद्य-सच्चेष्टात्मकमस्ये**त्यल्पकौकुचः** ॥३०॥

स्थितिविनयमुक्त्वा चरणकरणविनयमाह—

**कालेण निक्खमे भिक्खू, कालेण य पडिक्कमे ।**
**अकालं च विवज्जित्ता, काले कालं समायरे ॥३१॥**

**व्याख्या**—सप्तम्यर्थे तृतीया, **भिक्षुः काले** प्रस्तावे **निःक्रामेत्** गच्छेत् भिक्षायै, अकालनिर्गमे आत्मक्लामग्रामगर्हादिदोषाः, **काले च प्रतिक्रामेत्** प्रतिनिवर्त्तेत भिक्षाटनात्, स्वाध्यायाऽहान्यै, अलाभे अल्पलाभे वा तथा, **अकालं** तत्तत्क्रियाया असमयं **वर्जयित्वा काले** प्रत्युक्षेणादिवेलायां **कालं** तत्तत्कालार्हां क्रियां, **समाचरेत्,** कर्षककृषिक्रियावदिष्ट-फलहेतोः ॥३१॥

भिक्षाविधिमाह—

**परिवाडीए न चिट्ठिज्जा, भिक्खु दत्तेसणं चरे ।**
**पडिरूवेण एसित्ता, मियं कालेण भक्खए ॥३२॥**

Jain Education International 2010_02          For Private & Personal Use Only          www.jainelibrary.org

**व्याख्या**–**भिक्षुः परिपाट्यां** गृहपङ्क्तौ **न तिष्ठेत्,** पङ्क्तिस्थबहुगृहभिक्षायै नैकत्र तिष्ठेत्, तत्र दायकदोषाऽदृष्टेः, यद्वा भुञ्जाननृपङ्क्त्यां न तिष्ठेत्, अप्रीत्यदृष्टाकल्याणतादि-दोषसंभवात् । किञ्च **दत्तैषणां,** दाने एषणां ग्रहणैषणां दोषान्वेषणात्मिकां **चरेदा**सेवेत, **प्रतिरूपेण** प्रधानरूपेण, यद्वा **प्रतिबिम्बं** चिरन्तनमुनीनां यद्रूपं **तेन** पतद्ग्रहादिधारणात्म-केनान्यलिङ्ग्यसदृशेन वेषेण गवेषणादोषत्यागेन **एषयित्वा** गवेषयित्वा, एवं ग्रासैषणापि सूचिता, **मितं** परिमितं, बहुभुक्तौ स्वाध्यायहान्यादिदोषात्, **कालेन** "**नमोक्कारेण पारित्ता**" इत्याद्यगमोक्तप्रस्तावेनाहृताविलम्बितादिरूपेण वा **भक्ष्येद्** भुञ्जीत ॥३२॥

पुरायाताऽन्यभिक्षुसम्भावे विधिमाह–

**नाइदूरमणासन्ने, नन्नेसिं चक्खुफासओ ।**
**एगो चिट्ठिज्ज भत्तट्ठा, लंघिता तं नइक्कमे ॥३३॥**

**व्याख्या**–**अतिदूरे** देशे **न** तिष्ठेत्, तत्र तन्निर्गमाज्ञानादेषणाशुद्ध्यसम्भवाच्च, **अनासन्ने** आसन्ने भूभागे **न** तिष्ठेत्, अन्यभिक्षुकाऽप्रीतिभावात्, 'नन्नेसिं' **अन्येषां** गृहस्थानां **चक्षुःस्पर्शे** दृग्गोचरे **न** तिष्ठेत्, यदुतैष भिक्षुः निःक्रमणं प्रतीक्षते इति गृहिणो यथा न विदन्ति, किन्तु विविक्तदेशस्थ **एकः** पुराप्रविष्टोपरि द्वेषरहितस्**तिष्ठेत्** भिक्षार्थं, **तं** भिक्षुकं **लङ्घयित्वा [नातिक्रामेद्]** न प्रविशेत्, तल्लङ्घने चाऽप्रीत्यपवादभावात् ॥३३॥

तथा–

**नाइउच्चे व णीए वा, नासन्ने नाइदूरओ ।**
**फासुयं परकडं पिंडं, पडिगाहिज्ज संजए ॥३४॥**

**व्याख्या**–संयत **उच्चै**र्मालादौ **नीचे** भूमिगृहादौ पिण्डं भिक्षां **न** प्रतिगृह्णीयात्, तत्रोत्क्षेपनिक्षेपाऽदर्शनात्, दायकाऽपायादिसंभवात्, यद्वा साधुविशेषणं, द्रव्यभावाभ्यां **नात्युच्चो न नीचः,** उच्चस्थानस्थ ऊर्ध्वीकृतग्रीवो वा द्रव्यतः, भावतोऽहं लब्धिमा-नितिमदवान् इत्युच्चः, निम्नस्थानस्थो नतग्रीवो वा द्रव्यतो नीचः, भावतस्तु न मयाऽद्य किञ्चिल्लब्धमिति दैन्यवानिति, **न आसन्ने** स्थाने, **अतिदूरतो न** तिष्ठेत्, आसन्नाति-दूरयोर्जुगुप्साशङ्काऽनेषणादिदोषाः स्युः, **पिण्डं प्रासुकं परकृतं,** परेण गृहिणात्मार्थं परार्थं वा कृतं **प्रतिगृह्णीत संयतः** ॥३४॥

एवं सूत्रद्वयेन गवेषणाग्रहणैषणायुक्तिमुक्त्वा ग्रासैषणाविधिमाह–

**अप्पपाणप्पबीयंमि, पडिच्छिन्नंमि संवुडे ।**
**समयं संजये भुंजे, जयं अप्परिसाडियं ॥३५॥**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या**—अल्पशब्दोऽभावे, अल्पाः प्राणाः प्राणिनो यत्र, तद**ल्पप्राणं**, अल्पानि असन्ति बीजानि शाल्यादीनि यत्र **तदल्पबीजं**, **तस्मिन्** प्राणो मुखवायुः स द्वीन्द्रियादीनां स्यादतः प्राणा द्वीन्द्रियाद्याः, तत्रापि **प्रतिच्छन्ने** उपर्याच्छादिते, अन्यथा सम्पातिमपातात्, **संवृते** पार्श्वतः कटकुट्यादिना सङ्कटद्वारे, अटव्यां कुडङ्गादिषु वा, अन्यथा दीनादियाचने दानादानयोः पुण्यबन्धद्वेषादिदर्शनात्, उपाश्रयादिषु **समकं** अन्यैः साधुभिः साकं, नत्वेकाक्येव रसागाद्धर्यात् **संयतो भुङ्क्ते**, 'जयं'ति **यतमानः** सुर २ चब २ कस २ काद्यकुर्वन् **अपरिसाटिकं** परिसाटिमकुर्वन् ॥३५॥

अथ तत्र वाग्यतनामाह—

**सुकडि त्ति सुपक्कि त्ति, सुच्छिन्ने सुहडे मडे ।**
**सुनिट्ठिए सुलट्ठि त्ति, सावज्जं वज्जए मुणी ॥३६॥**

**व्याख्या—सुकृतं** सुष्ठु निर्वर्त्तितमन्नादि, **सुपक्वं** घृतपूर्णादि, **सुच्छिन्नं** शाकपत्रादि, **सुहृतं** शाकपत्रादेस्तिक्तत्वादि, सूपविलेपकादिना मात्रकादेर्घृतादि वा, **सुष्ठु मृतं** घृतादि सक्थुसूपादौ, **सुष्ठु निष्ठितं** गाढनिष्ठां रसप्रकर्षान्तं गतं, '**सुलट्ठि**'त्ति-सर्वैरपि रसादिभिः प्रकारैः शोभनमिति, एवम्प्रकारमन्यदपि सावद्यं वचो वर्जयेन्मुनिः । यद्वा **सुष्ठु कृतं** वदनेनारेः प्रतिकृतं, **सुष्ठु पक्वं** मांसादि, छिन्नो न्यग्रोधादिः, **सुहृतं** कदर्यादर्थजातं, **सुहृतो** वा चौरादिः, **सुमृतो**ऽयं प्रत्यनीकद्विजादिः, **सुनिष्ठितो**ऽयं चैत्यकूपादिः, **सुलष्टो**ऽयं गजादिः, इति सामान्येन सावद्यं वचो वर्जयेत्, निरवद्यं तु **सुकृतमनेन** धर्मध्यानादि, सुपक्वमस्य वाग्विज्ञानादि, **सुच्छिन्नं** स्नेहबन्धादि **सुहृतमुपकरणं** स्वजनोपसर्गं **सुहृतं** वा कर्मानीकादि, **सुमृतमस्य** पण्डितमरणमर्त्तुः, **सुनिष्ठितो**ऽसौ साधवाचारे, **सुलष्टं** शोभनमस्य तपोऽनुष्ठानादि, इति वदेत् ॥३६॥

एवं प्रतिरूपविनय उक्तः, अथ पण्डितबालयोः शिक्षायां गुरोः समश्रमौ भवतः, यतः—

**रमए पंडिए सासं, हयं भद्दं व वाहए ।**
**बालं सम्मइ सासंतो, गलियस्स व वाहए ॥३७॥**

**व्याख्या—पण्डितान्** शिष्यान् स्खलितादौ **शासन्** शिक्षयन् **रमते** रतिमान् स्यात् गुरुः, कमिव क इत्याह—**भद्रं हयमिव** यथा भद्रं शुभं हयं शासन् **वाहको**ऽश्वन्दमा रतिमेति, **बालमन्यं** (मूर्खं) **शासन् श्राम्यति**, स हि सकृदुक्त एव कृत्यं न कुरुते, पुनः पुनस्तमाज्ञापयन् खिद्यते, कमिव कः ? इत्याह—**गलिमश्वमिव वाहकः** ॥३७॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

बालाशयस्तु—

**खड्डुगा( या ) मे चवेडा मे, अक्कोसा य वहा य मे ।**
**कल्लाणमणुसासंतो, पावदिट्ठि त्ति मण्णइ ॥३८॥**

**व्याख्या—खड्डुकाष्टक्करा मे, चपेटाः** करतलाघाता **मे, आक्रोशा**श्चासत्यभाषा **मे, वधाश्च** दण्डकादिघाता **मे,** इति दुर्विचारयुतो बालः शिष्यः **कल्याणमि**हपरलोकहित-**मनुशासन्तं** शिक्षयन्तं गुरुं **पापदृष्टिं** पापबुद्धिं **मन्यते,** यथा पापोऽयं मां हन्ति निघृणो **गुप्तिपाल**वत्, ततः खड्डुकाद्या एव मे गुरुभिर्दीयन्ते नान्यत् किञ्चिदिष्टमस्तीत्यर्थः, यद्वा वाग्भिरप्यनुशास्यमानः खड्डुकादिरूपा वाचोऽसौ मन्यते ॥३८॥

विनीताशयस्तु—

**पुत्तो मे भाय णाइ त्ति, साहू कल्लाण मन्नइ ।**
**पावदिट्ठी उ अप्पाणं, सासं दासि त्ति( व ) मन्नइ ॥३९॥**

**व्याख्या—पुत्र** इव **मे, भ्रातेव मे, ज्ञातिर्मे इति** बुद्ध्याचार्यो मामनुशास्तीति **साधुः** सुशिष्यः **कल्याणं** गुरुमनुशासनं वा **मन्यते, पापदृष्टिस्तु** कुशिष्यः पुनस्तेन **शास्यमानमात्मानं दासमिव मन्यते,** यथासौ दासवन्मामाज्ञापयति ॥३९॥

विनयतत्त्वमाह—

**न कोवए आयरिअं, अप्पाणं वि न कोवए ।**
**बुद्धोवघाइ न सिया, न सिया तोत्तगवेसए ॥४०॥**

**व्याख्या**—[विनयी शिष्यः] **आचार्यम**न्यमपि च विनयार्हं **न कोपयेत्, आत्मानमपि** गुर्वादिताडनया **न प्रकोपयेत्,** कथञ्चित् सकोपतायामपि **बुद्धोपघाती** आचार्योपघातकृन्न **स्यात्** ।

**युगप्रधानोपघातिकुशिष्यवत्**—यथा कश्चिद्गुरुर्युगप्रधान उद्यतविहार्यपि क्षीण-जङ्घाबल एकस्थाने तस्थौ, तत्र श्राद्धैस्तीर्थाधारोऽयमित्यर्हस्निग्धमधुराहारादि तस्मै सदा ददे, तच्छिष्यास्तु गुरुकर्मत्वात् कदाचिद् दध्युर्यत् कियच्चिरमयमजङ्गमः पाल्यः ? तमनशनं जिग्राहयिषवो भक्तश्राद्धदत्तार्हाहारं तस्मै न ददुः, अन्तप्रान्ताद्यानीय विषण्णा इव तत्पुर ऊचुः किं कुर्मो ? यदीदृशामपि वोऽर्हान्नाद्यैरविवेकाः श्रद्धाः सदापि दातुमशक्ताः, श्राद्धांश्च ते प्रोचुर्यदिहं मुमुक्षवः स्निग्धाहारमार्या नेच्छन्ति, संलेखनामेव चिकीर्षवः, तत् श्रुत्वा सकोपखिन्नाः श्राद्धा गुरुमेत्य सगद्गदं जगुः भगवन् ! विश्वार्केष्वर्हत्सु चिराती-

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तेष्वपि प्रतपत्सु भवत्सु शासनं भाति, तत् किमकाले संलेखनारब्धा ? न वयमेषां निर्वेदायेति भवद्भिश्चिन्त्यं, यतः शिरःस्था अपि यूयं न भाराय न शिष्याणां न कदापि । तत इङ्गितज्ञैस्तैर्गुरुभिर्ज्ञातं यथामच्छिष्यकृत्यमेतत्, तत्किमदोऽप्रीतिदायुषा ? न धर्मिणा कस्याप्यप्रीतिरुत्पाद्येति ध्यात्वा गुरवो मुत्कलितमेव तत्पुर ऊचुः, कियच्चिरमजङ्गमैर-स्माभिर्वैयावृत्त्यं कार्याः साधवो यूयं च ? तदुक्तमार्थमेव स्वीकुर्म इति तानसौ संस्थाप्य भक्तं प्रत्याख्यातवान् । एवं विनयी शिष्य बुद्धोपघाती न स्यात् । तथा **तोत्रगवेषको न स्यात्**, तोत्रं द्रव्यतः प्राजनकः, भावतस्तु दोषोद्भावकतया व्यथाकृद्वचनं विनयिशिष्यो न गवेषयति, किमहमेषां जात्यादिदोषं वच्मीति न गवेषयति ॥४०॥

तथा–

**आयरियं कुवियं नच्चा, पत्तिएण पसायए ।**
**विज्झ( वि )ज्ज पंजलिउडो, वइज्जा न पुण त्ति य ॥४१॥**

**व्याख्या–आचार्यं** उपाध्यायादिं च **कुपितं**, तत्कृतबहिःकोपं अशिक्षणा-ऽदृष्टिदानादिं **ज्ञात्वा** प्रतीत्युत्पादकं वचः **प्रातीत्यिकं** शपथाद्यपि **तेन**, यद्वा **प्रीत्या** साम्नैव **प्रसादयेत्** प्रसन्नीकुर्यात्, **विध्यापयेत्** उदीर्णकोपानलमपि उपशामयेत् **प्राञ्जलिपुटः**, इत्थं कायिकं मानसिकं च विध्यापनोपायमुक्त्वा वाचिकं वक्तुमाह–**वदेत्** यथेदं क्षमितव्यं **न पुनरि**त्थमाचरिष्यामीति

यतः–

**जह दीवा दीवसयं, पदिप्पइ दिप्पई व सो दीवो ।**
**दीवसमा आयरिया, दिप्पंति परं च दीवंति ॥१॥** [ उ.नि./गा.८ ] ॥४१॥

अथ विनयगुणमाह–

**धम्मज्जियं च ववहारं, बुद्धेहिं ( आ )यरियं सया ।**
**तमायरंतो ववहारं, गरहं नाभिगच्छइ ॥४२॥**

**व्याख्या**–यत्तदोर्नित्यसम्बन्धात् यो **धर्मेण** क्षान्त्यादिनाऽ**र्जितो बुद्धैराचरितश्च व्यवहारः** प्रत्युपेक्षणादिः, विशेषेण अपहरति पापकर्मेति **व्यवहारस्तमाचरन् गर्हां** अविनीतोऽयमिति नाभिगच्छति, यद्वा गुरुविनयमाह–धर्माय साधु**र्धर्म्यो जीतो** व्यवहारः 'प्राकृतत्वाल्लिङ्गव्यत्ययः' अधुनागमादिव्यवहारव्यवच्छेदेन जीतव्यवहारात्, स **बुद्धै**राचार्यै**राचरितः**, सदा त्रिकाल-विषयत्वाज्जीतस्य, **तं** व्यवहारं प्रायश्चित्तदानरूप**माचरन् गर्हां** दण्डरुचिरयं निर्घृणो वेति गर्हां **गुरुर्नाभिगच्छति**, न चायं ममोपकारी मे शिष्य इति न दण्ड्यः ॥४२॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

किं बहुना ?—

**मणोगयं वक्कगयं, जाणित्ता आयरियस्स उ ।**
**तं परिगिज्झ वायाए, कम्मुणा उववायए ॥४३॥**

**व्याख्या—मनोगतं** मनसि स्थितं **वाक्यगतं** च कृत्यं, **तु**शब्दात् कायगतमपि **ज्ञात्वा, आचार्यस्य तन्**मनोगतादि **परिगृह्या**ङ्गीकृत्य **वाचा** इदमित्थं करोमीतिरूपया, **कर्मणा** क्रियया तत्करणेन त**दुपपादयेत्** कुर्यात् । '**मणोरुइं**' पाठे **रुचिं** इच्छाम् ॥४३॥

अथ सुविनीतलक्षणमाह—

**वित्ते अचोइए निच्चं, खिप्पं हवइ सुचोइए ।**
**जहोवइट्ठं सुकयं, किच्चाइं कुव्वइ सया ॥४४॥**

**व्याख्या—वित्तो** विनयादिसर्वगुणख्यातः, **अचोदितो नित्यं** क्षिप्रं भवति **सुचोदितः** सुप्रेरितस्तेन क्षिप्रं कृत्येषु प्रवर्त्तते, नानुशयाद्विलम्बते इत्यर्थः, **यथोपदिष्टं** उपदिष्टाऽनतिक्रमेण **सुष्ठु कृतं** यथास्यात्तथा **कृत्यानि** करोति, **सदा सता** वा भाव्येन प्रकारेण ॥४४॥

अथ निगमयति—

**नच्चा नमइ मेहावी, लोए कित्ती से (य) जायइ ।**
**हवइ किच्चाण सरणं, भूयाणं जगई जहा ॥४५॥**

**व्याख्या—ज्ञात्वैत**दध्ययनार्थं **नमयति** तत्कृत्यं प्रति प्रह्वीभवति **मेधावी** अध्ययनार्थ-धारणाशक्तिमान् **मर्यादावर्त्ती** वा, **तस्य च लोके कीर्त्तिः**, सुलब्धमस्य जन्म, निस्तीर्णो भवोऽनेनेत्यादि श्लाघा **जायते**, पुनः स **सत्कृत्यानां** पुण्यानुष्ठानानां दुर्विनीताऽयोग्यानां **शरणमा**श्रयो **भवेत् । भूतानां** प्राणिनां **यथा जगती** पृथ्वी आश्रयः ॥४५॥

अथ विनयफलमाह—

**पुज्जा जस्स पसीयंति, संबुद्धा पुव्वसंथुया ।**
**पसन्ना लाभइस्संति, विउलं अट्ठियं सुयं ॥४६॥**

**व्याख्या—पूज्याः** सूर्याद्या **यस्य प्रसीदन्ति,** कथम्भूताः ? **सम्बुद्धाः** सम्यक् ज्ञातवस्तुतत्वाः, **पूर्वसंस्तुताः** पूर्वं वाचनाकालादर्वाक् विनयेन परिचिताः, **प्रसन्नाः** पाठान्तरे **सम्पन्ना** ज्ञानादिगुणपूर्णाः, अथवा सम्यगऽविपरीताः प्रज्ञा येषां ते सम्प्रज्ञा आचार्या **लम्भयिष्यन्ति विपुलं श्रुतं,** कथम्भूतं श्रुतम् ? **आर्थिकम**र्थो मोक्षः कार्यम-स्येति आर्थिकम् ॥४६॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

श्रुतप्राप्तौ ऐहिकामुष्मिकफले गाथाद्वयेनाह—

**स पुज्जसत्थे सुविणीयसंसए, मणोरुई चिट्ठइ कम्मसंपया ।**
**तवोसमायारिसमाहिसंवुडे, महज्जुइ( ई ) पंचवयाणि पालिया ॥४७॥**

**व्याख्या—स** साधुः **कर्मसम्पदा**, कर्म दशविधचक्रवालसामाचारी, तस्याः सम्पत्तयोपलक्षितस्तिष्ठति, कथम्भूतः ? पूज्यं श्लाघ्यं शास्त्रमस्येति **पूज्यशास्त्रं**, विनीतस्य शास्त्रं विशेषात् पूज्यते, यद्वा प्राकृतत्वात् पूज्यः शास्ता गुरुरस्येति **पूज्यशास्तृकः**, विनीतो हि विनेयः शास्तारं पूज्यमपि विशेषतः पूजां प्रापयति, यद्वा पूज्यश्चासौ शस्तश्च सर्वत्र प्रशंसावत्त्वेन **पूज्यशस्तः**, सुष्ठु अतिशयेन विनीत उपनीतः प्रसादितगुरुणैवशास्त्रार्पणेन संशयो यस्येति **सुविनीतसंशयः**, सुविनीता वा संसत्परिषदस्येति **सुविनीतसंसत्कः**, विनीतस्य हि विनीतैव पर्षत् स्यात् । मनसो गुरुसम्बन्धिनो रुचिरिच्छाऽस्मिन्निति **मनोरुचिर्न** स्वरुचिचारी, यद्वा तस्य **कर्मसम्पत्** अष्टकर्मवृद्धिस्तिष्ठति अग्रतो न वर्द्धते । **'मणोरुइं चिट्ठइ कम्मसंपयं'** इति पाठे मनोरुचितफलदातृत्वेन **मनोरुचितां कर्मसंपदं** शुभप्रकृतीनामनुभवस्तिष्ठति । **नागार्जुनीयपाठे 'मणिच्छियं संपयमुत्तमं गइ त्ति'** इह च सम्पदं यथाख्यातचारित्रसंपदं इति । **तपसः समाचारी** समाचरणं, **समाधिश्चि**त्तस्वास्थ्यं ताभ्यां **संवृत्तो** निरुद्धाश्रवः, महती द्युतिस्तपस्तेजस्तेजोलेश्या वा यस्य स **महाद्युतिः**, **पञ्चमहाव्रतानि** हिंसानिवृत्त्यादीनि **पालयित्वा**ऽखण्डमाराध्य ॥४७॥

**स देवगंधव्वमणुस्सपूईए, चइत्तु देहं मलपंकपुव्वयं ।**
**सिद्धे वा हृ( भ )वइ सासए, देवे वा अप्परए महिड्डिए ॥४८॥ त्ति बेमि**

**व्याख्या—स** विनीतविनयो **देवै**र्वैमानिकज्योतिषै**गन्धर्वै**र्गन्धर्वनिकायोपलक्षितैर्व्यन्तरभुवनपतिभि**र्मनुष्यै**र्महानृपाद्यैः **पूजितः** सन् **मलपङ्कपूर्वकं**, रक्तशुक्रे मलपङ्कौ तत्पूर्वकं तद्भवदेहं **त्यक्त्वा सिद्धः शाश्वतः** सर्वकालस्थायी, न तु **बुद्ध**वत्तीर्थनिकारे आगन्ता, **देवो वाऽल्परतो**ऽल्पशब्दोऽभावेऽरतो लवसप्तमादि**रल्परजा** वाऽल्पबद्ध्यमानकर्मा, **महाऋद्धि**श्चक्रिभञ्जनाद्या तृणाग्रात्, स्वर्णकोटिपाताद्याविष्करणशक्तिर्वा यस्य साधोः, स भवति, देवविशेषणं चैतत्, **इति ब्रवीमि** गणधराद्युपदेशान्न तु स्वधिया ॥४८॥

**इति विनयश्रुताख्यमाद्यमध्ययनमुक्तम् ॥१॥**

● ● ●

Jain Education International 2010_02          For Private & Personal Use Only          www.jainelibrary.org

# द्वितीयं परीषहाध्ययनम् ॥

अथ विनयः परीषहसहैरपि कार्य इति द्वितीयं **परीषहा**ध्ययनं, इदं चाष्टमपूर्वमध्यगमभूत् । यतः–

**कम्मप्पवायपुव्वे, सत्तरसे पाहुडंमि जं सुत्तं ।**

**सनयं सउदाहरणं, तं चेवं इहं पि नायव्वं ॥१॥ इति निर्युक्तिः** [ गा.६९ ] ।

**सुअं मे आउसंतेणं भगवया एवमक्खायं इह खलु बावीसं परिसहा समणेणं भगवया महावीरेणं कासवेणं पवेइआ जे भिक्खू सुच्चा णच्चा जिच्चा अभिभूय भिक्खायरियाए परिव्वयंतो पुट्ठो नो विहनिज्जा ॥१॥**

**व्याख्या–सुधर्म**स्वामी **जम्बू**प्रत्याह–**श्रुतं मया आयुष्मन्नि**ति शिष्यस्यामन्त्रणं, महायुष एव सूत्रार्थचिरस्थायित्वात्, अव्युच्छित्त्यादिलाभात्, तत्र त्रिजगत्प्रतीतेन **भगवता** अष्टमहाप्रातिहार्यादिसमग्रैश्वर्ययुक्तेन एवं यतिसह्यमाख्यातं, अथवा 'आउसंतेणं ति' भगवद्विशेषणं **आयुष्मता भगवता** चिरजीविना, मङ्गलवचनमेतत्, यद्वा परार्थप्रवृत्त्यादिना श्रेष्ठमायुर्धरता, न तु मुक्तिं प्राप्यापि तीर्थलोपादौ पुनरिहायातेन, यतः उक्तं कैश्चित्–

**ज्ञानिनो धर्मतीर्थस्य, कर्त्तारः परमं पदं ।**

**गत्वा गच्छन्ति भूयोऽपि भवं तीर्थनिकारतः** ॥ [ ]

एवं ह्यनुन्मूलितरागादिदोषत्वात्तद्वचसोऽप्रामाण्यमेव स्यात् । निःशेषोन्मूलने कर्मणां न पुनरागतिः, यद्वा '**आवसंतेणं**' मयेत्यस्य विशेषणं, **आङि**ति गुरूक्तमर्यादया **वसता** मया श्रुतं, गुरुमर्यादावर्त्तिरूपत्वाद् गुरुकुलवासस्य, ततश्च ज्ञानादिलाभः "**नाणस्स होइ भागी**" [उ.प.६८२] इत्यादि यद्वा 'आमुसंतेण' **आमृशता** मया भगवदंह्रियुगं करतलेन स्पृशता, ज्ञाताखिलशास्त्रेणापि गुरुविश्रामणादिविनयकृत्यं कार्यं यतः–"**जहाहि अग्गी जलणं नमंसे**" [द.अ.९।१।११] इत्यादि ।

यद्वा 'आउसंतेणं ति' प्राकृतत्वात् **आयुषमाणेन** श्रवणविधिमर्यादया गुरून्

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सेवमानेन, विधिनैवार्हदेशस्थेन गुरुपार्श्वे श्रव्यं, न तु गुरुविनयभीत्या गुरुपर्षदुत्थितेभ्यः 'इह खलु बावीसं' ति **इह** लोके प्रवचने वा **खलु** निश्चितं वाक्यालङ्कारे वा, **द्वाविंशतिः परीषहाः** परि समन्तात् सह्यन्ते उदिता साधुभिर्निर्जरार्थं मनःशुद्ध्येति परीषहाः, श्राम्यतीति **श्रमण**स्तपस्वी, **तेन भगवता** श्री**महावीरेण काश्यपेन** काश्यपगोत्रेण **प्रवेदिताः** प्रकर्षेण स्वयं साक्षाद् ज्ञाताः, नान्यतः पुरुषादपौरुषेयागमाद्वा, **यान्** परीषहान् **भिक्षुः श्रुत्वा** गुर्वन्तिके **ज्ञात्वा** यथावदवबुद्ध्य, **जित्वा** पुनः पुनरभ्यासेन परिचितान् कृत्वा, **अभिभूय** सर्वथा तत्सामर्थ्यमुपहत्य, भिक्षोश्चर्या विहितक्रियासेवनं **भिक्षुचर्या** । ''**भिक्खायरियाए बावीसं परीसहा उईरिज्जन्ति**'' [ ] इति तद्ग्रहणं तया **परिव्रजन्** समन्ताद्विहरन्, **स्पृष्ट** इत्यादि श्लिष्टः परीषहैर्नो विविधैः प्रकारैः संयमशरीरोपघातेन **विनाशं प्राप्नुयात्** ॥

इत्युक्त उद्देशः, पृच्छामाह—

**कयरे खलु ते बावीसं परीसहा समणेणं भगवया महावीरेणं कासवेणं पवेइया ? जे भिक्खु सुच्चा नच्चा जिच्चा अभिभूय भिक्खायरियाए परिव्वयंतो पुट्ठो नो विहन्निज्जा । इमे खलु ते बावीसं परीसहा समणेणं भगवया महावीरेणं कासवेणं पवेइया, जे भिक्खु सुच्चा णच्चा जिच्चा अभिभूय भिक्खायरियाए परिव्वयंतो पुट्ठो नो विहन्निज्जा ।**

**तं जहा-दिगिंछापरीसहे १. पिवासापरीसहे २. सीयप० ३. उसिणप० ४. दंसमसगप० ५. अचेलप० ६. अरइप० ७. इत्थीप० ८. चरियाप० ९. निसीहियाप० १०. सिज्जाप० ११. अक्कोसप० १२. वहप० १३. जायणाप० १४. अलाभप० १५. रोगप० १६. तणफासप० १७. जल्लप० १८. सक्कार-पुरक्कारप० १९. पन्नाप० २०. अन्नाणप० २१. सम्मत्तप० २२ ॥२॥**

**व्याख्या—कतरे** किं नामानस्ते परीषहा इति, शेषं प्राग्वत् । निर्देशमाह—**इमे** तेऽनन्तरं वक्ष्यमाणतया हृदि वर्त्तमानत्वात् प्रत्यक्षास्ते इति ये त्वया पृष्टाः, शेषं प्राग्वत्, **तद्यथे**ति प्रारम्भे । परीति सर्वप्रकारेण सह्यते इति परीषहाः, **दिगिञ्छापरीषहः**, इह दिगिञ्छा देश्या क्षुदुच्यते, सैवात्यन्ताकुलताहेतुरिति परीषहः ।१। पातुमिच्छा पिपासा सैव **पिपासापरीषहः** ।२। एवं **शीत** ।३। **उष्ण** ।४। **दंशमशक** ।५। **अचेलपरीषहाः** ।६। अचेलत्वं वस्त्राऽरागः, **अरतिः** संयमाऽरतिः ।७। **स्त्रीपरीषहः** ।८। **चर्या** विहारः सैष **परीषहः** ।९। **नैषेधिकीपरीषहः** ।१०। नैषेधिकी स्वाध्यायभूः, **शय्यापरीषहः** ।११। शय्या

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

उपाश्रयः, **आक्रोशपरीषहः** ।१२। **वधपरीषहः** ।१३। याचना **याञ्चापरीषहः** ।१४। **अलाभपरीषहः** ।१५। **रोगपरीषहः** ।१६। **तृणस्पर्शपरीषहः** ।१७। **जल्लपरीषहः** ।१८। जल्लो मलः, सत्कारो वस्त्रादिभिः पूजनं, पुरस्कारोऽभ्युत्थानादिसंपादनं, तावेव परीषहः **सत्कारपुरस्कारपरीषहः** ।१९। **प्रज्ञा** ज्ञानं सैव **परीषहः** ।२०। **अज्ञानं** साधोः स्पष्टमति-श्रुताद्यशक्ति, तदेव **परीषहः** ।२१। दर्शनं सम्यग्दर्शनं, पुण्यफलसंदेहे दर्शनातिचारो वा, तदेव परीषहो **दर्शनपरीषहः** ।२२। इत्थं नामतः परीषहानुक्त्वा द्वाभ्यां गाथाभ्यामेकैक-स्वरूपमाह–अत्र निर्युक्तौ **सनत्कुमार**चक्री–

**कण्डू १ अभत्तच्छन्दो २, अच्छीणं वेयणा ३ तहा कुच्छी ४।**
**खासं ५ सासं ६ च जरं ७, अहियासे वाससत्तसए ॥१॥** [ उ.नि./गा.८४ ]

**परीसहाणं पविभत्ती, कासवेणं पवेइया ।**
**तं भे उदाहरिस्सामि, आणुपुव्विं सुणेह मे ॥१॥**

**व्याख्या**–परीषहाणामेषा **प्रविभक्तिः** पृथक्ता **काश्यपेन** श्रीवीरेण **प्रवेदिता** प्ररूपिता, **तां** परीषहप्रविभक्तिं **भवतामुदाहरिष्यामि, आनुपूर्व्या** क्रमेण, **शृणुत मम** उदाहरत इति, शिष्यादरज्ञप्त्यै शृणुतेति ॥१॥

इह सर्वपरीषहाणां क्षुत्परीषहो दुःसह इत्यादौ तमाह–

**दिगिंछापरिगए देहे, तवस्सी भिक्खु थामवं ।**
**न छिंदे न छिंदावए, न पए न पयावए ॥२॥**

**व्याख्या**–**दिगिंछा** क्षुत्तया **परिगते** व्याप्त**देहे** सति, तपोऽस्यास्तीति **तपस्वी** विकृष्टाष्टमादितपाः, स च गृहस्थादिरपि स्यादतो भिक्षुर्यतिः, सोऽपि कीदृक् ? स्थाम बलं संयमविषयं तदस्यास्तीति **स्थामवान्**, एवंविधोऽसौ न छिन्द्यात् स्वयं फलाद्यं, न **छेदये-द्वान्यैः**, स्वयं **न पचेन्नान्यैः पाचयेत्**, नान्यं छिन्दन्तं वा पचन्तं वाऽनुमन्येत । एवं न क्रीणाति, न क्रापयति, न क्रीणन्तमनुजानाति, क्षुत्पीडितोऽपि नवकोटीशुद्धिं न त्यजेत् ॥२॥

किञ्च–

**कालीपव्वंगसंकासे, किसे धमणिसंतए ।**
**मायण्णे असणपाणस्स, अदीणमणसो चरे ॥३॥**

**व्याख्या**–काली काकजङ्घा तस्याः पर्वाणि स्थूराणि, मध्यानि तनूनि च स्युस्तत-स्तपस्वी **काकजङ्घापर्वसदृशबाहुजङ्घाद्यङ्गः कृश**स्तपसाऽस्थिचर्मावशेषशरीरः, धमनीभिः

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

शिराभिः संततो व्याप्तो **धमनीसन्ततः**, ईदृगवस्थोऽपि अशनपानस्य मात्रां परिमाणं जानातीति **मात्रज्ञः**, न लौल्यान्मात्राधिकाहारः, तथा **अदीनमना** अनाकुलितचित्तश्चरेत् संयमाध्वनि यायात्, ततः क्षुधार्दितो नवकोटीशुद्धाहारावाप्तावपि लौल्यान्नातिमात्रोपभोगी, तदप्राप्तौ च न दैन्यवानित्येवं क्षुत्परिषह्यमाणः क्षुत्परीषहः सोढः स्यात् ।

**क्षुत्परीषहे हस्तिमित्रकथा** यथा–**उज्जयिन्यां हस्तिमित्रो** गृहपति**र्हस्तिभूति**सुतेन सह प्रव्रज्य कदापि साधुभिः सह **भोजकटं** प्रति प्रस्थितः, अटव्यां तस्यांह्रि कण्टकेन विद्धः, स चलितुमशक्तः, प्राणान्तां वेदनां ज्ञात्वैकत्राद्रिदर्यां स्थित्वा भक्तं प्रत्याचख्यौ, सर्वसाधून् भक्त्या स क्षामयित्वा **भोजकटं** प्रति तानचालयत् । क्षुल्लस्तत्पार्श्वे स्थाष्णुरपि बलात्तैश्चालितो दूरं गत्वा तान् वञ्चयित्वा व्याघुट्यागात्, पितुः पार्श्वे च स्थितस्तत्र स साधुस्तदैव वेदनया विपद्य शुभध्यानान्मृतो महर्द्धिर्देवो जातः, क्षुल्लस्तं मृतं न वेत्ति, लब्धनिद्र एवायमस्तीति वेत्ति । स च सुरः प्रयुक्तावधिः क्षुल्लककृपया स्वदेहमाश्रित्य क्षुल्लमूचे वत्स भिक्षायै याहि? तेनोचे क्व ? सोऽवगेते वनवृक्षा दृश्यन्ते, एतन्निवासिनो जनास्तव भिक्षां दास्यन्तीति । स तथेत्युक्त्वा तत्र गत्वा धर्मलाभं ददौ, ततो वृक्षाधः सालङ्कारो हस्तो निर्गत्यास्मै भिक्षां दत्ते, स एवं दिने दिने भिक्षां गृह्णन् साधुदेहस्थसुरेण सहालापपरोऽस्थात्, अथ ते साधवस्तत्र देशे दुर्भिक्षे जाते तेनैव पथा चलिता द्वितीयवर्षे तामटवीमगुः, क्षुल्लो दृष्टस्तैः पृष्टः क्व तिष्ठसि ? सोऽवक् यत्र क्षान्तकोऽस्ति, उक्तश्च भिक्षालाभस्ततस्ते तत्र गताः, दृष्टं च साधोः शुष्काङ्गं, तैर्ज्ञातं देवीभूतेन साधुना कृपा कृता, तत्र क्षान्तेन सोढः क्षुत्परीषहो, न क्षुल्लेन, अथवा क्षुल्लेनापि सोढः, यतोऽस्य साधून् मुक्त्वा क्षान्तपार्श्वमागच्छतो नायं भावोऽभूद्यदहमिह भिक्षां न लप्स्यामि, सचित्तफलाद्याहरिष्यामि चेति । ततो ज्ञात्वा प्रतिक्रान्तं क्षुल्लं साधवः सहाका**र्यवन्त्यां** गताः, यथा ताभ्यां क्षुत्परीषहः सेहे तथान्येनापि सह्य इत्युक्तः क्षुत्परीषहः प्रथमः ॥३॥

भिक्षार्थमटतस्तृट् स्यादिति तत्परीषहमाह–

**तओ पुट्ठो पिवासाए, दोगुंछी लद्धसंजमे ।**
**सीओदगं न सेविज्जा, वियडस्सेसणं चरे ॥४॥**

**व्याख्या–ततः** क्षुत्परीषहान्तको वा भिक्षुः **पिपासया स्पृष्टो**ऽभिद्रुतः, **जुगुप्सी** अनाचारस्य, 'लद्धसंजमे' **लब्धसंयमो** । यद्वा लज्जया सम्यग् यतते कृत्यं प्रत्यादृतो भवतीति **लज्जासंयतः शीतोदकं** सचित्ताम्बु **न सेवते**, न पानादिना भजेत् । 'वियडेत्ति' **विकृतस्या**ग्न्यादिना विकारं प्रापितस्याऽचित्तोदद**स्यैषणाय** गवेषणार्थं 'चतुर्थ्यर्थे

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

द्वितीया' **चरेत्** कुलेषु पर्यटेत्, अथवा **एषणां** एषणासमितिं **चरेत्** । 'चरेः सेवायामपि स्याद्' इति पुनः पुनः **सेवते**, एकश एषणाया अशुद्धावपि न तृष्णाधिक्यादनेषणीयं लायात् ॥४॥

किञ्च—

**छिन्नावाएसु पंथेसु, आउरे सुपिवासिए ।**
**परिसुक्कमुहेऽदीणे, तं तितिक्खे परीसहं ॥५॥**

**व्याख्या**—छिन्नोऽपगत आपातोऽन्यतोऽन्यतो जनागमो येषु ते **छिन्नापाता** विविक्ता इत्यर्थः, **तेषु पथिषु** मार्गेषु यान् 'आउरे' **आतुरो**ऽत्यन्ताकुलतनुः 'सुपिवासिए' **सुष्ठु पिपासित**स्तृषितः, थूत्कारशोषात् परिशुष्कमुखः स चाऽदीनश्च **परिशुष्कमुखाऽदीनः** साधु**स्तं तृट्परीषहं तितिक्षे( ष्ये )त** सहेतेति । (पाठान्तरे)–'**सव्वओ य परिव्वए**' **सर्वयोगानाश्रित्य, चः** पूर्तौ सर्वप्रकारं **परिव्रजेत्** संयमाध्वनि यायात् ॥

**तृट्परीषहे धनशर्मक्षुल्लकथा—उज्जयिन्यां धनमित्रो** वणिक्, **धनशर्मा** तत्सुतः, तौ संवेगात् प्रव्रज्यान्यदा साधुभिः सहावेलाया**मेलगपुर**पथि प्रस्थितौ, क्षुल्लस्तृषितो जातः, शनैः शनैः पश्चात् पतितः, क्षान्तोऽपि तत्कृते शनैर्याति, साधवोऽग्रे गताः, अन्तरा नद्यागात् । क्षान्तो वत्सेदं जलं पिबेत्युक्त्वा नदीमुत्तीर्य मा ममैष शङ्का करोत्वितिमतिर्मनाग् दूरे गत्वा स्थितः, क्षुल्ल एतस्तृषा शुष्कास्योऽपि नद्यम्बु नाऽपात् सचित्तमिति । एके आहुः–सम्प्रति सचित्तमप्यम्बु पिबामि पश्चाद् गुर्वन्तिके आलोचनां लास्यामीति विचिन्त्य तेन जलं पातुमञ्जलिर्धृतस्तावच्चिन्तितं हा कथमेतान् जीवान् पिबामीति स नापाज्जलं । तृषा मृतः सुरीभूतोऽवधिना ज्ञात्वा मृतक्षुल्लदेहमधिष्ठाय क्षान्तमनुययौ, क्षान्तोऽपि क्षुल्ल एतीत्यचलत् । ततो देवेन साधुभक्त्या गोकुलानि पथि विकुर्वितानि, साधुभिस्तत्र तक्राद्यात्तं, एवं व्रजिकापरम्परया साधवः पुरं प्राप्ताः, अन्त्यगोकुले क्षुल्लदेवो निजज्ञप्त्यै साधोरेकस्य विण्टिकां व्यस्मारयत् । ततः स साधुस्तां वीक्षितुं चलितस्तत्र विण्टिकां दृष्ट्वा गोकुलं चादृष्ट्वा विस्मितो व्याघुट्य तं वृत्तान्तं सर्वसाधुभ्यः कथयामास । ततः साधुभिर्देव-सान्निध्यं क्षान्तं, देवेन क्षान्तं विना साधवो नताः, एष मां दुर्गतौ क्षेपकः सचित्ता-म्बुपानबुद्धिदत्वादिति स जगौ च । एवं तृट् सह्या । इत्युक्तो द्वितीयस्तृट्परीषहः ॥५॥

क्षुत्तृडार्त्तस्य शीतमपि स्यादित्याह—

**चरंतं विरयं लूहं, सीयं फुसइ एगया ।**
**नाइवेलं मुणी गच्छे, सुच्चा णं जिणसासणं ॥६॥**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या**—'चरन्तं' ग्रामानुग्रामं मुक्तिपथे वा **व्रजन्तं**, 'विरयं' संसारा**द्विरतं**, 'लूहं' स्नानस्निग्धभोजनत्यागेन **रूक्षं** साधुं **एकदा** शीतादिकाले **शीतं स्पृशति**, तदा मुनि**रतिवेलं** वेलां स्वाध्यायादिसमयमतिक्रम्येत्यर्थः, शीतभीतः स्थानान्तरं **न गच्छेत्** । 'सोच्चा' **श्रुत्वा, णं** वाक्यालङ्कारे, **जिनशासनं** जिनागमं, अन्यो जीवोऽन्यो देहस्तीव्राश्च नरकादिषु शीतवेदना जीवैर्भुक्ता इत्यादि चिन्तयेत् ॥६॥

तथा—

**न मे निवारणं अत्थि, छवित्ताणं न विज्जए ।**
**अहं तु अग्गिं सेवामि, इइ भिक्खू न चिंतए ॥७॥**

**व्याख्या**—'मे' **मम** शीतवातादे**र्निवारणं** सौधादि **नास्ति**, 'छवित्ताणं' **त्वक्शरणं** वस्त्रकम्बलादि **न विद्यते**, शीतापास्तये **चाग्निं सेवे इत्यपि भिक्षुर्न चिन्तयेत्**, चिन्तानिषेधे सेवनं दूरापास्तमेव ॥

**शीते उदाहरणं—राजगृहे** चत्वारो वयस्याः श्री**भद्रबाहो**रन्ते धर्मं श्रुत्वा दीक्षिताः, बहुश्रुता जाताश्च, एकाकिप्रतिमां प्रपन्नाः, एकदा सर्वे विहरन्तो हेमन्ते **राजगृहं** प्राप्ताः, तेषामयं कल्पो यत्र यस्य चरमा पौरुषी स्यात्तेन तत्र प्रतिमया स्थेयमिति । ते चत्वारोऽपि भिक्षाचर्यां कृत्वा तृतीयपौरुष्यां निवृत्त्या **वैभारे** गम्यमिति विचिन्त्य चलिताः, एकस्य **वैभार**गुहाद्वारे, द्वितीयस्योद्याने, तृतीयस्योद्यानासन्ने, चतुर्थस्य च पुरोपान्ते चरमा पौरुषी जाता । ते तत्रैव क्रमेण कायोत्सर्गेऽस्थुः, तदा महाशीतेऽद्रिवाते वाति मेरुवदकम्पाः शीतं सम्यक् सहमाना रात्रेराद्यद्वित्रितुर्ययामेषु क्रमान्मृत्वा स्वर्गताः, **मरणसमाधिप्रकीर्णके** एते श्री**भद्रबाहु**नाम्नः पूर्वसूरेः शिष्याः शीतात् सिद्धाः, एवं शीतपरीषहः सह्यः, उक्तस्तृतीयः शीतपरीषहः ॥७॥

शीतविपक्षमुष्णं, शीतर्त्तोरनु ग्रीष्मे उष्णमिति वा तत्परीषहमाह—

**उसिणपरितावेणं, परिदाहेण तज्जिए ।**
**घिंसु वा परितावेणं, सायं नो परिदेवए ॥८॥**

**व्याख्या—उष्णं** उष्णवद्भूशिलादि, **तेन परितापस्तेन**, तथा **परिदाहेन**, बहिः स्वेदमलाभ्यां वह्निनाऽर्ककरैर्वा, अन्तश्च तृष्णया, **तर्जितो**ऽतिपीडितः, 'घिंसु वा' **ग्रीष्मे वा** सरदि वा **परितापेना**र्ककरादिजेन तर्जितः **सातं** सुखहेतुन् प्रति **न परिदेवेत**, हा कदा शीतांशुर्भावीति ॥८॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

उपदेशान्तरमाह–

**उण्हाभितत्तो मेहावी, सिणाणं नो विपत्थए ।**
**गायं नो परिसिंचिज्जा, न वीएज्ज य अप्पयं ॥९॥**

**व्याख्या–मेधावी** मर्यादानभिवर्त्ती **उष्णाभितप्त** उष्णेनात्यन्तं पीडितः **स्नानं** शौचं **नाभिप्रार्थयेत्, गात्रं** शरीरं **नो परिषिञ्चेत्** शीकराद्यैः, न **वीजयेच्च** तालवृन्तादिना, 'अप्पयं' **आत्मानं**, अथवाऽ**ल्पकं**, किं पुनर्बहु ? ॥

**अत्रार्हन्नकमुनिकथा**-**तगरापुर्यां अर्हन्मित्रा**चार्यान्तिके **दत्तो** वणिक् **भद्रा**भार्या-ऽ**र्हन्नक**पुत्राभ्यां दीक्षितः, स क्षुल्लेन भिक्षाचर्यां न कारयेत्, इष्टैः पोषयेच्च, किमेवमयं पोष्यते ? क्षमः, किं भिक्षाचर्यां न कार्यते ? इति जानन्तोऽपि साधव दाक्षिण्यात् किञ्चिन्नोचुः, क्षान्ते मृते साधुभिस्त्र्यहं भिक्षां दत्वा क्षुल्लो गोचराय प्रहितः स ग्रीष्मे-ऽधस्तप्तधूल्योद्ध्वं त्वर्ककरैस्तप्तस्तृडाद्याकुलः सुकुमालाङ्गो वर्त्मासन्नसौधच्छाये विश्रामायास्थात्, सौधेशा प्रोषितपतिका **धन**वणिक्पत्नी गवाक्षस्था तद्रूपाक्षिप्ता दास्या तमाकार्यापृच्छत् किं याचसे ? सोऽवक् भिक्षां, तया मोदका दत्ताः, स्निग्धदृशा पश्यन्त्या चोक्तः किं त्वयेदृक् दुःखं व्रतमात्तं ? सोऽवक् सुखार्थं, सोचे ततो मया सह भोगान् भुङ्क्ष्व ? अलं दुर्भगदुःस्थार्हकष्टक्रियया, पश्चिमवयसि कुर्या व्रतं, एवमनुकूलोपसर्गैरुष्णेन च भग्नमनाः स तद्वचः प्रतिपेदे । उक्तं च–

**दृष्टाश्चित्तेऽपि चेतांसि, हरन्ति हरिणीदृशः ।**
**किं पुनस्ताः स्मितस्मेर-विभ्रमभ्रमितेक्षणाः ॥१॥ [ ]**

स तया सह भोगान् भुञ्जानः सुखं तस्थौ, साधुभि**श्चार्हन्नकः** सर्वत्राशोधि, न लब्धः, **भद्रा** साध्वी तन्माता पुत्रशोकेनोन्मत्ता जाताऽ**र्हन्नकेति** विलपन्ती यं यं पश्यति शृणोति तं तम**र्हन्नक**स्त्वमित्युद्गिरन्ती त्रिकचतुष्कादिषु भ्राम्यन्ती **अर्हन्नके**न गवाक्षस्थेन तथावस्था सा दुःखिनी ग्रहिला दृष्टा, अहो मेऽज्ञातकार्यकारिता च यन्मातेयं कष्टेऽपातीति ध्यायान् स संवेदादुत्तीर्य तस्या अङ्घ्र्योः पतित्वोचे मातरहम**र्हन्नकः** कुलाङ्गारः, तं प्रेक्ष्य सा स्वस्थ-चित्तोचे पुत्र प्रव्रज ? तेनोक्तं मातर्नाहं प्रापकर्मभिः शक्नोमि संयमं कर्त्तुं, यदि वक्षि तदानशनं लामि, साऽवगेवमपि कुरु ? परं मा साधुर्भूत्वा दुर्गतिं यायाः, तुच्छं विषय-सुखमनन्तदुःखहेतुः, उक्तं च–

**वरं प्रविष्टं ज्वलितं हुताशनं, न चापि शीलस्खलितस्य जीवितं ।**
**वरं हि मृत्युः सुविशुद्धकर्मणो, न चापि भग्नं चिरसञ्चितं व्रतं ॥१॥ [ ]**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

इत्यादि सावद्ययोगं प्रत्याख्याय चतुःशरणादि कृत्वा तप्तशिलायां पादपोपगमने स्थितोऽसौ मुहूर्त्तेन मृक्षणवद्विलीनः सुध्यानः स्वर्गतः, पूर्वं तेनोष्णपरीषहो न सोढः, पश्चात् सम्यक् सेहे, एवमन्यैः सह्यः, उक्तस्तुर्य उष्णपरीषहः ॥९॥

ग्रीष्मादनु वर्षासु दंशादयः स्युरित्याह–

**पुट्ठो अ दंसमसएहिं, समरेव महामुणी ।**
**नागो संगामसीसे वा, सूरो अभिहणे परं ॥१०॥**

**व्याख्या–महामुनिः चः** पूर्त्तौ, **दंशमशकै**र्यूकाद्यैश्च **स्पृष्टः, सम एव** स्पृष्टाऽस्पृष्टावस्थयोस्तुल्य एव स्यात् । रेफः प्राकृतत्वात्, व इवार्थे भिन्नक्रमश्चेति, क इव ? **नाग** इव हस्तीव, यथा हस्ती शरैस्तुद्यमानोऽपि **सङ्ग्रामशीर्षे** रणशिरसि **शूरः** पराक्रमवान् स्यात्, यद्वा शूरो योधस्ततोन्तर्भावितोपमार्थत्वाद्वाशब्दस्य च गम्यत्वात् **शूरवद्वा परं** शत्रु**मभिहन्या**ज्जयेद्दंशादीन् दंशादिभिस्तुद्यमानोऽपि ॥१०॥

यथा जयेत्तथाह–

**न संतसे न वारिज्जा, मणंपि न पदूसए ।**
**उवेह न हणे पाणे, भुंजंते मंससोणियं ॥११॥**

**व्याख्या–न सन्त्रसेत्** दंशादिभ्यो नोद्विजेत्, तान्न **वारयेत्**, तुदतां माभूत् पीडा मामेषामिति आस्तां वचनादि, **मनोऽपि न प्रदूषयेत्**, न दुष्टं कुर्यात्, किन्तूपेक्षेत औदासीन्येन पश्येत् **प्राणान्** प्राणिनो, **मांसं रक्तं च भुञ्जानान्न हन्यात्** ॥

**दंशमशके कथा श्रमणभद्रमुनेः–चम्पायां जितशत्रो राज्ञः** सुतः **श्रमणभद्रो** युवराजो **धर्मघोष**गुरोर्धर्मं श्रुत्वा प्रव्रज्यैकाकिप्रतिमां प्रपन्नोऽधो भूमौ विहरन् शरत्कालेऽटव्यां प्रतिमास्थो रात्रौ मशकैर्भक्ष्यते, स तान्न प्रमार्जयत् सम्यक् सेहे, पीतशोणितो मृतः स्वर्गतः, एवमधिसह्यं । उक्तः पञ्चमो दंशपरीषहः ॥११॥

मशकाद्यर्दितो जीर्णवस्त्र सन् वस्त्रार्थी न स्यादित्याह–

**परिजुन्नेहिं वच्छेहिं, होक्खामि त्ति अचेलए ।**
**अदुवा सचेलए होक्खं, इति भिक्खू न चिंतए ॥१२॥**

**व्याख्या–वस्त्रैः परिजीर्णैः** समन्तात् हानिमुपगतैरह**मचेलक**श्चेलहानो **भविष्यामि,** अल्पदिनभावित्वादेषामिति दैन्यं, **अथवा सचेलकश्चे**लान्वितो **भविष्यामि**, जीर्णवस्त्रं हि मां दृष्ट्वा कश्चित् श्राद्धो वस्त्राणि दास्यतीति हर्षं **भिक्षुर्न चिन्तयेत्** ॥१२॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

यतः—

**एगया अचेलए होइ, सचेलयावि एगया ।**
**एयं धम्मं हियं नच्चा, नाणी नो परिदेवए ॥१३॥**

**व्याख्या—एकदा** जिनकल्पे, स्थविरकल्पेऽपि दुर्लभवस्त्रादौ निमित्तं विना प्रावरणे जीर्णादिवस्त्रत्वे वाऽ**चेलको भवति** । (पाठान्तरे-'**अचेले सइयं होइ' स्वयमेव** न तु पराभियोगतो**ऽचेलो भवति**) सचेलः **सवस्त्रश्चाप्येकदा** स्थविरकल्पाद्यवस्थायां स्यात्, **एतदि**त्यवस्थौचित्येनोभयं अचेलत्वं सचेलत्वं प्रत्युपेक्ष्याग्न्याद्यारम्भवारकत्वाभ्यां **धर्माय हितं ज्ञात्वा**, ज्ञानी, 'नग्ना एव तिर्यग्नारका' इति बोधात् शीतादौ किं मे शरणं ? इति **नो परिदेवयेत्** ॥

**अचलेपरीषहे कथा सोमदेवर्षेः—दशपुरपुरे सोमदेवः** पुरोहितो, **रुद्रा** भार्या, तयो**रार्यरक्षितफल्गुरक्षितौ** पुत्रौ, **आर्यरक्षितस्तोसलिपुत्रा**चार्याणामन्ते प्रव्रज्य श्री**वज्र**स्वामिसमीपे नवपूर्णानि साधिकान्यधीत्य लब्धाचार्यपदः **फल्गुरक्षिता**नुग्रहा**द्दशपुरं** प्राप्तस्तत्र च तेन स्वजनवर्गोऽदीक्षि मातृभ्रातृभगिनीभागिनेयादिः, **सोमदेव**स्तु पुत्रानु-रागे**णार्यरक्षित**सूरिभिः सहास्थात्, परं पुत्रीस्नुषादीनां पुरो नग्न इव कथं स्थास्यामीति न प्रव्रजति, आचार्यास्तमूचुर्दीक्षया जन्मफलं लात ? सोऽवक् चेद्वस्त्रशाटकच्छत्रपादत्राणयज्ञ-सूत्रकुण्डिकाद्यनुमन्यसे तदाहं दीक्ष्ये, गुरुभिस्तदपि प्रतिपद्य सोऽदीक्षि, चरणकरण-स्वाध्यायादिनिपुणश्च चक्रे । अन्यदिने गुरवश्चैत्यनत्यै गताः, तदा तच्छिक्षितलेखशालिकाः सर्वसाधून् क्षुल्लान्तान् तं त्यक्त्वाऽवन्दन्त, तदा वृद्धस्तदऽनत्या रुष्टस्तानाह रे मत्पुत्रपौत्र-दौहित्रमुखान् बालानपि यूयं वन्दध्वे, मां च न, तत्किमहं न दीक्षितोऽस्मि ? ते ऊचुः किं दीक्षितानां उपानत्करकब्रह्मसूत्रच्छत्रकानि स्युः ? तदा तेनाचिन्ति एतेऽपि मे चोयणां ददति तर्हि मुञ्चामीति गुरुष्वागतेषु नत्वोचे भगवन् छत्रकं मया मुक्तं, तैरूचे शुभं । पुनरेकदा बालश्राद्धैस्तस्मिन्ननते किमहं न दीक्षितोऽस्मीति पृच्छानन्तरं तैरूचे त्वत्पार्श्वे कर-कोऽस्तीत्युक्ते सोऽपि तेन मुक्तः, एवं यज्ञसूत्रादिसर्वं मोचितः, परं कटिपट्टकं तु न मुञ्चति। अथान्यदा तु सर्वान् वन्दामहे कटीपट्टकधरमेनं मुक्त्वेति बालश्राद्धैरुक्तं, स रुष्ट आह रे मां मा वन्दध्वं परं कटीपट्टकं न मोक्ष्ये । अथान्यदा कोऽपि तत्र साधुर्भक्तं प्रत्याख्याय मृतस्तदा तस्य कटीपट्टकत्याजनार्थं गुरुभिरूचे यः साधुं वहति तस्य महालाभः स्यात् । तत्र पूर्वदीक्षिताः संकेतात् पूर्वमुत्थिता वयं वहाम इति ब्रुवन्तस्तदाचार्यैरूचेऽस्मत्स्वजनाः किं निर्जरां नाप्नुयुर्यतो यूयं सर्वेऽप्युत्थिताः !! वयमपि वहाम एव । तदा वृद्ध उवाच पुत्र !

Jain Education International 2010_02　For Private & Personal Use Only　www.jainelibrary.org

किमत्र बह्वी निर्जरा ? ते ऊचुर्बाढं, सोऽवक् तर्हि साधुभिः सहाहमपि वहामि । तैरूचैऽत्रोपसर्गा उत्पद्यन्ते, बाला विलगन्ति, यदि सोढुं शक्नोषि तदोह्यतां, यदि च सम्यग् नाधिसहसे तदास्माकं न सुन्दरं स्यादेवं च स स्थिरीकृतः, अथ ते साधुमुत्पाट्य चलिताः, पृष्टतः संयता अप्युत्थितास्तावता सङ्केतितबालैर्विलग्य तस्य वृद्धस्य कटीपट्टको निष्कासितः, स लज्जाया मृतकं मुञ्चन्नन्यैरुक्तो मा मुञ्च ? तत्र तस्यान्येन साधुना मानोपेतं वासः कटिपट्टक इव कृत्वा दवरकेण बद्धं । स मार्गे मां प्रेक्षन्ते स्नुषाद्यास्तथाप्युपसर्ग-भीतस्तमुवाह । आगतश्च गुरुभिरूचे किमार्यैतत् ? सोऽवगुपसर्गोऽभूत्, सूरिणोचे आनयत शाटकं ? सोऽवक् किमथो शाटकेन ? 'जं दट्ठवं तं दिट्ठं'ति चोलपट्ट एवास्तु । एवं तेन पूर्वमचेलपरीषहो न सोढः पश्चाच्च सेहे । एवं सह्यः, उक्तः षष्ठोऽचेलपरीषहः ॥१३॥

अचेलस्याप्रतिबद्धविहारिणः शीतादिभिररतिः स्यादित्याह—

**गामाणुगामं रीयंतं, अणगारं अकिंचणं ।**
**अरई अणुप्पविसिज्जा, तं तितिक्खे परीसहं ॥१४॥**

**व्याख्या**—ग्रामो जिगमिषितः, अनुग्रामश्च तन्मार्गानुकूलः, एवं पुराद्यपि, ग्रामानुग्रामं **रीयमानं** विहरन्तं **अनगारं**, नास्य किञ्चन प्रतिबन्धास्पदं धनहेमाद्यस्तीत्य**किञ्चनं** निःपरि-ग्रहं प्रति यदि **अरतिः** संयमाऽधृति**रनुप्रविशेत्** मनो भिन्द्यात् **तामर**तिं **परीषहं** स **तितिक्षते** सहते ॥१४॥

यतः—

**अरइं पिट्ठओ किच्चा, विरए आयरक्खिए ।**
**धम्मारामे निरारंभे, उवसंते मुणी चरे ॥१५॥**

**व्याख्या—अरतिं पृष्टतः कृत्वा विरतो** हिंसादेः, आत्मा रक्षितो दुर्गतिहेतोर-पध्यानादेरनेने**त्यात्मरक्षितः**, आयो वा ज्ञानादिलाभो रक्षितोऽनेने**त्यायरक्षितो**, धर्मे आरमते रतिमान् स्यादिति **धर्मारामः**, यद्वा धर्म एवानन्दहेतुतया पाल्यतया वाऽऽरामो **धर्मारामस्तत्र** स्थितः, **निरारम्भ उपशान्त** एवंविधो **मुनिश्चरेत्** संयमाध्वनि, न पुनरुत्पन्नारतिरवधाव-नेच्छुः स्यात् ॥

**अरतिपरीषहे अर्हद्दत्तकथा**-**अचलपुरे जितशत्रु**राट्, तत्सुतो युवराट् **राद्धा**चार्याणां पार्श्वे धर्मं श्रुत्वा दीक्षां जग्राह । तेन सत्रा विहरन्तो गुरवोऽगुस्**तगरां** पुरीं । **राद्धा**चार्याणां स्वाध्यायशिष्या **आर्यराद्धाः** क्षपका **अवन्त्यां** सन्ति, तत्साधवस्**तगरा**मगुः, **राद्धा-चार्यैरवन्त्यां** कं निरुपसर्गमस्तीति पृष्टे ते आहुः, नृपपुरोधःपुत्रौ साधूनुद्वेजयतः, तद्युव-

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

राजर्षिः श्रुत्वा दध्यौ यो**ऽवन्त्यां** राजसूः साधूद्वेजकः स मद्भ्रातृव्यः संसारं मा भ्रमत्विति गुरूनापृच्छ्**यावन्त्यां** स ययौ । नताश्च तेन त**त्रार्यराद्धाः** क्षपकाः, वेलायां युवराज-साधुर्भिक्षार्थं चलितः, साधुभिः स्थापितो नास्थात्, एकस्मिन् गृहदर्शिके मार्गिते तैः क्षुल्लको दत्तः, तेन गृहाणि दर्शयता 'दर्शय तत्प्रत्यनीकगृहमिति जल्पन्' स राजगृहे नीतः, युवराजमुनिरथ भ्रातृगृहेऽक्षुब्धः प्रविष्टः, पुरोधोराजसूभ्यामुद्धताभ्यां दृष्टः, उत्थितौ तौ, साधुर्महत्स्वरं धर्मलाभं ददौ । तौ शठावेत्य हास्येनोचतुः साधो गातुं वेत्सि ? सोऽवग् वेद्मि, युवां वाद्यं वादयतं यथाहं गायामि । तौ तूर्यवादने प्रवृत्तौ परं न तु जानीतः, साधुनोचे रे कौलिकौ न किञ्चिज्जानीथः, तौ रुष्टौ साधोर्विलग्नौ, साधुना नियुद्धं जानता प्राक्कुटित्वा तदङ्गानि सन्धित उत्तारितानि, तौ हन्यमानावाराटिं मुञ्चतः, परिजनो वेत्ति एताभ्यां कुट्यमानो यतिराराटिं विधत्ते, साधुर्गतः, तन्त्रिणा तथावस्थौ तौ वक्तुमशक्तौ निश्चेष्टौ पश्यन्तौ दृष्टौ, राज्ञः पुरोधसश्चोक्तं, ताभ्यां तौ तथा दृष्ट्वा ज्ञातं नूनं केनापि साधुनैवं कृतौ । तन्त्रियुतो राजाऽर्य**राद्ध**पार्श्वमेत्यांह्र्योः पतितः, प्रोवाच च पूज्याः प्रसीदत पुत्रौ च जीवयत ? ते ऊचुः राजन्न विद्मोऽमुं वृत्तान्तं, अमुं प्राघूर्णकं पृच्छ ? राजोत्थाय तदङ्घ्रोः पतितस्तेनोचे धिक् ते राजत्वं यत्त्वं स्वसुतानपि न निगृह्णासि ! पश्चाद्राज्ञा बन्धुं ज्ञात्वा भक्त्या प्रसादयितुमारेभे । सोऽवग् यदीमौ प्रव्रजेतां तत्सज्जयामि नान्यथा । राज्ञा सपुरोधसा ताभ्यां च तत्स्वीकृतं । साधुना लोचं कृत्वा तौ सज्जितौ दीक्षितौ च । राजाङ्गजो निःशङ्कं संयममाराध, पुरोघःपुत्रः संयमं पालयन्नपि जातिमदाद्बलाद्दीक्षितोऽस्मीति दध्यौ । द्वावपि स्वर्गतौ ।

इतः **कौशाम्ब्यां तापसाख्यः** श्रेष्ठी मृत्वा स्वगृहे शूकरोऽभूज्जातिस्मरः, स निजे एव श्राद्धाह्नि पुत्रैर्हतो गृहेऽहिर्जातिस्मरोऽभूत्, मा गृहजनान् हन्त्वेष इति पुनः सुतैर्हतः पुत्रपुत्रो जातो, जातिं स्मृत्वा कथं स्नुषामम्बां पुत्रं पितरं च वच्मीति मौक्यं श्रितोऽवर्द्धत, मातृपितृकृतमौक्योपचारा न लग्नाः, अन्यदा चतुर्ज्ञानिनः स्थविरास्तत्र समवसृतास्तै-र्मूकबोधाय तद्गृहे प्रहितौ साधू गुरूक्तां गाथामेतां मूकाग्रेऽवक्ताम्-

**तावस किमिणा मूय-व्वएण पडिवज्ज जाणिउ धम्मं ।**
**मरिऊण सूयरोरग-जाओ पुत्तस्स पुत्तो ति ॥१॥** [ उ.प./गा.३०५ ]

स्वभावान् श्रुत्वा स विस्मिततस्तौ प्रणम्य कथं युवां जानीथ इति पप्रच्छ, तावूचतुर्गुरवो जानन्ति, ततः स ताभ्यां सहोद्याने गत्वा गुरून्नत्वा श्राद्धोऽभूत् । इतः स पुरोहितसुतदेवो **विदेहे**ऽर्हन्तं पप्रच्छ किमहं सुलभबोधिरुत दुर्लभबोधिः ? स्वाम्यूचे दुर्लभबोधिकोऽसि,

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

पुनः सोऽप्राक्षीत् क्वाहमुत्पत्स्ये ? स्वाम्याह **कौशाम्ब्यां** त्वं मूकस्य भ्राता भावी, मूकाच्च ते बोधिरस्ति । ततो देवोऽर्हतं नत्वा **कौशाम्ब्यां** मूकान्तिकं गतो बहु स्वं तस्मै दत्वोचे अहं त्वन्मातुर्गर्भे उत्पत्स्ये, तस्याश्चाम्रभक्षणे दोहदो भावी । गिरौ च मया सदापुष्पफल आम्रः कृतोऽस्ति, ततो दोहदसम्भवे त्वं मातुः पुरो वर्णान् लिखेश्चेत् पुत्रः स्यात्तं च मह्यं दत्से तदाम्रफलमानीय ददे, इच्छं, मां त्वदायत्तं कृत्वा जातं च वयःस्थं धर्मं बोधयेरिति । मूकस्तत्प्रतिपेदे । गतो देवोऽन्यदा च्युत्वा च तद्गर्भे उत्पन्नोऽकाले चाम्रफलदोहदो मातुर्जातस्तथैव च तेनापूरि । काले च पुत्रो जातः, मूकस्त**मर्हद्दत्ता**ख्यं सोदरं बालं साध्वङ्घ्रिषु पातयति, परं स रार्टि दत्ते रोदिति, न च वन्दते ।

ततो मूकः श्रान्तो दीक्षितः स्वर्गतोऽवधिं प्रायुङ्क्त, दृष्टो भ्रातोढचतुःस्त्रियो विषयासक्तः, देवेनास्य जलोदरं कृतं, वैद्याः सर्वे भग्नाः, स तु नोत्थातुमपीष्टे । अथ स सुरः शबररूपः सर्वान् व्याधीन् शमयामीत्युद्घोषयन् भ्राम्यति । **अर्हद्दत्ते**न तं दृष्ट्वोक्तं मां निरुजं कुरु ? सोऽवग् यदि मामेव सेवसे तदा सज्जयामि, तेनोचे एवमप्यस्तु , ततः सज्जितोऽसौ तेन सहाचलत्तेनास्य शस्त्रकोस्थलो दत्तो माययाऽतिभारः, अथैकस्मिन् देशे साधवः पठन्तस्ताभ्यां दृष्टास्तदा शबरेणोचे दीक्षया त्वं भारान् मुच्यसे, तेनाचिन्त्य-स्माद्भाराद्दीक्षा वरमिति तेनोक्ते स साध्वन्तिके दीक्षापितः, देवः स्वर्ययौ, स चोत्प्रव्रज्य गृहं ययौ । देवेनावधिना तथा ज्ञात्वा तथैव पुनः स जलोदरीकृतः, तथैवाऽरुत्कृतो भारादि-क्रमेण दीक्षितः, पुनरुत्प्रव्रजितः, एवं वारत्रयं जातं । तुर्यवेलायां देवस्तेन समं तृणभारं लात्वा प्रज्वलद् ग्रामं प्रविष्टः, तदा तेनोक्तं प्रज्वलन्तं ग्रामं सतृणभारः किं प्रविशसि ? सोऽवक् किं त्वं मानमायालोभप्रदीप्तं गृहवासं प्रविशसि ? तथापि न स प्रबुद्धस्ततो द्वावग्रे यातः, देवोऽटव्यामुत्पथेन यांस्तेनोचे किं मार्गं मुक्त्वोन्मार्गेण यासि ? देवोऽवक् किं त्वं मुक्तिमार्गं मुक्त्वा संसाराटवीं प्रविशसि ? तथापि स न बुद्ध्यते, अथ क्वापि चैत्ये तेन व्यन्तरसुरोऽर्चितः सन्नधः पतंस्तस्मै दर्शितः, स वक्ति अहो अधन्यो व्यन्तरोऽयं यो यथा यथार्च्यते तथा तथाऽधः पततीति, देवोऽवगहो त्वमप्यधन्य एव, यतो वारंवार-मर्च्यस्थाने प्रापितोऽप्युत्प्रव्रजसि । तेनोचे कस्त्वमरि ? तदा देवेन मूकरूपं दर्शितं, पूर्वभवस्तस्योक्तः, सोऽवक्कोऽत्र प्रत्ययः ? ततो देवस्तं **वैताढ्ये** सिद्धायतने नीत्वोचे त्वया देवत्वे मम सङ्केतितं यद्यहं धर्मे न सम्बुद्ध्येयं तदा मम कुण्डलयुगं मन्नाममयं त्वं दर्शयेरित्युक्त्वा तेन सिद्धायतनपुष्करिणीक्षिप्तं तच्चादर्शि, तद् दृष्ट्वा स जातिं स्मृत्वा सम्बुद्धोऽदीक्षि । संयमे च तस्य रतिर्जाता, प्रागरतिरभूत् । एवमरतिपरीषहः सह्यः, उक्तः सप्तमोऽरतिपरीषहः ॥१५॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

उत्पन्नसंयमारतेः स्त्रीभिर्निमन्त्र्यमाणस्य तदिच्छा स्यादतः स्त्रीपरीषहमाह–

**संगो एस मणूस्साणं, जाओ लोगंमि इत्थिओ ।**
**जस्स एआ परिन्नाया, सुकडं तस्स सामण्णं ॥१६॥**

**व्याख्या**–सज्जन्ति आसक्तमनुभवन्ति रागादिवशगा अत्रेति **सङ्गो** लेपः, **एष** स्त्रीनामा **मनुष्याणां** नृणां मक्षिकाणां श्लेष्मेव स्यात्, ततो **याः** काश्चन मानुष्यो देव्यस्तिरश्चो **लोके** तिर्यग्लोकादौ **स्त्रियः** सन्ति, एता एव हावभावादिभिरन्त्यतासक्तिहेतवोऽन्यथा गीताद्यपि सङ्गहेतुः, मनुष्योक्तेरेषामेव मिथुनसञ्ज्ञाधिक्यात् । **यस्यैताः** स्त्रियः **परी**ति सर्वेण **ज्ञाता** ज्ञपरिज्ञया इह प्रेत्य चानर्थहेतुत्वेन विदिताः प्रत्याख्याताः, **सुकृतं** सुष्ठुकृतं (पाठान्तरे 'सुकरं' **सुखकार्यं**) तस्येति तेन **श्रामण्यं** व्रतम् ॥१६॥

अवद्यत्यागो हि व्रतं, रागद्वेषौ चावद्यं, न च स्त्रीभ्यः परं रागद्वेषमूलं, अत आह–

**एवमादाय मेहावी, पंकभूया उ इत्थीओ ।**
**नो ताहिं विहन्निज्जा, चरिज्जत्तगवेसए ॥१७॥**

**व्याख्या–एवमाज्ञाय** ज्ञात्वा **मेधावी** अवधारणशक्तिमान् **पङ्कभूता** मुक्तिपथं यातां विघ्नत्वेन मालिन्यहेतुत्वेन च, **तुः** एवार्थः, (पाठान्तरे–'**एवमादाय मेहावी । जहा एया लहुस्सगा**') **एवं** वक्ष्यमाणार्थ**मादाय** बुद्धया लात्वा, **यथा एताः** स्त्रियस्तुच्छाशयादिना **लघ्वयः, नैव ताभिः** स्त्रीभि**र्विहन्यात्**। विशेषेण संयमायुर्घातेनात्मानं हन्यात्। **चरेत्** धर्मानुष्ठानं **आत्मगवेषकः**, कथमात्मा भवात्तार्य इति। यद्वात्मानं गवेषयते इ**त्यात्मगवेषकः**, चित्रालङ्कारा अपि स्त्रियो दृष्ट्वा तद्दृष्टिन्यासस्य दुष्टतां ज्ञात्वा आशु ताभ्यो दृग्वालनादमेध्यतादि ध्यात्वा आत्मान्वेष्टैव मुनिः स्यात्, यतः–"**चित्तभित्तिं न निज्झाए**" [ द.अ.८/गा.५५ ] ॥

**स्थूलभद्र**वत् स्त्रीपरीषहः सह्यो, न तु स्पर्द्धाकृत् साधुवन्न सह्यः, **तत्कथैवं**–**क्षितिप्रतिष्ठितं** प्राक्, ततः काले **चनकपुरं, ऋषभपुरं, कुशाग्रपुरं** जातं, ततो **राजगृहं**, तत**श्चम्पा**, ततः **पाटलीपुत्रं** जातं, तावद् ज्ञेयं याव**च्छकडाल**मृतेरनु **नन्दः श्रीयक**माह कुमार! अमात्यत्वं लाहि ? सोऽवग् मद्भ्राता ज्येष्टः **स्थूलभद्रः** कोशागृहे द्वादशवर्षं यावदस्ति, स राज्ञाहूयोक्तो मन्त्रिव्यापारं लाहि ? सोऽवग् विमृशामि, राजाह **अशोकवनीं** गत्वा विमृश ? स तत्र गतो विचारितवानहो राज्यकार्याक्षिप्तानां बहुसावद्यं बहुनरकान्तं व्यापारपारवश्यमस्ति, पितुरप्यस्यमादेव मरणं जातं, अतो भोगाः कटुफला इति वैराग्यात् पञ्चमुष्टिलोचं कृत्वा, कम्बलरत्नेन च धर्मध्वजं धृत्वा राज्ञः पार्श्वमेत्याह एतन्मयाऽचिन्ति, राजाह सुचिन्तितं, ततोऽसौ निर्ययौ, असौ वेश्यौको याति गुरुपार्श्वे वेति ज्ञातुं राट् सौधारूढोऽपश्यत्। पथि मृतेभगन्धान्मुखं

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

स्थगित्वा जने नश्यति सति, तं मुनिं तत्राध्वनि समाधिना यान्तं दृष्ट्वा त्यक्तकामोऽयमिति विचिन्त्य स **श्रीयकं** मन्त्रित्वेऽस्थापयत्। स च श्री**सम्भूति**विजयान्तेऽदीक्षि, घोरं तपश्चाकृत। विहृत्य च गुरवः **पाटलीपुत्रं** प्रापुस्तत्र त्रयः साधवो गुरून्नत्वा चतुर्मासकादावभिगृह्याऽचलन्, एकः सिंहगुहायां कायोत्सर्गेणान्यो दृग्विषाहिबिले तृतीयश्च कूपफलके चतुर्मासीं कायोत्सर्गेण स्थितः, सिंहसर्पौ साधू दृष्ट्वोपशान्तौ ।

**स्थूलभद्र**श्च कोशागृहे चतुर्मास्यै चलितस्तद्गृहद्वारे च समेत्य धर्मलाभं ददौ । कोशा तुष्टा, नूनं परीषहभग्न एतो भर्त्तेति विचिन्त्य संमुखमेत्योचे किं कुर्वे ? तत उद्यानगृहे स तदुक्त्याऽस्थात् । रात्रौ सर्वालङ्कारा तत्पार्श्वे सागात् । तच्चाटुभिः स मेरुरिवाचलो धर्ममूचे। प्रतिबुद्धा सा श्राविकाभूत्, राजदत्तनरं विना ब्रह्म चादृता । वर्षान्ते त्रीन् ऋषीन् क्रमैतान् सूरयः सम्मुखमीषदुत्थाय स्वागतं दुःकरकारका इत्यूचुः, **स्थूलभद्रः** कोशागृहे सरसभिक्षया चतुर्मासीमतीत्यागात्, तदा सूरयः ससम्भ्रममुत्थायातिदुःकराति-दुःकरकारकागच्छेत्यूचुः । तदा पूर्वे त्रयो मिथो जगुः मन्त्रिभूत्वाद्रागाद् गुरुभ्य एषा तत्प्रशंसा । द्वितीयवर्षासु सिंहगुहर्षिर्वेश्यौकश्चतुर्मास्यै ईर्ष्ययाभ्यग्रहीत् । गुरुभिरुपयुक्तै-र्वारितोऽपि स तत्रागात्, तस्यां वसतौ स्थितश्च । सोदाराङ्गा भूषाभूषिता तस्य धर्मं शुश्राव । स च तद्रूपाक्षिप्तस्तामप्रार्थयत्, सा तु तं नैच्छत्, भृशं प्रार्थ्यमाना सा तद्बोधायोचे लक्षदाने त्वदिष्टं स्यात् । सोऽवक् क्व मे लक्षं ? सोचे **नेपाल**देशराट् श्राद्धो यतये लक्षमूल्यं रत्नकम्बलं दत्ते, स तत्र गतो दत्तं च तत्तेन, ततो व्यावृत्तोऽरण्ये चौरैर्बद्धे मार्गे तुच्छकोऽवग् लक्षमेति, चौरेशः साधुं दृष्ट्वाऽमुञ्चत्, पुनः शुकोक्त्यैत्यैक्षिष्ट, तत्पार्श्वे किमप्यदृष्ट्वाऽभयं दत्वा साधुं सद्भावं पृच्छन् दण्डान्तर्वेश्यार्हरत्नकम्बलमुक्तवन्तं सोऽमुञ्चत् । स चागत्य तत् कोशायै दत्तवान् । तया स दिव्योऽपि पादप्रोञ्छनपूर्वकं क्षालेऽक्षेपि, सोऽवग् मा मुग्धे सर्वोत्तमं विनाशयैनं, सोचे मुने त्वत्संयमोऽपीदृक्, क्षालाभमद्देहेन मा दूषयितुमर्हसि, सः बुद्धः 'इच्छामोऽणुसट्ठिं' इत्युक्त्वागाद् गूरून् प्रतिक्रान्तश्च, गुरूभिरूचे वत्सैवं दुःकरदुःकरकारी **स्थूलभद्रो** यश्चिरपरिचितानपि वेश्याभोगान् नैच्छत् । एवं **स्थूलभद्रेण** स्त्रीपरीषहः सोढो, न तु सिंहगुहर्षिणा, इत्युक्तोऽष्टमः परीषहः ॥१७॥

एकत्र स्थितितो मन्दसत्वस्य स्त्रीरागः स्यादतो नैकत्र स्थेयं, चर्याविहारः कार्य इति चर्यापरीषहमाह—

**एग एव चरे लाढे, अभिभूय परीसहे ।**
**गामे वा नगरे वावि, निगमे वा रायहाणिए ॥१८॥**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या—एको** रागादिमुक्तोऽसहायश्च प्रतिमादिभृदादिर्वा, लाढयति प्रापयति स्वं एषणीयेनेति **लाढः,** देश्योक्त्या लाढो वा **प्रशस्यः, परीषहानभिभूय** जित्वा **ग्रामे, नगरे** करमुक्ते, **निगमे** वणिग्वासे **राजधान्यां चरेत्** ॥१८॥

तथा—

**असमाणो चरे भिक्खू, नेव कुज्जा परिग्गहं ।**
**असंसत्तो गिहच्छेहिं, अणिय( के )ओ परिव्वए ॥१९॥**

**व्याख्या—असमानो** न सगर्वो **भिक्षुश्चरेत्,** यद्वा असमानो प्राकृतेऽ**सन्निव चरेत्,** यत्रास्ति तत्रापि सोऽसन्निव चरेत्, सन् हि सर्वः स्वाश्रयादितर्प्ति कुर्यात्, अयं तु न । तथा परिग्रहं ग्रामादिषु ममत्वं नैव कुर्यात्, असंसक्तोऽसंबद्धो गृहस्थैः, अनिकेतोऽगृहो नैकत्रकृतास्पदः, **अनियतो** वा परिव्रजेत् सर्वतो विहरेत्, नियतविहारे ममता स्यात् ॥

**चर्यापरीषहे सङ्गमाचार्यदृष्टान्तः—कोल्लकिरे** पुरे **सङ्गमा**चार्या गच्छयुता दुर्भिक्षे **सिंहा**चार्यं संस्थाप्य तं सगच्छं दूरे व्यवहारयन् । स्वयं च क्षीणजङ्घाबलत्वात् पुरं नवभागीकृत्य द्रव्यतः पीठफलकादीनां, क्षेत्रतो वसतिपाटकादीनां, कालतो मासपरावर्त्तेन, भावतो निर्ममाः सकल्पवर्षाकल्पानस्थुः, पुरसूरी तत्तपसा तुष्टा तानसेवत । देशोनवर्षे **सिंहा**चार्यदिशा**द्दत्ता**भिधः शिष्यो विहरन् गुरुशुद्ध्यै तत्रैतः, स्थाने एव स्थितान् गुरून् दृष्ट्वा नित्यवासिनोऽमी न भावतोऽपि मासकल्पं व्यधुरिति सङ्क्लिष्टोऽज्ञातो वसतेर्बहिर्मण्डपिकायां स्थितः, भिक्षायै च गुरोः सार्थे चलितः, गुरवोन्तप्रान्तकुलेष्वभ्रमन्, स तूद्विग्नश्चिन्तयति यदमी मे श्राद्धकुलानि न दर्शयन्ति, ज्ञाततदाकूता गुरवोऽथ श्रेष्ठिनो गृहे गत्वा तत्र **रेवत्या**त्तं षण्मासीं यावदुदन्तं तत्सुतमङ्गुष्ठाङ्गुलीशब्देन मा रुद इति वाक्येन व्यन्तरीपलायनकरणपूर्वकं स्वस्थं चक्रुः, हृष्टेन श्रेष्ठिना गुरवो मोदकाद्यैर्निमन्त्रितास्तदा गुरवस्तान्मोदकान् **दत्ताय** दापयित्वा तं व्यसृजन्, **दत्त**स्तु चिरान्ममैकं कुलमनेन दर्शितं, स्वयं त्वतिविशिष्टगृहेषु यास्यन्तीति ध्यायन् वसतिमेतः, गुरवस्त्वन्तप्रान्ताहारमादाय वसतिमागत्याहारं कृतवन्तः, आवश्यककाले गुरुभिः स ऊचे भिक्षादोषानालोचय ? सोऽवग् भवद्भिः सहैव हिण्डितोऽस्मि, किमालोचयामि ? भवत्सार्थवशान्मयापि चिकित्साधात्रीपिण्डो भुक्तः, सूक्ष्माण्यप्यन्यच्छिद्राणि सुप्रकाश्यानीति गुरूनवहील्य स दूरं गतो दध्यौ च गुरुः सदेदृग्दोषपिण्डं भुङ्क्ते । अथ सुरी गुरुभक्त्या तच्छिक्षार्थं निशीथे सध्वान्तां वर्षां चकार, स भीतो गुरूनाह क्व यामि ? तैरूचे वत्सेत एहि ? सोऽवग् नेक्षे तमसा वसतिद्वारं, तैरङ्गुल्यऽदर्शि । सा दीपशिखेवाऽदीपि, स दुष्टोऽहो दीपोऽस्यास्तीति

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

ध्यायन् सूर्योक्तो रे दुःशिष्य ! दर्शयामि किं ते गुरुहीलाफलमधुना ? स भीत एत्य गुर्वंह्रिपतितो भूयो भूयोऽक्षामयत्, सूरिभिर्मा भैरित्यधीरि सः, शान्ता च सुरी । अथ सूरिभिर्नवभागादौ स्वविहारे प्रोक्ते स भक्तोऽभूत् । एवं यथा **सङ्गम**स्थविरैश्चर्यापरीषहः सोढस्तथान्यैः सह्यः, इत्युक्तो नवमश्चर्यापरीषहः ॥१९॥

यथा ग्रामादिष्वप्रतिबद्धत्वेन चर्या कार्या, तथा देहादिष्वप्रतिबद्धत्वेन स्वाध्याय-नैषेधिकीपरीषहः सह्य इति तमाह–

**सुसाणे सुन्नगारे वा, रुक्खमूलेव एगओ ।**
**अकुक्कुओ निसीएज्जा, न य वित्तासए परं ॥२०॥**

**व्याख्या–स्मशाने, शून्यागारे** शून्यगृहे, **वृक्षमूले वा एकको**, वा प्रतिमादौ गच्छतीत्य**येकगः** । **अकुत्कुचो** दुश्चेष्टारहितो, यद्वा **कुत्कुचः** कुन्थ्वादेर्हिंसा तद्रूपेण कर्म-बन्धहेतुना **रहितो** हस्तांह्रिभिरस्पन्दमानो **निषीदेत्ति**ष्ठेत्, **न च** परमुन्दिरादिं वि**त्रासयेत्,** माभूदसंयम इति । इहोपाश्रयात् स्वाध्यायार्थं यत्र गम्यते सा नैषेधिक्युच्यते ॥२०॥

तथा–

**तत्थ से अच्छमाणस्स, उवसग्गाभिधारए ।**
**संकाभीओ न गच्छिज्जा, उट्ठित्ता अन्नमासणं ॥२१॥**

**व्याख्या–तत्र** स्मशानादौ 'से' **तस्यासीनस्य** तिष्ठतो वा **उपसर्गाः** स्युस्तदा तान**भिधारयेदु**पेक्षेत, यथा किं मे दृढचित्तस्यैते कुर्युः ? (पाठान्तरे '**उवसग्गभयं भवे**' स्पष्टं) तत्कृतकष्ट**शङ्काभीत उत्थायान्यदासनं** स्थानं **न गच्छेत्** ॥

**नैषेधिकीपरीषहे कुरुदत्तसुतदृष्टान्तः–गजपुरे कुरुदत्त**इभ्यसूः स्थविरपार्श्वे दीक्षितो बहुश्रुतो जातः, कदाप्येकत्वप्रतिमावान् **साकेतपुरा**सन्ने चरमपौरुष्यां स प्रतिमया स्थितः, इत एकस्माद् ग्रामाद् गावः स्तेनैर्हृतास्तेन मार्गेण च नीताः, अन्वेषकास्तत्रागुस्तैस्तत्र स साधुर्दृष्टः, तत्र च द्वौ मार्गावास्तां, तैः साधुः पृष्टः केन मार्गेण गावो हृताः ? स नोचे, ते द्विष्टास्तच्छीर्षे मृदा पालिं बद्ध्वा चिताङ्गारांश्च क्षिप्त्वा गताः, **गजसुकुमाल**वत् स सम्यक् सेहे नैषेधिकी-परीषहं, एवमन्यैरपि सह्यः, इत्युक्तो दशमो नैषेधिकीपरीषहः ॥२१॥

नैषेधिक्यां स्वाध्यायं कृत्वा शय्यामागच्छेदिति शय्यापरीषहमाह–

**उच्चावयाहिं सिज्जाहिं, तवस्सी भिक्खु थामवं ।**
**नाइवेलं विहन्नेज्जा, पावदिट्ठी विहन्नइ ॥२२॥**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या–उच्चाः** शीतरक्षादिगुणैर्वरा, **अवचास्**तद्विपरीताः, अथवा **उच्चावच्चा** नानारूपा वा **शय्यास्ताभिस्तपस्वी भिक्षुश्च**, प्राग्वत्, **स्थामवान्** शीतादिसहनं प्रति शक्तः, **अतिवेलं** स्वाध्यायादिवेलातिक्रमं **न विहन्यात्** यायात् 'हनेर्गतावपि वृत्तेः' अत्राहं शीतादिनार्दित इति स्थानान्तरं नैति । यद्वा **वेलातिम**न्यकालाधिकां मर्यादां समेतां हर्षखेदाद्यै**र्नोल्लङ्घयेत्**, सर्वर्त्तुसुखदेयं शय्या सभाग्योऽहमिति हर्षः, शीतादिरक्षकां शय्यामपि न लभेऽभाग्योऽहमिति खेदः, यतः **पापदृष्टिर्विहन्येत** शय्यया ॥२२॥

ततः–

**पइरिक्कुवस्सयं लद्धुं, कल्लाणं अदुव पावगं ।**
**किमेगरायं( इं ) करिस्सइ, एवं तत्थहियासए ॥२३॥**

**व्याख्या–प्रतिरिक्तं** विविक्तं स्त्र्यादिरहितं **उपाश्रयं लब्ध्वा कल्याणं** भव्यं **अथवा पापकं** पांश्वाद्यैरभव्यं, किं ? एकरात्रिर्यत्र त**देकरात्रं** सुखं दुःखं वा शय्या **करिष्यति** ? न किञ्चिदपि । यतो जनः कोऽपि सौधेषु रत्नादिमयेषु वसति, परे च धूल्याकीर्णेषु नित्यं वसन्ति, अस्माकं तु नैकत्र स्थितिः, **एवं** तत्र सुखदुःखे **अधिसहेत,** जिनकल्पिक एकरात्रं, स्थविरश्च कतिरात्रीः ॥

**शय्यापरीषहे सोमदत्तसोमदेवसाधुदृष्टान्तः–कौशाम्ब्यां यज्ञदत्तो** द्विजस्तस्य द्वौ पुत्रौ **सोमदत्तसोमदेवौ सोमभूति**मुनिपार्श्वे प्रव्रज्य बहुश्रुतौ जातौ, स्वजनान् द्रष्टुमेतौ, ते **चावन्त्यां** गता आसन्, तत्र यान्तौ देशरीत्यदूष्यं द्विजौकस्य जानन्तौ मद्यमादायाऽपातां । तद् ज्ञात्वा सानुतापावनशनं वरमिति ध्यात्वा नदीतटे काष्ठोद्ध्वं पादपोपगमं श्रितौ, अकालेन नदीपूरेण काष्ठारूढौ नीतावब्धौ, तत्र ताभ्यां यादोजीवग्रसनादि सोढं । एवं यथायुरधिषह्य तौ शय्यापरीषहं स्वर्गतौ, उक्त एकादशमः शय्यापरीषहः ॥२३॥

शय्यास्थितस्य शय्यातरोऽन्यो वाऽक्रोशेदित्याक्रोशपरीषहमाह–

**अक्कोसेज्ज परो भिक्खूं, न तेसिं पडिसंजले ।**
**सरिसो होइ बालाणं, तम्हा भिक्खू न संजले ॥२४॥**

**व्याख्या–परो**ऽन्यो धर्मबाह्यो वा **भिक्षुं** 'धिग्मुण्ड ! किमिहैतः ? केनाहूतोऽसि ? **इत्याक्रोशेत्,** 'न तेसिं' रूपव्यत्ययात् **तस्मै [भिक्षुः] न प्रतिसञ्ज्वले**दग्निवन्न दीप्येत, सञ्ज्वलनकोपमपि न कुर्यात्, ज्वलंश्च **बालानां** मूर्खाणां **सदृशः स्यात्, क्षपक**वत् ।

**अत्र बालैः सादृश्ये क्षपककथा–**एकं क्षपकं सुरी गुणाकृष्टा नित्यं वन्दित्वोचे

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

मम कार्यं ज्ञाप्यं, कदापि स दुर्गिरा रुष्टो द्विजेन सह योद्धुं लग्नः, द्विजेन बलिना क्षुत्क्षामः क्षपको भुव्यपात्यताडि च, रात्रौ सुरी नन्तुमागात्, क्षपकस्तूष्णीमास्त, सुर्योक्तं भगवन् किं मयाऽपराद्धं ? सोऽवक् स त्वया दुरात्मा ममापकारी किं नाशिक्षि ? सोचे मया युवयोर्विशेषः कोऽपि न ज्ञातः, यथा त्वं श्रमणस्तथाऽयं द्विजः, कोपाद् द्वावपि समौ जातौ, प्रपन्नं च तत्क्षपकेन, **तस्माद्भिक्षुर्न सञ्ज्वलेत्** ॥२४॥

यतः—

**सोच्चा णं फरुसा भासा, दारुणा गामकंटका( याxगा ) ।**
**तुसिणीओ उवेहेज्जा, न ताओ मणसी करे ॥२५॥**

**व्याख्या—श्रुत्वा, णं** वाक्यालङ्कारे । **परुषाः** खरा **भाषाः**, मन्दसत्त्वाः संयमं दारयन्तीति **दारुणाः, ग्रामस्येन्द्रियगणस्य** दुःखकृत्त्वात् **कण्टकाः**, मुक्तिमार्गगतिविघ्न-कृत्त्वाद्वा, प्रतिकूलशब्दास्ता भाषा**स्तूष्णीको** मौनी, स कोपात् खरभाषी, **उपेक्षत, न ता मनसि कुर्यात्,** द्वेषाऽकरणात् ॥

**आक्रोशपरीषहेऽर्जुनमालाकारदृष्टान्तः-राजगृहेऽर्जुन**मालाकारस्तस्य भार्या च **स्कन्दश्रीः**, पुरबहि**र्मुद्गरपाणि**र्यक्षोऽस्ति, सो**ऽर्जुन**स्य कुलदेवः, **अर्जुन**स्यारामपार्गे एव तद्यक्षौकोऽस्ति, एकदा **स्कन्दश्री**रारामे**ऽर्जुन**स्य भक्तं दातुं गता, पुष्पाण्यादाय वलमाना यक्षौकःस्थैर्ललितगोष्ठ्यागतैः षड्भिर्विटैः सा दृष्टा, ततस्तैः सा यक्षाग्रेऽसेवि, ततस्ते सदापि तां सेवन्ते । **अर्जुनो** वरैः पुष्पैः सदा मुद्गरपाणिमर्चति, एकदा सा तैर्भुज्यमाना-**ऽर्जुनमा**यान्तं दृष्ट्वोचे**ऽर्जुनो**ऽयमेति ततो यूयं किं मां भोक्षथ ? ततस्तैरस्या इष्टमि**त्यर्जुनो** बद्धः, तद्दृष्टौ च ते तामसेवन्त । **अर्जुनो** दध्यौ यदहमेतं यक्षं नित्यमार्चं तथाप्यहमस्यैवाग्रे विडम्बितः, तन्नास्त्ययं सत्यो **मुद्गरपाणिः,** तदा यक्षः कृपया तस्य बन्धान् छित्वाऽयः-पलसहस्रमुद्गरं लात्वा**ऽर्जुन**देहेन तान् षट् नरान् स्त्रीसप्तमानहन् ।

एवं दिने दिने षट् नरान् स्त्रीसप्तमान् स हन्त्येव । यावत् सप्त हता न स्युस्तावल्लोको **राजगृहान्न** निरैत्, इतः श्री**वीर**स्तत्र समवसृतो, नत्यै न कोऽपि निरैत्, **सुदर्शन**श्रेष्ठी भक्त्यानिर्भयो निर्गतो नत्यै, दृष्टो**ऽर्जुनेन**, धावितोऽसावुद्ग्राम्य मुद्गरं, **सुदर्शन**श्चतुःशरणं कृत्वा श्री**वीरं** स्मृत्वा साकारं प्रत्याख्याय नमस्कारं स्मरन् कायोत्सर्गे-ऽस्थात्, **अर्जुन**स्तं हन्तुमक्षमो भ्रान्त्वा भ्रान्त्वा श्रान्तः, यक्षोऽपि समुद्गरस्तं मुक्त्वा ययौ, **अर्जुनो**ऽधिष्ठातृमुक्तो भुव्यपतत्, कथमिहास्मि ! किं ममेयमवस्थेत्यादि तत्प्रश्ने **सुदर्शने**नोक्ते च प्राग्वृत्तान्ते, रेऽहं स पापीति वैराग्यं गतः, ततः **सुदर्शने**न सह जिनं नत्वा

Jain Education International 2010_02          For Private & Personal Use Only          www.jainelibrary.org

धर्मं च श्रुत्वाऽपृच्छत् प्रभो कथं मे शुद्धिः ? अर्हन्नूचे दीक्षया, ततोऽसौ प्रव्रज्य **राजगृहे** विहरन् लोकैः स्वजनमारक इत्याक्रुश्यमानस्तच्च सम्यगधिसह्य लब्धकेवलो मुक्तिं ययौ । एवमाक्रोशपरीषहः सह्यः, उक्तो द्वादशमः परीषहः ॥२५॥

कश्चिदाक्रोशको वधमपि कुर्यादिति वधपरीषहमाह—

**हओ न संजले भिक्खू, मणं पि न पदूसए ।**
**तितिक्खं परमं नच्चा, भिक्खू धम्मं विचिंतए ॥२६॥**

**व्याख्या—भिक्षुर्हतो** यष्ट्याद्यैस्ताडितो **न सञ्ज्वलेत्** कायकम्पदुर्वाक्याकृतिभिः, **मनोऽपि न प्रदूषयेत्, तितिक्षां** क्षमां 'क्षमायुक्तो न निर्दयः' इति **परमां** धर्मसाधनां प्रति प्रकृष्टां **ज्ञात्वा भिक्षुर्धर्मं** क्षान्त्याद्यं **विचिन्तयेत्,** यथा 'क्षमामूल एव मुनिधर्म' इति ॥२६॥

तथा—

**समणं संजयं दंतं, हणिज्जा कोइ कत्थइ ।**
**नत्थि जीवस्स नासो त्ति, एवं पेहिज्ज संजए ॥२७॥**

**व्याख्या—श्रमणं संयतं** निरारम्भं, **दान्त**मिन्द्रियेषु, **हन्यात् कोऽ**प्यनार्यः **कुत्रापि** ग्रामादौ, तदा स **नास्ति जीवस्य** ज्ञानस्वरूपस्य **नाशो** मृतिः, किन्तु देहस्यैव, **एवं प्रेक्षेत** पश्येत् **संयतः,** (पाठान्तरे-'**न य पेहे असाहुयं**'-**न च प्रेक्षेत** ध्यायेत् घातकं प्रति **असाधुतां** द्रोहम्) ॥

**वधपरीषहे स्कन्दकशिष्यदृष्टान्तः—श्रावस्त्यां** पुर्यां **जितशत्रु**नृपराज्ञी**धारिणी**-कुक्ष्युद्भवः **स्कन्दक**कुमारः, तत्स्वसा च **पुरन्दरयशा**नाम्नी कुम्भकारकृते नगरे दण्डाग्रे राज्ञो दत्ता, तस्य नृपस्य **पालका**भिधः पुरोधाः, अन्यदा **श्रावत्स्यां सुव्रतो**ऽर्हन् समवसृतः, **स्कन्दको** नन्तुं ययौ, धर्मं श्रुत्वा च श्राद्धोऽभूत् । अन्यदा **पालकः श्रावस्त्यां** दौत्यायागतः, आस्थाने च स साधूनामवर्णं वदन् **स्कन्दकेन** निरुत्तरीकृतो द्वेषं प्राप्तः **स्कन्दकस्य** छिद्राण्यैक्षत । **स्कन्दकोऽ**न्यदा श्री**सुव्रतान्ते** पञ्चशततन्त्र(सेवक)युक् प्रव्रज्य बहुश्रुतीभूतोऽर्हद्दत्तसूरिपदस्तत्पञ्चशततन्त्रयुक् स्वसृपुरे विहर्त्तुं प्रभुं पप्रच्छ । स्वामी तत्र मृत्यूपसर्गमूचे । आराधका विराधका वेति तेन पृष्टे त्वां विना सर्वेऽप्याराधकास्त्वं च भव्य इति प्रभुणोक्ते परिवारयुतोऽसौ तत्र गतः, समवासार्षीच्च तत्रोद्याने । **पालकेन स्कन्दका**-गमनं पूर्वमेव ज्ञात्वा भूम्यन्तस्तत्रोद्यानेऽस्त्राण्यगोप्यन्त । राजा सपौरो सूरिनत्यै गतो देशनया हृष्टः, परं रहसि **पालकेन** व्युद्ग्राहितो यदेष कुमारः परीषहजितस्त्वां हत्वा राज्यं लास्यति, यदि न प्रत्येषि तदोद्यानं वीक्षस्व ? राज्ञा तत्र गुप्तां पञ्चशतीमस्त्राणां दृष्ट्वा कोपात्ते साधवो वधाय **पालकस्य** दत्तास्तेन च ते सर्वे यन्त्रे पीडिताः **स्कन्दक**गुरोर्लब्धाराधनाः

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सम्यग्वधपरीषहं सहमानाः केवलाप्त्यासिद्धाः, **स्कन्दकः** पार्श्वे स्थितः क्षुल्लमपि **पालका**ऽमुक्तं वीक्ष्य दूनो निदानं कुर्वन् यन्त्रेण सर्वेभ्यः पश्चात् पीडितो मृत्वाग्निकुमारेषूत्पन्नः। इतः **स्कन्दकस्य** धर्मध्वजं रक्तार्क्तं हस्त इति ज्ञात्वा शकुन्याप्तं **पुरन्दरयशा**ग्रेऽपाति, तस्यास्तद्दिने चिन्तासीद्यदद्य साधवः किं न दृश्यन्ते ? तावत्तेन चिह्नेन तयाऽज्ञायि यत् साधवो हता इति। तया नृप उक्त आः पाप किमिदमकार्षीः ! दीक्ष्येऽहमिति ध्यायन्ती सा देवैः स्वाम्यन्ते नीताऽदीक्षि। **अग्निकुमारे**णैत्य तत्पुरं सदेशं दग्धं, तदद्यापि **दण्डकार**ण्यं जातं। एवं तैः साधुभिर्यथा वधपरीषहः सोढः सम्यक् तथान्यैरपि सह्यो न तु **स्कन्दक**वन्नाध्यास्यः, इत्युक्तस्त्रयोदशो वधपरीषहः ॥२७॥

परैर्हतस्यागदादियाञ्चा स्यादिति याञ्चापरीषहमाह—

**दुक्करं खलु भो निच्चं, अणगारस्स भिक्खुणो।**
**सव्वं से जाइयं होइ, नत्थि किंचि अजाइयं ॥२८॥**

**व्याख्या—खलु** विशेषेण, **भो** लोका **दुष्करं** दुरनुष्ठानं **नित्यं** यावज्जीवं **अनगारस्या**ऽगृहस्य **भिक्षोः**, यत् **सर्वमा**हारोपध्यादि 'से' **तस्य याचितं भवति, नास्ति किञ्चि**द्दन्तशोधनाद्य**प्ययाचितम्** ॥२८॥

ततः—

**गोयरग्गपविट्ठस्स, पाणी नो सुप्पसारए।**
**सेओ आगारवासो त्ति, इइ भिक्खू न चिंतए ॥२९॥**

**व्याख्या**—गोरिव चरणं गोचरो, यथा गौर्ज्ञाताज्ञातविशेषं मुक्त्वा प्रवर्त्तते तथा साधुर्भिक्षार्थं, तस्मादग्रं प्रधानं एषणादत्ते, न पुनर्गौरिव यथा तथा, तस्मिन् प्रविष्टो **गोचराग्रप्रविष्टस्तस्य पाणि**र्हस्तः **सुखेन न प्रसार्यते,** पिण्डाद्यर्थं हस्तप्रसारणं शुभं न, तेनैव **श्रेयान्** प्रशस्यो**ऽगारवासो** गार्हस्थ्यं तत्र न कश्चिद्याचते, स्वार्जितं दीनादिभ्यो दत्वा भुज्यते, **इति** पूर्वोक्तप्रकारेण **भिक्षुर्न चिन्तयेत्** ॥

**याञ्चापरीषहे बलभद्रो दृष्टान्तः**—रामो **बलदेवो** हरिशबं वहन् सिद्धार्थबोधितः **कृष्ण**वपुः संस्कार्य स्वयं च परिव्रज्य **तुङ्गिकशृङ्गे** तपस्तप्यमानस्तृणकाष्ठाहारकेभ्यो भिक्षां लान् ग्रामं वा पुरं नागात्, यथा तेन याञ्चापरीषहो न सोढ एवं नान्यैः कार्यं, अन्ये आहु**र्बलस्य** भिक्षां भ्राम्यतो बहुजनस्तद्रूपेणाक्षिप्तो न किञ्चिदन्यद्वेत्ति, तच्चित्त एवास्थादिति स नगरादिषु नागात्, पान्थेभ्य एव भिक्षां ययाचे, एष याञ्चापरीषहः प्रशस्तः, एवं साधुभिरपि सह्यः, उक्तश्चतुर्दशो याञ्चापरीषहः ॥२९॥

Jain Education International 2010_02  For Private & Personal Use Only  www.jainelibrary.org

याञ्चायां कदाचिल्लाभान्तरायदोषान्न लभेतेत्यलाभपरीषहमाह—

**परेसु घासमेसिज्जा, भोयणे परिणिट्ठिए ।**
**लद्धे पिंडे अलद्धे वा, नाणुतपिज्ज संजए ॥३०॥**

**व्याख्या—परेषु** गृहिषु **ग्रासं** कवलं **एषयेत्** भ्रमरवत्, **भोजने**ऽन्ने **सुपरिनिष्ठिते** स्वयं सिद्धे सति, माभूत् पूर्वंगमे तदर्थं पाकादिप्रवृत्तनिष्ठा च, ततः **पिण्डे लब्धेऽलब्धे वा**, अल्पेऽनिष्टे वा लब्धे **नानुतप्येत** न दूयेत, न हृष्येत वा **संयतः** ॥३०॥

तथा—

**अज्जेवाहं न लब्भामि, अवि लाभो सुए सिआ ।**
**जो एवं पडिसंचिक्खे, अलाभो तं न तज्जए ॥३१॥**

**व्याख्या—अद्यैवा**स्मिन्नेव दिने**ऽहं न लभे, अपि** सम्भावने, **श्वः** शुद्धपिण्ड**लाभः स्यात्** अन्येद्युरन्यतरेद्युर्वा, **य एवं प्रतिसमीक्षेन विचारयेत् तं अलाभपरीषहो न तर्जयेत** नाभिभवेत् ॥

**अद्यैवाहं न लभामीति पादे लौकिकमुदाहरणं-वासुदेवसत्यकिबलदेवदारकाश्वा**श्वहृता अटव्यां वटाधो रात्रौ स्थिताः, **दारक** आद्ये यामे जागर्त्ति, तदा क्रोधः पिशाचरूपेणैत्य दारकं वक्ति भिक्षार्थमेतः सुप्तानद्मि, युद्धं वा देहि ? तेनोचे युद्ध्यस्व ? ततो द्वावपि युद्ध्यतः, दारको यथा यथा तं हन्तुं न शक्नोति तथा तथा रुष्यति, क्रोधोऽपि तथा तथा वर्द्धते, एवं दारकः कृच्छ्रेण याममत्यैत् । द्वितीययामं **सत्यकि**स्तृतीययामं च **बलः** कृच्छ्रेण, तुर्ययामे **हरिः** पिशाचोक्तो जगौ, मामजित्वा मत्सहायान् कथमत्सीति तयोर्युद्धं लग्नं, यथा यथा युद्धयति पिशाचस्तथा तथा **वासुदेवो**ऽहो बलवान् मल्ल इति तुष्यति, तथा तथा पिशाचो हीयते, तेनेच्छं क्षपितं क्रोधो लघुर्नीव्यां क्षिप्त्वा मुक्तः, प्रातर्जानुकर्पूरयोः केन घृष्टाः ? इति **हरिपृष्टै**स्तैरुक्तं पिशाचेन । **हरिर्व**क्ति स एष कोपः पिशाचो मया शान्तो जित इत्युक्त्वा नीव्या निष्कास्य तेन तेभ्यः सोऽदर्शि । एवमलाभे यो न दूयते तस्याऽलाभदुःखं हीयते, यस्त्वर्त्तिकृत् स लोभेनार्द्यते ।

**अलाभपरीषहे ढण्ढणसुतो दृष्टान्तः—**कस्मिंश्चिद् ग्रामे **परासुरो** विप्रो राङ्नियुक्तो ग्राम्यै राज्ञः क्षेत्राणि खेटयन् भक्तागमेऽपि निर्घृणस्तान्नाऽमुञ्चत् । राजक्षेत्रं वापयित्वा श्रान्तैः क्षुत्तृषाक्रान्तैः षट्हलशतनियुक्तषट्हालिकशतैर्द्वादशभिर्वृषशतैश्चाऽऽयाते भक्तेऽपि वेलातिक्रमेण बलात् स्वक्षेत्रैकैकां शीतां दापयन्नन्तरायकर्माजित्वाऽनालोच्य मृत्वा च भवं

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

भ्रान्त्वाकामनिर्जरया **द्वारावत्यां कृष्ण**-हरेर्**ढण्ढणा**पत्न्यां **ढण्ढण**कुमारसुतोऽभूत । स यौवने श्री**नेमे**र्धर्मं श्रुत्वा प्रव्रज्य बहुश्रुतोऽभूत् ।

अन्यदा तदन्तरायकर्म तस्योदीर्णं, ऋद्धेषु ग्रामेषु पुरादिषु सश्रद्धश्राद्धौकस्स्वपि स भिक्षां न लेभे, अनर्हं वा लेभे । अन्यदा तेन तत्कारणं पृष्टः स्वामी तस्यान्तरायकर्मोचे । तदाऽसावर्हतोऽग्रेऽभ्यग्रहीत् परलाभो मया न ग्राह्यः, स क्षुत्परीषहं सहमानः कालमत्यैत् । **हरि**र्द्वारिकैतं प्रभुं पप्रच्छ भगवन् तवाष्टादशसहस्त्रर्षिषु को दुष्करकारकः ? स्वाम्यूचे **ढण्ढणः**, योऽलाभपरीषहमेवं सहते, स गोचराग्रे गतोऽस्ति, पुरीं विशंस्त्वं तं द्रक्ष्यसि । **हरिः** पुरीं विशन् भिक्षायै प्रत्योको विशन्तं **ढण्ढणं** दृष्ट्वेभादुत्तीर्यानमत् । वन्द्यमानश्चेभ्येन दृष्ट्वा राजार्चय इति स्वगृहागतो मोदकैः प्रत्यलाभि । प्रभुमेत्य **ढण्ढण**मुनिर्जगौ प्रभो किं क्षीणो मेऽन्तरायः ? स्वाम्याह न क्षीणः, इयं **कृष्ण**लब्धिर्न ते । सोऽन्यलाभं नाश्नामीति विचिन्त्य शुद्धस्थण्डिले मोदकान् परिष्ठापयन्नपूर्वकरणात् केवल्यभूत् । एवं अलाभपरीषहः सह्यः इत्युक्तोऽलाभपरीषहः पञ्चदशः ॥३१॥

अलाभादन्तप्रान्तासिनां रोगाः स्युरिति रोगपरीषहमाह–

**नच्चा उप्पइअं दुक्खं, वेयणाए दुहट्टिए ।**
**अदीणो थावए पण्णं, पुट्ठो तत्थहियासए ॥३२॥**

**व्याख्या–ज्ञात्वा उत्पतितमु**द्भूतं **दुःखं** रोगदुःखं **वेदनया** स्फोटपृष्ठग्रहादिपीडनया दुःखेनार्त्तितोऽर्दितो **दुःखार्त्तितः**, एवंविधोऽ**प्यदीनः स्थापयेत्** स्थिरीकुर्याच्चलन्तीं **प्रज्ञां**, स्वकर्मफलमेवैतदिति तत्त्वधियं । **स्पृष्टोऽपि** 'अपेर्लोपात्' व्याप्तोऽपि राजमदादिभिः, यद्वा पुष्ट इव **पुष्टो** व्याधिभिरक्लैब्यात्, **तत्र** प्रज्ञास्थापने सति **अध्यासीत्** अधिसहेत रोगजं दुःखम् ॥३२॥

चिकित्सा न कारयितव्येत्याह–

**तिगिच्छं नाभिनंदिज्जा, संचिक्खत्तगवेसए ।**
**एवं खु तस्स सामण्णं, जं न कुज्जा न कारवे ॥३३॥**

**व्याख्या**–चिकित्सां रोगप्रतीकारं **नाभिनन्दे**त् नानुमन्येत, आस्तां कृतकारिते, 'संचिक्खे'त्ति **समाधिना तिष्ठेत्**, न कूर्जनकर्करायितादि कुर्यात् । चारित्रात्मानं गवेषयतीत्**यात्मगवेषकः, एवमे**तद्वक्ष्यमाणं 'खु'त्ति **यस्मात् तस्य श्रामण्यं** श्रमणभावो **यच्चि**कित्सां न कुर्यात्, **न कारयेत्**, नानुमन्यत च । जिनकल्पिकापेक्षमेतत्, स्थविर-कल्पिकाः पुष्टालम्बनाश्चिकित्सां कारयन्त्यपि ॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**रोगपरीषहे कालवैशिकमुनिदृष्टान्तः—मथुरायां जितशत्रु**राजा, तेन **काली**नाम्नी सुरूपैका वेश्यान्तःपुरे क्षिप्ता, तस्याः पुत्रः **कालवैशिक**कुमारः स्थविराणां पार्श्वे प्रव्रज्यैकाकित्वं प्रपन्नो गतो **मुद्गलशैलपुरं, तत्राहतशत्रो** राज्ञो राज्ञी तत्स्वसा, तस्य साधोरर्शव्याधिरभूत्, स तस्य चिकित्सां न करोति न च कारयति तथाविधप्रत्याख्यानात्, तद्वृत्तान्तज्ञया राज्यार्शौषधमिश्रमन्नं तस्मै दत्तं । सोऽधिकरणं तद् ज्ञात्वा भक्तं प्रत्याख्यातवान्। तेन च पुरा कुमारत्वे शिवानां शब्दं श्रुत्वा सेवकान् पृष्ट्वा ज्ञातशिवाशब्देनोचेऽमून् बद्ध्वानयत ? तैरेकः शिवो बद्ध्वानीतः, स तेन हन्यमानो यथा यथा खीखीति चक्रे तथा तथा सोऽहृष्यत्, शिवश्च हन्यमानो मृतोऽकामनिर्जरया व्यन्तरो भूत्वा विभङ्गज्ञानेनानशनिनं तं स्वघातकं ज्ञात्वा स्वदेहेन खीखीति कुर्वन्नत्ति । राजानशनिनं साधुं ज्ञात्वा रक्षितुं नरान् प्रैषीत्, यावन्नरा आययुस्तावच्छिवो न दृश्यते, गतेषु तेषु पुनस्तं सोऽत्ति । एवं साधुः खाद्यमानः शिवकृतव्यथामर्शार्त्तिं च सम्यगधिसह्य सिद्धः, एवं सह्यं । उक्तः षोडशो रोगपरीषहः ॥३३॥

रोगिणः शय्यादौ दुस्सहस्तृणस्पर्श इति तं परीषहमाह—

**अचेलगस्स लूहस्स, संजयस्स तवस्सिणो ।**
**तणेसु सुयमाणस्स, होज्जा गायविराहणा ॥३४॥**

**व्याख्या—अचेलकस्य रूक्षाहारत्वात् संयतस्य तपस्विनस्तृणेषु** दर्भादिषु **शयानस्या**सीनस्य वा **गात्रविराधना** गात्रस्य पीडा **भवेत्** ॥३४॥

ततः—

**आयवस्स निवाएणं, अतुला हवइ वेयणा ।**
**एयं नच्चा न सेवंति, तंतुजं तणतज्जिया ॥३५॥**

**व्याख्या—आतपस्य** धर्मस्य **नितरां पातेनाऽतुला वेदना स्यात्, एवं ज्ञात्वा** आस्तरणाय **तन्तुजं वस्त्रं** कम्बलादिं **तृणैस्तर्जिताः** पीडिता अपि **न सेवन्ते** । एतज्जिनकल्पिकापेक्षं, स्थविरकल्पिकास्तु सापेक्षसंयमत्वाद्वस्त्रं सेवन्ते, तेषां तृणस्पर्शपरीषहः कण्टकादिस्पर्शे, कारणेन तृणक्षेपे सार्द्धद्विहस्तसंस्तरे शयनेन देहेऽपि भवेत् ॥

**तृणस्पर्शपरीषहे भद्रर्षिदृष्टान्तः—श्रावस्त्यां जितशत्रो** राज्ञः पुत्रो **भद्र**स्त्यक्तकामभोगः स्थविरान्ते प्रव्रज्य बहुश्रुतः सन् काले एकत्वं प्रपन्नो विराज्ये गतो राजनरैर्हेरिकत्वेन बद्धोऽजल्पन् तक्षित्वासितदर्भैः संवेष्ट्य मुक्तो, दर्भै रक्तमिलितैर्दुःखं प्रापितस्तृणपरीषहं सम्यक् सेहे उक्तः सप्तदशस्तृणस्पर्शपरीषहः ॥३५॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तृणैः स्वेदान्मलः स्यादिति मलपरीषहमाह—

**किलिण्णगाए मेहावी, पंकेण व रएण वा ।**
**घिंसु वा परितावेणं, सायं नो परिदेवए ॥३६॥**

**व्याख्या**—क्लिन्नं बाधितं गात्रं यस्येति **क्लिन्नगात्रः क्लिष्टगात्रो, मेधावी** अस्नानमर्यादावान्, व्याधितो वा अरोगी वेत्यादि स्मरन्, **पङ्केन** स्वेदार्द्रमलेन, **रजसा** कठिनमलेन पांशुना वा, **ग्रीष्मे, वा**शब्दाच्छरदि **परितापेन सातं** सुखं **न परिदेवेत** न प्रलपेत, कदा मे एवं मलाक्तस्य सुखं स्यादिति ॥३६॥

ततः—

**वेइज्ज निज्जरापेही, आरियं धम्मणुत्तरं ।**
**जाव सरीरभेउ त्ति, जल्लं काएण धारए ॥३७॥**

**व्याख्या—वेदयेत्** सहेत **निर्जरापेक्षी,** कर्मणामात्यन्तिकक्षयार्थं जल्लजं दुःखं, **आर्यं धर्मं, अनुत्तरं** सर्वोत्तमं प्रपन्नो भवेद् भिक्षुरित्यर्थः, **यावच्छरीरस्य भेदो** विनाश स्यात्तावज्**जल्लं** काठिन्यापन्नं मलं **कायेन धारयेत्** । (पाठान्तरे-'**वेयंतो निज्जरापेही**'— **वेदयन्** जानन् **निर्जरार्थी** ।) ॥

**मलस्याऽपरीषहे इभ्यसुतर्षिदृष्टान्तः—चम्पायां सुनन्दो** वणिक् श्राद्धः साधूनां सर्वदौषधादि ददौ । तदापणे साधवो मलाक्ताङ्गा एतास्तन्मलगन्धेनोत्कटेनौषधानां गन्धो भग्नः, **सुनन्देन** गन्धद्रव्यभावितेनाचिन्ति साधूनां सर्वं लष्टं परं मलधारित्वं न चारु, स तदनालोच्य मृतः **कौशाम्ब्या**मिभ्यपुत्रो जातो धर्मं श्रुत्वा दीक्षितश्च । तन्मलगर्हाकर्मोदयात् स दुर्गन्धोऽभूत् । यत्र यत्र याति तत्र तत्र कोऽपि स्थातुं नाशकत् । उड्डाहोऽभूत् । साधुभिः स वसतावेव स्थापितस्तत्र तेन कायोत्सर्गस्थेन स्वदुर्गन्धापनयनार्थं देवताराधिता, तुष्टया देवतया स सुगन्धः कृतः, ततोऽयं सुर्या सुगन्धः कृत इत्युड्डाहं ज्ञात्वा पुनः कायोत्सर्गस्थः सुर्या सर्वसामान्यगन्धः कृतः, यथा तेन मलो न सोढस्तथान्यैर्न कार्यं । इत्युक्तोऽष्टादशो मलपरीषहः ॥३७॥

समलः शुचीन् सत्क्रियमाणान् दृष्ट्वा कोऽपि सत्कारादि स्पृहयेदिति सत्कार-पुरस्कारपरीषहमाह—

**अभिवायणमब्भुट्ठाणं, सामी कुज्जा निमंतणं ।**
**जे ताइं पडिसेवंति, न तेसिं पीहए मुणी ॥३८॥**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या–अभिवादनं** शिरोनामनांह्रिस्पर्शादि, **अभ्युत्थानं** स्पष्टं, तथासनमोचनं, तता **स्वामी** नृपादिः, **निमन्त्रणं** स्वगृहे पारणादिरूपं **कुर्यात्** । **ये** स्वयूथ्या अन्यतीर्थ्या वा **तान्य**भिवादनादीनि श्रुतनिषिद्धान्यपि **प्रतिसेवन्ते, न तेभ्यः स्पृहयेन्**मुनिर्यथा सुजन्मानोऽमी सभाग्या य एवं सत्क्रियन्ते इति ॥३८॥

किञ्च–

**अणुक्कसाई अप्पिच्छे, अण्णाएसी अलोलुए ।**
**रसेसु नाणुगिज्झिज्जा नाणुतप्पिज्ज पण्णवं ॥३९॥**

**व्याख्या**–उत्कः उत्कण्ठितः सत्कारादिषु शेते इत्येवंशील उत्कशायी, न तथा **अनुत्कशायी**, यद्वा प्राकृतत्वात् **अणुकषायी**, सत्काराद्यकुर्वते न कुप्यति, तत्सम्पत्तौ च न मानी, यतः–

**पलिमंथमहं वियाणिया, जावि य वंदणपूअणा इहं ।**
**सुहुमे सल्ले दुरुद्धरे, इय संखाय मुणी न मज्जइ ॥१॥ [ ]**

तदर्थमातापनादिमायालोभो वा न, **अल्पेच्छो** धर्मोपकरणमात्रेच्छः, अज्ञातैषी स्वं जात्यादिभिरविज्ञाप्याऽज्ञातचोक्षकुलेषु चैषयति पिण्डादीनि**त्यज्ञातैषी, अलोलुपः** सारौदनादिष्वगृद्धः, **रसेषु** घृतादिषु **नानुगृह्येन्**नाकाङ्क्षां कुर्यात्, सरसाशिनोऽन्यतीर्थ्यान्न स्तुयात् । **नानुतप्येत** सत्काराद्यर्थी किमहमेषां मध्ये न दीक्षित इति । प्रज्ञा हेयादेयविवेकमतिस्तद्वान् **प्रज्ञावान्** । सत्कारके तोषं न्यक्कारके च द्वेषमकुर्वताऽयं परीषहः सह्यः ॥

**असत्कारपरीषहस्याऽसहने सहने च श्राद्धसाधुदृष्टान्तः–मथुरायामिन्द्रदत्त**-पुरोधसा प्रासादस्थेनाधो यान्तं यतिं वीक्ष्यास्य शीर्षेंह्रिं मुञ्चन्नस्मीत्याशयेनांह्रिरधोऽवालम्बि । स श्राद्धेन श्रेष्ठिना दृष्टः कृता च प्रतिज्ञाऽवश्यं मयैतत्पादश्छेद्यः, अथ स तस्य छिद्राणि वीक्षते। गुरूंश्चापि स्वप्रतिज्ञोदन्तं सोऽवक् । तैरूचेऽयं परीषहः साधुभिः सह्यः, सोऽवग् मम परं प्रतिज्ञा । गुरुभिरूचेऽस्यगृहेऽधुना किमस्ति ? सोऽवगस्य प्रासादो नवो निष्पन्नोऽस्ति, तत्प्रवेशाह्नि च स नृपं तत्र भोजयिष्यति, तैरूचे राजा तद्गृहे प्रविशंस्त्वया करे धृत्वा रक्षणीयः, विद्यया तत्प्रासादं चाहं पातयिष्ये । श्रेष्ठी तथाकरोत् पतितश्च तत्प्रासादः, ततः श्रेष्ठिना राज्ञे प्रोक्तमसौ वो हन्तुं दध्यौ। राजा रुष्टः पुरोहितं श्रेष्ठिसाच्चक्रे । स ज्ञापितः श्रेष्ठिना साध्वभक्तिं । प्रवेशितश्चेन्द्रकीले तदंह्रिः, स्वप्रतिज्ञापूरणार्थं च तेन तस्य पिष्टमयोंह्रिश्छिन्नः, प्रतिबुद्धजैनधर्मश्च स विसृष्टः, अत्र साधुनाऽसत्कारपरीषहः सोढः, श्राद्धेन च यथा न सोढो न तथा कार्यं, किन्तु साधुवत् सह्यः, उक्त एकोनविंशः सत्कारपुरस्कारपरीषहः ॥३९॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

क्षुधादिपरीषहजयेऽपि प्रज्ञायां च खेदो न कार्य इति प्रज्ञापरीषहमाह–

**से नूणं मए पुव्वं, कम्मानाणफला कडा ।**
**जेणाहं नाभिजाणामि, पुट्ठो केणइ कन्हुई ॥४०॥**

**व्याख्या–'से'** उपन्यासे, इह प्रज्ञापरीषहो द्विधा, प्रज्ञायाः प्रकर्षेऽप्रकर्षे च, तत्र प्रज्ञाप्रकर्षपक्षे व्याख्या–**नूनं मया पूर्वभवे ज्ञानफला**नि ज्ञानप्रशंसादीनि **कर्माणि कृतानि**। अपेर्लोपात् **येनाहं नापि** मर्त्योऽपि **पृष्टः केनापि** सर्वेणेत्यर्थः, **कस्मिंश्चिद्य**त्रतत्रार्थे-**ऽभिज्ञानामि** उत्तरं ददे ॥४०॥

**अह पच्छा उइज्जंति, कम्मानाणफला कडा ।**
**एवमासासि अप्पाणं, नच्चा कम्मविवागयं ॥४१॥**

**व्याख्या–अथ पश्चादुदेष्यन्ति अज्ञानफलानि कर्माणि कृतान्य**बाधाकालादेः, तदुच्छेदायोपक्रमामि, न तु ज्ञानगर्वं दधे । **एवमाश्वासयित्वा**ऽऽत्मानं निर्मलं कुरु ? **ज्ञात्वा कर्मविपाककं** कर्मणां कुत्सितं विपाककम् ॥४१॥

प्रज्ञाहीनपक्षे तु व्याख्या–**नूनं मया पूर्वं कर्माण्यज्ञानफलानि** ज्ञानहीलादीनि **कृतानि, येनाहं केनापि कस्मिंश्चित्** सुगमेऽपि जीवादौ द्रव्येऽर्थे वा **पृष्टो नाभिजानामि** न वेद्मि ॥४०॥

'अह' **अथ** यदा तदा **चोदीयन्ते** द्रव्यादिसान्निध्यात् **कर्माण्यज्ञानफलानि कृतानि**, निर्मलस्य जन्तोः प्रकाशरूपस्य स्फटिकाभस्याऽप्रकाशत्वे ज्ञानावृत्तिरेव हेतुः, रवेरिवाभ्रं, **एवं** ध्यात्वाऽऽ**श्वासयात्मानं** ? दुःखितं स्वस्थं कुरु ? शेषं प्राग्वत् ॥४१॥

प्रज्ञापरीषहे **सागरचन्द्र**सूरिदृष्टान्तः–

**उज्जेणीकालखमणा, सागरखमणा सुवन्नभूमीए ।**
**इंदो आउयसेसं, पुच्छइ सादिव्वकरणं च ॥१॥** [ उ.नि./गा.१२० ]

**अवन्त्यां कालिका**चार्यो बहुश्रुतः, तच्छिष्याः पठितुं नेच्छन्ति सामाचार्यामलसाः, मृद्वपि शिक्षिताः क्रुद्ध्यन्ति । गुरुः शय्यातरस्योक्त्वा शिष्यान् मुक्त्वा रात्रौ निर्गतः सुवर्णभूमौ । तत्र शिष्यशिष्यः **सागरक्षपणः** सगच्छोऽस्ति । तदुपाश्रये स गतः, तेनाऽनुपलक्षयता नाभ्युत्थानादि कृतं, परं वृद्धसाधुरिति स्वाश्रयेऽस्थापि । तेन कुत आगता इति पृष्टे**ऽवन्त्या** इत्यसावूचे । ततोऽनुयोगं शिष्येभ्यो ददता तेन पृष्टं वृद्धायं श्रुतस्कन्धस्तव गतार्थः ? तेनोक्तं नूनं गतार्थः, सोऽवक् शृणु तर्हि इत्युक्त्वा स प्रज्ञागर्वेण श्रावयितुं लग्नः । इतः

Jain Education International 2010_02          For Private & Personal Use Only          www.jainelibrary.org

**कालिका**चार्यशिष्यास्तु प्रातर्गुरुमपश्यन्तः शय्यातरमूचुः क्व गुरवः ? सोऽवक् यूयं दुर्विनीताः कृतघ्ना निजगुरुं क्वापि गतं न वित्थ ? किमहं जाने ? तैर्भाषादिना गुरुस्वरूपं वेत्त्येष इति ज्ञात्वा निर्बन्धात् पृष्टः, न पुनरेवं कुर्म एवेति तैः प्रपन्ने तेन स्थानं प्रोक्तं । ततस्ते सुवर्णभूमिं गताः, तद्वृन्दं दृष्ट्वा लोका आहुः क आचार्यो याति, ते उचुः **कालिका**चार्याः, जनपरम्परया **सागर**क्षपणेन श्रुत्वा पृष्टं भो वृद्ध ! किं श्रुतं ? यन्मम पितामह एति। सोऽवक् मयापि श्रुतं । साधव एताः, **सागरो**ऽभ्युत्थितः, तैरूचे सन्त्यत्र गुरवः ? **सागरेणो**चे ज्यायानेकोऽस्ति न गुरवः, साधुभिर्दृष्ट्वोचे अम्येव गुरवः, तं स्वगुरुं ज्ञात्वा ह्रीणः **सागरस्ते** च सर्वे पदोर्लगित्वा गुरुमवन्दन्ताऽक्षामयंश्च । **सागरः** पुनः पुनः क्षामयन् पप्रच्छ कीदृक्कीदृगहं व्याख्यामि ? गुरुरूचे लष्टं, परं वत्स मा गर्वीः ! को वेत्ति कस्य क आगम इति । धूलिचिक्खिल्लपिण्डज्ञाते उक्ते—

**मा वहउ कोइ गव्वं, इत्थ जए पंडिओ अहं चेव ।**
**आसव्वन्नु मयाओ, तरतमजोएण मइ विविहा ॥१॥** [ सं.रं./गा.६७८६ ]

स प्रतिक्रान्तः, इति न कार्यं प्रज्ञौत्सुक्यं **सागर**क्षपणवत् । **कालिका**चार्याणां समीपे शक्र एत्य निगोदजीवस्वरूपं पप्रच्छेत्यादिसम्बन्धो ग्रन्थान्तरादवसेयः, एवं प्रज्ञायाः सद्भावे दृष्टान्त उक्तः, अभावे तु स्वयं ज्ञेयः, इत्युक्तो विंशः प्रज्ञापरीषहः ॥४१॥

प्रज्ञावदज्ञानमपि सह्यं, तस्मिन्न दुःखं कार्यं, इत्यज्ञानपरीषहमाह—

**निरट्ठगंमि विरउ, मेहुणाओ सुसंवुडो ।**
**जो सक्खं नाभिजाणामि, धम्मं कल्लाणपावगं ॥४२॥**

**व्याख्या—निरर्थके** मोक्षाऽभावे सति **मैथुनाद्विरतः, सुसंवृत** इन्द्रियमनःसंवरात्, दुस्त्याज्यस्य मैथुनस्य विरत्युक्त्या हिंसादिविरतोऽपि ज्ञेयः, **यः साक्षात्** स्फुटं **नाभिजानामि, धर्मं** वस्तुस्वरूपं, **कल्याणं** शुभं **पापकम**शुभं वा, बिन्दुलोपोऽत्र यद्वा **धर्मम**ाचारं, कल्योऽत्यन्तं नीरुग् न मोक्षस्तं अणतीति **कल्याणं** मोक्षहेतुं **पापकं** नरकादिहेतुं, कोऽर्थः ? चेद्विरतेः फलं तदा मे कथमज्ञानम् ? ॥४२॥

तथा—

**तवोवहाणमाया( दा )य, पडिमं पडिवज्जओ ।**
**एवं पि विहरओ मे, छउमं न नियट्टइ ॥४३॥**

**व्याख्या—तपो** भद्रादि, **उपधानं** श्रुतयोगरूपमाचाम्लादि, **तदादाय** चरित्वा **प्रतिमां**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

मासिक्यादिकां **प्रतिपद्य, एवं** क्रिययापि **मे विहरतो** मासकल्पादिनाऽप्रतिबन्धेन, **ज्ञाना-वृत्त्यादि न निवर्त्तते,** इति न ध्यायेत्, अज्ञानपरीषहोऽप्यज्ञानस्य भावाभावाभ्यां द्विधा, ततोऽज्ञानाभावपक्षे त्वेवं—**निरर्थको**ऽधिकाराद् ज्ञानमदे **विरतो मैथुनात् सुसंवृतः,** यत् **योऽहं साक्षाद्धर्मं कल्याणं पापकं** वा **नाभिजानामि "जे एगं जाणइ से सव्वं जाणइ"** [ ] इत्यागमात्, **छद्मस्थो**ऽहमेकमपि धर्मवस्तुस्वरूपं वर्णं च **न** पूर्णं **वेद्मि,** छद्मस्थस्य जीवादीनामप्रत्यक्षत्वात्, ततः साक्षाद्वस्तुभासि चेन्न ज्ञानं मे, ततः किं मुकुलितज्ञानेन गर्वः ? तथा तपउपधानादिनाप्यच्छेद्ये छद्मनि घोरे सति को मे ज्ञानगर्वः ? ॥

**अज्ञानपरीषहेऽशकटापितृसाधुदृष्टान्तः—गङ्गा**कूले द्वौ बन्धू दीक्षितौ, तत्रैको बहुश्रुतोऽपरश्चाल्पश्रुतः, यो बहुश्रुतः स शिष्यैः सूत्रार्थनिमित्तमायाद्भिर्दिवा न निर्व्यापारो, रात्रौ च प्रतीच्छकाद्यैः कालेऽपि न स्वप्तुं लेभे । अल्पश्रुतस्तु सर्वां रात्रिं सुखेन शेते । अन्यदा स बहुश्रुतः सूरिर्निद्राखेदाद्दध्यौ, अहो मद्भ्राता सपुण्यो यः सुखं शेते, मन्द-भाग्यश्चाहं क्षणमपि स्वप्तुं न लेभे । इति तेन ज्ञानावरणकर्मार्जि ।

ततः सोऽनालोच्याप्रतिक्रम्य मृत्वा स्वर्गे गत् ततश्च च्युत्वा **भरते** आभीरसुतोऽभूत् । यौवने ऊढः, सुता जाता, साऽतीवसुरूपा भद्रकन्यका, अन्यदा स आभीरः पुत्र्या सहान्याभीराणां सार्थेन शकटं घृतभाजनैर्भृत्वा विक्रयार्थं पुरं प्रति चलितः, कन्या च सा शकटमखेटयत् । आभीरास्तद्रूपाक्षिप्तास्तदनःपार्श्वे स्वानांसि खेटयंतस्तां च पश्यन्त उत्पथेन निजानांस्यभज्जन् । तेन तस्या अशकटाख्याभूत्, तत्पितुश्चा**ऽशकटापितेति** । स तद् दृष्ट्वा वैराग्यात् सुतां विवाह्य तस्यै च सर्वस्वं दत्वाऽदीक्षि । तेन त्रीण्युत्तराध्ययनान्यधीताति, तुर्ये 'असंखय'मित्यध्ययने उद्दिश्यमाने तद् ज्ञानावरणकर्मोदीर्णं, पठतो वर्णमात्रं नैत् । आचाम्लद्वयं जातं । गुरुभिरध्ययनेऽनुज्ञायमानेऽनेन पृष्टं भगवन्नस्याध्ययनस्य को योगः ? तैरूचे यावदिदं नाधीतं तावदाचाम्लानि क्रियन्ते, सोऽदीनस्तपश्चक्रे, एवं तेन द्वादश-भिर्वर्षैराचाम्लानि कुर्वता 'असंखयं' पठितं, निर्जरितं च शेषकर्म, ततस्तेन श्रुतं क्षिप्रमधीतम् ।

**परितंतो वायणाए, गंगाकूले पियाऽसगडाए ।**
**संवच्छरेहिं लद्धं, बारसहिं असंखयज्झयणं ॥१॥ [उ.नि./गा.१२१]**

एवमज्ञानपरीषहः सह्यः ।

**ज्ञानपरीषहाऽसहने स्थूलभद्रो दृष्टान्तः—स्थूलभद्र**श्चतुर्दशपूर्वी पूर्वमित्रगृहे गतस्त-त्पत्न्या नतः, क्व स गत इति पृष्टे सोचे वाणिज्ये । तद्गृहं च पूर्वं लष्टमासीत्तदा च शटितपतितं चाभूत् । **स्थूलभद्रः** स्वज्ञानेन स्तम्भाधो निधिं ज्ञात्वा हस्तं च तत्र कृत्वोचे—

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**इमं च एरिसं तं च, तारिसं पिच्छ केरिसं जायं ।**
**इय भणइ थूलभद्दो, सन्नाइघरं गओ संतो ॥१॥** [उ. नि./गा.१२२]

एतच्चेदृशं द्रव्यजातं, स चाऽज्ञानेन भ्राम्यति, तच्च तादृशं सौधं प्रेक्षस्व ! कीदृशं जातं जीर्णं !! एवमुक्तो जनो वेत्ति यथा गृहमेतत् पूर्वं लष्टमिदानीं च पतितमिति । एवं स्थूलभद्रप्रभुणान्यरूपेणानित्यतापि दर्शिता । ततोऽसावुपाश्रयं गतः, सुहृच्च स गृहमेतः पत्न्योचे **स्थूलभद्रो** नो गृहमेत्यैतदूचे । स तत्र खनन् रत्नभृतकलशं लेभे । इति **स्थूलभद्रेण** ज्ञानपरीषहो न सोढः ।

इह प्रज्ञाऽज्ञानपरीषहयोरयं भेदः-प्रज्ञापरीषहः परप्रश्ने स्यात्, अज्ञानपरीषहस्तु सदैवापूर्णमत्यादिज्ञानेष्वप्यज्ञानेष्वपि । यद्वा प्रज्ञा शास्त्रस्फुरणा, अज्ञानं च त्रिकालवस्त्व-ज्ञानं। इत्युक्तोऽज्ञानपरीषहः एकविंशः ॥४३॥ यतः–

अज्ञानदर्शने सम्यक्त्वे शङ्का स्यात्, सा न कार्येति दर्शनपरीषहमाह–

**नत्थि नूणं पर लोए, इड्ढी वावि तवस्सिणो ।**
**अदुवा वंचिओ मि त्ति, इइ भिक्खू न चिंतए ॥४४॥**

**व्याख्या–नास्ति नूनं परलोको** भवान्तरं **ऋद्धिर्वा**मर्षौषध्याद्यास्**तपस्विनो**ऽपि, अदृश्यमानत्वात् । **अथवाहं वञ्चितोऽस्मि** लोचोपवासादिना देहकष्टानुष्ठानेन भोगेभ्य **इति भिक्षुर्न चिन्तयेत्** ॥४४॥ यतः–

**पादरजसा प्रशमनं, सर्वरुजां साधवः क्षणात् कुर्युः ।**
**त्रिभुवनविस्मयजनकान्, दद्युः कामांस्तृणाग्राद्वा ॥१॥** [ ]
**धर्माद्रत्नोन्मिश्रित-काञ्चनवर्षादिसर्वसामर्थ्यम् ।**
**उद्गतभीमोरुशिला-सहस्रसंपातशक्तिश्च ॥२॥** [ ] इत्यादिऋद्धिः ।

तथा–

**अभू जिणा अत्थि जिणा, अदुवा वि भविस्सइ ।**
**मुसं ते एवमाहंसु, इति भिक्खू न चिंतए ॥४५॥**

**व्याख्या–अभूवन् जिनाः** सर्वज्ञा, अस्तीत्यव्ययं, **सन्ति जिनाः**, अस्याध्ययनस्य **कर्मप्रवाद**नामाष्टमपूर्वसप्तदशप्राभृतात् **सुधर्म**स्वामिना **जम्बूं** प्रति कथनाच्च तदा जिनाः सन्ति, विदेहापेक्षयाधुनापि । **अथवा, अपि** सत्ये, **भविष्यन्ति** जिनाः, एतन्**मृषा, ते एवं** धर्म**माख्युः**रिति च मृषा, **इति भिक्षुर्न चिन्तयेत्** ॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**दर्शनपरीषहे आषाढसूरिकथा—**

**ओहाविउकामो वि य, अज्जासाढो उ पणियभूमीए ।**
**काऊण रायरूवं, पच्छा सीसेण अणुसिट्ठो ॥१॥** [ उ. नि./गा.१२३ ]

अवधावितुकामो दीक्षां, मुमुक्षुरपि पणितभूमौ हट्टमध्ये वत्साभूमौ । आ**र्याषाढाचार्या** बहुश्रुता बहुशिष्याश्च । गच्छे कालं कुर्वन्तं शिष्यं निर्यामयन्तः स्वर्गतेन भवता मे दर्शनं देयमिति चोचुः, परं कोऽपि मृतो दर्शनं तस्मै नादात् । एकोऽतीवभक्तः शिष्यो निर्यामितो गाढाग्रहेण तथैवोक्तो नैत् । पश्चाद् गुरुणाऽचिन्ति न किञ्चित् कष्टक्रियाफलं, न परलोकोऽस्ति, ततः स स्वलिङ्गेनैवोत्प्रधावितः । इतस्तेन देवीभूतेन शिष्येण स्वस्थेन गुरुस्वरूपं दृष्ट्वा पथि ग्रामं कृत्वा नाट्यमारब्धं । गुरुस्तत्र तत् षण्मासीं यावदपश्यत्, देवप्रभावात् क्षुधं तृषं च नाज्ञासीत्, तत्संहृत्य तेन ग्राममध्ये एव शून्याध्वनि षट् बालाः सर्वालङ्कारयुताः कृताः, सूरिस्तान् दृष्ट्वैषां भूषणैः सुखं जीविष्यामीति ध्यात्वाद्यं बालमूचेऽर्पय मे तवाभरणानि ! तेनोक्तमहं पृथ्वीकायाख्यो मां च चौरेभ्यो रक्ष ! अथ बलात्तद्भूषणानि लान्तं तं सोऽवग् भगवन्नेकं ममाख्यानं शृणु ! पश्चाद्भूषा लायाः, सूरिर्जगौ शृणोमि । सोऽवक् एकः कुम्भकृन्मृदं खनन् पतत्तयाक्रान्तोऽवक्—

**जेण भिक्खं बलिं देमि, जेण पोसेमि नाइओ ।**
**सा मे मही अक्कमइ, जायं सरणओ भयं ॥१॥** [ उ. नि./गा.१२४ ]

यत्सहायेन यथाक्रमं भिक्षुदेवेभ्यो भिक्षां बलिं च ददे, ज्ञातीन् स्वजनान् पोषयामि सा मही मामाक्रामति । अयमिहोपनयश्चौरभयादहं त्वां शरणमेतस्त्वं चैवं विलुम्पसि, ततो ममापि जातं शरणतो भयमिति सर्वत्र भाव्यं । तेन तु तदाभरणान्यादाय पतद्ग्रहे क्षिप्तानि । गतः पृथ्वीकायः, ततोऽप्कायाख्यो बालस्तथैव कृतेऽवक्कथां । तालाचरः **पाडलाख्यो गङ्गा**मुत्तरन् जले ह्रियमाणो जगौ—

**जेण रोहंति बीयाइं, जेण जीवंति कासवा ।**
**तस्स मज्झे विवज्जामि, जायं सरणओ भयं ॥१॥** [ उ. नि./गा.१२६ ]

कासवाः कृषीवलाः, विवज्जामीति विपद्ये । तेन भूषा आदाय सोऽपि मुक्तः । तेजःकायिकाख्यानं-तपस्विनोऽग्निनोटजो दग्धस्तदा स जगौ—

**जमहं दिया य राओ य, तप्पेमि महुसप्पिसा ।**
**तेण मे उडओ दड्ढो, जायं सरणओ भयं ॥१॥** [ उ. नि./गा.१२७ ]

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अथवा-**वग्घस्स मए भीएण, पावओ सरणं कओ ।**

**तेण दड्ढं ममं अंगं, जायं सरणओ भयं ॥१॥** [ उ. नि./गा.१२८ ]

वायुकायिकाख्यानं—कश्चिद्युवाऽक्षमाङ्ग आत्तदण्डः केनापि पृष्टः, किं दण्डः करे ? सोऽवग्—

**जेट्ठासाढेसु मासेसु, जो सुहो वाइ मारुओ ।**

**तेण मे भज्जइ अंगं जायं सरणओ भयं ॥१॥** [ उ. नि./गा.१२९ ]

वनस्पतिकायाख्यानं—वृक्षे पक्षिणोऽस्थुस्तेषां बाला जाताः, द्रुपार्श्वे वल्ल्युच्छ्रिता, द्रुं परिवेष्ट्योपरि विलग्ना, सफलाभूत् । वल्ल्याऽहिर्विलग्य तद्बालानादत् । पक्षिणो जगुः—

**जाव वुच्छं सुहं वुच्छं, पायवे निरुवद्दवे ।**

**मूलाओ उट्ठिया वल्ली, जायं सरणओ भयं ॥१॥** [ उ. नि./गा.१३२ ]

अर्थः—यावदुषितं तावत् सुखमुषितं निरुपद्रवे पादपे, द्रुमूलाद्वल्ल्युच्छ्रिता, शरणतो वृक्षादेव भयं जातम् ।

अथ त्रसकायाख्यानचतुष्कं—पुरेऽरिरुद्धे बहिःस्था मातङ्गाः पुरमध्ये यान्तो मध्यस्थैर्निष्कासिताः, बहिररिभिर्व्यथितास्तदा कश्चिज्जनोऽवक्—

**अब्भिंतरा य खुभिया, पिल्लंति बाहिरा जणा ।**

**दिसं भयह मायंगा, जायं सरणओ भयं ॥१॥** [ उ. नि./गा.१३३ ]

अर्थः—आभ्यन्तराः क्षुब्धाः परचक्रात् त्रस्ता युष्मान् प्रेरयन्ति निष्कासयन्ति, माभूदन्नादिक्षय इति । बाह्या अपि उपद्रवन्ति, ततो हे मातङ्गा ! दिशं काञ्चन भजत ! यात ! तथा कस्मिंश्चित् पुरे राजा स्वयं चौरो, भण्डकश्च पुरोहितः, जनवस्तु द्रव्यादि स्वयमेव लुण्टति। तदा लोका मिथोऽवदन्—

**जत्थ राया सयं चोरो, भंडिओ य पुरोहिओ ।**

**दिसं भयह नागरा, जायं सरणओ भयं ॥१॥** [ उ. नि./गा.१३४ ]

तथा द्विजेनैकेन तडागोऽखानि, पालौ च देवकुलारामौ तेन कृतौ, प्रवर्त्तितश्च तत्राऽजयागस्तेन । ततोऽयं द्विजो मृत्वा तत्रैवाऽजोऽभूत् । सोऽजस्तत्पुत्रैर्यज्ञे हन्तुं कर्णे धृत्वा नीयमानः स्वकारितस्थानानि पश्यन् जातजातिस्मरः स्ववाचा बिबीति पूत्कुर्वन् स्वमशोचत। तदातिशयज्ञानर्षिणा तं दृष्ट्वोक्तम्—

**सयमेव लुक्ख लोविए, अप्पणिया उ वियट्ठि खाणिया,**

**उवाईयलद्धओ आसी, किं छगला बिबीति वाससि ॥१॥** [ उ. नि./गा.१३८ ]

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**अर्थः- स्वयमेव वृक्षा रोपिताः, आत्मना तु तटाकी खानिता ।**
**उपार्जितलब्धः आसीः, किं छगल बिबीति ब्रूषे ? ॥**

तत् श्रुत्वाऽजस्तूर्ष्णी स्थितः, द्विजश्चिन्तितं साधूक्त्यासौ तूर्ष्णी भेजे ।

अथ तैः पृष्टः साधुरूचेऽयं वः पिता । ते आहुः कथं तत्प्रतीति ? साधुर्जगो स्वयं न्यस्तं निधिमेषोऽमुकस्थाने दर्शयिष्यति । तैर्गृहे नीतोऽजो निधिभूमिं पादैः खनितुं लग्नः, लब्धनिधिभिस्तैर्मुक्तोऽजः साधूपान्ते धर्मं श्रुत्वा भक्तं प्रत्याख्याय स्वर्ययौ । तेन शरणाय ये तटाकारामयज्ञाः प्रवर्त्तितास्त एवाऽशरणरूपा जाताः, एवं वयं त्वच्छरणं गताः जातं च त्वत्त एव नो भयम् ।

तुर्यो दृष्टान्तः—कामातुरेणैकेन द्विजेन पित्रा स्वसुतां यौवनरूपाढ्यां दृष्ट्वा तया सह भोगाभिलाषः कृतः, तदपूर्यमाणाभिलाषदुःखेन दिनं दिनं प्रति कृशदेहो जातः, भार्यया तत्कारणं पृष्टे निस्त्रपोऽसौ स्वाभिलाषं जगौ । भार्ययाऽचिन्ति नूनमयमपूर्णाभिलाषो मृत्युं प्राप्स्यति, रण्डीभूता चाहं निःशरणा भविष्यामीति विचिन्त्य तयोक्तं हे स्वामिन् त्वं चिन्तां मा कुरु ! अहं तवाभिलाषं पूरयिष्यामीत्युक्त्वा तया पुत्र्यै कथितं, हे पुत्रि ! अस्मत्कुल-जातां तनयां प्रथमं कुलयक्षो भुनक्ति, अतस्त्वया रात्रावागतस्य यक्षस्य भोगनिषेधो न कार्यः, किञ्चावासेऽपि तदा त्वया दीपो न रक्षणीयः, पुत्र्या तत्प्रतिपन्नं परं यक्षजिज्ञासया शरावाधो दीपो रक्षितः, अथ भार्योक्तवृत्तान्तो दुष्टद्विजस्तत्र गत्वा पुत्र्या सह भोगानभुङ्क्त । रतश्रान्तश्च तत्रैव निद्रितः, यक्षजिज्ञासाप्रेरिता पुत्री शरावसम्पुटं दुरीकुर्वन्ती दीपप्रकाश-प्रकटीभूतं स्वपितरं विज्ञाय चिन्तयामास नूनं मम मातुरेवेदमकृत्यं । अथ मयापि तस्याः शिक्षायै पितैव सर्वदा भोगविषयीकर्त्तव्यः, पुत्रीकामुको द्विजोऽपि निजभार्यां तिरस्कृत-वान्। तदा तयोक्तम्—

**णवमासे कुच्छीए धालिया, पासवणे पुलीसे य मद्दिए ।**
**धूयाए मे गेहिओ हडे, सलणे य असलण य मे जायओ ॥१॥** [ उत्त. नि./गा.१३७ ]

अर्थः—नवमासान् यावत् या कुक्षौ धृता, यस्याः प्रश्रवणं पुरीषं च मर्द्दितं, तया पुत्र्या मे स्वामी हृतः । एवं मे शरणतोऽप्यशरणं जातम् ।

एवं त्रसकायेन चत्वारो दृष्टान्ता उक्तास्तथापि तमवगणय्य तस्य भूषा लात्वा पथि गच्छन् सदेवविकुर्वितां सशृङ्गारां साध्वीं दष्ट्वोवाच—

**कडए य ते कुंडले य ते, अंजियक्खि तिलय य ते कए ।**
**पवयणस्स उड्डाहकारिए, दुट्ठसिहे कत्तो सि आगया ॥१॥** [ उत्त. नि./गा.१३९ ]

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अर्थः-कटके च ते कुण्डले च ते, अञ्जिताक्षिणी त्वं, तिलकश्च त्वया कृतः, एवं हे प्रवचनस्योड्डाहकारिके दुष्टशिखे कुतोऽसि त्वमागता ! ॥

सैवमुक्ता साध्व्याह—

**राइसरिसवमित्ताइं, परछिद्दाइं पाससि ।**

**अप्पणो बिल्लमित्ताइं, किं छिद्दाइं न पाससि ॥१॥** [ उत्त. नि./गा.१४० ] सुगमम् ।

किञ्च- **समणो सि संजओ सि, बंभचारी समलेट्ठुकंचणो,**

**वेहारियवायओत्थि ते, जेट्ठुज्ज किं ते पडिग्गहे ॥२॥ [ उत्त. नि./गा.१४१ ]**

अर्थः—असि त्वं केवलं व्यवहारेण श्रमणः संयतो ब्रह्मचारी समलेष्टुकाञ्चनश्च, न तु भाववृत्त्या । किञ्च वैहारिकवातकस्ते, विहारकार्यहमिति ते वातको वातोऽस्ति, अतो हे ज्येष्ठार्य ! कथय त्वं यत्ते पतद्गृहे किमस्ति ! एवं साध्व्योड्डाहितोऽप्यसौ सूरिरप्रतिबुद्धोऽग्रेऽगात् । पुरश्चतुष्पथे ससैन्यो राजैति । तेन हस्तित उत्तीर्य स नतः, उक्तं च तेनाहो ममाद्य मङ्गलं यत्साधुर्दृष्टः, भगवन् प्रसद्य प्रासुकं पाथेयस्थमोदकादि लात्वा ममानुगृहीध्वं ! स नैच्छत् पात्रस्थभूषा एष माद्राक्षीदिति । तदा राजा बलात् पात्रं लात्वा मोदकान् क्षिपन् भूषा दृष्ट्वा रोषाद् भ्रुकुटिं कृत्वोचे हा अनार्य ! मत्पुत्राणामिमा भूषाः ! तदैवसुभटास्तूदस्त्रास्तस्य परितः स्फुरिताः, भीतः स यावन्न किमप्यवदत्तावद्देवो मायां तां संहृत्याविर्भूयोचे भगवन् न युज्यते वो ज्ञातागमानामेवं परिणामः, अहं भवद्भ्यो लब्धाराधनो वः शिष्यः, ममाऽनागमनहेतुं शृणुत ! —

**संकंतदिव्वपेमा, विसयपसत्ता समत्तकतव्वा ।**

**अणहीणमणुयकज्जा, नरभवमसुहं न इंति सुरा ॥१॥ [ बृ.स./गा.१९१ ]**

मार्गे वो नाट्यं पश्यतां यथा षण्मासी गतापि भवद्भिरज्ञाता तथा देवानां कालो यातीत्यादिस्वकृतपूर्वोक्तमायावृत्तान्तस्तेन तस्मै निवेदितः, ततः प्रतिबुद्धः 'इच्छामोऽनुशास्ति सम्मं चोयणे'त्युक्त्वा गतोऽसौ स्वस्थानं निरतिचारसंयमलीनोऽभूत् । एव**माषाढसूरि**णा पूर्वं दर्शनपरीषहो न सोढः, परैश्च सह्यः इत्युक्तो द्वाविंशो दर्शनपरीषहः ।

तत्र दर्शनमोहे दर्शनं, ज्ञानावरणे प्रज्ञाऽज्ञाने, अन्तरायेऽलाभः, चारित्रमोहे आक्रोश अरति स्त्री नैषेधिकी अचेलक याञ्चा असत्काराख्याः सप्त, शेषा एकादश वेद्ये । एवं सर्वेऽपि चतुर्षु कर्मसूदीयन्ते, तथोत्कृष्टतः समकं विंशतिपरीषहा ऊदीयन्ते शीतोष्णयोर्चर्यानैषिधिक्योरेकैकस्यैव भावात् । अनिवृत्तिबादरं दशमगुणस्थानं यावत् सर्वे स्युः,

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सूक्ष्मसम्पराये चतुर्दश, सप्तानां चारित्रमोहप्रतिबद्धानां दर्शनपरीषहस्य च तत्राऽभावात् । एकादश सयोगिकेविलिनि, वेद्यप्रतिबद्धानां तत्राऽभावात् ॥४५॥

अथाध्ययनार्थोपसंहारः—

**एए परीसहा सव्वे, कासवेणं पवेइआ ।**

**जे भिक्खू ण विहन्निज्जा, पुट्ठो केणइ कण्हुइ ॥४६॥ त्ति बेमि**

**व्याख्या—एते परीषहाः सर्वे काश्यपेन** श्रीवीरेण **प्रवेदिताः** प्ररूपिताः, **यान्** ज्ञात्वा **भिक्षु**र्द्वाविंशत्यन्यतरेण **केनापि कुत्रचिद्** देशे काले वा **स्पृष्टो** बाधितो **न विहन्येत** न संयमात् पात्येत, **इति ब्रवीमीति सुधर्मा जम्बूं** जगाद ॥४६॥

**इति द्वितीयं परीषहाध्ययननमुक्तम् ॥२॥**

• • •

Jain Education International 2010_02          For Private & Personal Use Only          www.jainelibrary.org

# तृतीयं चातुरङ्गीयमध्ययनम् ॥

तेन हेतुना परीषहाः सह्या येन चतुरङ्गी दुर्लभेति तृतीयं **चतुरङ्गीया**ध्ययनमाह–

**चत्तारि परमंगाणि, दुल्लहाणीह जंतुणो ।**
**माणुसत्तं सुई सद्धा, संजमंमि य वीरियं ॥१॥**

**व्याख्या–चत्वारि** मोक्षस्य परमाणि प्रकृष्टान्यङ्गानि उपायाः **परमाङ्गानि दुर्लभानि** स्युः, **इह** संसारे जन्तोः (पाठान्तरे–'देहिणो' **देहिनः**) **मानुष्यं** मनुष्यभवः १ **श्रुति**र्धर्मस्य २ **श्रद्धा** तत्वरुचिः ३ **संयमे च** विरतौ **वीर्यं** ४ । विशेषेणेरयति प्रवर्त्तयत्यात्मानं क्रियास्विति वीर्यं सामर्थ्यम् । चतुर्भिरङ्गैः–

**माणुस्स १ खित्त २ जाइ ३, कुल ४ रूवा ५ रुग्ग ६ आउयं ७ बुद्धी ८ ।**
**सवण ९ ग्गह १० सद्धा ११ संयमो १२, अ सड्ढत्तं च १३ लोगंमि दुल्लहाइं ॥१॥**
**[ उत्त. नि./गा.१५८ ]**

एते त्रयोदशभावाः सङ्गृहीता ज्ञेयाः । अत्र मानुष्यभवदुर्लभतायां दशदृष्टान्तसूचनं–

**चूलग १ पासग २ धन्ने ३, जुए ४ रयणे ५ सुमिण ६ चक्के ७ य ।**
**चम्म ८ जुगे ९ परमाणू १०, दस दिट्ठुंता मणुयलंभे ॥१॥ [ उत्त. नि./गा. १५९ ]**

चोल्लको भोजनं । तत्कथा चेत्थं–**काम्पिल्ये ब्रह्मदत्त**चक्रिणो राज्यं श्रुत्वैको द्विजः पुरा चक्रिपरिचितो बह्वापत्सु कृतचक्रिसहायः पूर्वं दत्तसङ्केततस्तत्रागात्, चक्रिणो ऽभिषेके द्वादश वर्षाणि जातानि, स तत्र प्रवेशं न लेभे । एकदोपानद्ध्वजीभूय स राजमार्गे तस्थौ । चक्रिणा राजपाटिकायां याता दृष्ट्वोपलक्ष्य स स्वान्तिकमानीतः, एकेऽप्याहुस्तेन द्वारपालं सेवमानेन द्वादशवर्षैश्चक्र्यापि । यथेच्छं वरं वृण्विति चक्रिणोक्ते भार्याप्रेरितः स ऊचे देव त्वद्गृहादारभ्य **भरते** सर्वगृहेषु सदीनारैकार्पणभोजनं दापय ! सर्वगृहभोजनादनु पुनस्त्वद्-गृहे भोजनं मेऽस्तु । चक्र्यूचे मूर्ख देशादि किं नेहसे ? सोऽवग् ममेयता सुखं । आद्येऽह्नि

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

चक्री भोजयित्वा वासोयुगं दीनारं चास्मै ददे । तदनु स नृपान्तःपुरद्वात्रिंशत्सहस्रराज्ञीनगर-पत्तनग्रामाकरादिषु भुञ्जानः सर्वत्र भुङ्क्त्वा कथं पारयेत् ? किन्तु नैव । कदाप्येतदपि घटेत, किन्तु जीवोऽकृतपुण्यो नृत्वाद्भ्रष्टो न नृत्वं लभेतेति **चोल्लक**दृष्टान्तः ॥१॥

**चन्द्रगुप्त**राज्ञः कोशत्रुटौ **चाणिक्यो** देवदत्तपाशकान् लात्वा स्थालं च दीनारैर्भृत्वा सभायामन्यराजादिभ्यो जगौ, यदि वो जयस्तदा स्थालस्थाः सर्वे दीनारा ग्राह्याः, यदि च मे जयस्तदैको दीनारो देयः, तस्तते हारिते यानं स्तोकं, जिते च धनो लाभ इत्यालोच्य तेन सह रमन्ते । स तु नाऽहारयत्, कोशश्चावर्द्धत, कदापि स देवसान्निध्योऽपि हारयेत् नत्व-कृतपुण्यो नृत्वं लभेत् । इति **पाशक**दृष्टान्तः ॥२॥

भव्ये सुभिक्षे भरते धान्यानि सर्वाण्येकत्र पिण्डीकृतानि स्युः, तत्र सर्षपप्रस्थः क्षिप्तो मिश्रीकृतः, जराजर्जरस्थविरी सूर्पकेण तैरेव सर्षपैः प्रस्थं कदापि दिव्यानुभावादिना पूरयेत्, यद्वा धान्यानि पृथक् पृथक् कुर्यात्, नत्वकृतपुण्यो नृत्वं लभेत इति **धान्य**दृष्टान्तः ॥३॥

एकस्य राज्ञः सभायामष्टोत्तरशतस्तम्भाः, प्रतिस्तम्भं चाष्टोत्तरशतमस्रयः सन्ति, राज्ञः सुतो राज्यार्थी स्थविरं नृपं हत्वा राज्यं लामीति चिन्तयन् कथञ्चन राज्ञाज्ञायि । राज्ञोक्तं वत्सास्मत्कुलक्रमोऽयमस्ति यः पितरं द्यूते जयति तस्य राज्यं देयं, अन्यथा राज्ये दीयमाने कुलसुरी कुप्यति । द्यूतविधिः पुनरित्थं—एकैकां स्तम्भास्रिमष्टोत्तरशतवारान्निरन्तरं जित्वैवं सभास्थसर्वस्तम्भानां द्यूते जयः कार्यः, तत्रैकवारमपि हारिते पूर्वजितमपि याति । एवं च निर्विघ्नं जित्वा राज्यं त्वं गृहाण ! इति रममाणः स कदापि देवसान्निध्याद्राज्यं लभेत, न त्वकृतपुण्यो नृत्वं लभेत । इति **द्यूत**दृष्टान्तः ॥४॥

वणिगेगो वृद्धो महाधनो रत्नानां कोटीः सञ्चिक्ये, अन्ये धनिनः स्वगृहोद्र्ध्वं कोटीस्वसङ्ख्यया ध्वजानबध्नन्, स तु न कदापि । एकदा तस्मिन् ग्रामगते तत्पुत्रै रत्नानि नानादेशागतवणिग्भ्यो यादृक्तादृग्मूल्येन विक्रीय सौधं कारयित्वोद्र्ध्वं कोटिध्वजा बद्धा । वृद्धो गृहेतस्तत्स्वरूपं ज्ञात्वा रुष्टः सुतानूचे मद्गृहाद्यात ! तदैत्यं यदा विक्रीतसर्वरत्नानि यूयमानयेत, नान्यथा । ततस्ते भ्रमन्तोऽन्यत्रान्यान्यक्रीतानि तानि कदापि दैवानुभावाल्लभन्ते, न त्वकृतपुण्यो नृत्वं लभेत । इति **रत्न**दृष्टान्तः ॥५॥

**मूलदेवो** राजसूः क्ष्मामटन्नेकस्मिन् चैत्ये सुप्तः, तत्र चान्ये पथिककार्पटिका अपि सुप्ता आसन् एकेन कार्पटिकेन स्वप्ने चन्द्रो मुखे प्रविशन् दृष्टो, **मूलदेवे**नापि तथैव स्वप्नं दृष्टं । कार्पटिकानां फलं पृष्टं, तैरुक्तं चन्द्रप्रमाणं रोट्टकं त्वं भिक्षायां लप्स्यसे । मूलदेवेन च स्नात्वा पुष्पफलादिपूर्णहस्तेन स्वप्नपाठकः स्वप्नफलं पृष्टः पुत्रीं परिणाय्य सप्तमेऽह्नि त्वं

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

राज्यं लप्स्यसे इत्यूचे । इतस्तत्र राजाऽपुत्रो मृतोऽमात्यैः पञ्च दिव्यान्यधिवासितानि, लब्धवांश्च **मूलदेवो** राज्यं तत् श्रुत्वा स कार्पटिक आकाशे मुखमुद्घाट्य सदा शेते कदापीन्दुः स्वप्ने मुखे विशेदिति । कदापीदमपि स्यान्न चाकृतपुण्यस्य नृत्वं । इति **स्वप्न**दृष्टान्तः ॥६॥

**इन्द्रपुरे इन्द्रदत्तो** राट्, तस्य द्वाविंशतिसुताः, राजान्यदा मन्त्रिपुत्रीं सुरूपां दृष्ट्वा तां परिणीतवान् । तदनन्तरं सा तेन विस्मृता । अन्यदा ऋतुस्नाता सा राज्ञा दृष्टा, पृष्टाश्चान्याः प्रियाः केयमिति । ताभिस्त्वद्राज्ञीत्युक्ते तेन तां रात्रिं सा भुक्ता । तस्या गर्भोऽभूत् । पुत्रीकथनतो मन्त्रिणा तत्सर्वं वृत्तान्तं नृपमुद्राङ्कितं पत्रे लिखितं । ततः सा मन्त्रिपुत्री गृहं प्राप्ता पुत्रमसूत, मन्त्रिणा तस्य **सुरेन्द्रदत्ता**भिधानं कृतं । क्रमेण तेन कलाचार्यसमीपे सर्वाः कला अभ्यस्ताः, राज्ञस्ते द्वाविंशतिकुमारा दुर्ललिताः किञ्चदपि नाऽपठन्, कलाचार्येण कुट्टितास्ते निजमातृणां तं वृत्तान्तमकथयन् । ताः पण्डितमुपालम्भयन्त । ततः पण्डितेन न च ते ताडिता न च पाठिताः । इतो **मथुरायां जितशत्रु**राज्ञा निजपुत्री**निवृत्ति**विवाहर्थं राधावेधपूर्वकं स्वयंवरमण्डपो विहितः, त**देन्द्रदत्तो** निजद्वाविंशतितनयोपेतस्तत्र हृष्टो गतः, अन्येऽपि तत्र बहवो राजकुमारा **निवृत्ति**कन्याविवाहार्थमेताः, मन्त्र्यपि स्वदौहित्रेययुत **इन्द्रदत्तेन** राज्ञा सह तत्रागतोऽभूत्, एवं तत्र मिलितानां कुमाराणां मध्यात् कोऽपि राधावेधं साधयितुं समर्थो नाभूत् । निजद्वाविंशतिसुतानपि तत्कार्येऽसमर्थान् ज्ञात्वा विषण्णीभूतो नृपो मन्त्रिणोक्तो हे स्वामिन्नलं खेदेन त्वत्पुत्रो मे दौहित्रेयो नूनं राधावेधं साधयिष्यति । विस्मितेन राज्ञोक्तं को मे पुत्रो ! नाहं स्मरामि ! तदा मन्त्रिणा स नृपमुद्राङ्कितो लेखोऽदर्शि । हृष्टेन नृपेण **सुरेन्द्रदत्ताय** राधावेधं साधयितुमाज्ञा दत्ता, तेनापि पितुरादेशमाप्य झटिति राधावेधः साधितः परिणीता च **निवृत्ति**कन्या । एवं दुःसाध्योऽपि चक्रोपेतो राधावेधः केनचित् साध्यते, किन्त्वकृतपुण्यो नृत्वं नाप्नोति । इति **चक्र**दृष्टान्तः ॥७॥

चर्म सेवालं तस्य घनसमूहेन निश्छिद्रीभूते कस्मिंश्चिद्बहुयोजनसहस्रविस्तीर्णेऽगाध-ह्रदे कच्छपो वर्षशते वर्षशते ग्रीवां प्रसारयति । स कदापि महावाताहतस्फुटन्निबिडशैवल-पटलैकदेशात्तत्तडागान्निजग्रीवामुद्ध्वींकृत्याश्विनपूर्णिमार्द्धरात्रेऽदृष्टपूर्वं सज्योतिश्चक्रेन्दुं दृष्ट्वा प्रहृष्टः, स्वपुत्रपौत्राणामिदमाश्चर्यं दर्शयामीति तानाह्वातुं तूर्णं स नदतले गत्वा स्वकुलं सर्वमानीयैतस्तावद्वातबलमिलितशैवलपटले तत्र मार्गमविन्दन् पुनरिन्दुं नैक्षिष्ट, तथा-ऽकृतपुण्यो नृत्वं नाप्नुते । इति **चर्म**दृष्टान्तः ॥८॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

[1]पुव्वंते हुज्ज जुगं, अवरन्ते तस्स होज्ज समिलाओ ।
जुगच्छिद्दंमि पवेसो । इय संसइओ मणुयलंभे ॥१॥ [ उत्त.नि.गा.१५९वृ. ]

जह समिला पब्भट्ठा, सागरसलिले अणोरपारंमि,
पविसिज्ज जुगच्छिदं, कहवि भमंती भमं तंमि ॥२॥ [ उत्त.नि.गा.१५९वृ. ]

सा चण्डवायवीई-पणोल्लिया अवि लभेज्ज जुगछिद्दं ।
न य माणुसाओ भट्ठो, जीवो पुण माणसं लहइ ॥३॥ [ उत्त.नि.गा.१५९वृ. ]

इति गाथाभिर्युगदृष्टान्तः ॥९॥

देवो महान्तं रत्नस्तम्भं संचूर्ण्याऽविभागांस्तदणून्नलिकायां क्षिप्त्वा **मन्दर**चूलायां स्थित्वा फूत्कुर्वन् दशदिक्षु निर्नाम नाशयेत्, कोऽपि तानपि मेलयित्वा पुनस्तथैव स्तम्भं कुर्यात्, किन्त्वकृतपुण्यो नृत्वं नाप्नुते । इति **परमाणुदृष्टान्तः** ॥१०॥

लब्धेऽपि नृत्वे—

**आलस्स १ मोह २ वन्ना ३, थंभा ४ कोहा ५ पमाय ६ किविणत्ता ७ ।**
**भय ८ सोगा ९ अन्नाणा १०, वक्खेव ११ कुतूहला १२ रमणा १३ ॥१॥**
[ उत्त. नि./गा.१६० ]

अर्थः—**आलस्यं** धर्मकार्योपेक्षा । **मोहो** भार्यादीनां, **अवज्ञा** किं धर्मेणेति ? किं वा भिक्षुवृत्त्या ? **स्तम्भो** जात्यादिगर्वः, **क्रोधः** कषायोदयः, **प्रमादो** निद्रादिः, **कृपणत्वं** यथा साध्वादीनां किमपि दातव्यं भविष्यतीति, **भयो** नारकादि भयं प्रदर्श्य नियमं दापयिष्यतीति, **शोको** स्वजनादिवियोगजः, **अज्ञानं** कुमतं, **व्याक्षेपो** वैयग्र्यं, **कुतूहलो** नटादेः, **रमणं** बालकादिखेलनं विषयाश्च ॥१॥ एते सिद्धान्तश्रवणे विघ्नाः,

श्रद्धादुर्लभतायां निह्नववक्तव्यतेयम्—

**बहुरयजमालिपभवा, जीवपएसा य तीसगुत्ताओ ।**
**अवत्तासाढाओ, सामुच्छेयासमित्ताओ ॥१॥** [ उत्त.नि./गा.१६५ ]

---

१. संस्कृतच्छाया—पूर्वान्ते भवेत् युगं, अपरान्ते तस्य भवेत् समिला ।
युगच्छिद्रे प्रवेशः, इति संशयः मानुष्यलाभे ॥१॥

यथा समिला प्रभ्रष्टा, सागरसलिले अर्णोऽपारे ।
प्रविशेत् युगच्छिद्रं, कथमपि भ्रमन्ती भ्रमं तस्मिन् ॥२॥

सा चण्डवातवीचि-प्रलोलिता अपि लभेत युगच्छिद्रं ।
न च मानुष्याद् भ्रष्टो, जीवः पुनः मानुष्यत्वं लभते ॥३॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**गंगाओ दो किरिया, छलुगा तेरासियाण उप्पत्ती ।**

**थेरा य गोट्ठमाहिल, पुट्ठमबुद्धं परूवंति ॥२॥** [ उत्त.नि./गा.१६६ ]

**अर्थः—बहुरता** निह्नवाः, नैकसमयेन वस्तूत्पद्यते, किन्तु बहुभिः समयैस्तन्निष्पत्तिं यातीति बहुरताः, **जमालि**प्रभवाः, **जमाले**रुत्पन्नाः ॥१॥

**जीवप्रदेशा** अन्त्यप्रदेशप्रदेशवादिनो, यथात्मनः सर्वप्रदेशेष्वन्त्यप्रदेशो जीवः, ते **तिष्यगुप्ता**दुत्पन्नाः ॥२॥

**अव्यक्ताः** संयताऽसंयताद्यवगमे सन्दिग्धाः, **आषाढा**ज्जाताः ॥३॥

**सामुच्छेदाः**, ते उत्पत्त्यनन्तरमेवोच्छेदवादिनो**ऽश्वमित्रा**ज्जाताः ॥४॥

**द्वे क्रिये**, एकसमये क्रियाद्वयानुभववादिनः **गङ्गसूरे**रुत्पन्नाः ॥५॥

जीवाजीवनोजीवरूपत्रिराशिवादिनः **षडुलूका**दुत्पन्नाः ॥६॥

**अबद्धिकाः** स्पृष्टकर्मवादिनो **गोष्ठमाहिला**दुत्पन्नाः ॥७॥

निह्नुवते जिनोक्तमिति **निह्नवाः**, एतेषु सप्तसु श्री**वीरस्य** ज्ञानोत्पत्तेरनु चतुर्दशसु वर्षेषु गतेषु क्रमादाद्यद्वितीयावुत्पन्नौ । श्री**वीर**निर्वाणच्चतुर्दशाधिके वर्षशतद्वये तृतीयः, विंशाधिके वर्षशतद्वये तुर्यः, अष्टाविंशत्यधिके वर्षशतद्वये पञ्चमः, चतुश्चत्वारिंशाधिके वर्षशतपञ्चके षष्ठः, चतुरशीत्यधिके च वर्षशतपञ्चके सप्तम उत्पन्नः ।

तत्र **क्षत्रियकुण्ड**पुरे श्री**वीर**ज्येष्ठस्वसुः **सुदर्शना**याः सुतो **जमालिः** पञ्चशतयुक्, तद्भार्या च श्री**वीर**पुत्री अनवद्याङ्गी **प्रियदर्शना**ह्वा सहस्त्रयुक् **ब्राह्मणकुण्ड**ग्रामे **वीरा**न्तीके प्राव्राजीत् । **जमालिः** श्री**वीरं** विहाराय त्रिकृत्वः पृच्छन् श्री**वीरा**ऽननुज्ञातोऽपि पञ्चशतसाधुसहस्त्रसाध्वीयुग् विहृतः, **श्रावस्त्यां तिन्दुको**द्यानेन्तप्रान्तैरुग्लः (खिन्नः) शिष्यान् संस्तारं कुर्वतोऽपृच्छत् संस्कृतं न वा ? तैरुक्तं संस्तृतं, तत्रागतोऽर्द्धसंस्तृतं वीक्ष्य क्रियमाणं कृतं इति जनोक्तं वृथाऽध्यक्षविरुद्धत्वादनुष्णाग्निवत्, एवं ध्यात्वा क्रियमाणं क्रियमाणमेव, कृतं तु कृतमिति प्ररूपयन् साधुभिरूचेऽर्हद्वाक् सत्यैव । चेत् क्रियमाणं कृतं नेष्यते ततः कथं क्रियायाः प्रारम्भसमय इवान्त्यसमये तदिष्यते ? सदाऽभावप्रसङ्गात् क्रियायाश्चाऽविशेषात् । न चाध्यक्षवैरुद्ध्यं यतो यद्वस्त्राद्यास्तीर्यते तदास्तीर्णमेवेत्युक्तोऽप्यनिच्छन् स स्वं, सह दीक्षितसाधुसाध्वीश्च मिथ्यात्वेऽपातयत् । अन्यदा शय्यातरश्राद्धेन **ढङ्क**कुम्भकृता तत्साध्वीजवनिकाङ्गारैरेकदेशे दग्धा, साधवीभिरुक्तं **ढङ्क** सङ्घाटी दग्धा, सोऽवक् यूयमेव वदथ यद्दह्यमानमदग्धं, ततः केन वः सङ्घाटी दग्धा ?

Jain Education International 2010_02　　For Private & Personal Use Only　　www.jainelibrary.org

अद्यापि दग्धुमारब्धास्ति । इत्यादि । ततः साधवः साध्व्यश्च **जमालिं** मुक्त्वा बुद्धाः श्री**वीरा**न्ते आलोच्य प्रतिक्रान्ताः, **जमालिस्त**दैव **चम्पायां** श्री**वीरा**न्तिके गत्वा विभुं जगौ देवानुप्रिय ! यथैके शिष्याः छद्मस्थाः सन्ति तथाहं नास्मि, छद्मस्थोऽहं केवलज्ञानदर्शी, **गौतमे**नोक्तं चेत्त्वं ज्ञानी तद्वद ! लोकः किं शाश्वतोऽशाश्वतो वा ? जीवः किं शाश्वतोऽशाश्वतो वा ? **जमालि**र्निरुत्तरस्तस्थौ संशयात् । श्री**वीरो**ऽवग् **जमाले** ! सन्ति मे बहवश्छद्मस्थाः शिष्याः, ये मद्वन्नित्याऽनित्यलोकजीवस्थापकाः, यतो यथा त्वं शाश्वतं लोकं जीवं चाचख्यौ तथा न । यतो जीवलोको नित्यो ध्रुवो द्रव्यतः, कालतस्त्वशाश्वत उत्सर्पिण्यादिपरावर्त्तात् नृत्वादिपर्यायपरावर्त्ताच्च । ततो **जमालि**र्जिनोक्तमश्रद्दधानोऽर्हत्पार्श्वं मक्त्वा बह्वसत्कल्पनाभिः स्वं परांश्च दूषयन् बहुवर्षाणि व्रतं प्रतिपाल्य षष्ठाष्टमादीनि बहूनि कृत्वा पक्षं संलेख्याऽनालोचितो **लान्तके** त्रयोदशसागरायुःकिल्बिषिकोऽभूत्—

**पञ्चतिरिक्खजोणिए, मणुस्सदेवे भवग्गहणाइं ।**
**संसारं अणुपरियट्टित्ता, तओ पच्छा सिज्झिहि त्ति** ॥१॥ [ ]

उक्त आद्यः ॥१॥

**ऋषभपुरे**ऽपराह्वे **राजगृहे गुणशीले** चैत्ये चतुर्दशपूर्विणो **वसुसूरेः** शिष्य-स्**तिष्यगुप्त आत्मप्रवाद**पूर्वे "**एगे भंते ! जीवप्पएसे जीव त्ति वत्तव्वं सिया, नो इणमट्ठे, एवं दो जीवपएसा, तिन्नि संखिज्जा वा जाव एगेणावि पएसेण ऊणो, नो जीव त्ति वत्तव्वं सिया, जम्हा कसिणे पडिपुन्ने लोगागासपएसे तुल्लपएसे जीव त्ति वत्तव्वं**" [ ] इत्यादि पठन् विप्रतिपन्नो यदि जीवप्रदेशा एकप्रदेशेनापि हीना नात्माख्यां लभन्ते किन्त्वन्त्यप्रदेशयुक्ता एव, ततोऽन्त्यप्रदेश आत्मा, आत्मत्वस्य तद्भावभावित्वादित्याख्यात् । गुरुणोक्तं नैवं, आत्माऽभावप्रसङ्गात्, यतोऽन्त्यप्रदेशोऽप्यजीवोऽन्यप्रदेशतुल्यपरिमाणत्वात् प्रथमादिप्रदेशवत् । प्रथमादिप्रदेशो वाऽजीवः शेषप्रदेशतुल्यपरिमाणत्वात् अन्त्यप्रदेशवत् ।

न च पूरण इति कृत्वा तस्यात्मत्वं युक्तं, एकैकस्य पूरणत्वाऽविशेषादेकमपि विना तस्याऽपूर्णतेत्युक्तोऽप्यमन्वानो गुरुणोत्सृष्टोऽसौ स्वमन्यांश्च भ्रामयन्**नामलकल्पा**पुर्या**मम्ब-शाल**वनस्थोऽन्यैर्निह्नवैर्युग् **मित्रश्री**श्राद्धेन सङ्खड्यां यूयं मद्गृहे पादाक्रमणं कुरुतेति निमन्त्रितास्ते आगुः, स कूरस्थाल्यादेरन्त्यसिक्थानि, वस्त्रादेश्चान्त्यतन्तु ददौ, ते तु बहु दास्यतीति ध्यायन्तः किमिदमित्याख्यन्तश्चेद्भवन्मतं सत्यमर्थसिद्धिकृत्तदा तथा दत्तं, न तु श्री**वीर**मतेनेत्युक्त्या ते सम्बुद्धा आर्य ! सत्या नोदनेत्यूचुः, ततः श्राद्धेन ते प्रतिलाभिता-क्षामिताः सर्वे आलोच्य प्रतिक्रान्ताः ॥ गतो द्वितीयः ॥२॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**श्वेताम्ब्यां** पुर्यां **पोलासोद्याने आषाढाचार्याः** शिष्याणामागाढयोगान् वाहयति । तद्दिने शूलेन स मृतः **सौधर्मे नलिनीगुल्म**विमाने उत्पद्य प्रयुक्तावधिः स्नेहात् स्वाङ्गमधिष्ठाय तदजानतामेवर्षीणां योगान् सम्पूर्य नवं सूरिं च संस्थाप्य स्वं देवत्वादिवृत्तं निवेद्य गतः, ते मुनयोऽसंयतोऽवन्दीति शङ्किताः को वेत्ति कः कीदृशोऽस्तीति मिथोऽप्यनमन्तोऽव्यक्तत्वं स्थापयन्तो **राजगृहे मौर्य**वंश्य**बलभद्र**राज्ञा कटकमर्द्दन मारयितुमारब्धाः, तदा त्वं श्राद्धोऽस्मान् यतीन् कथं हंसीति ब्रुवन्तो युष्मन्यतेः को वेत्ति कीदृशा यूयं को वाहमिति बोधिताः प्राग्वत् । इति तृतीयः ॥३॥

**मिथिलायां लक्ष्मीगृह**चैत्ये **महागिरि**शिष्य**कोडिन्न**शिष्योऽ**श्वमित्रो विद्यानुप्रवाद**पूर्वे नैपुणिकाख्यं वस्तु पठन् 'उत्पत्त्यनन्तरं वस्तुसमुच्छेद' इति दृष्ट्वा विप्रतिपन्नस्तथैव वदन् गुरुणा पर्यायरूपेणैवेदमुक्तं, न तु द्रव्यरूपेण, चेद् द्रव्यरूपेणाप्युच्छित्तिः स्यात्तदा किमाश्रित्य क्षणिकत्वव्यवस्थेत्युक्तोऽप्यनिच्छन् **राजगृहा**पराख्ये **काम्पिल्यपुरे** खण्डरक्षादाणग्राहिभिः कुट्यमानो यूयं श्राद्धा मां साधुं किं कुट्टयथेत्याख्यंस्त्वन्मते 'न ते वयं न च त्वं' स इत्यबोधि, गतस्तुर्यः ॥४॥

**उल्लुकदेशे उल्लुका**नदीतटे 'धूलीप्राकारवृतं खेटमुच्यते' तत्र खेटस्थाने **महागिरि**शिष्य**गङ्गाचार्यो** नदीमुत्तरन् खल्वाटः शीर्षे आतपौष्ण्यं पदोश्चाम्बुशैत्यमनुभवन्नहो एकसमये क्रियाद्वयानुभवः ! इति वदन् गुरुणा नैकसमये क्रियाद्वयानुभवः, किन्तु समयमनसी सूक्ष्मत्वान्न लक्ष्यते, तथा शैत्योष्णे युगपन्न संवेद्येते, भिन्नदेशत्वात् **विन्ध्यहिमाद्रि**स्पर्शक्रियावत्, इत्युक्तोऽप्यनिच्छन् **राजगृहे** महातपस्**तीरप्रभासा**ख्ये उष्णजलरूपे जलाशये **मणिनागा**ख्ये नागचैत्ये युगपत्क्रियाद्वयानुभवं प्ररूपयन्, **नागे**न सभायां हे दुःशिष्य ! मैवं वादीः, श्री**वीरे**णात्रैव भिन्नसमयः क्रियाद्वयानुभव उक्त इत्यबोधि, गतः पञ्चमः ॥५॥

**अन्तरञ्जिका**पुर्यां **बलश्री**नृपः श्राद्धस्तत्र **भूतगुहा**चैत्ये **श्रीगुप्ता**चार्याः समागताः, तस्य भागिनेयः शिष्यो **रोहगुप्तो**ऽभूत् । तत्रैकः परिव्राट् विद्यया पोट्टं तुन्दं स्फुटतीति तुन्दबद्धलोहपट्टो, **जम्बूद्वीपे** मत्प्रवादी नास्तीति **जम्बू**द्रुशाखायुत्करो जात**पुट्टशाला**ख्यो वादार्थं घोषणां कारितवान् । **रोहगुप्तेन** पटहोऽवारि । ततो वादे परिव्राजं जीवाऽजीवारूपराशिद्वयस्थापकं जीवाऽजीवनोजीवराशित्रयस्थापनेन, तथा–

**विच्छूय १ सप्पे २ मूसग ३, मिगी ४ वराही ५ कागि ६ पोयाई ७ ।** [ उ.नि.गा.१७३पू. ]
पोताकी शकुन्तिका, एता वादिविद्याः ।

**मोरी १ नउली २ बिराली ३, वग्घी ४ सीही य ५ उलिगी ६ उवाइ ७ ॥** [ उ.नि.गा.१७४पू. ]

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

उवाइ श्येनिका, एताभिः प्रतिविद्याभिश्च गुरुदत्ताभिमन्त्रितविश्वविद्याऽजेयधर्मध्वजेन तु रासभीं विद्यां स जिग्ये । तत्र नोशब्दो देशवाची, तेन नोजीवस्तत्क्षणत्रुटितपल्लीपुच्छादिः, आमलिततन्त्वादिश्च, **श्रीगुप्तेन** वसतावागतो द्रव्य १ गुण २ कर्म ३ सामान्य ४ विशेष ५ समवायाख्य६षट्पदार्थस्थापकत्वा**दुलूक**गोत्रप्रभवाच्च षडुलूको **रोहगुप्तो**ऽभाणि, त्वया श्रुताऽनुक्तमुक्तं, ततो राट्समक्षं ब्रूहि ! यन्मया वादिनिग्रहाय राशित्रयं स्थापितं परं श्रुते नास्तीति । सोऽनिच्छन् गुरुणा सह राज्ञोऽग्रे षण्मासान् वादं विहितवान् । ततः प्रान्ते कुत्रिकापणे सुरेण जीवाजीवाख्ये वस्तुनी ददति नोजीवं चाऽददति स चतुश्चत्वारिंशच्छत-पृच्छाभिर्निगृहीतः, राज्ञा नगरे घोषितं जयति जिनो **वर्धमानः,** ततः स **रोहगुप्तो** राज्ञा निर्विषयीकृतस्तेन च वैशेषिकसूत्राणि कृतानि । गतः षष्ठः ॥६॥

**दसपुरनयरेच्छुघरे, अजरक्खिय पूसमित्ततियगं च ।**
**गोट्ठामाहिलनवम-ट्ठमेसु पुच्छा य विंझस्स ॥१॥** [ उत्त.नि./गा.१७५ ]

**दशपुरे** इक्षुगृहे इक्षुवाटे **रक्षितः** प्राव्राजीत्, तच्छिष्यो घृतलब्धिमान् **घृतपुष्य-मित्रः,** तस्मै अधना वृद्धा धिग्जापि स्त्री षण्मासमिलितं घृतं हृष्टा दद्यात्, एवं **वस्त्रपुष्य-मित्रो**ऽपि, तथा नवपूर्वी नित्यं घृताश्यपि सर्वश्रुतचतुरनुयोगार्थस्मृतिध्यानात् कृशो **दुर्बलिकापुष्यमित्रः,** इति **पुष्यमित्र**त्रिकमभूत् । तथा **दुर्बलिकापुष्यमित्रः** १ **विन्ध्यः** २ **फल्गुरक्षितः** ३ **गोष्ठामाहिल**श्चेति प्रज्ञाः, **रक्षितै**रेकदा **मथुरायां** नास्तिकवादिजयाय **गोष्ठामाहिलः** प्रेषितः, स्वयं च कालं कुर्वद्भि**र्दुर्बलिकापुष्यमित्रः** पट्टेऽस्थापि । **गोष्ठा-माहिलो** वादिनं जित्वाऽऽयातो **दुर्बलिकापुष्यमित्रं** पट्टे श्रुत्वाऽमर्षत् पृथक्स्थानस्थस्त-च्छिद्राण्यपश्यत् । साधून् व्युद्ग्राहयितुं चाक्षमो गर्वा**द्दुर्बलिकापुष्यमित्र**पार्श्वे नाशृणोत्, किंतु **दुर्बलिकापुष्य**गुरुपार्श्वेऽधीत्य 'नवमट्ठमेसु त्ति' नवमाष्टमपूर्वयोर्विचारं चिन्तयतो **विन्ध्य**स्यान्तिके स शृणोति । अन्यदाऽष्टमपूर्वे किञ्चित् कर्मात्मप्रदेशैर्बद्धमात्रमेव शुष्क-कुड्यलग्नधूलीवद्विघटते, किञ्चित्तु बद्धस्पृष्टं आत्मप्रदेशैरात्मीकृतमार्द्रकुड्ये सस्नेहचूर्णवत्, किञ्चित्तु निकाचितं आत्मना सहाऽग्न्याऽयःपिण्डवदैक्यं प्राप्तं । इति **विन्ध्यो**क्ते **गोष्ठामाहिल** आह नैवं, मोक्षभावाप्तेः, यतो जीवाद्बद्धं कर्म न वियुज्यते अन्योऽन्या-ऽविभागसम्बद्धत्वात् ।

ततोऽजीवः कर्मणा स्पृष्टः, परं न बद्धः, किन्तु कञ्चुको, न वा तद्वानिति । ततो **विन्ध्यस्य दुर्बलिकापुष्यमित्र**गुरुपार्श्वे पृच्छा । गुरुराह-**माहिलो**क्तो हेतुरनेकान्तिकोऽन्योऽ-न्याऽविभागानामपि क्षीरनीरादीनामुपायतो वियोगदर्शनात् । दृष्टान्तोऽपि न साधनधर्मानुगः,

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

स्वप्रदेशस्यात्मना सह सम्बन्धाऽसिद्धेः, यतोऽत्र सम्बन्धो भिन्नानां संयोगे सतीष्यते, स विभिन्नत्वात् कर्मणो जीवेन सहास्ति, न तु प्रदेशस्य, अनादितोऽपि जीवस्वप्रदेश-योरैक्यात्। यच्चोक्तं जीव कर्मणा स्पृष्ट इत्यादि, तत्र चेत् कञ्चुकेनेव बाह्यप्रदेशेष्वेव स्पृष्टो न तु प्रतिप्रदेशं, तदान्तरप्रदेशेष्वात्मनः सहवर्त्ति आन्तरज्ञानं प्रतिघाताऽभावादनन्तं सर्वदा स्यान्न चैतद् दृष्टमिष्टं वा, तथा कर्मबन्धहेतुजीवाध्यवसायस्य ज्ञानमयस्य सर्वात्मनि सद्भावात्, कर्मवेदनायाः सर्वात्मनाऽनुभवनाच्च सर्वात्मप्रदेशैर्बद्धं कर्मेति मन्तव्यं । एवमपि जीव-कर्मणोर्वियोगः स्यादेव । यतो जीवात् कर्म वियुज्यते, मूर्त्तत्वे सत्यविभागसम्बद्धत्वात्, स्वर्णमलवत्, कर्मक्षये च मोक्ष एव ।

एवंविधेनोक्ते **गोष्ठामाहिलो** निरुत्तरः सन् नवमपूर्वे प्रत्याख्यानाधिकारे वक्ति श्रेयोऽपरिमाणप्रत्याख्यानं, परिमाणप्रत्याख्यानं पौरुष्यादि दुष्टं, यतस्तत्राशंसा प्रत्याख्यान-कालादनुभोक्ष्ये इति वाञ्छा स्यात्, स **विन्ध्ये**नोपेक्षितः **पुष्पा**न्तिके गत्वा स्वमतं वक्ति, **पुष्प** आह अहो ! अपरिमाणमिति कोऽर्थः ? यावच्छक्तिरुताऽनागताद्वा ? आद्ये शक्तिमितकालावधिभावेनास्मन्मताऽभ्युपगमः, द्वितीये तु मृतानां देवत्वे त्ववश्यं भावी व्रतभङ्गोऽतः परिमितमेव प्रत्याख्यानं कार्यं सुकृतहेतुत्वात् प्रासादादिवत् । ततोऽयं स्थविराणां अन्यगच्छबहुश्रुतानां सङ्घस्य च, तथा सङ्घाकारितायाः सङ्घस्यैव कायोत्सर्ग-सान्निध्येन श्री**सीमन्धरं** पृष्टैतायाः शासनसुर्या वाचं न मेने । **पुष्पमित्रै**र्गत्वोक्तं, तदप्य-मन्वानो द्वादशसम्भोगहीनः सङ्घबाह्यः कृतो निह्नवोऽयमभव्योऽभूत् । गतः सप्तमो निह्नवः ॥७॥

एवं देशनिह्नवानुक्त्वा बहुविसंवादिनिह्नवानाह—**रथवीर**पुरे सहस्रमल्लः **शिवाख्यः** क्षत्रियः **पाण्डुमथुरा**जयाल्लब्धराजप्रसादः स्वेच्छया क्रीडित्वा प्रत्यहं निशीथे गृहमेति । तत्पत्नी खिन्ना । एकदा तन्मातुस्तमुदन्तमुक्त्वा सा सुप्ता । मात्राऽवासमागतोऽसाववादि, अधुना यत्र द्वारण्युद्घाटितानि स्युस्तत्र याहि ? स **दीपको**द्याने **कृष्ण**सूरिपार्श्वे गत्वा स्वयं लोचं चक्रे । गुरुभिलिङ्गं दत्तं, अन्यदा तस्य राज्ञा रत्नकम्बलं ददे, गुरुणा साधूनां बुहमूल्यं वस्त्रं न युक्तमित्युक्तोऽपि स गुरुच्छन्नं तत्संगोप्य गोचरगतोऽन्वहं वीक्षते, मुधा मूर्च्छास्येति गुरुणा तत्परोक्षे तत् छित्वा साधूनां निषद्यादि कृतं । तद् ज्ञात्वा स दूनः, अन्यदा तत्र मण्डल्यां जिनकल्पो वर्ण्यते, यथा—

**जिणकप्पिया य दुविहा, पाणीपत्ता पडिग्गहधरा य ।**
**पाउरणमपाउरणा, इक्किक्का ते भवे दुविहा ॥१॥ [ प्रव.सा./गा.४९४ ]**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**दुगतिगचउक्कपणगं, नवदसइक्कारसेव बारसगं ।**

**एए अट्ठ विगप्पा, जिणकप्पे हुंति नायव्वा ॥२॥ [ प्रव.सा./गा.४९५ ]**

तत्र द्विविधो ह्युपधिः, रजोहृतिर्मुखपोतिश्च, कल्पेन सह ३, कल्पाभ्यां ४, तृतीयेनोर्णाकल्पेन ५ । रजोहरणं १ मुखवस्त्रिका २,

**पत्तं ३ पत्ताबन्धो ४, पायट्ठवणं ५ पायकेसरिया ६ ।**

**पडलाइं ७ रयत्ताणं ८, गोच्छओ ९ पायनिज्जोगो ॥१॥ [ निशी.भा./गा.१३९३ ]**

कल्पेन १०, कल्पद्वयेन ११, कल्पत्रयेण १२ । इति जिनकल्पिकस्योपकरणानि ॥

ततः **शिवभूतेः**, किं जिनकल्पोऽधुना न क्रियते ? किं दोषमूलोपधिपरिग्रहेण ? जिना अप्यचेला एवासन्नित्युपधौ पृच्छा । गुरूणां कथना यथा–

**मणपरमोहिपुलाए, आहारगखवगउवसमे कप्पे ।**

**संजमतियकेवलसिज्झ-णाय जंबुंमि वोच्छिन्ना ॥१॥ [ प्रव.सा./गा.६९३ ]**

मनोज्ञानं १ परमावधिः २ पुलाकलब्धिः ३ आहारकदेहः ४ क्षपकोपशमश्रेणी ५-६ जिनकल्पः ७ परिहारविशुद्ध्यादिसंयमत्रिकं ८-९-१० केवलज्ञानं ११ सिद्धिः १२ एतानि **जम्बू**गणभृति व्युच्छिनानि ।

तथाऽयतीनां नाग्न्येऽपि न कषायादिदोषहानिः, रागादिमत्त्वात् तिर्यग्वत् । यतीनां तु वस्त्राद्यपापाय संयमहेतुत्वात् शुद्धाहारादिवत् । तथा प्रतिलिख्य प्रमृज्योपवेशने धर्मध्वजस्य, सम्पातिमसत्वादिरक्षायै मुखपोतेः, जीवयत्नायै पात्रस्य, शीतातपादिवेदनायामसहस्य चित्तस्थैर्यकृत्त्वेन महिकावर्षादौ कल्पादीनां संयमहेतुत्वं स्पष्टमेव, एवं च परिग्रहोऽपि न । "**न सो परिग्गहो वुत्तो**" [ द.वै.६।२१ ] इत्याद्युक्तेः, जिनानामपि न सर्वथाऽचेलत्वं, "**सव्वे वि एगदूसेण**" [ आ.नि.२२७ ] इत्याद्युक्तेः स तदमन्वानः कषायमोहाद्युदयान्नग्नीभूतः, **उत्तरा**ख्या तत्स्वसापि तथैव कृत्वा भ्रातृपृष्टिगामिनी वेश्यया गवाक्षस्थया मास्मासु जनो व्यराङ्क्षीदिति वासः पर्यधापि । भ्रात्रापि बिभत्सेयमिति सोक्ता, सुर्यां दत्तमिदं न त्याज्यं । **शिव**शिष्यौ **कौण्डिन्यकोट्टवीरौ**, ताभ्यां तत्प्रशिष्यैश्चोत्पन्ना **बोटिक**दृष्टिरिति । इयता श्रद्धादुर्लभत्वमुक्तं, अस्याश्च सम्यक्त्वपूर्वत्वात्, सम्यक्त्वरूपत्वाच्च । संयमवीर्यस्यैतेनैव दुर्लभत्वमुक्तं ज्ञेयम् ।

मानुष्यदुर्लभतां स्पष्टयति–

**समावन्ना ण संसारे, नाणागोत्तासु जाइसु ।**

**कम्मानाणाविहा कट्टु, पुढो विस्संभया पया ॥२॥**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या–प्रजा** जीवाः, **जना** वा, **समन्तादापन्नाः** प्राप्ताः, **ण** इत्यलङ्कारे, **संसारे नानागोत्रासु** अनेकाख्यासु **जातिषु** क्षत्रियादिषु, **कर्माणि** ज्ञानावरणादीनि **नानाविधानि कृत्वा**, 'पुढो' **पृथक् पृथक्** एकैकशो, बिन्दुरलाक्षणिकः **विश्वभृतो** जगत्पूरका वर्त्तते,

**नत्थि किर सो पएसो, लोए वालग्गकोडिमित्तो वि ।**
**जम्मणमरणाबाहा, जत्थ जिएहिं न संपत्ता ॥१॥ [ म.प./गा.२३८ ]**

**विश्रम्भिता** वा कर्मसु, तद्विपाकाऽज्ञानात् पुनर्मानुष्यं दुःखेन लप्स्यन्ते ॥२॥

यतः–

**एगया देवलोएसु, नरएसु वि एगया ।**
**एगया आसुरं कायं, अहाकम्मेहिं गच्छइ ॥३॥**

**व्याख्या–एकदा** शुभकर्मानुभवकाले **देवलोकेषु** सौधर्मादिषु, **एकदा नरकेषु** रत्नप्रभादिष्वपि, **एकदा** असुराणामयम**आसुरस्तं कायं** निकायं, यथाकर्मभिः स्वयंकृतैः शुभाशुभदेवनारकासुरगतिहेतुभिः क्रियाविशेषैस्तत्तद्गतिहेतुचेष्टितैः सरागसंयममहारम्भा जीवा **गच्छन्ति** ॥३॥

**एगया खत्तिओ होइ, तओ चंडाल वोक्कसो ।**
**तओ कीडपयंगो य, तओ कुंथू पिवीलिया ॥४॥**

**व्याख्या**–सूत्रवैचित्र्याद्बहुवचनक्रमेऽप्येकवचनं । **एकदा क्षत्रियो** राजा भवति, 'तओ' **ततस्तको** वा, प्राणी **चाण्डालः** स्यात् । यदि वा शूद्रेण ब्राह्मण्यां जातश्चाण्डालः, निषादेन शूद्र्यां जातो **वोक्कसो**, वर्णभेदः, अत्र क्षत्रियादिग्रहणेन नीचसङ्कीर्णजातय उक्ताः, **ततो** नृत्वादनु **कीटः**, **पतङ्गः** शलभः, **च** समुच्चये, **ततस्तको** वा **कुन्थुः**, **पिपीलिका** च भवति। कीटाद्यैः शेषतिर्यग्भेदा दर्शिताः ॥४॥

तथापि–

**एवमावट्टजोणीसु, पाणिणो कम्मकिव्विसा ।**
**न निव्विज्जंति संसारे, सव्वट्ठेसु य खत्तिया ॥५॥**

**व्याख्या–एवमा**वर्त्तन**मावर्त्तः** परिवर्त्तस्तेनोपलक्षितासु **योनिषु** चतुरशीतिलक्षेषु **प्राणिनः कर्मणा किल्बिषा** अधमा **नोद्विजन्ते** भवभ्रमात्, कदापि छुटिष्याम्यहं **न** वेति न **निर्विद्यन्ते,** के इव ? **क्षत्रिया** इव, यथा क्षत्रियनृपाः **सर्वार्थेषु** रम्यशब्दादिषु धनहेमादिषु वा न निर्विद्यन्ते, प्रत्युत तान् भुञ्जानः सतृष्णा एव स्युः पाठान्तरे–'**सव्वट्ठ**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**इव खत्तिय'** त्ति **क्षत्रियो** भ्रष्टराज्यः **सर्वार्थान्** प्रार्थयमानो **नोद्विजते**, तथैते जीवाः सुखानीहन्ते ॥५॥

**कम्मसंगेहिं संमूढा, दुक्खिया बहुवेयणा ।**
**अमाणुसासु जोणीसु, विणिहम्मंति पाणिणो ॥६॥**

**व्याख्या**—ततः कर्म**सङ्गैः सम्मूढाः दुःखिताः**, बह्वयो वेदना येषां ते **बहुवेदनाः** प्राणिनो**ऽमानुषासु** नरकतिर्यगाभियोग्यादिदेवदुर्गतिषु **योनिषु विहन्यन्ते** विशेषेण निपात्यन्ते कर्मभिः ॥६॥

नृत्वाप्तिमाह—

**कम्माणं तु पहाणाए, आणुपुव्वी कयाइओ ।**
**जीवा सोहिमणुपत्ता, आययंति मणुस्सयं ॥७॥**

**व्याख्या—कर्मणां** नृगतिनिवारकाणां अनन्तानुबन्ध्यादीनां **प्रहाणस्य** क्षयस्य **आये** लाभे सति, अनेनेश्वरकर्तृत्वं निरस्तं, **आनुपूर्व्या** क्रमेण न झगित्येव, **तु**रेवार्थे, **कदाचिदेव** न सर्वदा, **जीवाः शुद्धिं**, क्लिष्टकर्महान्या पश्चाद**नुप्राप्ता** आश्रिताः सन्तो **मनुष्यतामाददते** स्वीकुर्वन्ति ॥७॥

नृत्वेऽपि श्रुतिर्दुर्लभेत्याह—

**माणुस्सं विग्गहं लद्धुं, सुई धम्मस्स दुल्लहा ।**
**जं सुच्चा पडिवज्जंति, तवं खंतिमहिंसयं ॥८॥**

**व्याख्या—मानुष्यं** मनुष्यसम्बन्धिनं **विग्रहं** देहं **लब्ध्वा**, अपि गम्यः, **श्रुतिर्धर्मस्य दुर्लभा** स्यात् । **बौद्धादि**धर्मत्यागायाह—**यं धर्मं श्रुत्वा प्रपद्यन्ते तपो** द्वादशधा, **क्षान्तिं** क्रोधादिजयं, **अहिंस्रतां** अहिंसनशीलतां, अमृषावादादिव्रतानि च ॥८॥

श्रुत्याप्त्यामपि श्रद्धा दुर्लभेत्याह—

**आहच्च सवणं लद्धुं, सद्धा परमदुल्लहा ।**
**सोच्चा नेयाउयं मग्गं, बहवे परिभस्सइ ॥९॥**

**व्याख्या**—'आहच्च' इति **कदाचित् श्रवणं** धर्माकर्णनं नृत्वे **लब्ध्वापि श्रद्धा** धर्मेच्छा **परमदुर्लभा** स्यात्, **श्रुत्वा नैयायिकं** न्याययुक्तं मार्गं सम्यक्त्वादिमुक्तिपथं **बहवः परी**ति सर्वप्रकारं **भ्रस्यं** ते नैयायिकमार्गात् । केचिज्**जमाल्यादी**न्याहुः ॥९॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

एतत्त्रयाप्तावपि संयमवीर्यदुर्लभत्वमाह—

**सुइं च लद्धुं सद्धं च, वीरियं पुण दुल्लहं ।**
**बहवे रोयमाणा वि, नो य अणं पडिवज्जए ॥१०॥**

**व्याख्या—श्रुतिं** नृत्वं **श्रद्धां च लब्ध्वापि वीर्यं** संयमविषयं **पुनर्विशेषेण दुर्लभं,** यतो **बहवो** जना **रोचमाना अपि** श्रद्दधाना अपि **नो, चस्यैवार्थत्वान्नैव, णमिति** वाक्यालङ्कारे, अथवा **नो एनं** धर्मं **प्रतिपद्यन्ते श्रेणिका**दिवत् न कर्तुमाद्रियन्ते ॥१०॥

चतुरङ्गफलमाह—

**माणुसत्तंमि आयाओ, जो धम्मं सुच्च सद्दहे ।**
**तवस्सी वीरियं लद्धुं, संवुडो निद्धुणे रयं ॥११॥**

**व्याख्या—मानुषत्वे आयातो यो धर्मं श्रुत्वा श्रद्दधते** स **तपस्वी** निर्निदानतपोऽन्वितो **वीर्यं** संयमयोगं **लब्ध्वा संवृतः** स्थगिताश्रवो **निर्द्धुनोति** नितरां स्फेटयति, **रजो** बद्ध्यमानं बद्धं च कर्म, तदपनयनान्मुक्तिमाप्नोतीति ॥११॥

एवं पारलौकिकफलमुक्तमथैहिकफलमाह—

**सोही उज्जुभूयस्स, धम्मो सुद्धस्स चिट्ठइ ।**
**निव्वाणं परमं जायइ, घयसित्त व्व पावए ॥१२॥**

**व्याख्या—शुद्धिः** कषायकालुष्यहानिः स्यात्, **ऋजुभूतस्य** चतुरङ्गाप्त्या मुक्तिं प्रति सरलीभूतस्य सज्जीभूतस्येत्यर्थः, **धर्मः** क्षान्त्यादिः, **शुद्धस्य** शुद्धिं प्राप्तस्य **तिष्ठत्य**चलतयास्ते, धर्मावस्थितौ च **निर्वाणं** स्वास्थ्यसमाधिरूपं **परमं** प्रकृष्टं **याति, घृतासिक्तः पावक** इव, यथाग्निर्घृतेन तृणादिभ्योऽधिकं दीप्यते, निवृत्तिं प्राप्नोति । तथा—

**तणसंथारनिसण्णो वि, मुणिवरो भट्ठरागमयमोहो ।**
**जं पावइ मुत्तिसुहं, कत्तो तं चक्कवट्टी वि ॥१॥** [ सं.प./गा.४८ ]

यद्वा **निर्वाणं** शान्त्या जीवन्मुक्तिं याति—

**निर्जितमदमदनानां, वाक्कायमनोविकाररहितानां ।**
**विनिवृत्तपराशाना-मिहैव मोक्षः सुविहितानां ॥१॥** [ प्र.र./श्लो.२३८ ]

यतो विवाहप्रज्ञप्त्यां–**"जे इमे अज्जत्ताए समणा निग्गंथा विहरन्ति एएणं कस्स तेयलेस्सं वीईवयन्ति ? गोयमा मासपरियाए समणे निग्गंथे वाणमंतराणं देवाणं तेयलेस्सं वीईवयई, इत्यादि पञ्चमासपरियाए चन्दसूरियाणं०, छम्मासपरियाए सोहम्मीसाणं देवाणं०, इत्यादि**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**बारसमासपरियाए अणुत्तरोववाइयाणं० वीईवयइ । तेण सुक्के सुक्काभिजाइए भवित्ता । ततो पच्छा सिज्झइ**" । तपस्तेजसा तत्तद्देवाधिकाः साधवः स्युः, **नागार्जुनीया**स्तु पठन्ति–

**चउद्धा संपयं लद्धुं, इहेव ताव भासए ।**
**तवतेयसुसंपन्ने, घयसित्तो व पावए ॥१॥**

**चतुर्धा सम्पदं** मानुष्यादि **लब्ध्वा, इहैव** लोके, **तावदा**स्तां परत्र, तेजसा **विभ्राजते** ज्ञानश्रिया दीप्यते, तेजसा **तपस्तेजसा संपन्नो** युक्तः, शेषं प्राग्वत् ॥१२॥

अत्र परत्र च फलायोपदेशः–

**विगिंच कम्मुणो हेउं, जसं संचिणु खंतिए ।**
**पाढवं सरीरं हिच्चा, उड्ढं पक्कमई दिसं ॥१३॥**

**व्याख्या–वेवेग्धि** पृथक्कुरु ? **कर्मणो हेतु**मुत्पादकं कारणं मिथ्यात्वाऽविरत्यादिकं, तच्चाऽयशोहेतुत्वात् । **यशः** संयमं विनयं वा **सञ्चिनु** पुष्टं कुरु ? **क्षान्त्या** मार्दवाद्यैश्च, ततः 'पाढवं'ति पार्थिवमिव **पार्थिवं** मृन्मयाभं मानुषं **शरीरं हित्वा ऊर्ध्वां दिशं प्रक्रामति** अपुनर्भवतया याति येन भवान्, त्वं मोक्षं यासीति तात्पर्यम् ॥१३॥

इत्थं सिद्धियायिनामुक्तं परेषां त्वाह–

**विसालिसेहिं सीलेहिं, जक्खा उत्तरउत्तरा ।**
**महासुक्का व दिप्पंता, मन्नंता अपुणच्चयं ॥१४॥**
**अप्पिया देवकामाणं, कामरूवविउव्विणो ।**
**उड्ढं कप्पेसु चिट्ठंति, पुव्वावाससया बहू ॥१५॥**

**व्याख्या**–'विसालिसेहिं'ति मागध्यां **विसदृशैः** स्वस्वचारित्रमोहनीयक्षयोपशमगर्भितैः **शीलै**र्वृतपालनै**र्यक्षा** देवा ऊर्ध्वं कल्पेषु कल्पोपरिवर्त्तिषु ग्रैवेयकेष्वनुत्तरविमानेषु कल्पेषु सौधर्मादिषु च तिष्ठन्तीति, **उत्तरोत्तरा** उत्तरोत्तरविमानस्था **महाशुक्लाश्च**न्द्रार्काद्या **इव दीप्यमानाश्चा**रुशब्दादिविषयोत्पन्नरत्यब्धिमग्नत्वाद् दीर्घस्थितित्वात् स्व**मपुनश्च्यवं मन्यमानाः** ॥१४॥

एवं देहसुखसम्पदावुक्ते । तथा प्राक्कृतसुकृतै**रर्पिता** ढौकिता **देवकामानां** देवस्त्रीस्पर्शादीनां, सूत्रत्वात्, **कामरूपविकरणा** यथेष्टरूपकृतिशक्तयः, **पूर्वाणि** बहूनि, जघन्यतोऽपि पल्योपमस्थितित्वात् तत्राऽसङ्ख्यपूर्वाणां भावात्, एवं **वर्षशतान्य**पि **बहूनि,** पूर्ववर्षशतायुषामेव व्रतयोग्यत्वेन विशेषाद्देशनार्हतेत्थमुक्ता, अत्रैष भावोऽपि व्यङ्ग्यः ॥१५॥ युग्मम् ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

ततः—

**तत्थ ठिच्चा जहाठ्ठाणं, जक्खा आउक्खए चुया ।**
**उवंति माणुसिं जोणिं, से दसंगेऽभिजायए ॥१६॥**

**व्याख्या–तत्र** कल्पादिषु **स्थित्वा यथास्थानं** स्वकर्मार्हमिन्द्रादिपदं तस्मिन् स्थित्वा, आयुःक्षयाच्च्युता **यक्षा उपयान्ति मानुषीं योनिं**, तत्र **स** इति सावशेषसत्कर्मा कश्चिज्जन्तुः, दश भोगाङ्गान्यस्येति **दशाङ्गोऽभिजायते**, एकवचनं तु कश्चिन्नवाङ्गादिरपीति ज्ञप्त्यै ॥१६॥

अङ्गान्याह—

**खित्तं १ वत्थुं २ हिरण्णं ३ च, पसवो दासपोरुसं ४ ।**
**चत्तारि कामखंधाणि, तत्थ से उववज्जए ॥१७॥**

**व्याख्या–क्षेत्रं** ग्रामारामादिसेतुकेतूभयात्मकं वा, सेतुः केदारः, केतुर्हलादिकृष्टा भूः, उभयं वा ।१। तथा **वास्तु** खातोच्छ्रितोभयात्मकं ।२। **हिरण्यं** रूप्यादि धान्यादि च ३ **पशवो**ऽश्वाद्याः, दास्यते दीयते एभ्य इति दासाः पोष्यवर्गाः, पौरुषं पदातिवृदं, **दासपौरुषेयं** ४ एते **चत्वारः कामा** अभिलाषा**स्तेषां स्कन्धा**स्तत्तत्पुद्गलचया यत्रस्यु**स्तत्र** कुलेषु **स उत्पद्यते**, अनेनैकमङ्गमुक्तं सर्वार्द्धिसम्पूर्णताख्यम् ॥१७॥

अथ शेषनवाङ्गान्याह—

**मित्तवं १ नाइवं २ होइ, उच्चागोए य ३ वण्णवं ४ ।**
**अप्पायंके ५ महापन्ने ६, अभिजाए ७ जसो ८ बले ९ ॥१८॥**

**व्याख्या**–मित्राणि सहपांशुक्रीडितादीन्यस्य सन्तीति **मित्रवान्** १, **ज्ञातयः** स्वजना सन्त्यस्येति ज्ञातिवान् २, **भवति**, उच्चैर्लक्ष्म्यादिक्षयेऽपि पूज्यतया गोत्रं कुलमस्येति **उच्चैर्गोत्रः** ३, **चः** समुच्चये, वर्णः श्यामादिस्निग्धत्वादिगुणैः प्रशस्योऽस्येति **वर्णवान्** ४, **अल्पातङ्को** नीरोगः ५, महती प्रज्ञास्येति **महाप्राज्ञः** ६, **अभिजातो** विनीतः ७, **यशस्वी** ८, **बलवान्** ९, उभयत्र सूत्रत्वान्मत्वर्थलोपः ॥१८॥

**भुच्चा माणुस्सए भोए, अपडिरूवे अहाउयं ।**
**पुव्वं विसुद्धसद्धम्मे, केवलं बोहि बुज्झिया ॥१९॥**
**चउरंगिं दुल्लहं मच्चा, संजमं पडिवज्जिया ।**
**तवसा धुयकम्मंसे, सिद्धे भवइ सासए ॥२०॥ त्ति बेमि**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या–भुक्त्वा मानुष्यकान् भोगान्**, मनोज्ञान् शब्दादीन्, अप्रतिरूपान्-असमानान्, **यथायुर्यावज्जीवं, पूर्वं** पूर्वजन्मनि, विशुद्धो निदानादिहीनत्वात् सद्धर्मोऽस्येति **विशुद्धसद्धर्मः, केवलाम**कलङ्कां बोधिं **बुद्ध्वा** प्राप्य ॥१९॥

**व्याख्या**–ततोऽपि, चतुर्णामङ्गानां समाहारश्चतुरङ्गी, **तामुक्त**स्वरूपां **दुर्लभां मत्वा** ज्ञात्वा **संयमं** सर्वविरतिं **प्रतिपद्य, तपसा** बाह्याभ्यन्तरेण धुताः स्फेटिताः कर्मणोंशा भागा येन स **धूतकर्मांशः सिद्धो भवति** । स न **आजीविक**मतसिद्धिवत् पुनरिहैतीत्याह–**शाश्वतः** शस्वद्भवनात्, शस्वद्भवनत्वं पुनर्भवहेतुकर्मबीजात्यन्तिकोच्छेदात् । उक्तं च–

**दग्धे बीजे यथात्यन्तं, प्रादुर्भवति नाङ्कुरः ।**
**कर्मबीजे तथा दग्धे, नारोहति भवाङ्कुरः ॥१॥ [ तत्त्वा.अ.१०सू.७भा. ]**

**इति** समाप्तौ **ब्रवीमी**ति पूर्ववत् ॥२०॥

## इति चातुरङ्गीयं तृतीयाध्ययनमुक्तम् ॥३॥

• • •

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

# चतुर्थं प्रमादऽप्रमादाख्यध्ययनम् ॥

चतुरङ्ग्याप्तावपि प्रमादो महादोषाय अप्रमादो गुणाय चेति तुर्यं **प्रमादाऽप्रमाद-नामा**ध्ययनमाह–

**असंखयं जीविय मा पमायए, जरोवणीयस्स हु नत्थि ताणं ।**
**एयं वियाणाहि जणे पमत्ते, कन्नु विहिंसा अजया गहिंति ॥१॥**

**व्याख्या**–न संस्क्रियते तदसंस्कृतं, शक्रशतैरपि वर्द्धयितुं त्रुटितं वा कर्णवत् सन्धातुमशक्यं **जीवितं,** ततो **मा प्रमादीः**, चतुरङ्ग्याप्ते धर्मे प्रमादं मा कृथाः ! यतो **जरयोपनीतस्य** मृत्युसमीपं प्रापितस्य, **हुः** यस्माद्धेतो**र्नास्ति त्राणं** शरणं येन मृत्युतो रक्षा स्यात्, उक्तं च **वाचकैः**–

**मङ्गलैः कौतुकैर्योगै-र्विद्यामन्त्रैस्तथौषधैः ।**
**न शक्या मरणात् त्रातुं, सेन्द्रा देवगणा अपि ॥१॥** [ ]

यद्वा वार्द्धक्ये धर्मं करिष्ये इति कश्चिद्वक्तीत्याशङ्क्याह–**जरामुपनीतस्य** स्वकर्मभि**र्नास्ति त्राणं,** येन पुनर्यौवनमानीयते, तदा पुत्रादयोऽपि न पालयन्ति ।

**अत्राऽट्टनो दृष्टान्तः–अवन्त्यां जितशत्रुर्नृपः**, तद्राज्येऽट्टनाख्यो मल्लोऽस्त्यजेयः, तदा च **सोपारकपुरे सिंहगिरी** राजा, तत्र यो मल्लान् जयति तस्य स बहु स्वं दत्ते, **अट्टनो** वर्षे वर्षे तत्र गत्वा तत्रत्यमल्लान् जित्वा द्रव्यं लाति, एकदा राज्ञाचिन्ति, एषोऽन्य-राज्यादेत्यात्रत्यमल्लान् जयति तन्न मे शोभा, ततः प्रतिमल्लं कुर्वे, एको मत्सी वसापानान्महाबली दृष्टो, योग्योऽयमिति राज्ञाऽऽपोषि मल्लोऽस्थापि च, द्वितीयवर्षे तेन **सहाट्टनेन** युद्धं प्रारब्धं, तदा **मत्सीमल्लेनाटनो** जितः, स्वगृहं गतः स दध्यौ, मम वार्द्धक्यमस्य च तारुण्यं, ततोऽहमन्यं शिक्षयामीति भ्रमन् **सुराष्ट्रायामे**कं कर्षकमेकेन करेण हलं वाहयन्तं, द्वितीयेन च फलहीमुत्पाटयन्तं दृष्ट्वा विस्मितः, तावत्तद्भार्या

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

भक्तमादाय तत्रागात्, भृतघटसमानं कूरं सोऽत्ति स्म । सञ्ज्ञाभूमिं गत**मट्टनो** जाठराग्निना सर्वाहारः पक्वोऽस्येति तं परीक्ष्य विकाले तद्गृहे गत्वोचे**ऽट्टनो**ऽहं मदन्ते त्वं तिष्ठ ? त्वामीश्वरं कुर्वे इति । तेन तद्वचः प्रपद्य भार्या**वन्त्यां** प्रैषि। **अट्टनेन** स वमन-विरेचादिनाऽपोषि, युद्धं च तस्य शिक्षितं, स **फलहीमल्ला**ख्येन प्रसिद्धोऽभूत् । आगामिवर्षे**ऽट्टन**स्तेन सह **सोपारकं** यातः, तत्र **फलहीमल्लमत्सीमल्ला**भ्यां युद्धमारब्धं, एकं दिनं गतं, न कोऽप्यजैषीत्, सायं राजा मल्लाश्च स्वस्थानं गताः, **अट्टनेन फलहीमल्ल** उक्तः पुत्र ! यत्ते दुष्यति तद्वाच्यं, तेन तदुक्तेर्मर्दनस्नानसेकादिना सोऽसज्जि । **मत्सीमल्ल**स्यापि राज्ञा मर्दनिकाः प्रहिताः, सोऽवददहमेतत्पितु**रट्टन**स्य जेता, ततः कोऽसौ वराकः ? किमत्र मर्दनिकैः कार्यं ? इति ता स व्यसर्जयत् ।

द्वितीयेऽह्न्यपि तौ युद्धं चक्रतुः, तदा श्रान्तो **मत्सीमल्लः फलहीमल्ले**न जितः, **अट्टनो** राज्ञा सत्कृतो गतो**ऽवन्तीं**, तत्र मुक्तयुद्धव्यापारः स्वजनैर्जरया सर्वार्थाऽक्षम इति मत्वा पराभूतः, तदा स ताननापृच्छ्यैव **कौशाम्ब्यां** गत्वा वर्षं यावच्च तत्र रसायनभक्षणेन बलिष्ठीभू**यावन्त्या**मागत्य युद्धे राज्ञो **निरङ्गना**भिधं मल्लं जघान । तदाऽगन्तुकेन मल्लेन मे मल्लो हत इति राजा कोपातुरो न तं प्राशंसत्, जना अपि तूष्णीं स्थिताः, तदा**ऽट्टनो** राज्ञो ज्ञप्त्यै प्रोवाच—

**साहह वण सउणाणं, साहह भो ! सउणिगा सउणिगाणं ।**
**निहओ निरंगणो अट्ट-णेण निक्खिन्नसत्थेणं ॥१॥ [ उ.४/१ बृ.वृ. ]**

ततो राज्ञा**ऽट्टनो**ऽयमिति ज्ञात्वा तुष्टेन तस्मै जन्मावधिभोज्यं स्वं दत्तं । स्वजनास्तद् ज्ञात्वा तत्रैतास्तत्पादपाताद्यैरर्थलाभात्तमावर्जयितुं लग्नाः, तदा स दध्यो नूनमीमे सर्वे द्रव्य-सम्बन्धिनो नो मम, ततो यावत् सचेष्टोऽस्मि तावत्प्रव्रजामीति स दीक्षितः, एवं जरोपनीतस्या**ऽट्टन**स्येवान्यस्यापि न त्राणं बन्धुभिः पालनं, जरातो वा रक्षणम् ।

**एव**मित्येवम्प्रकारं (पाठान्तरे **एनमु**क्तमर्थं) **विशेषेण विविधं** वा **जानीहि** ? भो **जना** लोकाः **प्रमत्ताः** प्रमादिनः, सूत्रत्वादुभयत्रैकवचनं । **किमर्थं** त्राणमवलम्बनं ? 'गहिंति'त्ति सूत्रत्वाद् **गमिष्यन्ति ग्रहीष्यन्ति** वा, **नु** इति वितर्के, अत्राणा नरकं गमिष्यन्ति, किम्भूताः ? **विहिंस्रा** विविधहिंसनशीलाः, जन्तून् विहिंसन्तीति **विहिंसा** वा, तथा **अयताः** पापस्थानेभ्यो-ऽनुपरताः, यद्वा जनः प्रमत्तः 'कन्नु'त्ति **काम**प्यवक्तव्यां नरकादिगतिमसौ **ग्रहीष्यति** ॥१॥

किं तव विवेकिनोऽपि प्रमादः ? इति गुरूपदेशं, कोप्यर्थस्यापि पुरुषार्थत्वान्मा प्रमादीरित्यर्थविषये वक्ति, तत्राह—

**जे पावकम्मेहि धणं मणूसा, समाययंते अमइं गिहाय ।**
**पहाय ते पासपयट्टिए नरे, वेराणुबद्धा नरयं उविंति ॥२॥**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या—ये** नराः **पापकर्मभिः** पापहेतुकृषिवाणिज्यादिभिर्**धनं** द्रव्यं समाददते, किं कृत्वा ? **अमतिं** नञः कुत्सायामिति कुमतिं **गृहीत्वा** सम्प्रधार्य, यद्वा **अमतम**शोभनं मतं **नास्तिका**दि, अथवा अमृतवि**वामृतमा**त्मन्यानन्दहेतुत्वा**द्धनं गृहीत्वा,** ततः **प्रहाय** तद्धनं प्रकर्षेण त्यक्त्वा नरकमुपयान्तीति सम्बन्धः, **तान् नरान् पश्य** विलोकय ? 'पयट्टिए' **प्रवृत्तान् प्रवर्त्तितान्** वा पापधनेनैव मृतिं प्रति, वैरं पापकर्म, तेनानुबद्धान् **वैरानुबद्धान्**, यद्वा **ते नराः** पाशा इव पाशाः स्त्र्यादयस्तेषु प्रवृत्ताः **पाशप्रवृत्ता नरकमुपयान्ति** ॥२॥

**नरकापायो न प्रत्यक्षलक्षोऽत इहैव मृत्य्वपायसूचको दृष्टान्तः**-कस्मिंश्चित् पुरे चौरो रात्रौ धनाढ्येषु गृहेषु क्षात्रं दत्वा दत्वा बह्वर्थान् हृत्वा स्वगृहैकदेशे कूपकं खात्वा तमर्थैर्भृत्वेष्टस्वैः कन्यां विवाह्य तां प्रसूतिवर्ती सतीं रात्रौ हत्वा तत्रैव कूपे क्षिपति, मा मे भार्यापत्यानि च प्रौढान्यन्यस्य स्वं वदन्त्विति । पुनश्च स उदुह्यते । अन्यदैकां सुरूपां स ऊढः, सा प्रसूत्यनन्तरं मोहेन तेन न हता, सुतोऽष्टवार्षिको जातः, पितुश्चेष्टां च विलोकयामास, तदा शङ्कितेन तेन चौरेण चिन्तितं प्रागेनां हन्यां पश्चात् सुतमिति तां हत्वा सोऽवटेऽक्षिपत्, तत्क्षणमेव सुतस्तु गृहान्निर्गत्याऽनेन मे माता हतेति लोकानां पुरः पूच्चक्रे। राजनरैस्तत् श्रुत्वा तद्गृहमेत्य स धृतो दृष्टश्च कूपो द्रव्यभृतोऽस्थीनि च तत्र । ततस्तैर्बद्ध्वासौ राज्ञेऽर्पितः, राज्ञा सर्वस्वं लोकानां दत्वा स दुर्मारैरघानि । एवमन्येऽपि धनं प्रधानमिति तदर्थं प्रवर्त्तमानास्तदपहायेहैवाऽनर्थाप्ता नरकं यान्ति ॥२॥

कर्मणामवन्ध्यतां वदन् प्राक्तमर्थं दृढयति—

**तेणे जहा संधिमुहे गहीए, सकम्मुणा किच्चइ पावकारी ।**
**एवं पया पिच्च इहं पि लोए, कडाण कम्माण न मोक्ख अत्थि ॥३॥**

**व्याख्या—स्तेनश्चौरो यथा सन्धिः** क्षात्रं, **तस्य मुखे** द्वारे **गृहीतो** धृतः, **स्वकर्मणा** स्वानुष्ठानेन गृहेशेन बहिःस्थचौरेण चाकृष्यमाण इव **कृत्यते** छिद्यते, **पापकारी ।**

यथैकेन चौरेणाऽभेद्योपवरके फलकाञ्चिते कपिशीर्षाकारं क्षात्रं पातितं, क्षात्रे चौरोऽर्धप्रविष्टः सन् गृहेशेन ज्ञात्वांह्र्योर्गृहीतः, ततो ज्ञापिततत्स्वरूपेण बहिःस्थचौरेणापि स गृहीतः, एवं द्वाभ्यां बलवद्भ्यां स्वाभिमुखमाकृष्यमाणः स स्वयंकृतकपिशीर्षधाराभिः स्फाट्यमानोऽत्राणोऽभूत्। **एवं** चौरवत् **हे प्रजाः** हे प्राणिनः पेच्छन्ति प्रेक्षध्वं ! प्राकृत-त्वाद्वचनव्यत्ययः, **इहा**ऽस्मिन् **लोके** जन्मनि, आस्तां परलोके इत्यपिशब्दार्थः, **कृतानां कर्मणां न मोक्षोऽस्ति** (पाठान्तरे–'**एवं पया पिच्च इहं च**' त्ति) **प्रजाः प्रेत्य** परलोके **इह** लोकेऽपि कृत्यन्ते तादृग्बाधाभिः, यथैकेन चौरेण रात्रौ दुरारोहे प्रासादे आरुह्य विमार्गेण

क्षात्रं दत्तं, बहुद्रव्यजातमात्तं, स्वगृहं गतः, प्रातः स्नात्वा शुद्धवासास्तत्र स गतः कः किं वक्तीति ज्ञातुं। तत्र मिलितो जनोऽवक् कथमत्र दुरारोहे प्रासादे आरुह्यानेन विमार्गेण क्षात्रं दत्तं ? कथं च लघुना क्षात्रद्वारेण प्रविष्टश्चौरः कथं निर्गतश्च ? इति श्रुत्वा स हृष्टो दध्यौ, सत्यमेतदहं कथमत्र प्रविष्टो निर्गतश्चास्मीत्यात्मनः कुक्षिं कटिं चालोक्य क्षात्रमुखं पश्यन् राज्ञो नरैर्ज्ञातश्चौरोऽयमिति बद्ध्वा राज्ञोऽग्रे आनीतोऽशिक्षि च। एवं पापकर्मेच्छापि न कार्या ॥३॥

कोऽपि वेत्ति यत्स्वजनैश्छुट्यते तदर्थमाह–

**संसारमावण्ण परस्स अट्ठा, साहारणं जं च करेइ कम्मं।**
**कम्मस्स ते तस्स उ वेयकाले, न बंधवा बंधवयं उवेंति ॥४॥**

**व्याख्या**–संसरणमुच्चावचकुलेषु भ्रमणं **संसारस्तमापन्नः**, '**परस्स**' त्ति पुत्रकलत्रादे**रर्थाय, च** एवार्थे, यद्वा **साधारणं** स्वस्यान्येषां चैतद्भवितेति कृत्वा **कर्म** कृष्यादि **करोति** भवान्, हे कृष्यादिकर्मकर्त्तस्ते **तव तस्य** परार्थस्य साधारणस्य च, **तु** पुन**र्वेदकाले** कर्मफलविपाकसमये **यदर्थं कर्म** कृतं करोषि वा, **ते बान्धवाः** स्वजना **बान्धवतां** तत्पापविभजनस्फेटादिना **नोपयान्ति,** किं पुनः स्वार्थमेव कृतस्य फलं कथ्यते ? ततस्तत्प्रेमत्यागाद्धर्मे एवाऽवहितेन भाव्यं। **आभीरीव्यञ्चकवणिग्वत्**।

यथैको वणिग् हट्टे व्यवहरन्नेकामृजुमाभीरीं रूपकौ लात्वा रूतार्थमायातां रूतसमर्घ्य-त्वादेकरूपकरूतं द्विःकृत्वाऽदात्। सा वेत्ति द्वयो रूपकयोर्दत्तमिति लात्वा गता। वणिगप्येष रूपको मुधा लब्धस्ततो घृतपूरान् भोक्ष्ये इति स मितान् घृतगुडान् गृहे प्रैषीत्। भार्ययापि ते कृताः, तदा तज्जामाता समित्रश्चौरहृतपश्वन्वेषणार्थं तत्रागात्। तया परिवेषितान् घृतपूरान् भुक्त्वा च स ययौ। वणिगथ स्नातो भोक्तुं गतः, पत्न्यान्नं परिवेषितं, परं घृतपूरका न परिवेषिताः, ततः पृष्टे जामातृवृत्तान्तो ज्ञातस्तदा तेनाचिन्ति, सा मुग्धा मयाऽवञ्चि, घृतपूरा अप्यगुः, सचिन्तो देहचिन्तार्थं स ग्रीष्मे निर्गतो, मध्याह्ने च द्रुतले विश्रामाय स्थितः।

इतस्ततो भिक्षायै यान्तं साधुं स ऊचे भगवन् क्षणमत्र विश्रामं लभस्व ! साधुरूचे मया तूर्णं स्वकार्ये गम्यं, सोऽवक् किं कोऽप्यन्यकार्येऽपि याति ? साधुरूचे केचिदन्य-कार्येऽपि यान्ति, यथा त्वं भार्याद्यर्थं क्लिश्यसि। तत् श्रुत्वा सममर्मेण तद्वचसा स्पृष्टः सम्बुद्धः साधुस्थानं पृष्ट्वावसरे साधूपान्तं गतो धर्मं श्रुत्वा दीक्षेच्छुः स्वजनान् पृष्टुं स गृहं गतस्तान् भार्यां चोवाच, हट्टे व्यवहरतो मे तुच्छलाभस्ततो विदेशवाणिज्यं विधास्ये, यतो द्वौ सार्थवाहौ स्तस्तत्रैको भाण्डमूल्यं दत्वा सुखेनेष्टपुरं नयति, उपार्जितं च न याचते, द्वितीयो न किञ्चिद्भाण्डमूल्यं दत्ते, पूर्वार्जितं च लुम्पति, ततः केन सहाहं यामीत्युक्ते

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

भ्रात्रादिभिरूचे पूर्वेण सत्रा यातेति तैरनुज्ञातस्तद्युतोऽसौ गतः साधूपाश्रयं, तैरूचे क्व सार्थवाहः ? तेनोचे नूनं परलोकसार्थवाहोऽयं साधुः स्वेन पञ्चमहाव्रतात्मकेन भाण्डेन व्यवहारयति, अनेन सह शिवपत्तनं यामीति बलात् स प्राव्राजीत् । यथायं वणिक् स्वजनाऽस्वजनत्वमालोचयन् प्रत्यावृत्तस्तथान्यैर्विवेकिभिर्यतनीयं । यतः–

**माता भ्राता भगिनी, भार्या पुत्रस्तथा च मित्राणि ।**
**न घ्नन्ति ते यदि रुजं, स्वजनबलं किं वृथा वहसि ॥१॥ [ ]**

**रोगहरणऽप्यशक्ताः, प्रत्युत धर्मस्य ते तु विघ्नकराः ।**
**मरणाच्च न रक्षयन्ति, स्वजनपराभ्यां किमप्यधिकम् ॥२॥ [ ]**

**तस्मात् स्वजनस्यार्थे, यदिहाऽकार्यं करोषि निर्लज्ज ! ।**
**भोक्तव्यं तस्य फलं, परलोकगतेन त्वया मूढ ॥३॥ [ ]**

**तस्मात् स्वजनस्योपरि, विहाय रागं च निवृतो भूत्वा ।**
**धर्मं कुरुष्व यत्ना-दिहपरलोकस्य पथ्यदनम् ॥४॥ [ ]**

कोऽपि वेत्ति यदि पुनर्द्रव्याच्छुट्यते तत्राह–

**वित्तेण ताणं न लभे पमत्ते, इमंमि लोए अदुवा परत्थ ।**
**दीवप्पणट्ठेव अणंतमोहे, नेयाउयं दट्ठुमदिट्ठमेव ॥५॥**

**व्याख्या–वित्तेन** द्रव्येण **त्राणं** स्वकृतकर्मणो रक्षणं **न लभते, प्रमत्तो** मद्यादिप्रमादवान्, **अस्मिन् लोके** इह लोके, **अथवा परत्रापि, पुरोधःपुत्रवत्–**

यथैकेन राज्ञा कस्मिंश्चिदुत्सवेऽन्तःपुरे निर्गच्छतीत्युद्घोषणाऽकारि, यत् सर्वे नराः पुरान्निर्गच्छन्तु, पौरा निर्गताः, पुरोधःसुतो राजमित्रं वेश्यागृहेऽस्ति, स ज्ञात्वापि न निर्गतः, राड्नरैश्च धृतः, अहं राड्मित्रं का मे भीरिति तैः सह विवदमानो राज्ञोन्तिकं स नीतः, राज्ञा वध्य आज्ञप्तः, पुरोधा एत्योचे सर्वस्वं ददे मा मार्यतां मे पुत्रस्तथापि राज्ञा न मुक्तः शूलायां दत्तश्च । एवमन्येऽपि वित्तेन त्राणमिह नाप्नुवन्त्यास्तामन्यजन्मनि । तन्मूर्छावतः पुनरधिकं दोषमाह–'दीवे' इति, प्रकर्षेण नष्टः प्रणष्टो दीपोऽस्येति प्राकृतत्वा**द्दीपप्रणष्टः**, स **इव**, अनन्तस्तद्भवापेक्षया मोहो ज्ञानदर्शनावरणमोहनीयात्मकोऽस्ये**त्यनन्तमो**हो, निश्चित आयो लाभो न्यायो मुक्तिः, स प्रयोजनमस्येति **नैयायिकस्तं** सम्यग्दर्शनादिकं मुक्तिमार्गं, 'दट्ठुं' ति, अन्तर्भूतः अपिशब्दः, **दृष्ट्वाप्यदृष्टैव** स्यात्, तद्दर्शनफलाऽभावात् ।

यथा केऽपि रसार्थिनः स दीपाद्युपकरणा यन्त्रशीलाकीर्णाद्रिबिलान्तर्गताः, प्रमादात्

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

प्रणष्टदीपा गुहातमोमोहिता इतस्ततो भ्रमन्तोऽहिदष्टा दुस्तरगर्त्ते पतिता मृताः, तथायमपि सम्यक्त्वश्रुतदीपेन विषमे धर्ममार्गे चलन् प्रमादाद् गतसम्यक्त्वतत्त्वो लोभाऽहिदष्टोऽधः पतेत्, न केवलं धनं त्राणाय न स्यात्, किन्तु त्राणहेतुं ज्ञानाद्याप्तं हन्ति ॥५॥

एवं धनाऽसारतां ज्ञात्वा कृत्यमाह–

**सुत्तेसु यावी पडिबुद्धजीवी, न वीससे पंडिय आसुपन्ने ।**
**घोरा मुहुत्ता अबलं सरीरं, भारंडपक्खीव चरेप्पमत्ते ॥६॥**

**व्याख्या–सुप्तेष्व**विवेकिषु, द्रव्यतो निद्रया भावतो धर्मं प्रति प्रमादेन, **चः** पूरणे, **अपि** सम्भावने, प्रतिबुद्ध एव जाग्रदेव जीवतीत्येवंशीलः **प्रतिबुद्धजीवी**, द्रव्यतो जाग्रत्, भावतः सम्यक्त्वतत्त्वज्ञः, द्रव्यसुप्तेषु प्रतिबुद्धजीवी निद्राहीनो**ऽगडदत्तवत्** स्यात्,

यथा**ऽवन्त्यां जितशत्रु**राज्ञो**ऽमोघरथो** रथिकस्तस्य **यशोमती** भार्या **अगडदत्त**श्च पुत्रः, तस्य बाल्ये पिता मृतः, सोऽन्यदाम्बां रुदन्तीं दृष्ट्वाऽपृच्छत्, तयोचे वत्सैषो–**ऽमोघप्रहारी** रथिकस्त्वत्पितुः पदं प्राप्तस्तं तथास्थं त्वां चाऽविद्यं दृष्ट्वा मे हृद् दूयते । तेनोचे को मां विद्यां शिक्षयति ? सोचे अस्ति **कौशाम्ब्यां दृढप्रहारी** ते पितुर्मित्रमिति । स गतः **कौशाम्ब्यां** मिलितश्च **दृढप्रहारिणः**, तेनापि धनुर्वेदादिज्ञेन स्वपुत्र इव सर्वशस्त्र–कलासु स पारिणीकृतः, अन्यदा स गुर्वनुज्ञातः सिद्धविद्यः स्वकला दर्शयितुं राजकुले–ऽगात् । तच्छस्त्रकलया सर्वा सभा विस्मिता, राजाऽवक् तुभ्यं किं ददे ? तेनोचे स्वामिन् साधुकारमेव देहि ! तदा लोकै राजा विज्ञप्तः स्वामिन् साम्प्रतं नगरमध्येऽन्वहं स्तैन्यं भवति, तेन जनोऽपि निःस्वो जातोऽस्ति । राज्ञा तलारक्ष उक्तो यत्सप्तरात्रान्तश्चौरमानयेति । सोऽवक् स्वामिन् मया स निगृहीतुमशक्यस्त**दागडदत्तेनोच्चे** स्वामिन् सप्ताहान्तश्चौरमह–मानेष्ये । अथ स राज्ञानुज्ञातो वेश्यासुराद्यूतस्थानजीर्णोद्यानशून्यदेवकुलादिषु चौरं निरूपयन् सप्तमेऽह्नि जीर्णोद्याने सायमाम्रतले चौरग्रहणोपायं ध्यायन् निविष्टः, तावदुद्बद्धपण्डिडको दीर्घजङ्घो मुखेन गुणनं कुर्वन्नेकः परिव्राड् तत्रागात् । दृष्टोऽनेन ज्ञातश्चौरः, स तत्पार्श्वे निविश्योचे, वत्स कस्त्वं ? किं खिन्नः ? सोऽवग् भगवन्नह**मवन्ती**वासी क्षीणस्वो यद्धविष्यो यत्र तत्र भ्रमन्नस्मि । सोऽवग् वत्साहं तवार्थं ददे, मा विषीद ? **अगडो**ऽवग् भगवन्स्तर्हि तु महाकृपा ।

अथास्तेऽर्के ध्वान्ते च विस्तृते त्रिदण्डाच्छस्त्रं कृष्ट्वा स बद्धपरिकरो वत्स यावः पुरान्तरित्यवोचत् । अथ नूनं चौर इति ध्याय**न्नगडो**ऽपि सशङ्कस्तमनुयातः, प्रविष्टौ च तौ पुरान्तः, तत्र श्रीमद्गृहे क्षात्रं दत्वा प्रविश्य च परिव्राजा रत्नादिभृताः पेटा निष्कासिताः,

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**अगडं** च तत्र रक्षकं मुक्त्वा स देवकुलात् सुप्तान् दरिद्रनॄन् लात्वाऽऽगतः, तैः पेटा उत्पाट्य तौ पुराद्बहिर्गतौ । स उवाच वत्स क्षणमत्र निद्राहि ? यावद्रात्रिर्याति, ततः स्थानं यास्यावः, **अगडः** क्षणं कूटेन सुप्त्वा क्षणादेवोत्थाय वृक्षान्तरेऽस्थात् । निद्रिता भारवाहिकाः परिव्राजोत्थाय सर्वे हताः, ततोऽसा**वगडं** श्रस्तरे नाऽपश्यत्, इतो**ऽगडस्**तत्सम्मुखमागत्य तं हृदये हत्वाऽपातयत् । तेन स्वस्य निश्चितां मृतिं ज्ञात्वोचे, वत्सेमं ममासिं लाहि ? व्रज च स्मशानासन्नदेवीगृहे, तत्र गत्वा शब्दं कुर्याः, भूगृहे मम स्वसास्ति, तस्यै चायमसिर्दर्श्यः, सा च त्वद्भार्या, त्वं च द्रव्येशो भूयाः, इत्युक्त्वा स मृतः, **अगडस्**तत्र गत्वा तथाकरोत्, साऽऽयाता देवीव, भ्रातुरसिं दृष्ट्वा मृतिं च ज्ञात्वा कूटमैत्र्या सम्भ्रमा भूगृहं प्रविश्यासनं मुमोच, स तत्रोपविष्टस्तच्चर्यां पश्यन् सशङ्कोऽस्थात् । सा शय्यां प्रस्तार्योचे स्वामिन्निह सुखनिद्रां कुरु ? स तत्र सुप्त्वा तस्यामन्यचित्तायामुत्थायान्मयत्र छन्नं स्थितः, इतस्तया शय्योद्ध्र्वं पूर्वसज्जिता शिलाऽपाति, शय्याऽचूरि, हृष्टोचे हतो मया भ्रातृघातीति । **अगडस्**तां केशेष्वाकृष्योचे दासि ! को मां हन्तीति ? ततः सा तदंह्रोः पतित्वोवाचाहं त्वच्छरणास्मि, तेन मुक्ता, प्रातस्तां विश्वास्यादाय स गतो नृपं, राज्ञा सोऽर्चि धनादिभिः, पुरदेशजनैरपि पूजितः स भोगभागभूत् । एवमन्योऽप्यप्रमत्त इहैव कल्याणभाक् स्यात् ।

**भावसुप्तेषु** मिथ्यात्वादिमोहितेष्वपि जनेषु यतिः सम्यग्ज्ञानेन प्रतिबोधपूर्वमेव संयमजीवितं धारयतीति **प्रतिबुद्धजीवी न विश्वस्तः** स्यात्, प्रमादेषु बहुजनप्रवृत्तिदर्शनान्नैतेऽनर्थकारिण इति **न विश्वस्तः स्यात् पण्डितः**, आशु शीघ्रं सुकृतेषु यतनीयमिति प्रज्ञा बुद्धिर्यस्य स **आशुप्रज्ञः**, यतो जीवं घूर्णयन्तीति **घोरा** निर्दयाः, शश्वन्मृतिदत्वान्**मुहूर्त्ताः** कालभेदाः, घोरा अप्यमी देहबलात् कदाचिन्न प्रभविष्यन्तीत्याह—**अबलं,** न मृत्युदायिमुहूर्त्तान् प्रति शक्तिव**च्छरीरं,** ततो **भारण्डपक्षीवाऽप्रमत्तश्चर** । यथा सोऽप्रमत्तश्चरति तथा त्वमपि प्रमादरहितश्चर ।

**अहो वैचित्र्यमेषां यत्, त्रिपादा मर्त्त्यभाषिणः ।**
**द्विजीवा द्विमुखाश्चैको-दरा भिन्नफलैषिणः ॥१॥**

भारण्डपक्षिणः पक्षद्वयभिन्नदेहैकचरणस्य पक्षान्तरेण सहान्तर्वर्त्तिसाधारणचरणत्वात् स्वल्पमपीच्छाभेदेन प्रमाद्यतोऽवश्यं मृत्युः, तथा तवापि प्रमाद्यतः संयमायुर्भ्रंशः ॥६॥

अमुमर्थं स्पष्टयति—

**चरे पयाइं परिसंकमाणो, जं किंचि पासं इह मन्नमाणो ।**
**लाभंतरे जीविय बूहइत्ता, पच्छा परिण्णाय मलावधंसी ॥७॥**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या—चरेत्** संयमाध्वनि **पदानि** पदन्यासान् क्रियाप्रकारान्, यद्वा **पदानि** धर्मकृत्यानि मूलगुणादीनि, **परिशङ्कमानः** संयमदोषान् गणयन्, अत्र मे मूलगुणस्खलना भविष्यतीति भावयन्, **यत्किंचिद**ल्पमपि, गृहिसंस्तवादि दुश्चिन्तितादिप्रमादपदं संयमे स्वातन्त्र्यहानिमूलगुणादिमालिन्यकृत्त्वाद्बन्धहेतुत्वेन **पाशमिव मन्यमानः**, यथा भारण्डः पदानि शङ्कमानश्चरति, यत्किंचिद्दवरकाद्यपि पाशं मन्यते । ननु चेच्छङ्कमानश्चरेत्ततोऽनशनमेव लात्वित्याह—**लाभान्तरे** लाभविशेषे सति, यावद्विशिष्टविशिष्टतरज्ञानदर्शनचारित्राद्याप्तिः स्यात्तावदिदं **जीवित**मन्नपानाद्यै**र्बृहयित्वे**व वृद्धिं नीत्वेव **पश्चाल्ला**भादनु **परिज्ञाय** सर्वप्रकारैर्ज्ञात्वा, यथेदं तदानीं प्राग्वन्ननिर्जराकरमिति, ज्ञपरिज्ञातः प्रत्याख्यानपरिज्ञया भक्तं प्रत्याख्याय सर्वथा जीवितनिरपेक्षो, मलोऽष्टप्रकारं कर्म, तदपध्वंसते, इत्येवं शीलो **मलापध्वंसी** स्यात्, यद्वा **जीवितं बृंहयित्वा लाभान्तरे** लाभच्छेदेन्तर्बहिश्च मलाश्रयान्, **मलमौ**दारिकशीरं, **तदपध्वंसी** स्याज्जीवितं त्यजेदिति । इह लाभं यावद्देहो रक्ष्यः, यथा **मूलदेव**नृपेण धनलाभं याव**न्मण्डिक**चौरो रक्षितः, पश्चाद्धतः, एवं पश्चादनशनं ग्राह्यं । कथैवं—

**अवन्त्यां** श्रेष्ठा **देवदत्ता** वेश्या, तस्या**मचलो** धनी, **मूलदेवो** द्यूती चाधनश्चासक्तौ । तस्या **मूलदेव** इष्टः, गणिका**ऽक्कायास्त्वचलः,** सोचे पुत्रि ! किमनेन द्युतिना ? तयोक्तं **मूलदेवो** दक्षः, तयोक्तं किमेषोऽस्मादधिकं ज्ञानं वेत्ति ? **अचलो**ऽपि सर्वकलाज्ञः, तया दास्युक्ता । व्र**जाचलं** कथय च **देवदत्ते**क्षून् भोक्तुमिच्छति । तयोक्तो**ऽचलो** दुर्लभानपीक्षून् शकटभृतान् प्रेषितवान् । वेश्ययोक्तं किमहं हस्तिनी ? **मूलदेवो** दास्याऽज्ञापि, तेनेक्षुभागा निस्त्वचीकृताः कर्पूरादिवासिताः प्रहिताः, तयोक्तं मातः पश्य दाक्ष्यं ? सा मौनेऽस्थात्, **मूलदेवे** च द्वेषं गता । अथैकदा**ऽक्कया** प्रेरिते**नाचलेन देवदत्तायै** प्रोक्तमहमद्य ग्रामान्तरं गच्छामीत्युक्त्वा स निजगृहे गुप्तस्तस्थौ । तदा निःशङ्कया **देवदत्तया मूलदेवो** निजनिकेतने आकारि । तदैवा**ऽक्का**सङ्केतितो**ऽचलो**ऽपि तत्रागात् । तदा **देवदत्त**या **मूलदेवो** मञ्चाधो गुप्तीकृतो ज्ञातश्चा**ऽक्को**क्तितो**ऽचलेन** । **देवदत्तोक्ता** दास्यो**ऽचलार्थं** स्नानसामग्रीं लात्वा तत्र स्थिताः, **अचलेनो**क्तमद्य मया शय्योपरि स्नानकरणलब्धस्वप्नः सफलीकार्योऽस्ति, विनश्यत्वियं शय्या, इतोऽपि भव्यामपरां शय्यामहं तेऽर्पयिष्यामीत्युक्त्वा स शय्योपरि स्नानं कृतवान् । ततो जलार्द्रो**ऽचलेन मूलदेवः** केशेष्वाकृष्योक्तो व्रज ? जीवन्मुक्तोऽसि, त्वमप्येवं मां मुञ्चेः, **मूलदेवो** लज्जया निर्गत्य निःसबलो **बेन्नातटं** प्रति चलितः, पथ्येको द्विजो मिलितः, मध्याह्ने कुक्षिम्भरेण द्विजेन शम्बलं भक्षितं, **मूलदेवाय** किञ्चिदपि न दत्तं । एवं दिनत्रयं यावत्तेन निस्तृपेन क्षुत्क्षामायापि **मूलदेवाय** न किञ्चिद्दत्तं चतुर्थेऽह्नि स द्विजः पृथग्भूते निजग्राममार्गे चलितः, तदा ताभ्यां परस्परं नामग्रामादि पृष्टम् ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अथ **मूल** आसन्नग्रामं गत्वा भिक्षायां च कुल्माषानादाय वलितः साधुमेक मासक्षपणपारणके ग्रामाभिमुखं व्रजन्तं महाभक्त्या तैः कुल्माषैः प्रतिलाभ्योचे–

**धन्नाणं खु नराणं, कुम्मासा हुन्ति साहुपारएण** । [ उ.४।७बृ.वृ.पू. ]

इत्युक्ते सुर्यासन्नस्थयोचे सः, पश्चार्द्धेन याचस्व ? त्वां ददे, तदा सोऽवक्–

**गणियं च देवदत्तं, दन्तिसहस्सं च रज्जं च** ॥१॥ [ उ.४।७बृ.वृ.प. ]

सुर्योक्तं तत्ते शीघ्रं भावि । अथेतोऽसौ **बेन्नातटे** गतस्तत्र च राजाऽपुत्रः पञ्चत्वं प्रयातोऽभूत्। मन्त्रिशृङ्गारितहस्तिन्याभिषिक्तो **मूलदेव**स्तत्र राजाभूत् । ततो**ऽवन्तीशे**न सह दानाद्यैः प्रीतिं कृत्वा तेन **देवदत्ता**मानाय्य स्वान्तःपुरे क्षिप्ता । अन्यदा**ऽचलः** पोतयुतो व्यापारार्थं तत्रागतः शुल्कचौर्यतो राजनरैर्धृत्वा **मूलदेवा**ग्रे समानीतः, **मूलदेव**स्तमुपलक्ष्य स्वं च प्रज्ञाप्य पूर्ववचनेन सत्कृत्य विससर्ज ।

अथ तत्र **बेन्नातटे मण्डिका**भिधश्चौरोऽह्नि गडुमिषेण लेपलिप्तजानुकृतपट्टबन्धो दण्डधरः पुरे शनैः शनैश्चलति, रात्रौ च क्षात्रैर्द्रव्यं लात्वा पुरासन्नोद्याने भूमिगृहे निक्षिपति । तत्र तत्स्वसा कन्यास्ति, कूपश्चाप्येकोऽस्ति । यश्च निशि लोभात्तस्य लोप्त्रमुत्पाट्य तत्र याति, तं तत्स्वसा पादशौचमिषेण कूपे पातयति । दुःखीभूता लोका **मूलदेवा**य चौरोपद्रवं कथयामासुः, राज्ञारक्षक उक्तस्तदा तेनोक्तं स्वामिन्नयं चौरो मया निग्रहितुं न शक्यते । तदा निशि राजा नीलाम्बरः स्वयमेकाकी बहिर्जीर्णदेवकुलस्थश्चौरेणेत्योक्तः कस्त्वं ? राज्ञोचे कार्पटिकोऽहं, चौरेणोक्तमेहि त्वां धनिनं कुर्वे । ततस्तेन राट्र सार्थे नीतः, ततोऽसौ क्षात्रं दत्वा धनवद्गृहाद् बहु स्वं लात्वा नृपशीर्षे ददौ, पुरो भूगृहान्तर्गत्वा चौरः स्वसारमूचे- ऽस्यांह्रिशौचं कुरु ? तया तदंह्रिशौचकरणानन्तरं तत्पादकोमलस्पर्शतो मोहितया सङ्केतितोऽसौ नष्टस्तदा चौरः पृष्ठौ सखड्गोऽधावत् । अथ **मूलदेवो** मार्गे शिवलिङ्गं निजोत्तरीयेनाच्छाद्य वृक्षान्तरे लीनः, घोरतमसि चौरस्तदुत्तरीयाच्छादितं शिवलिङ्गं तमेव कार्पटिकं मन्यमानः कोपेन कङ्कपत्रतो द्विधा कृतवान् । ततोऽसौ द्रुतं भूगृहान्तर्गतः, प्रातर्नृपेण स आहूय सन्मान्य च तत्स्वसाऽयाचि । तेनापि दत्ता, अथ क्रमेण राज्ञा-वर्जनपूर्वकं तस्मात् सर्वस्वं गृहीत्वा पौरभ्यस्तेषां लेखानुसारेण समर्पितं, ततश्च तेन लोकसाक्षिकं स **मण्डक**चौरः शूलायां प्रोतः, एवं साधुः काले देहं त्यजेत् ।

एतन्न स्वातन्त्र्येणेत्याह–

**छंदं निरोहेण उवेइ मोक्खं, आसे जहा सिक्खियवम्मधारी ।**
**पुव्वाइं वासाइं चरप्पमत्तो, तम्हा मुणी खिप्पमुवेइ मुक्खं** ॥८॥

**व्याख्या**—**छन्दः** स्वच्छन्दता, **तन्निरोधेन** तन्निषेधेन, यद्वा **छन्दसा** गुर्वनुमत्या **निरोध** आहारादित्यागः, छन्दो निरोधः, अथवा छन्दो वेद आगमः, **छन्दसा** आगमेन **निरोध** इन्द्रियादिनिग्रहस्तेन मोक्षं कर्मक्षयमुपैति, न तु सर्वथा जीवितं प्रत्यनपेक्षितया, तथा च—

**सव्वत्थ संजमं, संजमाउ अप्पाणमेव रक्खिज्जा ।**

**मुच्चइ अइवायाओ, पुणो वि सोही नयाविरई ॥१॥** [ ओ.नि./गा.४७ ]

**अत्र दृष्टान्तमाह**—अश्वो यथा शिक्षितो वल्गनोत्प्लवनधावनादिशिक्षां ग्राहितो, वर्म अश्वतनुत्राणं तद्धरणशीलः शिक्षितवर्मधारी, स्वातन्त्र्यं विना चलन् युद्धेऽरिभिर्न हन्येत, तन्मुक्तिमाप्नोति, स्वतन्त्रोऽश्वस्तु **प्रथममशिक्षितो** रणमाप्तस्तैर्हन्यते । **अश्वदृष्टान्तोऽयं**—राज्ञा द्वयोः क्षत्रिययोर्द्वावश्वौ दत्तौ शिक्षणार्थं पालनार्थं च, तत्रैकेनाश्वः कालार्हजवसादियोग्याशनेन पोष्यमाणो धावनलालनवल्गनाद्याः कलाः शिक्षितः, परेण च कोऽस्मै जवसादिदातेति घरट्टेऽवाहि, अश्वार्थदत्तं राजधनं च स्वयं भुक्तं । रणकाले राज्ञ उक्त्या तावश्वावारुह्यैतौ, राज्ञोक्तौ च रणं प्रविष्टौ, पूर्वशिक्षितः सादिमनोऽनुवर्त्तमानोऽश्वो रणपारं प्राप्तः, द्वितीयस्त्वशिक्षितो गोधूमपेषणयन्त्रनियुक्त इव तत्रैव भ्रमन्नरिभिरशिक्षितोऽयमिति ज्ञात्वाऽश्ववारं हत्वात्तः, यथाद्याश्वस्तथा धर्मार्थ्यपि स्वातन्त्र्यहीनो मुक्तिमाप्नोति, अत एव च **पूर्वाणि वर्षाणि** इति, एतावदायुषामेव चारित्रत्वात्, **चर** । आगमोक्तक्रियां सेवस्व । **अप्रमत्तो** गुरुवशत्वादरं प्रमादपरिहर्त्ता, **तस्माद**प्रमादा**न्मुनिः क्षिप्रं मोक्षमुपैति** ॥८॥

कोऽप्याह अन्ते एव क्रिया कार्या, तत आह—

**स पुव्वमेवं न लभिज्ज पच्छा, एसोवमा सासयवाइयाणं ।**

**विसीयइ सिढिले आउयंमि, कालोवणीए सरीरस्स भेए ॥९॥**

**व्याख्या**—यः प्रागप्रमत्तो न स्यात्, **एवं**शब्दस्य इवार्थत्वात् स **पूर्वमिव** पूर्वकालमिव **न लभेत** इच्छाजयेन छन्दो निरोधं **पश्चाद**न्त्यकाले, **एषोपमा** इयं सम्प्रधारणा, यदुत पश्चाद्धर्मं करिष्याम इति **शाश्वतवादिनां** निरुपक्रमायुष्कतया शाश्वतमिवात्मानं मन्यमानानां युज्येतापि, न तु बुद्बुदायुषां, तथा चोत्तरकालमपि छन्दो निरोधमप्राप्नुवन् **विषीदति, शिथिले** आत्मप्रदेशान्मुञ्च**त्यायुषि,** मनुष्यायुःकर्मणि **कालेन** मृत्युना स्वस्थितिक्षयसमयेनै**वोपनीते** उपढौकिते **शरीरस्य भेदे** पृथक्त्वे । अत आदितोऽपि न प्रमाद्यम् ॥९॥

प्रागिव पश्चादप्रमत्तता न स्यादित्याह—

**खिप्पं न सक्केइ विवेगमेउं, तम्हा समुट्ठाय पहाय कामे ।**

**समिच्च लोयं समया महेसी, आयाण( अप्पाण )रक्खी व चरप्पमत्तो ॥१०॥**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या–क्षिप्रं** तत्क्षणे एव **न शक्नोति** न क्षमः स्यात्, द्रव्यतो बहिः-सङ्गत्यागरूपं, भावतः कषायत्यागरूपं **विवेकमेतुं गन्तुम्**,

**अत्र ब्राह्मणीदृष्टान्तः**–यथैको द्विजोऽन्यदेशं गत्वा सर्वविद्यापारङ्गामीभूय स्वदेशमेतः, द्विजेनैकेन च स सरूपां कन्यामुद्वाहितः, स लोके वेदेष्वधीतीति भूरिदक्षिणा लेभे, जातश्च श्रीमान्, पत्नी च तेन बहुस्वर्णालङ्कृतिभिरलङ्कारि, सापि नित्यं मण्डितैवास्थात्, भर्त्रोक्तं प्रियऽस्मद्वासः प्रत्यन्तग्रामेऽस्ति, अतः पर्वादिषु भूषाः परिधीयन्ते, न सदा, स्तेनादिभयात्। सोचे जात ! यदा चौरा एष्यन्ति तदाहं शीघ्रमेव भूषा उत्तारयिष्ये। अथान्यदा स्तेना आयाता नित्यमण्डितताया गृहं च प्रविष्टाः, सा तैः सालङ्कारा गृहीता। प्रणीताहारत्वान्मांसलाङ्गा उत्तारणाऽनभ्यासाच्च सा भूषा उत्तारयितुं नाऽशकत्। तदा चौरास्तद्धस्तादि छित्वाऽलङ्कारांश्चादाय स्वस्थानेऽगुः।

एवमन्योऽपि प्रागकृतपरिकर्मो न तत्काल एव विवेकमेतुं शक्नोति, यत एवं तस्मात् समुत्थाय सम्यक् प्रवृत्त्योत्थाय, पश्चात् छन्दं निरोत्स्याम इत्यालस्यत्यागेनोद्यमं कृत्वा, **प्रहाय** त्यक्त्वा **कामान्**, **समेत्य** सम्यग् ज्ञात्वा, **लोकं** प्राणिवर्गं, **समतया** समशत्रुमित्रतया **महर्षिः** सन्, मह एकान्तोत्सवरूपत्वान्मोक्षस्तमिच्छतीत्येवंशीलो **महैषी** वा, स निर्निदानः सन्नात्मानं रक्षत्यपायेभ्यो दुर्गत्यादिभ्य इत्येवंशील **आत्मानुरक्षी**, यद्वाऽऽदीयते स्वीक्रियते आत्महितमनेनेत्यादानः संयमस्तद्रक्षी **आदानरक्षी**, एवंविधस्त्वं हे साधो अप्रमत्तश्चर। **इह प्रमादत्यागाऽत्यागयोरैहिकदृष्टान्तः** –

कापि वणिक्स्त्री प्रस्थितपतिका केवलं स्वदेहभूषापरा कर्मकरान्निजनिकर्मसु न नियुक्ते, न तेषामशनादिसारां कुरुते, सर्वे कर्मकरा नष्टास्तदभावाच्च धनहानिर्जाता। समेतेन वणिजा गृहमजनं दृष्ट्वा विज्ञाय च तत्कारणं सा गृहान्निष्कासिता। अन्या निःस्वकन्या धनैर्वृता, तत्स्वजनाश्च तेनोक्ता यद्येषा स्वं रक्षति तदा तामुद्वहे, तद् ज्ञात्वा सा प्रज्ञोचे रक्षिष्यामि स्वं। तेनोढा, ततः सोऽगाद्वाणिज्ये, अथ सा सदा कर्मकरादीनां प्रातरशनं दत्वा पूर्वाह्णकाले भोजनं दत्ते, स्निग्धवाचा च जल्पन्ती सन्ध्याया अर्वागेव तेषां ग्रासं दत्ते, मासिकद्रव्यमपि पूर्णावधौ तेभ्यो नियमितं ददाति, न केवलं स्वशुश्रूषापरैवाभूत्। इतो भर्त्तेतस्तां योग्यां च दृष्ट्वा सर्वस्वस्वामिनीं चकार। एवमिहैव गुणायाऽप्रमादो दोषाय प्रमादश्च, आस्तामन्यजन्मनि ॥१०॥

प्रमादमूलं रागद्वेषाविति सोपायं तत्त्यागमाह–

**मुहुं मुहुं मोहगुणे जयंतं, अणेगरूवा समणं चरंतं।**
**फासा फुसंती असमंजसं च, न तेसि भिक्खू मणसा पउस्से ॥११॥**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**मंदा य फासा बहुलोहणिज्जा, तहप्पगारेसु मणं न कुज्जा ।**
**रक्खिज्ज कोहं विणइज्ज माणं, मायं न सेवेज्ज चइज्ज( पयहिज्ज ) लोहं॥१२॥**

**व्याख्या**—मुहुर्वारंवारं **मोहगुणान्** मोहहेतून् शब्दादीन् **जयन्तं** श्रमणं, स्पर्शाः शब्दरूपादयः स्पृशन्ति गृह्यमाणतया मिलन्ति, अनेकविधं कार्कश्यकुरूपादिभेदं रूपं स्वरूमेषामित्य**नेकरूपाः** । **चरन्तं** संयमाध्वनि, **असमंजसं वा,** वा एवार्थे, अननुकूलमेव यथा स्यात्तथा, न तेषु स्पर्शेषु भिक्षुः, अपेर्लोपात् **मनसापि,** आस्तां वाचा कायेन वा, न **प्रदुष्येत् प्रद्विष्याद्वा,** खरसंस्तारकतृणस्पर्शादौ हन्तोच्चाटितोऽनेनेति न ध्यायेत् ॥११॥

**व्याख्या**—तथा मन्दयन्ति विवेकिनमप्यज्ञतां नयन्तीति **मन्दाः, चः** समुच्चये, **स्पर्शाः** शब्दाद्याः, बहून् लोभयन्तीति **बहुलोभनीयाः,** यद्वा बहूनां लोभने हिता **बहुलोभनीयाः,** अपेर्लोपात् **तथाप्रकारेष्वपि** बहुलोभनीयेष्वपि मृदुस्पर्शमधुररसादिषु मनो न कुर्यात्, मनसोऽप्यकरणे प्रवृत्तिस्तु दुरापास्तेव । अथवा मन्दबुद्धित्वामन्दगतित्वान्मन्दाः स्त्रियस्ता एव स्पर्शप्रधानत्वात्स्पर्शाः, **मन्दाश्च स्पर्शा बहूनां** कामिनां **लोभनीया** भवन्ति, तासु, लिङ्गव्यत्यया**त्तथाप्रकारासु** मोहिनीषु मनोऽपि न कुर्यात् । स्त्रीणामेव बह्वपायहेतुत्वादित्थमुक्तं । **रक्षेत् क्रोधं, विनयेदपनयेन्मानं** गर्वं, **मायां** परवञ्चनं **न सेवेत, त्यजेल्लोभं** सङ्गम् ॥१२॥

एवं चारित्रशुद्धिरुक्ता, सा सम्यक्त्वशुद्धौ स्यादत आह—

**जे संखया तुच्छपरप्पवाई, ते पिज्जदोसाणुगया परज्झा ।**
**एए अहम्मु त्ति दुगंछमाणो, कंखे गुणे जाव सरीरभेओ ॥१३॥ त्ति बेमि**

**व्याख्या—ये संस्कृता** इति कृत्रिमशुद्धिमन्तो, न तु तत्त्वज्ञाः, यद्वा संस्कृतागमभाषका **बौद्धाद्याः** क्षणिकत्वनित्यत्वादिवादिनः, **तुच्छा** यदृच्छाभिधायितया निस्साराः, उक्तं च—

**उक्तानि प्रतिषिद्धानि, पुनः संभावितानि च ।**
**सापेक्षनिरपेक्षाणि, ऋषिवाक्यान्यनेकशः ॥१॥ [ ]**

**परप्रवादिनः** परतीर्थिकाः, **ते प्रेमद्वेषाभ्यां** रागद्वेषाभ्या**मनुगताः,** अत एव 'परज्झ'त्ति देश्युक्त्या **परवशा** रागादिग्रस्तत्वात् । **एते**ऽर्हन्मतबाह्याः, अधर्महेतुत्वाद**धर्मा इति जुगुप्समानः,** उन्मार्गेऽमीति निश्चिन्वन्न तु निन्दन्, निन्दायाः सर्वत्र निषेधात्, **काङ्क्षेद**भिलषद् **गुणान्** ज्ञानादीन्, **यावत् शरीराद्भेदो** मृतिर्मुक्तिर्वा स्यादिति, समाप्तौ, **ब्रवीमि** गणधराद्युक्त्या ॥१३॥

**इति प्रमादाऽप्रमादाख्यं तुर्याध्ययनमुक्तम् ॥४॥**

• • •

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

# पञ्चममकाममरणीयाध्ययनम् ॥

तत्रात्मा काङ्क्षेत गुणान्, यावच्छरीरस्य भेद इति वदता मर्त्तव्यमप्रमत्ततयेत्युक्तं । तच्च मरणयुक्तिज्ञानात् स्यादिति पञ्चमं **मरणा**ध्ययनमाह—

तत्र **द्रव्यमरण**मजीवानां विनाशः, **भावमरण**मायुःक्षयः, तत् त्रिधा, **ओघमरणं** सामान्यतः सर्वप्राणिनां प्राणत्यागात्मकं स्यात्, **भवमरणं** यन्नारकादेर्नरकादिभवविषयितया विवक्षितं, **तद्भवमरणं** यस्मिन्नेव मनुष्यभवादौ मृतः पुनस्तस्मिन्नेवोत्पद्य यन्म्रियते इति । इह मनुष्यभावभाविना भवमरणान्तर्वर्त्तिना मनुष्यभविकमरणेनाधिकारः । सम्प्रति मरणभेदाः प्रदर्श्यन्ते । यथा—

**आवीइ १ ओहि २ अंतिय ३, वलायमरणं ४ वसट्टमरणं ५ च ।**
**अंतोसल्लं ६ तब्भव ७, बालं ८ तह पंडियं ९ मीसं १० ॥१॥** [ प्र.सा.गा.१००६ ]

**छउमत्थमरण ११ केवलि १२, वेहायस १३ गिद्धपिट्ठमरणं १४ च ।**
**भत्तपरिण्णा १५ इङ्गिणि १६, पाउवगमणं १७ च सत्तरसं ॥२॥** [ प्र.सा.गा.१००७ ]

**व्याख्या—आवीचिमरणं** १ **अवधिमरणं** २ 'अंतिय'त्ति आर्षत्वा**दत्यन्तमरणं** ३ 'वलायमरणं'ति **वलान्मरणं** ४ **वशार्त्तमरणं** ५ **अन्तःशल्यमरणं** ६ **तद्भवमरणं** ७ **बालमरणं** ८ तथा **पण्डितमरणं** ९ **मिश्रमरणं** १० **छद्मस्थमरणं** ११ **केविलमरणं** १२ **वैहायसमरणं** १३ **गृद्ध्रस्पृष्टमरणं** १४ **भक्तपरिज्ञामरणं** १५ **इङ्गिनीमरणं** १६ **पादपोपगमनमरणं** १७ चेति सप्तदशमरणानि ॥

तत्राद्यं प्राकृतत्वादासमन्ताद्वीचय इव वीचयः प्रतिसमयमनुभूयमानायुषोऽपरायुर्दलिकोदयपूर्वायुर्दलिकच्युतिश्रेण्यो यस्मिंस्तदावीचि, तच्च तन्मरणं च **आवीचिमरणं,** तत्पञ्चधा, **द्रव्यावीचिमरणं** १ **क्षेत्रावीचिमरणं** २ **कालावीचिमरणं** ३ **भवावीचिमरणं** ४ **भावावीचिमरणं** ५ चेति । तत्र **द्रव्यावीचिमरणं** नाम यन्नरकतिर्यग्नरामराणामुत्पत्तिमसमयात् प्रभृति स्वस्यायुः कर्मदलिकानामनुसमयमनुभवनाद्विचटनं, तच्च नारकादिभेदाच्चतुर्धैव तद्विषयं क्षेत्रमपि चतुर्धैव,

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तत्प्राधान्यापेक्षया **क्षेत्रावीचिमरण**मपि चतुर्धा । कालो यथायुष्कालो गृह्यते, तत्वद्धाकाल:, तस्य देवादिष्वभावात् , स च देवायुष्ककालादिभेदाच्चतुर्धा, तत्प्राधान्यापेक्षया **कालावीचिमरण**मपि चतुर्धा, नरकादिचतुर्विधभावापेक्षया **भवावीचिमरण**मपि चतुर्धा, नारकाद्यायुः-क्षयलक्षणभावं प्राधान्येनापेक्ष्य **भावावीचिमरण**मपि चतुर्धा वाच्यं ।

तथा **अवधि**र्मर्यादा, ततश्च यानि नरकादिभवनिबन्धनतयायु:कर्मदलिकान्यनुभूय सम्प्रति म्रियते, यदि पुनस्तान्येवानुभूय मरिष्यति तदा तद् द्रव्यावधिमरणं । आवीचि-मरणवद् द्रव्यादिभेदैः पञ्चधा । सम्भवति हि गृहीतोज्झितानामपि कर्मदलिकानां पुनर्ग्रहणं, परिणामवैचित्र्यादेवं क्षेत्रादिष्वपि भाव्यम् ॥२॥

अवधिमरणवदा**त्यन्तिकमरण**मपि द्रव्यादिभेदतः पञ्चधा, विशेषस्त्वयं-यानि नरकाद्यायुष्कतया कर्मदलिकान्यनुभूय म्रियते, मृतो वा न पुनस्तान्यनुभूय मरिष्यति, एवं क्षेत्रादिष्वपि वाच्यम् ॥३॥

त्रीण्यमून्यावीचिअवध्यात्यन्तिकमरणानि प्रत्येकं पञ्चानां द्रव्यादीनां नरकादिगति-भेदेन चतुर्विधत्वाद्विंशतिभेदानि स्युः ॥

**वलवन्मरणं** तु संयमखिन्ना दुश्चरतपः कर्त्तुमक्षमाः, व्रतं मोक्तुं चाऽनिच्छवः, कथं वयमस्मात् कष्टाच्छुटाम इति ध्यात्वा ये म्रियन्ते, तद्वलतां संयमान्निवर्त्तमानानां मरणं वलवन्मरणम् ॥४॥

**वशार्त्तं** तु इन्द्रियविषयवशगतानां भयादिवशगतानां वा स्निग्धदीपकलिका-ऽवलोकाकुलितपतङ्गवन्मरणम् ॥५॥

**अन्तःशल्यमरणं,** लज्जेन्द्रियसुखमदादिना गुर्वग्रे दोषाऽकथनेन,

> **एयं ससल्लमरणं, मरिऊण महब्भए दुरंतंमि ।**
> **सुचिरं भमंति जीवा, दीहे संसारकान्तारे ॥१॥** [ उ.नि./गा.२२० ] ॥६॥

तद्भवमरणं मुक्त्वा असङ्ख्यायुर्नृतिर्यग्देवनैरयिकान् असङ्ख्यायुषां तद्भवमरणं, तेषां केषामपि नृतिर्यक्ष्वुत्पत्तेः, तद्धि यस्मिन् भवे वर्त्तते जन्तुस्तद्भवयोग्यमेवायुर्बद्ध्वा पुनस्तत्क्षयेण म्रियमाणस्य स्यात् ॥७॥

बालपण्डितमिश्रमरणानि तु यथा—मृतिसमयेऽपि देशविरतिमप्यप्रतिपद्यमानानां मिथ्यादृशां सम्यग्दृशां वा मरणं विषविषकन्यादिभिर्वाऽविरतार्त्तस्य मरणं **बालमरणम्** ॥८॥

विरतानां सर्वसावद्यनिवृत्तिमभ्युपगतानां मरणं **पण्डितमरणम्** ॥९॥

बालपण्डितमरणं **मिश्रमरणं,** देशविरतानाम् ॥१०॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

छद्मस्थमरणकेवलिमरणे तु मनःपर्यायज्ञानिनोऽवधिज्ञानिनश्च श्रुतज्ञानिनो मतिज्ञानिनश्च म्रियन्ते ये श्रमणाश्छद्मस्थास्तेषां मरणं **छद्मस्थमरणम्** ॥११॥

केवलिन उत्पन्नकेवलाः सर्वकर्माणुक्षये म्रियन्ते तत् **केवलिमरणं** ॥१२॥

ऊद्ध्वं द्रुशाखादौ स्वमुद्बद्ध्य, ऊद्ध्वं गिरिशृङ्गादेर्वा, भृगुपातात् कूपपाताद्वा शस्त्रादिना स्वयं म्रियमाणस्य विहायसि भवत्वा**द्वैहायसमरणम्** ॥१३॥

गृध्रशकुनिकाशिवाऽद्यादिभिर्भक्षणं, गम्यत्वात् स्वस्य तदवारणादिना, तद्भक्ष्यकरिकरभादिशरीरानुप्रवेशेन च गृद्ध्रादिभिर्भक्षणं यस्मिंस्तद् **भृंगृद्ध्रस्पृष्टम्** ॥१४॥

अन्त्यत्रयं तु भक्तं भोजनं, तस्य परिज्ञा, ज्ञपरिज्ञया नैकभेदमस्माभिर्मुक्तपूर्वमेतद्धेतुकं चाऽवद्यमिति परिज्ञानं, प्रत्याख्यानपरिज्ञया च त्यागः,

**सव्वं [ च ] असणपाणं, चउव्विहं जा य बाहिरा उवही ।**
**अब्भितरं च उवहिं, जावज्जीवं च वोसिरे ॥१॥** [ म.प./गा.२३४ ]

इत्यागमवचनाच्चतुर्विधाहारस्य त्रिविधाहारस्य वा यावज्जीवं प्रत्याख्यानं **भक्तपरिज्ञामरणम्** ॥१५॥

इङ्ग्यते प्रतिनियतप्रदेश एव वेद्यतेऽस्यामनशनादिक्रियायामितीङ्गिनी, तया च मरण**मिङ्गिनीमरणम्** ॥१६॥

पादपो वृक्षः, उपशब्दश्च सादृश्ये, ततश्च पादपमुपगच्छति सादृश्येन प्राप्नोतीति **पादपोपगमनं,** कोऽर्थो ? यथा पादपः पतितः सममसममित्यचिन्तयन्निश्चलमास्ते, परप्रयोगात्तु कम्पते, तथाऽयमपि भगवान् यथा समविषमदेशेष्वङ्गमुपाङ्गं वा प्रथमतः पतितं न चालयति ॥१७॥

एतत्पादपोपगमं मरणं सर्वोत्कृष्टं, अर्हदाद्यैरुत्तमैराचरितं एतत्त्रयं क्रमेण कनिष्ठमध्यमज्येष्ठसञ्ज्ञयोच्यते, विशिष्टविशिष्टतरविशिष्टतमधृतिमतामेव तत्प्राप्तिरिति कनिष्ठत्वादिस्तद्विशेष उक्तः, फलं वैमानिकतामुक्तिलक्षणं त्रयस्यापि ।

**एयं पच्चक्खाणं, अणुपालेऊण सुविहिओ सम्मं ।**
**वेमाणिओ व देवो, हविज्ज अहवा वि सिज्झिज्जा ॥१॥** [ म.प./गा.३२२ ]

अवधिमरणादीनि षोडश मरणानि सादीनि सपर्यवसितानि स्युः, एकसामायिकतायास्तेषामुक्तत्वात् । प्रवाहापेक्षया तु शेषभङ्गत्रयेऽपि सन्ति । आद्यं त्वनादि स्यात्, प्रतिनियतायुःपुद्लापेक्षया तु साद्यपि स्यात् । अपर्यवसितं अभव्यानां, भव्यानां तु सपर्यवसितम् ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**धीरेण वि मरियव्वं, काउरिसेण वि अवस्स मरियव्वं ।**
**तम्हा अवस्समरणे, वरं खु धीरत्तणे मरिओ ॥१॥** [ म.प./गा.३२१ ]
**संसाररंगमज्झे, धीबलसन्नद्धबद्धकच्छाओ ।**
**हंतूण मोहमल्लं, हरामि आराहणपडागं ॥२॥** [ म.प./गा.३१० ]

तथाहि भक्तपरिज्ञामरणमार्यिकादीनामुक्तमस्ति, यतः-

**सव्वावि य अज्जाओ, सव्वे वि य पढमसंघयणवज्जा ।**
**सव्वेवि देसविरया, पच्चक्खाणेण उ मरेंति ॥१॥** [ म.प./गा.५४१ ]

अत्र प्रत्याख्यानं भक्तपरिज्ञा, तत्रेङ्गिनी द्वितीयादिसंहननेऽपि पुंसां स्यात्, पादपोपगमं त्वाद्यसंहनने एव ।

**पढमंमि य संघयणे, वट्टंते सेलकुड्डसामाणे ।**
**तेसिं पि य वोच्छेओ, चउदसपुव्वीण वोच्छेए ॥१॥** [ म.प./गा.५३३ ]

पादपोपगमे देव उत्पाट्य क्वापि विषमे स्थाने क्षिपेत्, परं चरमदेहः पीडां नाप्नुते । देवलोके कोऽपि संहरेत् तत्रानुकूलविषयेष्वपि स न क्षुभ्यति, इति महासामर्थ्यं, सर्वार्हतामेतदेव मरणं स्यात् । तथा-

**भावियजिणवयणाणं, ममत्तरहियाण नत्थि हु विसेसा ।**
**अप्पाणंमि परंमि य, तो वज्जे पीडमुभये वि ॥१॥** [ पञ्च.व./गा.५३९ ]

इत्यागमः, तेन गृद्ध्रस्पृष्ट-वैहायसमरणे आत्मपीडाकारकारणे एवानुज्ञाते स्वधर्मबाधायां, **उदायिनृपा**नुमृतगुरुवत्, नान्यथा । एवं मरणानि ज्ञात्वा पण्डितमरणेन मर्यं, आदावत्राऽकाममृतेरुक्तत्वाद**काममरणं** नामास्याध्ययनस्य । यथा-

**अण्णवंसि महोहंसि, एगे तिन्ने दुरुत्तरं ।**
**तत्थ एगे महापण्णे, इमं पन्हमुदाहरे ॥१॥**

**व्याख्या**-अर्णवे भावतः समुद्रे संसारे, महानोघो भावतो भवपरम्परा यस्मिन्, सुब्व्यत्ययात्, **अर्णवान्महौघात्**, दुःखेन तरीतुं शक्याद् **दुरुत्तरात्**, **एको** रागाद्यसहायो **गौतमा**दिर्यद्वा एको जिनमतप्रतिपन्नो, न तु **चरकादि**मताक्षिप्तस्तीर्ण इव **तीर्णः**, आसन्नसिद्धित्वेनाभूत्, **तत्र** सदेवमनुजायां पर्षदि **गौतमा**दौ तरणप्रवृते **एक**स्तीर्थकरः, तत्कालेऽत्रैकस्यैव तीर्थकृतो भावात्, महती प्रज्ञा केवलात्मिका संविद्यस्य स **महाप्राज्ञः**, **इमं** संसारतरणोपायं **प्रश्नमु**पदेशं भव्यजनप्रष्टव्यरूप**मुदाहृतवान्** । श्री**वीरो गौतमा**दिभ्य आख्यातवानिति भावः ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

यथा—

**संतिमेए दुवे ठाणे, अक्खाया मारणंतिया ।**
**अकाममरणं चेव, सकाममरणं तहा ॥२॥**

**व्याख्या**—'संति' इति प्राकृतत्वात् **स्तो** विद्येते, **एते मः** अलाक्षणिकः, **द्वे**, तिष्ठन्त्यनयोर्जन्तव इति **स्थाने, आख्याते** पूर्वार्हद्भिः, मरणमेवान्तो निजनिजायुः पर्यन्तस्तस्मिन् भवे **मारणान्तिके**, एकं **अकाममरणं, चः** समुच्चये, **एव** पूरणे, तथा द्वितीयं **सकाममरणम्** ॥२॥

केषामिदं कियद्वारमित्याह—

**बालाणं अकामं तु, मरणं असयं भवे ।**
**पंडियाणं सकामं तु, उक्कोसेण सयं भवे ॥३॥**

**व्याख्या**—बाला इव **बालाः** सदसद्विवेकमूर्खाः, **तेषां तु**शब्दस्यैवकारार्थत्वात्, **मरणमकाममेवाऽसकृद्वा**रंवारं **भवेत्**, ते हि विषयरागतो मरणनिच्छन्त एव म्रियन्ते तेन च भवेऽटन्ति, **पण्डितानां** चारित्रवतां, सह कामेनाऽभिलाषेण वर्त्तते इति **सकामं**, अनिषिद्धमनुमतमिति युक्तितो मरणं प्रत्यऽत्रस्ततयाऽऽराधनोत्सवभूतत्वाच्च, तस्य तादृशं, **तु**र्विशेषे, **उत्कर्षेण** केवलिनां **सकृदे**कवारमेव **भवेत्**, जघन्येन तु शेषचारित्रिणः सप्ताष्टवारान् भवेत् ॥३॥

आद्यं स्थानमाह—

**तत्थिमं पढमं ठाणं, महावीरेण देसियं ।**
**कामगिद्धे जहा बाले, भिसं कूराइं कुव्वइ ॥४॥**

**व्याख्या**—**तत्रा**ऽकामसकाममरणयोर्मध्ये **प्रथमं स्थानं** अकाममरणरूपं **महावीरेण देशितं** प्ररूपितं, आद्यगाथायां 'तत्थ एगे महापन्ने' इति मुकुलितोक्तावपि व्यक्त्यर्थमेतत्, कामेषु इच्छामदनात्मकेषु गृद्धोऽभिकाङ्क्षन् **कामगृद्धः, यथा बालो** मूर्खो **भृशं क्रूराणि** हिंसादिकर्माणि **करोति** अशक्तावपि मनसापि कृत्वाऽकाम एव म्रियते, **तण्डुलमत्स्य**वत् ॥४॥

एतदेव स्पष्टयति—

**जे गिद्धे कामभोगेसु, एगे कूडाय गच्छइ ।**
**न मे दिट्ठे परे लोए, चक्खुदिट्ठा इमा रइ ॥५॥**

**व्याख्या**—**यः** कश्चित्, काम्यते इति **कामः** शब्दो रूपं च, भुज्यन्ते इति **भोगाः**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

स्पर्शो रसो गन्धश्च, एष कामभोगयोर्भेदः, **तेषु गृद्धः**, यद्वा **कामेषु** स्त्रीसङ्गेषु, **भोगेषु** धूपनविलेपनादिषु, **एकस्**तन्मध्यात्कश्चित् क्रूरकर्मा कूटमिव **कूटं**, प्राणिनां यातनाहेतुत्वान्नरको मृगया वा, यद्वा द्रव्यतः कूटं मृगादिबन्धनं, भावतस्तु मृषाभाषादि, तस्मै **गच्छति** प्रवर्त्तते, स हि मांसादिलोलुपतया द्रव्यभावकूटानि सेवते । प्रेरितश्च कैश्चिद्वक्ति, **न मया दृष्टः परलोको** भूतभाविजन्मात्मकः, **चक्षुर्दृष्टा** प्रत्यक्षा **इयं रतिः** कामसेवोत्था चित्तप्रसन्नता वर्त्तते ॥५॥

तदाशयं व्यञ्जयितुमाह—

**हत्थागया इमे कामा, कालिया जे अणागया ।**
**को जाणइ परे लोए, अत्थि वा नत्थि वा पुणो ॥६॥**

**व्याख्या—हस्तगता** इव स्वाधीनतया **इमे** प्रत्यक्षोपलभ्याः **कामाः** शब्दादयः सन्ति, तथा काले सम्भवन्तीति **कालिकाः** अनिश्चितकालान्तरप्राप्तयो **येऽनागता** भाविजन्मसम्बन्धिनः सन्ति, यतः **कः पुनर्जानाति** ? नैव कश्चित्, यत्**परलोकोऽस्ति वा नास्ति वेति**। परलोकस्य सुकृतादिकर्मणां चास्तित्वनिश्चयेऽपि को हस्तागतान् कामांस्त्यक्त्वा कालिककामार्थं यतते ? ॥६॥

कोऽपि जानन्नपि कामांस्त्यक्तुमक्षम इत्याह—

**जणेण सद्धं होक्खामि, इइ बाले पगब्भइ ।**
**कामभोगाणुरागेणं, केसं संपडिवज्जइ ॥७॥**

**व्याख्या—जनेन** लोकेन **सार्द्धं भविष्यामि**, बहुर्जनो भोगासङ्गी तदहमपि तद्गतिं यास्यामि, यद्वा 'होक्खामि' **भोक्ष्यामि** पालयिष्यामीति । यथा स्वयं जनः कलत्रादिकं पालयति, तथाहमपि, न हि इयान् जनसमूहोऽज्ञ इति । **बालोऽज्ञ इति प्रगल्भते** धाष्टर्यमवलम्बते, अलीकवाचालतया स्वयं नष्टः परान्नाशयति । **कामभोगानां** पूर्वोक्तानामनु**रागेण क्लेशं** इह परत्र च बाधां **सम्प्रतिपद्यते** प्राप्नोति ॥७॥

क्लेशाप्तेर्युक्तिमाह—

**तओ से दंडं समारभइ, तसेसु थावरेसु य ।**
**अट्ठाए य अणट्ठाए भूयगामं विहिंसई ॥८॥**

**व्याख्या—ततः** कामभोगानुरागात् **स** धाष्टर्यवान् **दण्डं** मनोदण्डादिकं **समारभते**, केषु ? **त्रसेषु स्थावरेषु च** जीवेषु, **अर्थाय** वित्ताप्त्यादिकार्याय, **च**स्य भिन्नस्थान-

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सम्बन्धात्, **अनर्थाय** चेति । यस्यात्मनः सुहृदादेर्वा न कार्यं, तस्मै निरर्थकमेव दण्डमारभते, **पशुपालवत्**—यथैकोऽजापालो मध्याह्नेऽजासु वने तटच्छायायां सुप्तासु स्वयं वंशदलेनाऽजाभक्षितकोलास्थिभिर्वटपत्राणि छेदयन् प्रायः सर्वमपि वटमच्छिद्रयत् । तदैकोऽरिहृतराज्यः क्षत्रियस्तं वटं तथा दृष्ट्वा, गोपं च पृष्ट्वा, तत्तत्कृतं च ज्ञात्वा तस्मै धनं दत्वाऽवक् मम शत्रोरक्षिणी पातय ? तेनापि तत् प्रतिपन्नं । तेन स पुरे नीत्वा राजाध्वासन्नगृहेऽस्थापि । इतस्तस्यारिर्नृपस्तन्मार्गेण निर्गतः, क्षत्रियकथनतश्च स तस्याक्षिणी पातयामास । पश्चात् स क्षत्रियो राजा जातो गोपमूचे वरं ब्रूहि ! तेनोक्तं मम तमेव ग्रामं देहि ! तेनापि तस्मै स दत्तः, तेन तत्रेक्षुतुम्ब्यो रोपिताः, निष्पत्तौ च स गुडेन सह तुम्बानि भक्षयन् जगौ—

**अट्टमट्टं पि सिक्खिज्जा, सिक्खियं न हु निप्फलं ।**
**अट्टमट्टपसाएण, खज्जए गुडतुंबयं ॥१॥** [ उ.५/८ बृ.वृ. ]

एवं तेनाऽनर्थाय वटः, अर्थाय च नृपदृष्टी छिद्रिते । एवं दण्डमारभते, नत्वारम्भमात्र एव, किन्तु **भूतग्रामं** प्राणिवृन्दं **विहिनस्ति** हन्ति । एवं पञ्चगाथाभिदण्डत्रयव्यापार उक्तः ॥८॥

**हिंसे बाले मुसावाइ, माइल्ले पिसुणे सढे ।**
**भुंजमाणे सुरं मंसं, सेयमेयं ति मण्णइ ॥९॥**

**व्याख्या**—हिंसनशीलो **हिंस्रो**, **बालो**ऽज्ञो, **मृषावादी**, **मायी**, **पिशुनः** परदोषोद्घट्टकः, **शठो** वेषविपर्यासादात्मानमन्यथा दर्शयति, **मण्डिकचौर**वत् । अत एव च **भुञ्जानः सुरां** मद्यं, **मांसं** च, **श्रेयः** प्रशस्ततर**मेतदिति** च **मन्यते** । भाषते च—"**न मांसभक्षणे दोषो । न मद्ये न च मैथुने**" ॥ [ द्वा.द्वा.७।९ ] इति ॥९॥

तथा—

**कायसा वयसा मत्ते, वित्ते गिद्धे य इत्थिसु ।**
**दुहओ मलं संचिणइ, सिसुणागो व्व मट्टियं ॥१०॥**

**व्याख्या—कायेन मत्तो** मदवान् गन्धगजवत् यतस्ततः प्रवृत्तिमान्, यद्वाऽहोऽहं बलवान् रूपवान् वेति चिन्तयन्, **वचसा मत्तः** स्वगुणान् ख्यापयन्, अहं सुस्वर इति गायन् वा, उपलक्षणत्वान्मनसा मत्तो मदाध्मातोऽहमवधारणशक्तिमानिति । **वित्ते स्त्रीषु च गृद्धः**, वित्ते गृद्ध इत्यदत्तादानी परिग्रही च, स्त्रीगृद्ध इति मैथुनासक्तः, इह विश्वे स्त्रियः सारमित्यूचानः, 'दुहओ'त्ति **द्विधाभ्यां** रागद्वेषाभ्यां, **मल**मष्टप्रकारकर्म **सञ्चिनोति** बध्नाति, क इव ? **शिशुनाग** इव अलस इव, यथाऽलसो **मृत्तिकां** चिनोति, स हि स्निग्धतनुर्बही रेणु-

Jain Education International 2010_02　For Private & Personal Use Only　www.jainelibrary.org

गुण्ठितोऽन्तश्च तामेव मृत्तिकामत्ति, ततोऽर्ककरैः शुष्यन् क्लिश्यति विनश्यति च, तथा-यमप्युग्रकर्मा दुर्गतौ गच्छति ॥१०॥

यथा—

**तओ पुट्ठो आयंकेण, गिलाणो परितप्पइ ।**
**पभीओ परलोयस्स, कम्माणुप्पेहि अप्पणो ॥११॥**

**व्याख्या—तकस्ततो** वाऽष्टकर्ममलतः **स्पृष्टः, आतङ्केन** आशुघातिशूलविसूचिकादि-रोगेण, तत्तद्दुःखोदयात्मकेन वा **ग्लान** इव **परी**ति सर्वप्रकारं **तप्यते** खिद्यते, प्रकर्षेण **भीतः**, कस्मात् ? सुब्व्यत्ययात् **परलोकात्**, कीदृक् सन् ? कर्माणि अनुप्रेक्षते इत्येवंशीलः **कर्मानुप्रेक्षी, आत्मनः**, कोऽर्थः ? स हि हिंसाऽलीकभाषणादिकामात्मचेष्टां चिन्तयन् न किञ्चिन्मया शुभं कृतं, किन्तु सदैवाजरामरवच्चेष्टितं, इति विषयाकुलचेतसोऽपि प्रायः प्राणत्यागसमयेऽनुतापः स्यात् ॥११॥

कथं—

**सुया मे नरए ठाणा, असीलाणं च जा गइ ।**
**बालाणं कूरकम्माणं, पगाढा जत्थ वेयणा ॥१२॥**

**व्याख्या—श्रुतानि** 'मे' **मया नरके स्थानानि** सीमन्तकाऽप्रतिष्ठानादीनि, कुम्भी-वैतरण्यादीनि वा, अथवा **स्थानानि** सागरोपमादिस्थित्यात्मकानि, **अशीलानाम**सदाचाराणां **या गति**र्नरकात्मिका सा श्रुता, कीदृशानां ? **बालानाम**ज्ञानां **क्रूरकर्मणां, यत्र** गतौ **प्रगाढा वेदनाः** शीतोष्णशाल्मल्याश्लेषणाद्याः सन्ति, अतो ममाप्येवंविधस्यानुष्ठानस्ये-दृश्येव गतिरिति ॥१२॥

तथा—

**तत्थोववाइयं ठाणं, जहा मेयमणुस्सुयं ।**
**अहाकम्मेहिं गच्छंतो, सो पच्छा परितप्पइ ॥१३॥**

**व्याख्या—तत्रे**ति नरकेषु, उपपाते भव**मौपपातिकं स्थानं** यथा स्यात्, 'मे' **मया तदनुश्रुतमव**धारितं गुरुभिरुच्यमानं, अयं भावः—औपपातिकत्वान्नारकाणामन्तर्मुहूर्त्तादेव छेदनादिवेदनाः स्युस्ततो गर्भजत्वं वरं, यतस्तत्र छेदादि कालान्तरे स्यादिति । तत 'अहा' **यथाकृतकर्मभिर्गच्छन्** नरकादिकं तदनुरूपं स्थानं, **स** बालः **पश्चादा**युषि हीयमाने परितप्यते, धिग्मां पापकारिणं, किमिदानीमपुण्यः करोमीत्यादि शोचते ॥१३॥

Jain Education International 2010_02          For Private & Personal Use Only          www.jainelibrary.org

अमुमेवार्थं दृष्टान्तेनाह—

**जहा सागडिओ जाणं, समं हिच्चा महापहं ।**
**विसमं मग्गमोतिण्णो, अक्खे भग्गंमि सोयइ ॥१४॥**

**व्याख्या—यथा शाकटिको** 'जाणं'त्ति **जानन् समम्**उपलादिरहितं **महापथं त्यक्त्वा** विषमं उपलादिसङ्कुलं **मार्गमवतीर्णः**, गन्तमुपक्रान्तः (पाठान्तरे-'उगाढो'त्ति **अवगाढः** प्रविष्ट इत्यर्थः) **अक्षे** धुरि **भग्ने शोचते**, धिग्मां यज्जानन्नप्यपायमापम् ॥१४॥

अथ दृष्टान्तोपयनयः—

**एवं धम्मं विउक्कम्म, अहम्मं पडिवज्जिया ।**
**बाले मच्चुमुहं पत्ते, अक्खे भग्गो व सोयइ ॥१५॥**

**व्याख्या—एवमि**ति शाकटिकवत् **धर्मं** क्षान्त्यादिकं यतिधर्मं सदाचारात्मकं वा **व्युत्क्रम्य** विशेषेणोल्लङ्घ्य, **अधर्मं** हिंसादिकं **प्रतिपद्य बालो मृत्युमुखं** मरणगोचरं **प्राप्तः, अक्षे भग्ने** शाकटिक इव **शोचते**, इहैव भवे स्वकृतकर्मणां मारणान्तिक-वेदनात्मकं फलमनुशोचति, यथा हा ! किमेतज्जानतापि मयैवमनुष्ठितम् ! ॥१५॥

तथा च—

**तओ से मरणंतंमि, बाले संतस्सई भया ।**
**अकाममरणं मरई, धुत्ते वा कलिणा जिए ॥१६॥**

**व्याख्या—तत** आतङ्कोत्पत्तौ शोचनानन्तरं, मरणमेवान्तो **मरणान्तस्तस्मिन्**उपस्थिते, **बालो भया**न्नरकगतिभयात् **सन्त्रस्यति, अकाममरणेन म्रियते, धूर्त्त इव** द्यूतकार इव, 'वा' इवार्थे, यया धूर्तः **कलिना** एकेन प्रक्रमाद्दायेन जितः स्वं शोचते तथासावपि तुच्छ-भोगैर्हारितदिव्यसुखः शोचन् म्रियते ॥१६॥

अथ निगमयति—

**एयं अकाममरणं, बालाणं तु पवेइयं ।**
**इत्तो सकाममरणं, पंडियाणं सुणेहि मे ॥१७॥**

**व्याख्या—तुः** एवार्थे, **एतद्** दुःकृतकर्मणां परलोकाद्विभ्यतां यन्मरणमुक्तं **तद-काममरणं बालानामेव प्रवेदितं** तीर्थकृद्भिः, **इतः सकाममरणं पण्डितानां** सम्बन्धि **श्रृणुत 'मे'** वदत इति ॥१७॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तदाह—

**मरणं पि सपुण्णाणं, जहा मेतमणुस्सुयं ।**
**सुपसन्नमणक्खायं, संजयाणं वुसीमओ ॥१८॥**

**व्याख्या—मरणमपि**, ततो जीवितं च, **सपुण्यानां** 'पुण् कर्मणि शुभे' इति पुण्धातोरुणादौ पुण्यं, तद्वतां, तद्बुधमान्यं **मयाऽनुश्रुतम**वधारितं, भवद्भिरपि तत्कार्यमिति शेषः, 'सुप्पसन्नमणक्खायं'त्ति सुष्ठु प्रसन्नं मरणसमयेऽप्यकलुषं अकषायं मनो येषां ते **सुप्रसन्नमनसस्तैः ख्यातं**, यद्वा 'सुप्पसन्नेहिं अक्खायं'त्ति **सुप्रसन्नैः** पापमलापगमान्नैर्मल्यभाग्भिस्तीर्थकृद्भिराख्यातं (पाठान्तरे-'**विप्पसन्नमणाघायं**'त्ति विविधैर्भावनादिभिः प्रसन्ना अनाकुलचेतसस्तत्सम्बन्धिमरणमपि विप्रसन्नं, न विद्यते आघातो यतनयाऽन्यप्राणिनां, विधिवत्संलेखनयात्मनश्च, यस्मिन् **तदनाघातं**) **संयतानां**, समिति सम्यग्, यतानां चारित्रिणां । 'वुसीमओ'त्ति आर्षत्वा**द्वश्यवतां**, वश्य आत्मा येषां ते वश्यवन्तस्तेषाम् ॥१८॥

तथा च—

**न इमं सव्वेसु भिक्खूसु, न इमं सव्वेसु गारिसु ।**
**णाणासीला य गारत्था, विसमसीला हि भिक्खूणो ॥१९॥**

**व्याख्या—इदं** पण्डितमरणं **न सर्वेषां भिक्षूणां** परदत्तोपजीविजैनव्रतिनां, किन्तु केषाञ्चिद्भाग्यवद्भिक्षूणां, **नेदं सर्वेषामगारिणां** गृहस्थानां, चारित्रिणामेव तद्भावात् । यतो**ऽगारस्था नानाशीला** अनेकविधव्रताः, अनेकभङ्गत्वाद्देशविरतेः, सर्वविरतिरूपत्वस्य तेष्वसम्भवात्, विषममतिगहनं शीलं येषां ते **विषमशीला भिक्षवो,** न हि सर्वेऽप्यनिदानिनोऽविकलचारित्रिणो वा जैनर्षयोऽपि, तीर्थान्तरीयास्तु दूरिता एव ॥१९॥

सामान्यतो भिक्षुगृह्याद्यन्तरमाह—

**संति एगेहि भिक्खूहिं, गारत्था संजमुत्तरा ।**
**गारत्थेहि य सव्वेहिं, साहवो संजमुत्तरा ॥२०॥**

**व्याख्या—सन्ति एकेभ्यः** कुतीर्थिक**भिक्षुभ्यो** जीवास्तिक्यादिहीनेभ्योऽविरतेभ्यो**ऽगारस्था गृहिणः संयमेन** देशविरत्यात्मके**नोत्तराः, अगारस्थेभ्यश्च सर्वेभ्यो**ऽनुमतिवर्जसर्वोत्तमदेशविरतिप्राप्तेभ्योऽपि **साधवः संयमोत्तराः**, पूर्णसंयमत्वात्तेषां, अत्र **श्राद्धदृष्टान्तः**— एकः श्राद्धः साधुं पप्रच्छ श्राद्धसाधवोः किमन्तरं ? साधुरूचे मेरुसर्षपान्तरं, तत आकुलीभूय पुनः स पप्रच्छ, कुलिङ्गिश्राद्धयोः किमन्तरं ? साधुरूचे तदेव । ततः स प्रसन्नोऽभूत् ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**देसिक्कदेसविरया, समणाणं सावगा सुविहियाणं ।**
**जेसिं परपासंडा, सइमं पि कलं न अग्घंति ॥१॥ [ ]**

एतेन चारित्रभावदर्शनेन पण्डितमरणं समर्थितम् ॥२०॥

नन्वन्यतीर्थिनो लिङ्गं दधति, कथं तेभ्योऽगारस्थाः संयमोत्तराः ? इत्याह–

**चीराजिणं निगणिणं, जडी संघाडि मुंडिणं ।**
**एताइं पि न ताइंति, दुस्सीलं परियागयं ॥२१॥**

**व्याख्या**–चीराणि चीवराणि, अजिनं च मृगादिचर्म, तच्**चीराजिनं**, 'निगणिणं' **नाग्न्यं**, 'जडि'त्ति **जटित्वं**, **सङ्घाटी** वस्त्रजनितकन्थाधारित्वं, **मुण्डित्वं** च, **एतान्यपि** निजनिजप्रक्रियाव्रतवेषरूपाणि लिङ्गानि **नैव त्रायन्ते** भवाद्दुःकृतकर्मणो वा, **दुःशीलं** दुराचारं **पर्यायागतं** प्रव्रज्यापर्यायप्राप्तमपि न त्रायते । न हि कषायकलुषितचेतसो लिङ्गादिधारणं कुगतिनिवारणायालमिति ॥२१॥

गृहाद्यभावे कथं दुर्गतिरित्युच्यते–

**पिंडोलए व दुस्सीले, नरगाओ न मुच्चइ ।**
**भिक्खाए वा गिहत्थे वा, सुव्वए कम्मई दिवं ॥२२॥**

**व्याख्या**–**वा**शब्दः अपिशब्दार्थः, पिण्डमवलगति सेवते इति पिण्डावलगो यः परदत्तोपजीवी, सोऽपि **दुःशीलो नरकादेर्न मुच्यते, रङ्कवत्**–

यथा **राजगृहे** रङ्कः पुरे भिक्षामलब्ध्वाऽऽरक्षकोक्त्योद्यानिकायां जनं **वैभारगिरि**तले गतं ज्ञात्वा तत्र गतः, प्रमत्ते जने तत्राप्यलब्धभिक्षो रुष्टो जनोद्र्ध्वं शिलामोचनाशयेन गिर्यारूढः शिलां चालयन् स्खलितो रौद्रध्यायी पतच्छिलया चूर्णितो गतः सप्तमीं क्ष्मां, जनस्तु नष्टः ।

**अथ सुगतिहेतुमाह**–'**भिक्खाए**'त्ति' भिक्षामत्ति अकति वेति **भिक्षादो भिक्षाको वा** यतिः, **गृहस्थो वा सुव्रतः** शोभनव्रतः शोभनं निरतिचारतया सम्यग्भावानुगततया च व्रतं यस्य स 'दिवं' **देवलोकं क्रामति**, मुख्यतो मुक्तिहेतुत्वेऽपि व्रतपालको देवलोकं याति ॥२२॥

गृह्यपि यथा दिवं याति तथाह–

**अगारिसामाइयंगाइं, सड्ढी काएण फासए ।**
**पोसहं दुहओ पक्खं, एगराइं ण हावए ॥२३॥**

**व्याख्या**–**अगारी** गृहस्थः, सम्यक्त्वश्रुतदेशविरतिरूपं सामायिकं, तस्याङ्गानि, निःशङ्कितकालाध्ययनाणुव्रतादिरूपाणि **अगारिसामायिकाङ्गानि**, 'सड्ढी'त्ति **श्रद्धावान्**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**कायेन** मनसा वाचा च **स्पृशति** सेवते समाचरति निःशङ्कितकालपाठाद्यमित्यर्थः, **पोषधं** आहारपोषधादिस्तं **द्वयोर**पि सितसितेतरपक्षयोश्चतुर्दशीपौर्णिमास्यादिषु तिथिषु, अपेर्गम्यत्वा-**देकरात्रमपि**, उपलक्षणादेकदिनमपि 'न हावए' **न हानिं प्रापयेत्**, रात्रिग्रहणं दिवाव्या-कुलतायां सत्यां रात्रावपि कुर्यात्, सामायिकाङ्गत्वेनैव सिद्धे पौषधस्य भेदेनोपादानमादर-दीप्त्यै ॥२३॥

उक्तमर्थं निगमयति—

**एवं सिक्खासमावण्णो, गिहवासे वि सुव्वओ ।**
**मुच्चइ च्छविपव्वाओ, गच्छे जक्खसलोगयं ॥२४॥**

**व्याख्या—एव**मुक्तरीत्या **शिक्षया** व्रतसेवनया **समापन्नो** युक्तो **गृहवासेऽपि सुव्रतः** शोभनव्रतो मुच्यते, छविस्त्वक्, पर्वाणि जानुकूर्परादीनि, तद्योगादौदारिकशरीरं यच्**छविपर्वात्मकं तस्मात्, गच्छेद्यक्षै**र्देवैः **सलोकतां** समानलोकतां, अर्थाद्देवगतिं यायात्। पण्डितमरणावसरेऽपि प्रसङ्गतो बालपण्डितमरणमुक्तम् ॥२४॥

पण्डितमरणमाह—

**अह जे संवुडे भिक्खू, दोण्हमण्णयरे सिया ।**
**सव्वदुक्खप्पहीणे वा, देवे वा वि महिड्डिए ॥२५॥**

**व्याख्या—अथे**ति प्रारम्भे **यः संवृतः** स्थगिताश्रवो **भिक्षुर्भावभिक्षुर्द्वयोरन्यतरः** कोऽपि **स्यात्**, कथं ? **सर्वदुःखप्रहीणः** सिद्धो वा **देवो वा, अपि** सम्भावने, संहन-नादिवैकल्य**महर्द्धिकः** सम्भवेत् ॥२५॥

तद्देवयोग्यावासनाह—

**उत्तराइं विमोहाइं, जुईमंताणुपुव्वसो ।**
**समाइण्णाइं जक्खेहिं, आवासाइं जसंसिणो ॥२६॥**

**दीहाऊया इड्ढिमंता, समिद्धा कामरूविणो ।**
**अहुणोववण्णसंकासा, भुज्जो अच्चिमालिप्पभा ॥२७॥**

**व्याख्या—उत्तरा** उपरिवर्त्तिनोऽनुत्तरविमानाख्याः सर्वोपरिवर्त्तित्वात्तेषां, **विमोहा** इत्यल्पवेदादिमोहोदयतया विमोहाः, यद्वा मोहो द्विधा, द्रव्यतोऽन्धकारो भावतो मिथ्या-त्वादिः, सततरत्नोद्योते सम्यक्त्वे च मोहाऽसम्भवाद्विगतो मोहो येषु ते **विगतमोहाः**, तथा द्युतिरन्यातिशायिनी येषु ते **द्युतिमन्तः**, **अनुपूर्वतः** क्रमेण सौधर्माद्यनुत्तरान्तेषु विमोह-

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

त्वादिविशेषणानि ज्ञेयानि । **समाकीर्णा** व्याप्ता **यक्षैर्देवैः**, एवंविधा **आवासा** भवन्ति, प्राकृतत्वान्नपुंस्त्वनिर्देशः । अथ तत्र ते देवाः कथम्भूताः ? **यशस्विनः** ॥२६॥

**व्याख्या–दीर्घायुषः** सागरायुषः, **ऋद्धिमन्तो** रत्नादिसम्पदुपेताः, समिद्धा अतिदीप्ताः, कामोऽभिलाषस्तेन रूपाणि कामरूपाणि, तद्वन्तः **कामरूपिणो** विविधवैक्रियशक्त्यन्विताः, अनुत्तरेष्वपि विकरणशक्तेः सत्त्वात् । **अधुनोपपन्नसङ्काशाः,** अनुत्तरेषु हि वर्णद्युत्यादि यावदायुस्तुल्यमेव स्यात् । **भूयः**शब्दः प्राचुर्ये, **प्रभूतादित्यदीप्तयो,** नह्येकस्यैवादित्यस्य तादृशी द्युतिरस्ति ॥२७॥

**ताणि ठाणाणि गच्छंति, सिक्खित्ता संयमं तवं ।**
**भिक्खाए वा गिहत्थे वा जे संतिपरिनिव्वुडा ॥२८॥**

**व्याख्या–तान्युक्तानि स्थानानि** आवासात्मकानि **गच्छन्ति,** गताः गमिष्यन्ति च, केऽपि सौधर्मादिष्वपि यान्ति, कथं ? **शिक्षित्वा**ऽभ्यस्य, **संयमं** सप्तदशधा, **तपो** द्वादशधा, के ? **भिक्षाका गृहस्था वा** भावतो यतय एव, **ये शान्त्योपशमेन परिनिर्वृता** विध्यातकषायाऽनलाः, यद्वा **ये** केचन **सन्ति** विद्यन्ते **परिनिर्वृता** इति ॥२८॥

मरणे साधूनां लक्षणमाह–

**तेसिं सुच्चा सपुज्जाणं, संजयाणं वुसीमओ ।**
**न संतसंति मरणंते, सीलवंता बहुस्सुया ॥२९॥**

**व्याख्या–तेषां** भावभिक्षूणां **श्रुत्वा** उक्तरूपस्थानाप्तिमिति, सतां पूजार्हाणामिति **सत्पूज्यानां,** सती वा पूजा येषां ते **सत्पूजास्तेषां** संयतानां, 'वुसीमओ'त्ति **वश्यवतां, न सन्त्रस्यन्ति** नोद्विजन्ति **मरणान्ते** समुपस्थिते, के ? **शीलवन्तश्चा**रित्रिणो **बहुश्रुता** विविधागमश्रुतिजलधियः, यतः-

**चरितो निरुपक्लिष्टो, धर्मो हि मयेति निर्वृतः स्वस्थः ।**
**मरणादपि नोद्विजते, कृतकृत्योऽस्मीति धर्मात्मा ॥१॥ [ ]** ॥२९॥

द्वे मरणे व्याख्याय शिष्योपदेशमाह–

**तुलिया विसेसमादाय, दयाधम्मस्स खंतिए ।**
**विप्पसीएज्ज मेहावी, तहाभूएण अप्पणा ॥३०॥**

**व्याख्या–तोलयित्वा** परीक्ष्य स्वधृत्यादि, बालपण्डितमरणे च विशेषं, बाल–

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

मरणात् पण्डितमरणस्य विशिष्टत्वं, भक्तपरिज्ञादिमरणत्रयस्य च **विशेषमादाय** ज्ञात्वा, तथा **दयाधर्मस्य** यतिधर्मस्य विशेषं शेषधर्मातिशायित्वं चादाय, **क्षान्त्या** मार्दवादिभिश्च **विप्रसीदेत्** विशेषेण प्रसन्नतां भजेत्, न तु मरणादुद्विजेत, **मेधावी** मर्यादावान्, **तथा-भूतेनो**पशान्तमोहोदयेन, यद्वा यथैव मरणकालात् प्रागनाकुलचेता अभूत्, तथैव मरण-कालेऽपि स्थिरेण, **तथाभूतेना**ऽकषायेणात्मना स्वयं प्रसीदेदिति सम्बन्धः, न तु कृतद्वादश-वर्षसंलेखनतादृक् तपस्विवन्निजाङ्गुलिभङ्गादिना कषायितया भवितव्यमिति ॥३०॥

प्रसन्नस्य कृत्यमाह—

**तओ काले अभिप्पेए, सड्ढी तालिसमंतिए ।**
**विणएज्ज लोमहरिसं, भेयं देहस्स कंखए ॥३१॥**

**व्याख्या—ततः** कषायोपशमात् काले मरणकाले**ऽभिप्रेते**ऽभिरुचिते सति । कदा च मरणमभिप्रेतं यदा योगा नोत्सर्पन्ति **तादृशामि**तिचिन्तनरूपं भयोत्थं **रोमहर्षं,** हा मे मरणं भावीति भयोत्थं, **श्रद्धावान्** गुरूणा**मन्तिके विनयेद्** विनाशयेत्, च **भेदं** विनाशं **देहस्य काङ्क्षेद्-**अभिलषेत्, त्यक्तपरिकर्मत्वात्, न तु मरणाशंसया, अथवा 'तालिस'त्ति यादृशः प्रव्रज्याप्रति-पत्तिकाले संलेखनाकालेऽपि **श्रद्धावान् तादृश** एव मरणकालेऽपीति ॥३१॥

निर्गमयति—

**अह कालंमि संपत्ते, आघायाय समुस्सयं ।**
**सकाममरणं मरइ, तिण्हमण्णयरं मुणि ॥३२॥ त्ति बेमि**

**व्याख्या—अथ** मरणेच्छानन्तरम्—

**निप्फाइया य सीसा, सऊणी जह अंडगं पयत्तेणं ।**
**बारससंवच्छरियं, अह संलेहंतो करेइ ॥१॥** [ आचा.गा.२६७ ] इत्यादि,

क्रमेण **सम्प्राप्ते मरणकाले, आघातयन्** संलेखनादिभिरा समन्ताद् **घातयन्** विनाशयन्, **समुच्छ्रयम**न्तः कार्मणशरीरं बहिरौदारिकं, **सकाममरणं** साभिलाषमरणं, तेन म्रियते, **त्रयाणां** भक्तपरिज्ञाइङ्गिनीपादपोपगमनाना**मन्यतरेण मुनिस्त**पस्वी । **इति** परि-समाप्तौ **ब्रवीमी**ति प्राग्वत् ॥३२॥

**इति पञ्चममकाममरणीयाध्ययनमुक्तम् ॥५॥**

• • •

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

# षष्ठं क्षुल्लकनिर्ग्रन्थीयमध्ययम् ॥

अग्रे विंशत्तमस्य महानिर्ग्रन्थीयस्य वक्ष्यमाणत्वादिदं स्तोकनिर्ग्रन्थाचाररूपं **लघुनिर्ग्रन्थीयं** । तत्र निर्ग्रन्थशब्देन पञ्च निर्ग्रन्थाः स्युः, यथा–

**★पुलागबकुसकुसीला, नियंठसिणायगा य णायव्वा ।**
**एएसिं पंचण्ह वि, होइ विभासा इमा कमसो ॥१॥** [ उ.नि.गा. २३७ वृ.भा. ]

तत्र पुलाकः कणपलालं तद्वत् संयमेऽसारः,

**होइ पुलाओ दुविहो, लद्धिपुलाओ तहेव इयरो य ।**
**लद्धिपुलाओ संघाइ-कज्जे इयरो य पंचविहो ॥२॥**

**णाणे दंसणचरणे, लिंगे अहसुहुमए य नायव्वो ।**
**नाणे दंसणचरणे, तेसिं तु विराहण असारो ॥३॥** [ उ.नि.गा. २३७ वृ.भा. ]

ज्ञानादीनां विराधनया असारः,

**लिंगपुलाओ अण्णं, निक्कारणओ करेइ सो लिंगं ।**
**मणसा अकप्पियाणं, निसेवओ होयहासुहुमो ॥४॥** [ उ.नि.गा. २३७ वृ.भा. ]

बकुशः कर्बुरः,

**सरीरे उवकरणे वा, बाउसियत्तं दुहा समक्खायं ।**
**सुक्किलवत्थाणि धरे, देस सव्वे सरीरंमि ॥५॥** [ उ.नि.गा. २३७ वृ.भा. ]

शरीरं उपकरणे भूषापरः सदा शुक्लवस्त्राणि मृक्षितपादत्राणदण्डकादि शोभायै धत्ते, देशतः स्तोकं, सर्वतस्तु बहु,

**आभोग १ अणाभोग २, संवुड ३ मसंवुडे ४ अहासुहुमे ५ ।**
**सो दुविहो वि बउसो, पंचविहो होइ नायव्वो ॥६॥** [ उ.नि.गा. २३७ वृ.भा. ]

---

१. ससैन्यचक्रिचूरकः ।

★ पुलागबकुस......इत्यादि गाथाः उत्तराध्ययननिर्युक्ति- गाथा २३७ वृत्तौ आह च भाष्यकृत् इति आख्याताः ॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

आभोगबकुशादीनां व्याख्या–

**आभोगे जाणंतो, करेइ दोसं तहा अणाभोगे ।**

**मुलुत्तरेहिं संवुडो, विवरीय असंवुडो होइ ॥७॥** [ उ.नि.गा. २३७ वृ.भा. ]

संवृत्तं छन्नं मूलोत्तरगुणानां दोषकृत् ।

**अच्छिमुहमज्जमाणो, होइ अहासुहुमओ तहा बउसो ।**

**पडिसेवणाकसाए, होइ कुसीलो दुहा एसो ॥८॥** [ उ.नि.गा. २३७ वृ.भा. ]

अक्षि मुखं च मार्जयन्, पीहकादि स्फेटयन् क्षालयन् वा, शरीररजः स्फेटयन्, स्वकीर्त्तिवस्त्रादिऋद्धिकामः,

अथ कुशीलः प्रतिकूलः, वितथा सेवनया कुत्सितं शीलमष्टादशसहस्रशीलाङ्गान्यस्येति कुशीलः ।

**णाणे दंसणचरणे, तवे य अहसुहुमए य बोधव्वो ।**

**पडिसेवणाकुसीलो पंचविहे ऊ मुणेयव्वो ॥९॥** [ उ.नि.गा. २३७ वृ.भा. ]

**नाणाई उवजीवइ, अह सुहुमो अह इमो मुणेयव्वो ।**

**साइज्जंतो रागं, वच्चइ एसो तवच्चरणी ॥१०॥** [ उ.नि.गा. २३७ वृ.भा. ]

अयं तपश्चरणीति साद्यमानः स्तूयमानो रागं व्रजति ।

**एमेव कसायंमि वि, पंचविहो होइ ऊ कुसीलो उ ॥**

**कोहेण वि वज्जाइ, पउंजई एमेव नाणाई ॥११॥** [ उ.नि.गा. २३७ वृ.भा. ]

**एवमेव दंसणंमि वि, सावं पुण देइ ऊ चरित्तंमि ।**

**मणसा कोहाईणि, करेइ अह सो अहासुहुमे ॥१२॥** [ उ.नि.गा. २३७ वृ.भा. ]

दर्शने सम्यक्त्वेऽपि सम्यक्त्वस्थापकशास्त्रे च क्रोधात् प्रवर्त्तते, शापं दत्ते, य एवं चारित्रे कुशीलः, एवं तपस्यपि च । अथ निर्ग्रन्थ उपशामकः क्षपको वा यथाख्यातचारित्री । स्नातकः केवली ।

तत्र पुलाकादयः पञ्च सर्वार्हत्तीर्थेषु स्युः, पुलाकबकुशप्रतिसेवना, कुशीलास्तीर्थे नित्यं, शेषास्तु तीर्थेऽतीर्थे वा, सर्वे भावतो निर्ग्रन्थलिङ्गे स्युः, "**पुलाकबकुसपडिसेवणा, कुसीला उक्कोसेण तिदसपूव्वधरा,**" [ ] कषायकुशीलनिर्ग्रन्थौ चतुर्दशपूर्विणावपि । पुलाकस्य श्रुतं जघन्येन नवमपूर्वतृतीयाचारवस्तु, उत्कृष्टं नवपूर्वाणि, बकुशकुशीलनिर्ग्रन्थानां श्रुतं अष्टौ प्रवचनमातरः, अश्रुतः केवली स्नातकः, पञ्चानां मूलगुणानां निशाभोज्यषष्ठानां पराभियोगादन्यतरत् सेवमानः पुलाकः स्यात्, बहुशश्चित्रमहीधनोपकरणदन्तदार्ढ्यस्वर्णकीलिकादिपरोऽपि न मूलगुणभञ्जकः, उत्तरगुणदोषी तु स्यात्, प्रतिसेवनाकुशीलः

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

पुलाकवत्, कषायकुशीलनिर्ग्रन्थस्नातका निर्दोषा मूलोत्तरगुणयोः बकुशप्रतिसेवनाकुशलीयोः सर्वा लेश्याः, पुलाककषायकुशीलयोस्तेजोलेश्याद्यास्तिस्रः, निर्ग्रन्थस्नातकयोः शुक्ललेश्या । पुलाक उत्कृष्टस्थितिषु सहस्रारदेवेषु, बकुशप्रतिसेवनाकुशीलौ द्वाविंशतिसागरेषूत्पद्येते, कषायकुशीलनिर्ग्रन्थौ सर्वार्थे, जघन्यतः सर्वे पल्यपृथक्त्वस्थितौ सौधर्मे, एवं निर्ग्रन्थाः पञ्चविधा उक्ताः, प्रमादादिना सेवमाना अपि पुनः पश्चात्तापिनः संयमादृताः, इह ग्रन्थो द्विधा, तयोर्द्रव्यतः—

**क्षेत्रं १ वास्तु २ धन ३ धान्य-संग्रहो ४ मित्र ५ ज्ञातियसंयोगः ६ ।**
**यान ७ शयन ८ आसनानि ९, दासी १० दासाश्च ११ कुप्यं १२ च ॥१॥ [ ]**

इति द्वादशधा । आन्तरस्तु-

**मिच्छत्तं १ वेयतिगं ४, हासाइ छच्चगं च नायव्वं १० ।**
**कोहाईण चउक्कं १४, चउदस अब्भिंतरा गंठी ॥१॥ [ प्रव.सा./गा.७२१ ]**

द्रव्यभावग्रन्थेभ्यो मुक्तो निर्ग्रन्थः, तस्याचाराध्ययनमिदम् ।

इह प्रागध्ययने सकाममरणं म्रियते इत्युक्तं, स तु मननान्मुनिरिति ज्ञान्येव, ये त्वज्ञानिनस्तानाह—

**जावंतऽविज्जापुरिसा, सव्वे ते दुक्खसंभवा ।**
**लुप्पंति बहुसो मूढा, संसारंमि अणंतए ॥१॥**

**व्याख्या—यावन्तो** वेदनं विद्या तत्वज्ञानं, न विद्या अविद्या मिथ्यात्वोपहतकुत्सितज्ञानं, तत्पूर्णाः पुरुषा **अविद्यापुरुषा** विद्याहीना वा **अविद्यापुरुषाः, ते सर्वे** अविद्यापुरुषाः, दुःखस्य सम्भवो येषु ते **दुःखसम्भवाः,** यद्वा दुःखं करोति दुःखयति, ततो दुःखं पापं कर्म, ततस्तस्य सम्भव उत्पत्तिर्येषां ते **दुःखसम्भवाः, लुप्यन्ते** दारिद्र्याद्यैर्बाध्यन्ते, **बहुशो**ऽनेकशो **मूढा** हिताऽहितविवेचनं प्रत्यसमर्थाः, **संसारेऽनन्तकेऽविद्यमानां** ते, अनेन चानन्तसंसारिकतादर्शनेन तादृशां पण्डितमरणाऽभाव उक्तः ॥१॥

**अत्र दृष्टान्तः**—एको ग्राम्यो दारिद्र्येण गृहान्निर्गत्य पृथ्वीमभ्रमत्, परं भिक्षापि तेन नाप्ता । पुनर्गृहं प्रति प्रत्यावृत्तः, एकस्मिन् ग्रामे पाणपाटकपार्श्वे देवकुले रात्रौ स स्थितः, देवकुलादेकः पाणश्चित्रहस्तो निर्गत्यैकदेशे स्थित्वा घटमूचे, शीघ्रं गृहं कुर्वित्युक्ते गृहं जातं, एवं यद्यत् सोऽवक् तद्घटोऽकरोत्, यावच्छय्यायां स्त्रीभिः सह भोगान् सोऽभुङ्क्त । प्रातस्तेन सर्वं जह्रे । स ग्राम्यस्तद् दृष्ट्वा दध्यौ मुधाहं बहुक्ष्मामभ्रमं, एतमेव सेवे । अथ

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

स तमेवाऽश्रयत् । स भक्त्या प्रीत ऊचे किं ते ददे ? स ऊचे त्वत्प्रसादेनाहमप्येवं भोगान् भुञ्जे । तेन किं विद्यां लासि ? उत विद्याभिमन्त्रितं घटमित्युक्ते स विद्यासाधनादि-कष्टभीरुतयोचेऽभिमन्त्रितं घटं देहि ? तेनाभिमन्त्र्य घटो दत्तः, तल्लात्वा स्वग्राममेत्य सौधं विकुर्व्य स्वबन्धुयुक् भोगान् भुङ्क्ते, एवं तस्य बन्धूनां च सर्वे स्वाजीविकोपायाः शिथिलीभूताः, गवाश्वादयोऽप्यसारिता गताः, अन्यदा सोऽतिहर्षाद्धटं स्कन्धे धृत्वा पीतासवोऽनृत्यत्, प्रमादाद् घटश्च भग्नो नष्टश्च । पश्चात् स तत्स्वजनाश्चाऽधनाः परप्रेष्यताद्यै-र्दुःखान्यन्वभवन् । चेत्तदा स विद्यामलास्यत् तदा घटं नवमप्यकरिष्यत् । एवमविद्यानराः क्लिश्यन्ते । दृश्यन्ते हि यानपात्रिण इहैव मोहाद्दिग्मूढा जलान्तर्गिर्यास्फालनस्फुटितपोताः कल्लोलैः क्षिप्यमानाः कूर्ममकराद्यैर्विलुप्यन्ते, एवं तेऽविद्या बहुशो मूढाः शारीरमान-सैर्महादुःखैर्विलुप्यन्ते, अन्येऽप्यर्था अस्यां गाथायां सन्ति, परं विस्तरभयान्नोक्ताः ॥१॥

यतश्चैवं ततः कृत्यमाह–

**समिक्ख पंडिए तम्हा, पासज्जाइपहे बहू ।**
**अप्पणा सच्चमेसिज्जा, मित्तिं भूएसु( हिं) कप्पए ॥२॥**

**व्याख्या–समीक्ष्या**लोच्य, **पण्डितो** हिताऽहिते विवेकी, 'तम्हा'त्ति यस्मादेवा-ऽविद्यावन्तो लुप्यन्ते **तस्मात्**, पाशाः पारवश्यहेतवो भार्यादिसम्बन्धास्त एव तीव्रमोहो-दयादिहेतुतया जातीनामेकन्द्रियादिजातीनां पन्थानो मार्गाः **पाशजातिपथास्तान् बहून्** प्रभूतान्। अविद्यावतां विलुप्तिहेतुकृत्, **आत्मना** स्वयं न परोपरोधादिभिः, सद्भ्यो जीवेभ्यो हितः **सत्यः** संयम आगमो वा, **तमेषयेद्** गवेषयत्, **मैत्रीं** मित्रभावं भूतेषु पृथ्व्यादिषु जन्तुषु **कल्पयेत्**। (पाठान्तरे–**'अत्तट्ठा सच्चमेसिज्जा' आत्मार्थं सत्यमेषयेत्** गवेषयत्,) न तु परार्थं, अपरकृतस्याऽपरत्राऽसङ्क्रमणेन परार्थानुष्ठानस्याऽनर्थकत्वात् ॥२॥

अपरं च–

**माया पिया ण्हुसा भाया, भज्जा पुत्ता य ओरसा ।**
**नालं ते मम ताणाय, लुप्पंतस्स सकम्मुणा ॥३॥**
**एयमट्ठं सपेहाए, पासे समियदंसणे ।**
**छिंद गिद्धिं सिणेहं च, न कंखे पुव्वसंथवं ॥४॥**

**गाथाद्वयव्याख्या–माता, पिता, स्नुषा** वधूः, **भ्राता, भार्या, पुत्राः**, कथम्भूताः पुत्राः ? ओरसि भवा **औरसाः** स्वयमुत्पादिताः, **नालं** न समर्था**स्ते** मात्रादयो **मम त्राणाय** रक्षणाय **लुप्यमानस्य** छिद्यमानस्य **स्वकृतेन कर्मणा** ज्ञानावरणीयादिना ॥३॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**एतं** पूर्वोक्तम**मर्थं स्वप्रेक्षया** स्वबुद्ध्या **पश्येद**वधारयेत्, शमितं दर्शनं मिथ्यात्वात्मकं येन स **शमितदर्शनः**, यद्वा सम्यगितं गतं जीवादिपदार्थेषु दर्शनं दृष्टिरस्येति स **सम्यगित-दर्शनः** सम्यग्दृष्टिः सन् **छिन्द्याद् गृद्धिं** विषयाकाङ्क्षां, **स्नेहं च** स्वजादिषु, तथा **पूर्वसंस्तवं** पूर्वपरिचय एकग्रामोषितोऽयमित्यादिकं, अपेर्गम्यत्वा**न्नापि काङ्क्षेत** ॥४॥

अथ फलमाह–

**गवासं मणि कुंडलं, पसवो दासपोरुसं ।**
**सव्वमेयं चइत्ताणं, कामरूवी भविस्ससि ॥५॥**

**व्याख्या**–गावश्च अश्वाश्च **गवाश्वं**, तत्राश्वगावो वाहदोहोपलक्षिताः, पशुत्वेऽप्यनयोः पृथगादानं गाढोपयोगित्वेन प्राधान्यात्, **मणयो** मरकतादयः स्वर्णादि च, **कुण्डलं** शेषा-भरणानि च, **पशवो**ऽजैडकादयः, **दासा** गृहजाताद्याः, **पौरुषं** पदात्यादिसमूहं, **सर्वमेत-त्त्यक्त्वा** संयमं प्रपाल्य **कामरूपी भविष्यसि**, इहैव वैक्रियादिलब्धेः, परत्र च देवत्वाद्याप्तेः ॥५॥

पुनर्द्वितीयगाथोक्तं सत्यमेव विशेषत आह–

**थावरं जंगमं चेव, धणं धन्नं उवक्खरं ।**
**पच्चमाणस्स कम्मेहिं, नालं दुक्खाओ मोयणे ॥६॥**

**व्याख्या**–**स्थावरं** गृहारामादि, **जंगमं** मनुष्यादि, '**चेव**'त्ति समुच्चये, **धनं, धान्यं, उपस्करं** गृहोपकरणं, एतानि **कर्मभिः पच्यमानस्य** दुःखाग्निना तप्यमानस्य जीवस्य **दुःखाद्विमोचने नालं** न समर्थानि ॥६॥

**अज्झत्थं सव्वओ सव्वं, दिस्स पाणे पियायए ।**
**न हणे पाणिणो पाणे, भयवेराओ उवरए ॥७॥**

**व्याख्या**–आत्मनि यद्वर्त्तते तदध्यात्मं, यद्वा अध्यात्मं मनस्तस्मिंस्तिष्ठतीत्य-**ध्यात्मस्थं**, सूत्रत्वाद्वर्णलोपः, तच्चेह सुखं दुःखं च, **सर्वत** इष्टसंयोगाऽनिष्टवियोगादिहेतुजं, सर्वं शारीरं मानसिकं च **दृष्ट्वा** प्रियत्वाऽप्रियत्वस्वरूपेणावधार्य, तथा **पाणे** प्राणिनः प्रिया दया रक्षणं येषां तान् **प्रियदायान्**, प्रिय आत्मा येषां तान् **प्रियात्मकान्** वा दृष्ट्वा **न हन्यात् प्राणा**न्नापि घातयेत्, प्राणान् घ्नन्तं च नानुजानीयात् **प्राणिन** इति, जातावेक-वचनं। भयं सप्तधा, वैरं प्रद्वेषस्तस्मा**द्भयवैराद्**परतो निर्वृत्तः सन् ॥७॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

हिंसाश्रवनिरोधमुक्त्वा शेषाश्रवनिरोधमाह–

**आयाणं नरयं दिस्स, णायइज्ज तणामवि ।**
**दोगुंच्छी अप्पणो पाए, दिन्नं भुंजेज्ज भोयणं ॥८॥**

**व्याख्या**–आदीयते इत्यादानं धनधान्यादि, आर्षत्वाद**दानीयं** वा, तदेव नरकहेतुत्वा**न्नरकं दृष्ट्वा नाददीत**, 'तणामवि' **तृणमपि**, किन्तु प्राणाधारणाय, जुगुप्सते आत्मानं आहारमन्तरेण धर्माक्षममित्येवंशीलो **जुगुप्सी आत्मनः पात्रे दत्तं** भोजनसमये गृहस्थै**र्भुञ्जीत भोजनमा**हारं । जुगुप्सिशब्देनाहाराऽनिच्छादर्शनात् परिग्रहाश्रवरोध उक्तः, तदेवं 'तन्मध्यपतितस्तद्ग्रहणेन गृह्यते' इतिन्यायान्मृषावादाऽदत्तादानमैथुनात्माश्रवत्रयरोध उक्तः । यद्वा '**सच्चमेसिज्जा**' सत्यशब्देन साक्षात् संयममपि वदता मृषावादनिवृत्तिरुक्ता । आदानं हि ग्रहणमेव रूढं तच्चाऽदत्तस्येति गम्यं । एतेनाऽदत्तादानविरतिरुक्ता । '**गवासम्**' इत्यादिना तु परिग्रहनिरोध उक्तः, तन्निरोधान्नाऽपरिगृहीता स्त्री भुज्यते इति मैथुननिरोध उक्त एव । '**अप्पणो पाए**' इति पात्रग्रहणं, माभून्निःपरिग्रहतया पात्रस्याप्यग्रहणमिति कस्यचिद्व्यामोह इति । तदगृहे तादृग्लब्ध्यभावेन पाणिभोक्तृत्वाऽभावाद् गृहिभाजने बहुदोषः "**पच्छाकम्मं पुरेकम्मं**" [द.६।५३] इत्यादि । एवं पञ्चाश्रवविरमणात् संयम उक्तः ॥८॥

यथात्र परे विप्रतिपद्यन्ते तथा दर्शयति–

**इहमेगे उ मन्नंति, अप्पच्चक्खाय पावगं ।**
**आयरियं विदित्ताणं सव्वदुक्खा विमुच्चइ ॥९॥**

**व्याख्या–इहा**स्मिन् जगति मुक्तिमार्गविचारे वा **एके** कपिलादिकुतीर्थ्यास्तु मन्यते प्ररूपयन्ति च, यथा **अप्रत्याख्याय पापकं** हिंसाविरतिमकृत्वा, **आर्यं** तत्वं यद्वाऽऽ**चारिकं** निजनिजाचारभवमनुष्ठानमेव **विदित्वा** स्वसंवेदनेनानुभूय **सर्वदुःखेभ्य** आध्यात्मिकाधिभौतिकाधिदैविकलक्षणेभ्यः शारीरमानसेभ्यो वा **मुच्यते** । आहुश्च–

**पञ्चविंशतितत्त्वज्ञो, यत्र तत्राश्रमे रतः ।**
**जटी मुण्डी शिखी वापि, मुच्यते नात्र संशयः ॥१॥** [शा.वा./३-३७]

तेषां ज्ञानमेव मुक्त्यङ्गं । नचैतच्चारु, न हि रोगेभ्य इवौषधादिज्ञानाद्भावरोगेभ्यो ज्ञानावरणादिकर्मभ्यश्चारित्रादिज्ञानादेव महाव्रतात्मकपञ्चाङ्गोपलक्षितक्रियामननुष्ठाय मुक्तिः, ते चैवमनालोचयन्तो भवदुःखाकुलिता वाचालतयैवात्मानं स्वस्थयन्ति ॥९॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तथा चाह—

**भणंता अकरंता य, बंधमोक्खपइण्णिणो ।**
**वायावीरियमेत्तेणं, समासासंति अप्पयं ॥१०॥**

**व्याख्या—भणन्तो** वदन्तो ज्ञानमेव मुक्त्यङ्गं, **अकुर्वन्तश्च** क्रियां, बन्धमोक्षयोः प्रतिज्ञावन्तो **बन्धमोक्षप्रतिज्ञिनो** बन्धमोक्षस्थापका अक्रियिणः, **वाग्वीर्यमात्रेण समाश्वासयन्ति**, ज्ञानादेव वयं मुक्तिगामिन इति स्वस्थयन्त्यात्मानम् ॥१०॥

ततश्च—

**ण चित्ता तायए भासा, कुओ विज्जाणुसासणं ।**
**विसण्णा पावकम्मेहिं, बाला पंडियमाणिणो ॥११॥**

**व्याख्या—**भाषा प्राकृतसंस्कृतादिरूपा आर्या, विषयं ज्ञानमेव मुक्त्यङ्गमित्यादिर्वा **भाषा [चित्रा] न त्रायते** पापेभ्यः, अचिन्त्यो हि मणिमन्त्रौषधीनां प्रभाव इत्यघोरमन्त्रात्मिका विद्या त्राणाय भविष्यतीत्याह—**कुतो विद्याया** विचित्रमन्त्रात्मिकाया **अनुशासनं** शिक्षणं त्रायते पापात् ? न कुतोऽपि, तन्मात्रादेव मुक्तौ शेषानुष्ठानवैयर्थ्यात् । ते तु विविधमनेकप्रकारं सन्ना मग्ना **विसन्ना पापकर्मसु** हिंसाहेत्वनुष्ठानेषु सततं तत्कारयेयुरिति । यद्वा (पाठान्तरे—'विसन्ना पावकिच्चेहिं' **विषण्णा** विषादं गताः **पापकर्मभि**र्हिंसाद्यैर्यथा कथमेवं कर्मभिर्वयं भविष्याम इति ।) **बाला** रागद्वेषाकुलिताः, **पण्डितमात्मानं** मन्यन्ते इत्येवंशीलाः पण्डितमानिनः । ये बालाः पण्डितमानिनो न स्युस्ते सम्यगजानानाः परं पृच्छेयुरुपदेशाच्च तानि पापकर्माणि त्येजेयुर्न तु विषण्णा एवासीरन्, ये तु बालाः पण्डितमानिनश्च ते स्वयमज्ञा अपि ज्ञत्वगर्वाद् गुणवतोऽनुपासमानाः स्युः ॥११॥

मुक्तिपथद्वेषिणां दोषानाह—

**जे केइ सरीरे सत्ता, वण्णे रूवे य सव्वसो ।**
**मणसा कायवक्केणं, सव्वे ते दुक्खसंभवा ॥१२॥**

**व्याख्या—ये केचित् शरीरे** स्नानादिभिः **सक्ताः, वर्णे** सुस्निग्धगौरत्वादिके, **रूपे** सौन्दर्ये, **चात्** स्पर्शादिषु वस्त्रादिषु च, **सर्वशः** सर्वैः स्वयंकरणकारणादिभिः प्रकारै**र्मनसा,** कथं वर्णादिवन्तो वयं भविष्याम इति **कायेन** रसायनाद्युपभोगेन, **वाक्येन** रसायनादिप्रश्नेन, देहजरादिहानिहेत्वध्यात्मक्रियया वा, **ते सर्वे** ज्ञानवादिनो **दुःखसम्भवा** इहामुत्र च दुःखभाजनम् ॥१२॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

उपदेशसारमाह—

**आवण्णा दीहमद्धाणं, संसारंमि अणंतए ।**
**तम्हा सव्व दिसं पस्स, अप्पमत्तो परिव्वए ॥१३॥**

**व्याख्या**—एते मुक्तिवैरिणो वादिनः, **आपन्नाः** प्राप्ता **दीर्घ**मनाद्यन्त**मध्वानं** उत्पत्तिप्रलयरूपं, अन्यान्यभवभ्रमणैकत्रस्थित्यभावात्, **संसारे** गतिचतुष्टयेऽ**नन्तके** अविद्यमानान्ते, **तस्मात्** तान् वादिन उपेक्ष्य, **सर्वा दिशो** भावदिशः-

**पुढविजलजलणवाया, मूला खंधग्गपोरबीया य ।**
**बितिचउपणिंदितिरिया, नारया देवसंघाया ॥१॥ [ ]**

**समुच्छिमकम्माकम्म-भूमिगनरा तहंतरद्दीवा ।**
**भावदिसा दिस्सइ जं, संसारी नियमयेयाहिं ॥२॥ [ ]**

ता एताः **पश्यन्न**प्रमत्तो यथैषामेकन्द्रियाणां विराधना न स्यात्तथा **परिव्रजेत्** संयमाध्वनि, यद्वा **संसारापन्नानां सर्वदिशो दृष्ट्वा चाप्रमत्तो** यथैतासु न भ्रमसि तथा **परिव्रज ?** हे सुशिष्य ! ॥१३॥

अप्रमत्तमार्गमाह—

**बहिया उड्ढमायाय, नावकंखे कयाइवि ।**
**पुव्वकम्मक्खयट्ठाए, इमं देहं समुद्धरे ॥१४॥**

**व्याख्या—बहिर्भूतं** संसारादूद्र्ध्वं सर्वोपरिस्थं अर्थान्मोक्ष**मादाय,** मयैतस्मै यत्यमिति निश्चित्य, यद्वा **बहिरा**त्मनो बहिर्भूतं धनधान्यादि, च **ऊर्द्ध्वं** मोक्ष**मादाय** हेयत्वेनादेयतया च ज्ञात्वा **नावकाङ्क्षेद्वि**षयादीन्, न क्वचिद्रागं कुर्यात्, **कदाचिदपि** वा, परीषहोपसर्गाद्याकुलत्वेऽपि, आस्तामन्यदा, एवं सति देहधारणमप्ययुक्तमेव, तद्धारणे सत्याकांक्षासम्भवात् तस्यापि चात्मनो बहिर्भूतत्वादेवेति ध्यात्वाह—'पुव्व' इत्यादि **पूर्वकर्मणां क्षयार्थमिदं देहं समुद्धरेत्** शुद्धाहाराद्यैः, तत्पाते ह्यन्यभावोत्पत्तावविरतिः स्यात्। उक्तंच—

**सव्वत्थ संजमं, संजमाउ अप्पाणमेव रक्खिज्जा ।**
**मुच्चइ अइवायाओ, पुणो विसोही नयाविरई ॥१॥** [ ओघ.नि./गा.४७ ]

ततः शरीरोद्धरणमपि निस्सङ्गतयैव कार्यम् ॥१४॥

देहपालनेऽपि निस्सङ्गताविधिमाह—

**विगिंचि कम्मुणो हेउं, कालकंखी परिव्वए ।**
**मायं पिंडस्स पाणस्स, कडं लद्धूण भक्खए ॥१५॥**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या**–**विविच्य** पृथक्कृत्य **कर्मणो** ज्ञानावरणादेर्**हेतुं** मिथ्यात्वाऽविरत्यादि, कालमनुष्ठानप्रस्तावं काङ्क्षतीत्येवंशील: **कालकाङ्क्षी परि** समन्ताद् **व्रजे:** संयमे, इति**मात्रां** यावत्या संयमनिर्वाहस्तावतीं ज्ञात्वा **पिण्डस्या**ऽन्नादेः **पानस्या**चामादेः, खाद्य-स्वाद्याऽग्रहणं एतैः, उत्सर्गतस्तदनुभागात्, **कृतमा**त्मार्थमेव गृहिभिः, **लब्ध्वा भक्षयेत्** ॥१५॥

भुक्तशेषं न स्थाप्यमित्याह–

**सन्निहिं च न कुव्विज्जा, लेवमायाय संजए ।**
**पक्खी पत्तं समायाय, निरविक्खो परिव्वए ॥१६॥**

**व्याख्या**–सम्यगेकीभावेन निधीयते निक्षिप्यतेऽनेनात्मा नरकादिष्विति **सन्निधिः**, प्रातरिदं भोक्ष्यते इत्याशया यदन्नादि स्थापनं तन्**न कुर्वीत** । **च:** निश्चये, **लेपमात्रया**, यावता पात्रं लिप्यते तन्मात्रयापि सन्निधिं, यद्वा **लेपमेकं मर्यादीकृत्य** न स्वल्पमप्यन्यत् सन्निदधीत **संयतः**, यथा **पक्षी पत्रं** पक्षसञ्चयं **समादाय** परिव्रजति, एवं भिक्षुः पात्रमुपकरणं च समादाय **निरपेक्षो** निरीहः, तस्य वा विनाशादौ शोकाऽकृतेर्निस्सङ्गः **परिव्रजेत्** संयममार्गे, एवं च प्रत्यहमयमपलीमन्थभीरुतयाऽहिंसास्वाध्यायादिहानित्यागाय पात्राद्युपकरणसन्निधावपि न दोषः ॥१६॥

कृतं लब्ध्वा इति प्रागुक्तं स्पष्टयति–

**एसणासमिओ लज्जू, गामे अनियओ चरे ।**
**अपमत्तो पमत्तेहिं, पिंडपायं गवेसए ॥१७॥**

**व्याख्या**–एषणायां उत्पादनग्रहणग्रासविषयायां सम्यगितः स्थित **एषणासमितः**, प्राधान्याच्च इहैषणाग्रहणं, प्रायस्तद्भावे ईर्याभाषासमित्यादिसम्भव इति ज्ञप्त्यै, एवम-निश्रितगतिरुक्ता । लज्जाशब्देन संयमस्तद्वान् यतिरपि **लज्जा**, आर्षत्वाच्चैवं निर्देशः, **ग्रामे** उपलक्षणान्नगरादौ, **अनियतः** अनित्यवास**श्चरेत्**, इति निरपेक्षतैवोक्ता । **अप्रमत्तः** सन् विषयादिप्रमादाऽसेवनात्, **प्रमत्तेभ्यो** गृहिभ्यः **पिण्डपातं** भिक्षां **गवेषयत्** ॥१७॥

इति संयमस्वरूपोक्त्योक्तं निर्ग्रन्थस्वरूपं, अथाध्ययनार्थवक्तारमाह–

**एवं से उयाहु अणुत्तरनाणी, अणुत्तरदंसी अणुत्तरनाणदंसणधरे ।**
**अरहा णायपुत्ते, भयवं वेसालिए वियाहिए ॥१८॥ त्ति बेमि**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या—इति स** भगवानु**दाहृतवान्**, **अनुत्तरज्ञानी** सर्वोत्कृष्टज्ञानवान्, नाऽस्योत्तरमस्तीत्यनुत्तरं पश्यती**त्यनुत्तरदर्शी**, विशेषसामान्यग्राहित्वाद् ज्ञानदर्शनयोः, अनुत्तर-ज्ञानदर्शने, भिन्नभिन्नसमयभावित्वेन युगपदुपयोगाऽभावेऽपि लब्धिरूपतया धारयती**त्य-नुत्तरज्ञानदर्शनधरः**, अत्र हि अनुत्तरज्ञानी अनुत्तरदर्शीतिभेदाभिधानेन ज्ञानदर्शनयोर्भिन्नकालो ज्ञेयः, प्राधान्यमाश्रित्य विशेषसामान्ये भिन्नक्रमकाले विवक्षिते, न तु कदाप्यस्पष्टज्ञानता ज्ञेया, अर्हतीन्द्रादिभ्यः पूजामि**त्यर्हन्** तीर्थकृत्, **ज्ञात** उदारक्षत्रियः **सिद्धार्थस्तस्य पुत्रो महावीरो** भगवान् समग्रैश्वर्यादिवान्, विशालाः शिष्यास्तीर्थं यशःप्रभृतिगुणा वा यस्येति **वैशालिकः**, 'वियाहिय'त्ति **व्याख्याता** कथिता सदेवमनुजासुरायां पर्षदि (पाठान्तरे-एवं से उदाहु अरहा पासे पुरिसादाणीए भगवं वेसालिए बुद्धे परिनिव्वुडे त्ति) **अर्हन्** सामान्योक्तावपि प्रक्रमा**न्महावीरः**, पश्यति समस्तभावान् केवलेनेति **पश्यंस्**तथा पुरुषश्चासौ आदानीयश्च **पुरुषादानीयः**, पुरुषविशेषणं पुरुष एव प्रायस्तीर्थकृदिति ज्ञप्त्यै, पुरुषैर्वा आदानीयो ज्ञानादिगुणतया **पुरुषादानीयः, इति** समाप्तौ **ब्रवीमी**ति प्राग्वत् ॥१८॥

**इति क्षुल्लकनिर्ग्रन्थीयं षष्ठमध्ययनमुक्तम्** ॥६॥

• • •

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

# सप्तममौरभ्रीयमध्ययनम् ॥

निर्ग्रन्थत्वं तु रसाऽगृद्धेः स्यात्, सा च रसगृद्धानां कष्टदर्शनार्थं दृष्टान्तैः स्फुटं स्यादित्युरभ्रादिपञ्चदृष्टान्तयुक् सप्तम**मौरभ्रीया**ध्ययनमाह—तत्राद्यो भोगिनां विपद्ज्ञप्त्यै **उरभ्र**दृष्टान्तः (१), कष्टहेतवो यथा भोगास्तथा तुच्छा अल्पकालसुखाश्चेति ज्ञप्त्यै द्वितीय-तृतीयौ **काकिण्याम्र**दृष्टान्तौ (२-३), भोगिनामायव्ययज्ञप्त्यै **वणिग्**दृष्टान्तस्तुर्यः (४), आयव्ययतोलनाय देवनृभोगानां **समुद्रकुशाग्र**दृष्टान्तः पञ्चमः (५), यद्वाद्यो द्वितीयो विप्रकर्मत्वा**द्विप्रस्य** दृष्टान्तौ । तृतीयः **क्षत्रियस्य**, तुर्यो **वणिजः**, पञ्चमः **सर्ववर्णेषु** गुणिनां तपसे दृष्टान्तः ।

भोगिकष्टज्ञप्त्यै उरभ्रदृष्टान्तो यथा—

**जहाएसं समुद्दिस्स, कोइ पोसिज्ज एलगं ।**
**ओयणं जवसं दिज्जा, पोसेज्जा वि सयंगणे ॥१॥**

**व्याख्या—यथा** आदिश्यते विविधव्यापारेषु परिजनोऽस्मिन्नायाते इत्या**देशः** प्राघूर्णकः, **तं समुद्दिश्या**श्रित्य, यथाऽऽदेशः समस्येति, स चैनं भोक्ष्यते, इति विचार्य **कश्चित्** परलोकापायनिरपेक्षः **पोषयेत्** पुष्टं कुर्यात्, **एलक**मूरणकं, **ओदनं** भक्तं तद्योग्यशेषान्नानि च, **यवसं** मुद्गमाषादि **दद्यात्**, एवं **पोषयेत्**, पुनर्वचनमादरज्ञप्त्यै । **अपि** सम्भावने, सम्भाव्यते एवेदं क्वापि गुरुकर्मा **स्वकाङ्गणे**, अन्यत्र निर्युक्तकाः कदाचिन्नोदनादि दास्यन्तीति स्वकाङ्गणोक्तिः "**महोक्षं वा महाजं वा श्रोत्रियाय प्रकल्पयेत्**" [ ] इति **स्मृत्युक्तेः**, विप्राणामियं कुमतिः स्यात् ।

**अत्र दृष्टान्तो—**यथैकोऽजोऽभ्यागतार्थं पोष्यते, स च पुष्टाङ्गः सुस्नातो हरिद्रादि-कृताङ्गरागः कृतकर्णचूलो बालैर्नानाक्रीडाभिः क्रीड्यते, तं च लाल्यमानं दृष्ट्वा कोऽपि वत्सो मात्राऽपत्यस्नेहेन गोपितं, गोदुहापि दयया मुक्तं क्षीरं नापात्, मात्रा पृष्टो जगौ रोषात्

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अम्बायमजो यथेष्टौदनयवसाद्यैर्नानालङ्कारैश्च पुत्र इव मन्यते, अहं त्वभाग्यः शुष्कतृणान्यपि बहूनि न लभे, पयोऽपि कोऽपि काले मां न पाययेत् । मात्रोचे वत्स !—

**आउरचिण्हाइं एयाइं, जाइं चरइ नंदिओ ।**
**सुक्कतणेहिं लाढाहिं, एयं दीहाउलक्खणं ॥१॥ [ उ.नि./गा.२४९ ]**

यस्मादातुरो मर्त्तुकामो यन्मार्गयति तत्पथ्यमपथ्यं वा दीयते, एवमस्याप्यजस्य पोषोऽर्चा च, यदा तदा चैष घातिष्यते, त्वं च रक्ष्यसे, ततोऽसौ मान्यतेऽजः ॥१॥

किं करोति इत्याह—

**तओ से पुट्ठे परिवूढे, जायमेए महोदरे ।**
**पीणिए विउले देहे, आएसं परिकंखए ॥२॥**

**व्याख्या—ततस्तद्भोजनात्** 'से' इति **स** उरभ्रः **पुष्टः**, उपचितमांसतया **परिवृढः** समर्थः, **जातमेद** उपचितचतुर्थधातुः, **महोदरः** प्रीणितो यथार्हदानेन, एवं **विपुले** विशाले **देहे** सति, **आदेशं प्रतिकाङ्क्षती**त्युपमार्थो ज्ञेयः ॥२॥

ततः—

**जाव न एइ आएसे, ताव जीवइ से दुही ।**
**अह पत्तंमि आएसे, सीसं छेत्तूण भुज्जइ ॥३॥**

**व्याख्या—यावन्नैति आदेशः** प्राघूर्णकस्**तावदेव जीवति स** उरभ्रो **दुःखी** वध्य-मण्डनमिवास्यौदनदानादि, तत्वतो दुःख्येव सः, **अथ प्राप्ते आदेशे शीर्षं छित्वा** द्विधा कृत्वा स्वामिना सहैव स प्राघूर्णकेन **भुज्यते** । **अथ कथाशेषः**—ततोऽसौ वत्स-प्राघूर्णकेष्वागतेषु तमेडकं हतं दृष्ट्वा तृषितोऽपि भयेन मातुः स्तन्यं नैच्छत् । मात्रोचे किं पुत्र भयभीतः ? मे स्नेहक्षरत्पयोऽपि न पिबसि ? सोऽवक् सोऽजः प्राघूर्णकागमे मदग्रे निर्गतजिह्वस्तरलनेत्रो विस्वरं रसन् हतः, तद्भयान्मे कुतः पयःपानेच्छा ? मात्रोचे वत्स ! मया तदैवोचे, आतुरचिह्नान्येतानि, एष च तेषां विपाकः प्राप्तः ॥३॥

**जहा खलु से उरब्भे, आएसाए समीहिए ।**
**एवं बाले अहम्मिट्ठे, इहई नरयाउयं( णिरआउयं ) ॥४॥**

**व्याख्या—यथा खलु स** उरभ्र **आदेशाय समीहितः**, कल्पितोऽयमस्मै भवि-ष्यतीत्यादेशं परिकाङ्क्षति । **एवं बालो**ऽतिशयेनाधर्मो**ऽधर्मिष्ठ** ईहत इव **ईहते** तदनुकूल-चारितया **नरकायुष्कम्** ॥४॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

उक्तमेव गाथात्रयेण समर्थयति–

**हिंसे बाले मुसावाई, अद्धाणंमि विलोवए ।**
**अण्णदत्तहरे तेणे, माई कन्नुहरे सढे ॥५॥**

**व्याख्या–हिंस्रः** स्वभावतः प्राणान् हिनस्ति, **बालोऽज्ञः**, **मृषावादी**, **अध्वनि** मार्गे विलुम्पति मुष्णातीति **विलोपको** मोषकः, अन्येभ्यो दत्तं राजादिना वितीर्णं हरत्यन्तरैव छिनत्ती**त्यन्यदत्तहरः**, अन्यैर्वा अदत्तं हरती**त्यन्याऽदत्तहरः**, स्तैन्येन कृतवृत्तिः **स्तेनः**, **मायी** वञ्चकः, कस्यार्थं, नु वितर्के, हरिष्यामीत्याशयी **कन्नुहरः**, **शठो** वक्राचारः ॥५॥

**इत्थीविसयगिद्धे य, महारंभपरिग्गहे ।**
**भुंजमाणे सुरं मंसं, परिवूढे परंदमे ॥६॥**

**व्याख्या–स्त्रीषु विषयेषु गृद्धः**, महारम्भोऽनेकजन्तुघातकृद्व्यापारः, परिग्रहश्च धान्यादिसञ्चयो यस्यासौ **महारम्भपरिग्रहः**, **सुरां मांसं** च भुञ्जानः, **परिवृढः** प्रभुः पुष्टमांसशोणिततया तत्क्रियाक्षम इति । अत एव परानन्यान् दमयति, नृकृत्याऽकृत्येषु प्रवर्त्तते इति **परन्दमः** ॥६॥

**अयकक्करभोई य, तुंदिल्ले चियलोहिए( सोणिए ) ।**
**आउयं निरए कंखे, जहाएसं व एलए ॥७॥**

**व्याख्या–अजश्छागस्तस्य कर्करं** यच्चनकवद्भक्ष्यमाणं कर्करायते, तच्चेह मेदोऽतिपक्वं वा मांसं, **तद्भोजी**, अत एव **तुण्डिलो** जातबृहज्जठरः, चितमुपचितं लोहितं रक्तमस्येति च **चितलोहितः**, शेषधातूपलक्षणमेतत्, **आयुर्जीवितं नरके** सीमन्तकादौ **काङ्क्षती**व, तद्योग्यकर्मारम्भितया, **आदेश**मिव **यथैडकः** ॥७॥

विषयिणामैहिकापायं गाथाभ्यामाह–

**आसणं सयणं जाणं, वितं कामाणि भुंजिया ।**
**( दुक्खाहडं ) दुस्साहडं धणं हिच्चा, बहुं संचिणिया रयं ॥८॥**

**व्याख्या–आसनं, शयनं, यानं, वित्तं** द्रव्यं, **कामान्** मनोऽन्यान् शब्दादीन् **भुक्त्वा**, दुःखेनात्मपरदुःखकरणेनाहृतमुपार्जितं **दुःखाहृतं**, यद्वा दुःखेन संह्रियते मील्यते स्मेति **दुःसंहृतं**, **धनं हित्वा** आसनाद्युपभोगेन द्यूताद्यऽसद्व्ययेन च त्यक्त्वा, तथा मिथ्यात्वाद्यै**र्बहु** प्रभूतं **सञ्चित्यो**पार्ज्य, **रजो**ऽष्टप्रकारं कर्म ॥८॥

Jain Education International 2010_02		For Private & Personal Use Only		www.jainelibrary.org

**तओ कम्मगुरू जंतू, पच्चुप्पण्णपरायणे ।**
**अय व्व आगयाएसे, मरणंतंमि सोयइ ॥९॥**

**व्याख्या—ततो** रजःसञ्चयात्तको वा सञ्चितरजाः, कर्मणा गुरुरधोगामितया **कर्म-गुरुर्जन्तुः, प्रत्युत्पन्नं** वर्त्तमानं, **तस्मिन् परायण**स्तन्निष्ठः "**एतावानेव लोकोऽयं । यावा-निन्द्रियगोचरः**" [ ष.स.८१ ] इति **नास्तिकमता**नुसारितया परलोकनिरपेक्षः, **अज इव** उरभ्र इवा**गते आदेशे** प्राघूर्णके **मरणान्ते शोचते,** धिग्मां विषयव्यामोहार्जितगुरुकर्माणं, हा क्वेदानीं गन्तव्यं ! इत्यादिप्रलापान्नास्तिकस्यापि प्रायस्तदा शोकसम्भवात् । इत्यैहिकापाय उक्तः ॥९॥

पारलौकिकापायमाह—

**तओ आउपरिक्खीणे, चुत्तो( चुआ ) देहा विहिंसगा ।**
**आसुरियं दिसं बाला, गच्छंति अवसा तमं ॥१०॥**

**व्याख्या—ततः** शोचनानन्तरं **आयुषि परिक्षीणे, च्युतो** भ्रष्टो देहात् (पाठान्तरे-'चुआ देहा') **च्युतदेह**श्च्युतशरीरो **विहिंसको** विविधप्राणघाती, असुराणां रौद्रकर्मकारिणां इय**मासुरी तां दिशं** नरकगतिं **बालो**ऽज्ञो **गच्छति, अवशः** कर्मपरवशः, तमोयुक्त-त्वा**त्तमोरूपां,** सर्वत्र बहुवचनं व्याप्त्यर्थं, यथा नैक एवंविधः, किन्तु बहवः ॥१०॥

उक्त उरभ्रदृष्टान्तो भोगविपद्वाची, अथ काकिण्याम्रदृष्टान्तौ भोगतुच्छताल्पकालताज्ञप्त्यै—

**जहा कागिणीए हेउं, सहस्सं हारए नरो ।**
**अपत्थं अंबगं भुच्चा, राया रज्जं तु हारए ॥११॥**

**व्याख्या—यथा काकिण्या** रूपकाशीतितमभागरूपाया **हेतोः सहस्रं** कार्षापणानां **हारयेन्नरः, अत्र दृष्टान्तः**—यथैकेन द्रमकेण भिक्षां कृत्वा कार्षापणानां सहस्रमर्जयित्वा स्वगृहाय प्रस्थितेन शम्बलार्थं एकरूप्यकस्य काकिणीः कृत्वा दिने दिने भुञ्जताऽन्यदा मार्गे क्वापि एका काकिणी विस्मारिता । सार्थे प्रस्थिते सति मार्गे यान् स तां स्मृत्वा दध्यौ, मा मे रूपकान्तरभेदो भूयादिति कार्षापणवासनिकामेकान्ते सङ्गोप्य स काकिण्यर्थं निर्वृत्तः, काकिणी त्वेनन न लब्धा, पश्चादागतेन वासनिकापि केनापि हृता दृष्टा । एवं स उभयभ्रष्टो गृहेत्वा क्षुधा पीड्यमानो जनैश्च परिभूयमानोऽशोचत । एष काकिणीदृष्टान्तः । तथा **अपथ्यम**हित**माम्रफलं भुक्त्वा राजा, तुः** एवार्थे **राज्यं अहारयदेव । तत्कथेयं—** राज्ञोऽत्याम्रप्रियस्याम्राजीर्णेन विसूचिका जाता । महावैद्यैर्महता यत्नेन राजा पटूकृत्वोक्तः, आम्रभक्षणेन त्वं मरिष्यसि, राज्ञा स्वदेशे सर्वमाम्रवनमुच्छेदितम् । अन्यदा साऽमात्यो

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

राजाऽश्वहृतोऽटव्यां गतः, आम्रच्छायायां च विश्रान्तः, अध आम्राणि पतितानि दृष्ट्वाऽमात्येन वार्यमाणोऽपि ततफलं करे धृत्वा परामृशन् जिघ्रन्नास्ये क्षिप्त्वाऽगिलत्, मृतश्चेत्याम्रदृष्टान्तः ।

अथ दृष्टान्ते दार्ष्टान्तिकं योजयति–

**एवं माणुस्सगा कामा, देवकामाण अंतिए ।**
**सहस्सगुणिया भुज्जो, आउं कामा य दिव्विया ॥१२॥**

**व्याख्या–एवं** काकिण्यम्रकसदृशा **मानुष्यकाः कामा** विषयाः, **देवकामानां अन्तिके** सहस्रगुणकारगुणिताः **सहस्रगुणिता भूयो** बहून् वारान् मनुष्यायुःकामापेक्षया, **आयुर्**देवभवस्थितिः, **कामाश्च**शब्दाद्याः, **दिव्यका** देवभवभवाः, देवभोगानां भूयस्त्वं सूचयता कार्षपणसहस्रराज्यतुल्यतोक्ता ॥१२॥

नृकामानामेव काकिण्याम्रफलोपमां भावयति–

**अणेगवासाणिजुया( नउया ), जा सा पन्नवओ ट्ठिई ।**
**जाइं जीयंति दुम्मेहा, ऊणे वाससयाउए ॥१३॥**

**व्याख्या**–अनेकानि बहूनि तानि चेहाऽसङ्ख्येयानि वर्षाणां नयुतानि सङ्ख्याविशेषा वर्षनयुतान्य**नेकानि च तानि वर्षनयुतानि** । 'स्वरोऽन्योऽन्यस्य' इति प्राकृतलक्षणात् सकाराकारदीर्घत्वं, एवमन्यत्रापि स्वरान्यत्वं ज्ञेयं, पुंस्त्वमपि । पल्याः सागराः, तत्र चतुरशीतिवर्षलक्षाः पूर्वाङ्गं, तच्च पूर्वाङ्गेन गुणितं पूर्वपूर्वम्, चतुरशीतिलक्षाहत नयुताङ्गं, चतुरशीतिलक्षाहतं च नयुतं ज्ञेयं । **या से**ति प्रज्ञापकः, शिष्यान् प्रत्येवमाह–**प्रकृष्टं** क्रियायुक्तत्वाद् ज्ञानं प्रज्ञा, तद्वतः **प्रज्ञावतः स्थिति**र्युक्तिर्देवभवे देवायुर्दिव्यकामाश्च । सा वो नश्च ज्ञातैव । **यानि** अनेकवर्षनयुतानि दिव्यस्थितिदिव्यकामविषयभूतानि, 'जीयंति' इति **हारयन्ति,** तदपि ज्ञातमेव, तद्धेत्वनुष्ठानाऽकरणात् । **दुर्मेधसो** विषयैर्जिता जीवा **ऊने वर्षशतायुषि,** श्री**वीर**शासने **वर्षशतायुष** एव जन्तवः, इतीत्थमुपन्यासः, प्रभूते ह्यायुषि एकदा हारितान्यपि पुनर्जायेरन्, अस्मिंस्तु सङ्क्षिप्तायुषि एकदा हारितानि हारितान्येव । भावार्थोऽयं–मर्त्त्याभोगाः काकिण्याम्राभाः, सुराणामायुर्विषयाश्च कार्षापणसहस्रराजतुल्याः । यद्वा द्रमको राजा च काकिण्यम्रफलकृते कार्षापणसहस्रं राज्यं च हारितवानेवमेतेऽपि दुर्मेधसोऽल्पतरमनुष्यायुःकामार्थे प्रभूतान् देवायुःकामान् हारयन्ति ॥१३॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्यवहारदृष्टान्तमाह—

**जहा य तिन्नि वणिया, मूलं घेत्तूण निग्गया ।**
**एगो त्थ लब्भइ लाभं, एगो मूलेण आगओ ॥१४॥**

**व्याख्या—यथा त्रयो वणिजो मूलं** मूलराशिं **गृहीत्वा** स्वस्थानात् स्थानान्तरं **निर्गताः**, तत्र गतानामे**मेको** वणिक् कलाज्ञोऽत्रैतेषु मध्ये **लभते लाभं** विशिष्टद्रव्योपार्जनं, **एको** द्वितीयो न दक्षो नाऽदक्षो **मूलधनेनैवागतः** स्वस्थानम् ॥१४॥

**एगो मूलं पि हारित्ता, आगओ तत्थ वाणिओ ।**
**ववहारे उवमा एसा, एवं धम्मे विजाणह ॥१५॥**

**व्याख्या**—एकस्तृतीयो द्यूतमद्याद्यासक्तो व्यवसायमकुर्वन् **मूलं** नीवीमपि **हारयित्वा**ऽगतः स्वस्थानम् ।

**कथेयं**—एकस्य वणिजस्त्रयः पुत्रास्तेन तेषां सहस्रं सहस्रं कार्षापणानां दत्तं, उक्ताश्चैतावता द्रव्येण व्यवहृत्येयता कालेनैतव्यं । तेऽपि तन्मूलं लात्वा स्वपुरान्निर्गताः, पृथक् पृथक् पत्तनेषु स्थिताः, तत्रैको भोजनाच्छादनस्तोकव्ययो निर्द्यूतमद्यमांसवेश्यादिव्यसनो युक्त्या व्यवहरन् धनं लाभं लेभे । द्वितीयस्तु मूलमक्षिपन् लाभं भोजनाच्छादनमाल्यभूषादिषु भुङ्क्ते, न चाऽत्यादरेण व्यवहरते । तृतीयस्तु न किञ्चिद् व्यवहरन् द्यूतमांसवेश्यागन्धमाल्यताम्बूलशरीरसत्क्रियाभिरल्पेनापि कालेन द्रव्यं क्षपितवान् । त्रयोऽपि यथावधिकाले स्वपुरमेताः, तत्र यश्छिन्नमूलः स पितृभ्यां गृहान्निष्कासितो जननिन्द्यः प्रेष्य एव जातः, द्वितीयो गृहव्यापारे नियुक्तो भक्तमात्रसन्तुष्टोऽभूत्, न प्रतिष्ठार्हपुण्यकृत्यमुख्याधिकारी । इतरस्तु गृहसर्वेशो जातो राजमान्यश्च बन्धुयुग् मोदते । केऽप्याहुस्त्रयो वणिजः प्रत्येकं प्रत्येकं व्यवहरन्ते, तत्रैकश्छिन्नमूलः प्रेष्यत्वं गतः, केन वा व्यवहरते ? अच्छिन्नमूलः पुनरपि वाणिज्ये याति, इतरो बन्धुयुग् मोदते ।

**एष व्यवहारविषयोपमादृष्टान्तः**, एषां **एवं** वक्ष्यमाणन्यायेन **धर्माधर्मविषयामेनामुपमां विजानीत** ! ॥१५॥

यथा—

**माणुसत्तं भवे मूलं, लाभो देवगईभवे ।**
**मूलच्छेएण जीवाणं, नरग-तिरिक्खत्तणं धुवं ॥१६॥**

**व्याख्या—मानुषत्वं भवेन्मूलं** स्वर्गापवर्गात्मकोत्तरोत्तरफलहेतुतया, तथा **लाभो**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

मनुजगत्यपेक्षया विषयसुखादिभिर्विशिष्टत्वा**द्देवगति**रूपो **भवेत्, मूलच्छेदेन** मानुषत्वगतिहान्या **जीवानां नरकत्वं तिर्यक्त्वं ध्रुवं** स्यात् ॥

अयं भावः—त्रयः संसारिणः सत्वा नृत्वं प्राप्ताः, तत्रैको माद्दवार्जवादिगुणाढ्यो मध्यमारम्भपरिग्रहयुक्तो मृत्वा नीवीधनवद्वणिग्वत्तदेव नृत्वं लेभे। द्वितीयः सम्यग्दर्शनचारित्रगुणेषु स्थितः सरागसंयमेन लब्धलाभवणिग्वद्देवेषूत्पन्नः, तृतीयः **'हिंसे बाले मुसावाइ'** इत्याद्यैः पूर्वोक्तैः सावद्ययोगैर्वर्त्तित्वा छिन्नमूलवणिग्वन्नरकेषु तिर्यक्षु चोत्पन्नः ॥१६॥

मूलच्छेदमेव स्पष्टयति—

**दुहओ गइ बालस्स, आवई वहमूलिया ।**
**देवत्तं माणुसत्तं च, जं जिए लोलयासढे ॥१७॥**

**व्याख्या—द्विधा गति**र्नरकतिर्यग्गतिरूपा, **बालस्य** रागद्वेषाकुलस्य, 'आवइ'त्ति **आगच्छति,** वधः प्राणिवधः, उपलक्षणान्महारम्भपरिगृहाऽनृतभाषामायादयश्च, मूलं कारणं ययोर्गत्योस्ते **वधमूलिके,** यद्वा बालस्य द्विधा गतिः, तत्र गतस्यापत् स्यात्, सा कीदृशी ? **वधो** विनाशस्ताडनं वा **मूल**मादिर्यस्याः सा, मूलग्रहणच्छेदभेदातिभारारोपणादिग्रहः, लभन्ते हि जीवा नरकतिर्यक्षु विविधवधाद्यापदः, किमित्येवमत आह—**देवत्वं मानुषत्वं च यद्यस्माज्जितो** हारित, लोलता पिशितादिलाम्पट्यं, तद्योगाज्जन्तुरपि लोलतेत्युक्तः, शाठ्ययोगाच्छठो विश्वस्तजनवञ्चकः, ततो लोलता चासौ शठश्च **लोलताशठः,** लोलता पञ्चेन्द्रियवधादीनां नरकस्य च हेतुः, उक्तं च—"**महारंभयाए महापरिग्गहयाए कुणिमाहारेणं पञ्चेन्दियवहेणं जीवा निरयाउयं नियच्छंति**" [ ] । शठ इत्यनेन तु शाठ्यमुक्तं, तच्च तिर्यग्गतिहेतुः, यतः—"**चउहिं ठाणेहिं जीवा तिरियाउयं पकरंति माइल्लयाए नियडिल्लयाए अलियवयणेणं कूडतुलकूडमाणेणं**" [ ], माया छद्मनिकृतिर्दोषाच्छादनम् ॥१७॥

मूललाभभूतयोर्नृत्वदेवत्वयोर्हारणात् पुनर्मूलच्छेदमेव समर्थयति—

**तओ जिए सया होइ, विविहं दुग्गइं गए ।**
**दुल्लहा तस्स उम्मग्गा, अद्धाए सुचिरादवि ॥१८॥**

**व्याख्या—ततो** देवत्वनृत्वहारणात् **तको** वा बालो **जित** एव **सदा स्यात्, द्विविधां** नरकतिर्यग्भेदां **दुर्गतिं गतः,** ततः दुर्लभा तस्य देवनृत्वे हारितवत **उन्मज्या,** दुर्गतिनिर्गमनं, **अद्धायां** काले **सुचिरादपि** प्रभूतायामपि ॥१८॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

एवं मूलहारिणो युक्तिरुक्ता, मूलप्रवेशिनो युक्तिमथाह—

**एवं जियं सपेहाए, तुलिया बालं च पंडियं ।**
**मूलियं ते पवेसिंति, माणुसं जोणिमिंति जे ॥१९॥**

**व्याख्या—एवं जितं** लोलतया शाठ्येन देवत्वमनुजत्वे हारितं **बालं सम्प्रेक्ष्य** सम्यगालोच्य, **तोलयित्वा** दोषगुणवत्तया परिभाव्य **पण्डितम**लोलमशठं च नृदेव-गतिगामिनं, जितमिति बालस्य विशेषणं, न तु पण्डितस्य, स भवात् **मूलिकं** मूलिधनं, **ते** मूलप्रवेशकवणिक्सदृशाः **प्रविशन्ति [ ये ]मानुषीं योनिमायान्ति**, बालत्वं त्यक्त्वा पण्डितत्वसेवनात् ॥१९॥

यथा—

**वेमायाहिं सिक्खाहिं, जे नरा गिहिसुव्वया ।**
**उविंति माणुसं जोणिं, कम्मसच्चा हु पाणिणो ॥२०॥**

**व्याख्या**—विविधा मात्राः परिणामा यासां ताभि**र्विमात्राभि**र्विविधपरिणामाभिः **शिक्षाभिः**, प्रकृतिभद्रकत्वादेरभ्यासरूपाभिः, उक्तं च—"**चउहिं ठाणेहिं जीवा मणुयाउयं बंधंति, तं जहा—पगइभद्दयाए, पगइविणीयपाए, साणुक्कोसयाए, अमच्छरियाइ**" [  ] त्ति । **ये नरा गृहिसुव्रता** गृहित्वे धृतसत्पुरुषव्रताः, न त्वणुव्रतादिधराः, व्रतसम्यक्त्वा-दिवत्त्वे हि देवगतेरेव भावात् । यतो लोका अप्याहुः—

**विपद्युच्चैः स्थेयं पदमनुविधेयं च महतां,**
**प्रिया न्याय्या वृत्तिर्मलिनमसुभङ्गेऽप्यसुकरं ।**
**अनुत्सेको लक्ष्म्याः सुहृदपि न याच्यः कृशधनः,**
**सतां केनोद्दिष्टं विषममसिधाराव्रतमिदम् ॥१॥ [  ]**

तथागमोक्तव्रतधारणस्य देवगतिहेतुत्वात् । ते **उपयान्ति मानुषीं योनिं, कर्मसत्या** सत्य-मनोवाक्कायकर्त्तव्यता, **हुः** यस्मात्, यद्वा सत्यान्यवन्ध्यफलानि कर्माणि ज्ञानावरणादीनि येषां ते **सत्यकर्माणः**, सूत्रत्वाद् व्यत्ययः, **प्राणिनः**, निरुपमकर्मापेक्षं चैतत् ॥२०॥

लब्धलाभनृयुक्तिमाह—

**जेसिं तु विउला सिक्खा, मूलिअं ते अइच्छिया ।**
**सीलवंता सविसेसा, अदीणा जंति देवयं ॥२१॥**

**व्याख्या—येषां, तुः** एवार्थे, **विपुला**, निःशङ्कितत्वादिसम्यगणुव्रतमहाव्रतादि-

Jain Education International 2010_02          For Private & Personal Use Only          www.jainelibrary.org

विषयत्वेन विस्तीर्णा **शिक्षा** ग्रहणासेवनात्मिकाऽस्ति, **मौलिकमिव** नृत्वं **तेऽतिक्रान्ताः,** यद्वा **अतिक्रम्योल्लङ्घ्य** **शीलवन्तः** सदाचारा अणुव्रतमहाव्रतादिमन्तः सह विशेषेणोत्तरोत्तरगुणप्रतिपत्तिलक्षणेन वर्तन्त इति **सविशेषाः** अत एवाऽ**दीना** कथं वयमत्र भविष्याम इति वैक्लव्यरहिताः, परीषहोपसर्गादिसम्भवे वा अदैन्यभाजो **देवत्वं यान्ति,** महोपक्रमास्तु सिद्धिं यान्ति ॥२१॥

एतमर्थं निगमयति—

**एवमदीणवं भिक्खुं, अगारिं च विजाणिया ।**
**कहन्नु जिच्चमेलिक्खं जिच्चमाणो ण संविदे ? ॥२२॥**

**व्याख्या—एवं** लाभान्वित**मदीनवन्तं** अदीनं **भिक्षुं अगारिणं** वा, विशेषेण तथाविधशिक्षावशाद्देवनृगतिगामित्वेन **ज्ञात्वा** विज्ञाय यतमानो बुधः **कथं नु** इति वितर्के, 'जिच्चं'ति **जेयं** लभ्यं जेतव्यं **ईदृक्षं** देवनृगत्यात्मकं **जीयमानो** हार्यमाण इन्द्रियादिभि**र्न संवित्ते** ? संवित्त एव, जानीते । ज्ञपरिज्ञया प्रत्याख्यानपरिज्ञया च संविदानश्च यथा न जीयते तथा यतते, यदा त्वसौ विषयव्यामोहतो हार्यमाणमात्मानं न जानीते तदा नृदेवगतिकर्मभिर्जीयत एव । उक्तो भोगिनामायव्ययज्ञप्त्यै वणिग्दृष्टान्तस्तुर्यः ॥२२॥

अथ नृसुरसुखमानज्ञप्त्यै पञ्चमो दृष्टान्तः—

**जहा कुसग्गे उदगं, समुद्देण समं मिणे ।**
**एवं माणुस्सगा कामा, देवकामाण अंतिए ॥२३॥**

**व्याख्या—यथा कुशाग्रे** याव**दुदकं** तिष्ठति तत्कुशाग्रोदकं, **समुद्रेण समं मिनुयात्,** कोऽर्थः ? कोऽपि कुशाग्रबिन्दुं करे लात्वा मिनोति, नीरमानं कुर्यात् यत्समुद्र इयानेवास्ति नाऽधिकः, ततो यावद्दर्भाग्राब्धिजलयोरल्पबहुत्वं, **एवं मानुष्यकाः कामा देवकामानामन्ते**ऽन्तिके कृता अल्पबहुत्वे स्युः, यथा चान्यो जलबिन्दुमब्धिवन्मन्यते तथा रागी चक्र्यादिनृकामान् देवकामसमान् मन्यते । तत्त्वतस्तु कुशाग्रजलबिन्दोरिव जलधेर्नृकामानां दिव्यभोगेभ्यो महदेवान्तरम् ॥२३॥

उक्तमर्थं निगमयन्नुपदेशमाह—

**कुसग्गमित्ता इमे कामा, सन्निरुद्धंमि आउए ।**
**कस्स हेउं पुरा काउं, जोगक्खेमं न संविए ॥२४॥**

**व्याख्या—कुशाग्र**शब्देन कुशाग्रस्थो जलबिन्दुरुच्यते, **तन्मात्रा** इमे कामा

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

मनुष्यविषयाः **सन्निरुद्धे** सङ्क्षिप्ते **आयुषि** सन्ति । एवं मनुष्यायुषोऽल्पतया सोपक्रमतया वा कामानामल्पत्वमुक्तं ऋद्ध्यादेश्च । 'कस्स' **कं हेतुं** कारणं **पुरस्कृत्या**ऽऽश्रित्य **योगक्षेमं** अप्राप्तविशिष्टधर्मप्राप्तिः प्राप्तस्य च पालनं **न संवित्ते** न जानीते जन इति । तदसंवित्तौ हि विषयरागो हेतुः, देवत्वे तदाधिक्याद्विषयार्थिनापि तत्प्राप्तिकारी धर्म एव कार्यः ॥२४॥

इत्थं दृष्टान्तपञ्चकमुक्तं, **उरभ्र**दृष्टान्तेन भोगानामपायबहुलत्वं दर्शितं, अपायबहुलमपि यन्न तुच्छं तन्न त्यक्तुं शक्यं, इति **काकिण्याम्रफल**दृष्टान्ते तुच्छत्वं । तुच्छं च लाभच्छेद-व्यवहारज्ञतयाऽऽयव्ययतोलनावानेव हातुं शक्त इति **वणिग्व्यवहार**दृष्टान्तः । आयव्ययतोल-नाच्च **कुशाग्रसमुद्र**दृष्टान्तदृढता । तत्र दिव्यकामानां समुद्रजलोपमत्वमुक्तं, तथा च तदुपार्जनं महानायः, अनुपार्जनं च महाव्यय इति दर्शितम् ।

इह च योगक्षेमाऽसंवेदने कामाऽनिवृत्त एव स्यात्, तस्य दोषमाह—

**इह कामानियट्टस्स, अत्तट्ठे अवरज्झइ ।**
**सुच्चा णेयाउयं मग्गं, जं भुज्जो परिभस्सइ ॥२५॥**

**व्याख्या—इह** नृत्वेऽर्हन्मते वा **कामेभ्योऽनिवृत्तस्य आत्मार्थ** आत्मनः सुखादिहेतुरर्थः स्वर्गमोक्षादिर**पराध्यति** नश्यति । **यतः श्रुत्वा** प्रतिपद्य च **नैयायिकं मार्गं भूयः** पुनः **परिभ्रस्यति** कामाऽनिवृतः, जिनागमश्रवणात् कामनिवृत्तिं प्रपन्नोऽपि गुरुकर्मत्वात् प्रतिपतति, ये तु श्रुत्वापि न प्रसन्नाः, श्रवणं वा येषां नास्ति ते कामाऽनिवृत्ता एवेति भावः ॥२५॥

कामनिवृत्तस्य गुणमाह—

**इह कामनियट्टस्स, अत्तट्ठे नावरज्झइ ।**
**पूइदेहनिरोहेणं, भवे देवे त्ति मे सुयं ॥२६॥**

**व्याख्या—इह कामेभ्यो निवृत्तस्य आत्मार्थः** स्वर्गादिर्**नापराध्यति** न भ्रश्यति, कथं ? **पूतिः** क्वथितो **देह** औदारिकं शरीरं तस्य **निरोधेन** त्यागेन भवेत् कामनिवृत्तो **देवः** सिद्धो **वेति मया श्रुतं** गुरुभ्यः ॥२६॥

ततश्च

**इड्ढी जुइ जसो वण्णो, आउं सुहमणुत्तरं ।**
**जत्थ भुज्जो मणुस्सेसु, तत्थ से उववज्जइ ॥२७॥**

**व्याख्या—ऋद्धिः** स्वर्णादिः, **द्युति**र्देहस्य, **यशः** पराक्रमजं, **वर्णो** गाम्भीर्यादि-गुणैः श्लाघा, गौरत्वादिर्वा, **आयु**र्जीवितं, **सुखं** इष्टविषयाप्त्या, न विद्यते उत्तरं प्रधान-

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

मस्मादित्यनुत्तरं, अनुत्तरशब्दः सर्वत्र योज्यः, एतानि देवभवे लभते, तथा येषु मनुष्येषु भूय एतानि अनुत्तराणि **स्युस्तत्र स** स्वर्गादुत्पद्यते, कामाऽनिवृत्त्या यस्यात्मार्थोऽपराध्यति स बालः, इतरस्तु पण्डितः ॥२७॥

अथोपदेशमाह—

**बालस्स पस्स बालत्तं, अधम्मं पडिवज्जिया ।**
**चच्चा धम्मं अहम्मिट्ठे, नरएसु उववज्जई ॥२८॥**

**व्याख्या—बालस्या**ऽज्ञस्य **पश्य बालत्वं, अधर्मं** विषयासक्तिरूपं **प्रतिपद्या**-भिगम्य (पाठान्तरे—'**पडिवज्जिणो**' **प्रतिपादिनो**ऽवश्यं प्रतिपद्यमानस्य) **त्यक्त्वा धर्मं** विषयत्यागरूपं, **अधर्मिष्ठो**ऽसौ **नरके**ऽन्यत्र दुर्गतौ वा **उत्पद्यते** ॥२८॥

तथा—

**धीरस्स पस्स धीरत्तं, सव्वधम्माणुवत्तिणो ।**
**चच्चा अहम्मं धम्मिट्ठे, देवेसु उववज्जइ ॥२९॥**

**व्याख्या**—धिया राजते, परीषहाद्यक्षोभ्यो वा **धीरः, तस्य पश्य धीरत्वं** धीरभावं, सर्वं धर्मं क्षान्त्यादिरूपमनुवर्त्तते, तदनुकूलाचारतया स्वीकुरुते, इत्येवं शीलस्तस्य **सर्व-धर्मानुवर्त्तिनः**, स **त्यक्त्वाऽधर्मं** विषयरूपमसदाचारं **धर्मिष्ठः** सन् **देवेषूत्पद्यते** ॥२९॥

ततः—

**तुलियाण बालभावं, अबालं चेव पंडिए ।**
**चइऊण बालभावं, अबालं सेवई मुणी ॥३०॥ त्ति बेमि**

**व्याख्या—तोलयित्वा** अशुभशुभत्वेन विचार्य **बालभावं अबालं** अबालत्वं, **चः** समुच्चये, **एवे**ति प्राकृतत्वान्म्लोपे एवमनन्तरोक्तप्रकारेण **पण्डितस्त्यक्त्वा बालभावं अबालत्वं सेवते मुनिरिति** समाप्तौ **ब्रवीमी**ति प्राग्वत् ॥३०॥

**इत्यौरभ्रीयं सप्तममध्ययनमुक्तम् ॥७॥**

• • •

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

# अष्टमं कापिलीयाध्ययनम् ॥

विषयत्यागः प्रागुक्तः, स च निर्लोभस्य स्यादित्यष्टममलोभत्वस्थापनाय **कापिली-याध्ययनमाह–**

**कपिलात्** समुत्थितमिदमिति कापिलीयं । **ततः पूर्वम् कपिलकथा–कौशाम्ब्यां जितशत्रु**राजा, तत्र चतुर्दशविद्यावान् **काश्यपाख्यः** पुरोधा अभूत्, राज्ञा तस्याद्भुता-वृत्तिश्चक्रे, तस्य **यशा** भार्या, पुत्रः **कपिलो** जातः, **काश्यप**स्तदैव मृतः, तत्पट्टेऽन्यो द्विजोऽभूत्, सोऽश्वारूढश्छत्रे ध्रियमाणेऽन्वहं राजमार्गेऽयात् । तं भर्त्तुः पदे तथा दृष्ट्वा **यशा** प्रत्यहमरोदीत् । अन्यदा **कपिले**न सा रोदनहेतुं पृष्टोचे त्वत्पिता सर्वविद्यावानासीत्, त्वं तु मूर्खोऽभूरतस्त्वयि सत्यपि त्वत्पितुः पदमस्मै द्विजाय राज्ञा दत्तं । **कपिलो**ऽवक् अहमपि तर्हि सविद्यः स्यां, सोचे वत्सात्र त्वां मत्सरेण कोऽपि न शिक्षायिष्यति, परं **श्रावस्त्यां** त्वत्पितुर्मित्र**मिन्द्रदत्त** उपाध्यायोऽस्ति, तत्र गत्वाधीष्व ! स तत्राऽगत्, स्वोदन्तमुक्त्वा तत्पार्श्वेऽध्यैष्ट । तत्र **शालिभद्रे**भ्य उपाध्यायगिरा **कपिलं** भोजनाच्छाद-नाद्यैरप्रीणयत् । तस्येभ्यस्यैका दासी नित्यं तस्मै भोजनं परिवेषयति । क्रमेण स परिहासशीलस्तया सह लग्नः, सा तमूचे त्वं मे प्रियः, परं न त्वत्पार्श्वे किञ्चिदपि धनमस्ति, ततोऽहं वस्त्राद्यर्थमन्यैः सह चेद्रमे, तदा त्वं मा रोषीः, अन्यथाहं तवैव ।

अन्यदा दासी महे समासन्ने सा दासी निशि निद्रामलभमाना तेन पृष्टोचे दासी मह एति मम तु पुष्पपत्रादिकृते द्रव्यं नास्ति । त्वयाऽकिञ्चनेन भर्त्रा सखीनां मध्ये मम विगोपो भावी । अथ स तत्स्नेहेनाधृतिं कुर्वंस्तयोचेऽधृतिं मा कार्षीः, अत्र **धनो** नामा श्रेष्ठी प्रातः पूर्वम् वर्द्धापयितुः स्वर्णमाषद्वयं दत्ते, त्वं पाश्चात्यरात्रौ सवेलं गत्वा तं वर्द्धापय ! सा तदुक्त्या मा प्राक् तत्रान्यो यायादिति सवेलमुत्थाय दक्षिणायै यान् मार्गे राजनरैर-कालचारित्वाद्धृतो बद्ध्वा प्रातः **प्रसेनजिन्**नृपाग्रे नीतः, राज्ञा सा शान्त इव दृष्टः पृष्टो दास्युदन्तं यथास्थमूचे । ततो राज्ञा सत्यहृष्टेनोक्तं यत्त्वं वदसि तद्ददे, स्वेष्टं याचस्व ?

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

ओमित्युक्त्वा सोऽ**शोकवनिका**यामालोचयितुं गतो दध्यौ द्वादशरत्तिकारूपे माषद्वये स्वर्णे मार्गिते केवलं पुत्रपुष्पादि भावि, ततश्चतुरष्टौ षोडश वा तान् याचे तैश्चास्या मम च वासांसि कथं स्युरिति तच्छतं याचे । ते न चाभरणानि कथं स्युस्ततः सहस्रं याचे, तेन च भृत्ययानासनानि कथं स्युस्ततो लक्षं याचे । तेन च सौधोद्यानग्रामाकरदेशाश्वेभादि कथं स्यात्? ततः कोटिं याचे, एवं लोभाब्धौ विसर्पति सति स दध्यौ, यदहं विप्रः पाठायात्रैतो दास्यां च लुब्धो लोभाब्धौ पतितो नरकादिक्लेशमाप्स्ये, इति महासंवेगात्त्यक्तमानमाया-मोहममतामदमात्सर्यमन्मथादिभावः पञ्चमुष्टिकं लोचं कृत्वा सुरीदत्तवेषो राज्ञोऽग्रे एत्य स धर्मलाभं ददौ । राज्ञा तदसदृशं दृष्ट्वोचे भोः किमालोचि ? तेनोचे—

**जहा लाहो तहा लोहो, लाहा लोहो य वड्ढइ ।**
**दोमासकणयकज्जं, कोडीए वि न निट्ठियं ॥१॥** [ उत्त. अ. ८ / गा.१७ ]

राजा कोटिमपि ददामीत्युक्त्वा कोटिमानाय्योचे गृहाणे मां मुञ्च व्रतं ? तेनोचे प्राप्तसन्तोष-स्याद्य मे कोट्यापि न कार्यमिति श्रुत्वा राजाऽहो महर्षे ! त्वं दुष्करकारीत्यमुं प्रशशंस । स चैवं कोटिं त्यक्त्वा श्रमणोऽभूत् । षण्मासान् छद्मस्थः क्षपितकर्मा केवली विहरन् **श्रावस्तीराजगृह**पुरान्तरष्टादशयोजनमानाटव्यां स्थिता**मिक्कटदासा**ख्यया **बलभद्र**मुख्य-चौरपञ्चशतीं पूर्वसङ्गतिकां बोधार्हां ज्ञात्वा तत्र गतः, चौरैर्दृष्ट्वा हेरिकोऽयमिति रुष्टैर्धृत्वा स निजसेनापतिपार्श्वे नीतः, तेनोचे मुञ्चत मुनिमेतं, तैरूचे खेलामोऽनेनेति चौरैरूचे साधो! नृत्य ? सोऽवक् वादको युज्यते । तदा ते सर्वे तालानकुट्टयन्त । **कपिलो** भगवांश्च ध्रुवकमगायत्—

**अधुवे असासयंमि, संसारंमि दुक्खपउराए ।**
**किं नाम हुज्ज तं कम्मयं, जेणाहं दुग्गइं न गच्छिज्जा ॥१॥**

**व्याख्या**—एतं ध्रुवकं सर्वत्र श्लोकान्तरे सोऽगायत्, ध्रुवकलक्षणं तु

**जं गिज्जइ पुव्वं चिय, पुणो पुणो सव्वकव्वबन्धेसु ।**
**धुवयं ति तमिह तिविहं, छप्पायं चउप्पयं दुपयं ॥१॥** [ उ. ८।१ बृ.वृ. ]

अत्र केचिच्चौराः प्रथमश्लोकेन प्रबुद्धाः प्राव्रजन्, केऽपि द्वितीयगाथया, केऽपि तृतीयया, यावत्पञ्चशतान्यबुद्ध्यन्त । ध्रुवकव्याख्या चेत्थं—ध्रुव एकास्पदप्रतिबद्धो, न तथा, तस्मिन्**नध्रुवे**, क्षेत्रतो नवनवक्षेत्रस्पर्शित्वादस्थिरे, एवम**प्यशाश्वते** कालतोऽप्यनित्ये, शश्वद्भवनाच्छास्वतो, न तथाऽशाश्वतस्तस्मिन्, अशाश्वतं हि राज्यादि, यतः—

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**चलं राज्यैश्वर्यं धनकनकसारः परिजनो,**
**नृपाद्वाल्लभ्यं वा चलममरसौख्यं च विपुलं ।**
**बलं रूपारोग्यं चलमिह चरं जीवितमिदं,**
**जनो दृष्टो यो वै जनयति सुखं सोऽपि हि चलः ॥१॥** [ हरिलवाचकः ]

इदृशे **संसारे** 'दुक्खपउराए' **दुःखप्रचुरे** प्रचुराणि शारीरमानसानि दुःखानि यत्र, प्राकृतत्वात् प्रचुरदुःखे, यद्वा दुःखानां प्रचुर आयो लाभो यस्मिन् तस्मिन् **दुःखप्रचुराये, किमिति** प्रश्ने, **नामे**ति च सम्भावने भवेत् । **तत्कर्म** किमनुष्ठानं ? **येन** कर्मणाऽ**हं दुर्गतिं** नरकादिकां **न गच्छेयं** । भगवतोऽसंशयेऽपि दुर्गत्यभावेन चौरापेक्षयेत्थमुक्तं । (पाठान्तरे-**जेणाहं दुग्गइओ मुच्चेज्जा**) इति । **नागार्जुनीया**स्त्वाद्यपादमित्थं पठन्ति–'**अधुवम्मि मोहगहणाए' मोहेन** दर्शनमोहनीयेन **गहने** इति ॥१॥

चौरैस्तालकुट्टनपूर्वकं ध्रुवकेऽस्मिन् प्रत्युद्गीते मुनिस्तत्कर्मैव ध्रुवकेणाह–

**विजहितु पुव्वसंजोगं, न सिणेहं कहिंचि कुव्विज्जा ।**
**असिणेह सिणेहकरेहिं, दोसपओसेहि मुच्चए भिक्खू ॥२॥**

**व्याख्या–विहाय** विशेषेण पुनःस्मरणादिना हित्वा त्यक्त्वा **पूर्वसंयोगं** पुरापरिचितमातृपित्रादिस्वजनधनादेः संयोगं सम्बन्धं, **न स्नेहं क्वचिद्वा**ह्येऽभ्यन्तरे वा वस्तुनि **कुर्वीत, अस्नेहः** स्नेहरहितः, अपेर्गम्यत्वात् **स्नेहकारेष्वपि** स्नेहकरणशीलेषु पुत्रादिष्वपि, आस्तामन्यार्थेषु, **दोषै**रतिचारैरिह मनस्तापाद्यैः **प्रदोषैः** परत्र नरकगत्याद्यै**र्मुच्यते भिक्षुः** ॥२॥

यत् स्वयं चक्रे तदाह–

**तो नाणदंसणसमग्गो, हियनिस्सेसाए य सव्वजीवाणं ।**
**तेसिं विमोक्खणट्ठाए, भासइ मुणिवरो विगयमोहो ॥३॥**

**व्याख्या–ततो**ऽनन्तरं भाषते मुनिवरः, विशेषावबोधो ज्ञानं, सामान्यबोधो दर्शनं, ताभ्यां केवलाभ्यां समग्रः समन्वितो, यद्वा समग्रे पूर्णे ज्ञानदर्शने यस्यासौ **ज्ञानदर्शनसमग्रः**, हितः प्रियो निःश्रेयसो मोक्षो **हितनिःश्रेयसस्तदर्थं,** यद्वा प्राकृतत्वान्निः**शेषहिताय** सर्वजीवानां, **चः** भिन्नक्रमः, **तेषां** च चौराणां तानेवोद्दिश्य भगवत्प्रवृत्तेः, **विमोक्षणार्थाय** अष्टविधकर्मपृथक्करणहेतवे **भाषते,** वर्त्तमाननिर्देशस्तस्मिन् काले मुनिवरो विगतमोहश्चारित्रमोहनीयाऽभावात्, यथाख्यातचारित्री ॥३॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

यथा—

**सव्वं गंथं कलहं च, विप्पजहे तहाविहं भिक्खू ।**
**सव्वेसु कामजाएसु, पासमाणो न लिप्पई ताई ॥४॥**

**व्याख्या—सर्वमशेषं ग्रन्थं** बाह्यमभ्यन्तरं धनमिथ्यात्वादिकलहहेतुत्वात्, **कलहं** क्रोधं, **चात्** मानादींश्च, **विप्रजह्यात्** त्यजेत् । अभ्यन्तरग्रन्थरूपत्वेऽप्येषां बहुदोषज्ञप्त्यै पृथग्ग्रहणं, **तथाविधं** कर्मबन्धहेतुं, न तु धर्मोपकरणमपि । तथाविधो **भिक्षुरिति सर्वेषु कामजातेषु** शब्दादिविषयप्रकारेषु **पश्यन्** विपाककटुतादोषजातं, इति **न लिप्यते** कर्मणा, तायते त्रायते वा दुर्गतेरात्मानं सर्वप्राणिनो वा, **तायी त्रायी** वा ।

ग्रन्थत्यागे गुणमुक्त्वाऽन्यथा दोषमाह—

**भोगामिसदोसविसन्ने, हियनिस्सेयसबुद्धिवुच्चत्थे ।**
**बाले य मंदिए मूढे, बज्झइ मच्छिया व खेलंमि ॥५॥**

**व्याख्या**—भोगा एव गृद्धिहेतुत्वादामिषं, तदेवात्मदूषणाद्दोषस्तत्र विशेषेण सन्नो निमग्नः, **भोगामिषदोषविषन्नः, हितं** स्वहितं **निश्रेयसो** मोक्ष**स्तयोर्बुद्ध्या विपर्यस्तो** विमुखः, यद्वा विपर्यस्ता हिते निःशेषा बुद्धिर्यस्य स **हितनिःशेषबुद्धिविपर्यस्तः, बालो**ऽज्ञः, **मन्दो** धर्माऽनुद्यतः, **मूढो** मोहाकुलचित्तो **बद्ध्यते** कर्मणा, **मक्षिकेव खेले** श्लेष्मणि, यथा सा स्निग्धतागन्धादिभिराकृष्यमाणा श्लेष्मणि मज्जति, मग्ना च रेण्वादिना बद्ध्यते, एवं जन्तुर्भोगामिषे निमग्नः कर्मणा बद्ध्यते ॥५॥

भोगानां प्रायो दुस्त्यजत्वमाह—

**दुपरिच्चया इमे कामा, णो सुजहा अधीरपुरिसेहिं ।**
**अह संति सुव्वया साहू, जे तरंति अतरं वणिया वा ॥६॥**

**व्याख्या**—दुःखेन परित्यज्यन्ते इति **दुःपरित्यजा इमे** प्रत्यक्षाः **कामाः** संसारिणां, तत्रापि नैव 'सुजहा' **न सुहानाः** सुखत्यजाः, विषसंपृक्तमधुरान्नवद**ऽधीरपुरुषै**रबुद्धैर-सत्त्वैर्वा, पुरुषग्रहणं तु तेऽल्पवेदोदयात् सुखेनैव त्यक्तारः स्युस्तैरप्यमी न सुखेन त्यज्यन्ते, आस्तामतिघोरस्त्रीपङ्ककवेदोदयिभिः स्त्रीक्लीबैः, धीरैस्तु सुत्याज्याः । यच्चेह दुःपरित्यजा इमे इत्युक्त्वा पुनर्न सुहाना इत्युक्तं सा न पुनरुक्ति, विशेषद्योतकत्वात् । **अथ** पुनः **सन्ति** शोभनानि सम्यग्ज्ञानित्वेन व्रतानि हिंसाविरत्यादीनि येषां ते **सुव्रताः**, यद्वा शान्त्योपलक्षिताः

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**शान्तिसुव्रता** इह सन्ति, साधयन्ति पौरुषेयीभिः क्रियाभिर्मुक्तिमिति **साधवः, ये तरन्ति अतरं** तरणाऽशक्यं विषयौघं भवं वा, यतः—

**विषयगणः कापुरुषं, करोति वशवर्त्तिनं न सत्पुरुषं ।**
**बध्नाति मशकमेव हि, लूतातन्तुर्न मातङ्गं ॥१॥ [ ]**

**वणिज इव,** यथा वणिजः पोतेनाब्धिं तरन्ति तथा ॥६॥

किं सर्वर्षयोऽतरं तरन्त्यथवा नेत्याह—

**समणा मु एगे वयमाणा, पाणवहं मिया अयाणंता ।**
**मंदा नरयं गच्छंति, बाला पावियाहिं दिट्ठीहिं ॥७॥**

**व्याख्या**—श्राम्यन्ति मुक्त्यै इति **श्रमणाः स्मो** वयं, इत्ये**के**ऽन्यतीर्थ्या इति **वदमानाः**, 'दीप्तिर्ज्ञानं यत्र विमत्यपसम्भाषोपमन्त्रणे वद इत्यात्मनेपदं', प्राणिवधं, मृगा इवाऽज्ञाः **अजानन्तो** ज्ञपरिज्ञया, के प्राणिनः ? के वा तेषां प्राणाः ? कथं वा वध्यः ? इत्यनवबुध्यमानाः, प्रत्याख्यानपरिज्ञया च तद्वधमप्रत्याचक्षाणा इति । अनेन आद्यव्रतमपि ते न विदन्ति, आस्तां तर्हि शेषव्रतानि, मन्दा इव **मन्दा** मिथ्यात्वमहारोगा **नरकं गच्छन्ति, बाला** हेयोपादेयविवेकरहिताः, प्रापयन्ति नरकमिति **प्रापिकाभिः**, "**न हिंस्यात् सर्वभूतानि**" [ ] इत्याद्यभिधाय, "**श्वेतं छागमालभेत वायव्यां दिशि भूतिकामः,**" [ ] इत्यादिपरस्परविरुद्धाभिः पापहेतु**दृष्टिभि**रदर्शनवन्तः, तथा "**ब्रह्मणे ब्राह्मणमालभेत, इन्द्राय क्षत्रं, मरुद्भयो वैश्यं, तपसे शूद्रम्**" [ ] । तथा—

**यस्य बुद्धिर्न लिप्येत, हत्वा सर्वमिदं जगत् ।**
**आकाशमिव पङ्केन, नासौ पापेन लिप्यते ॥१॥ [ ]**

इत्यादिभिर्दयादमबाह्याभिश्च, तद्बहिःकृतानां वल्कलादिधारिणामपि न केनचित् पापात् परित्राणं । यतः—

**चर्मवल्कलचीराणि, कूर्चमुण्डजटाः शिखाः ।**
**न व्यपोहन्ति पापानि, शोधकौ न दयादमौ ॥७॥ [ ]**

अत एवाह—

**न हु पाणवहं अणुजाणे, मुच्चेज्ज कयावि सव्वदुक्खाणं ।**
**एवमारिएहिं अक्खायं, जेहिं इमो साहुधम्मो पण्णत्तो ॥८॥**

**व्याख्या—नैव प्राणिवधं** मृषावादादि च, अपेर्गम्यत्वात् **अनुजानन्नपि**, आस्तां

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

कुर्वन् कारयन् वा **मुच्यते, कदाचित्** कस्मिंश्चिदपि काले, कैः **सर्वदुखैः** शारीरमानसैः, तृतीयार्थे षष्ठी । ततः प्राणातिपातनिवृत्ता एव श्रमणाः, त एव च तरन्तीत्युक्तं स्यात् । गर्वत्यागायाह—**एवमार्यै**रर्हद्भिराचार्यै**र्वाख्यात**मुक्तं, **यैरयं** मयि प्रत्यक्षं वर्त्तमानः **साधुधर्मो** हिंसाविरत्यादिरूपः **प्रज्ञप्तः** प्ररूपितो वा ॥८॥

साधुधर्ममेवाह—

**पाणे य नाइवाएज्जा, से समिय त्ति वुच्चइ ताइ ।**
**तओ से पावयं कम्मं, निज्जाइ उदयं व थलाओ ॥९॥**

**व्याख्या—प्राणा**निन्द्रियोच्छ्वासादी**न्नाऽतिपातयेत्, चात्** कारणानुमत्योरपि निषेधः, मृषाद्युपलक्षणं चैतत् । यः प्राणान्नातिपातयेत् **स समितः** समितिवानित्युच्यते । **तायी** रक्षकः प्राणिनां, ततः समितात्, 'से' **अथार्थे, पापकं** कर्म निर्याति । (पाठान्तरे 'निण्णाइ'त्ति देश्युक्त्या **अधो याति** ।) **उदकमिव,** यथोदकं **स्थलादु**च्चभूमेरधो याति ॥९॥

प्राणातिपातविरतिं स्पष्टयति—

**जगनिस्सिएहिं भूएहिं, तसनामेहिं थावरेहिं च ।**
**नो तेसिमारभे दंडं, मणसा वयसा कायसा चेव ॥१०॥**

**व्याख्या—जगल्लोकस्तन्निश्रितेषु** तदाश्रितेषु **भूतेषु त्रसनामसु** त्रसनामकर्मोदयतो द्वीन्द्रियादिषु तथा **स्थावरेषु,** स्थावरनामोदयात् पृथ्व्यादिषु **चः** समुच्चये **नो तेषु दण्डं** वध**मारभेत** कुर्यात्, **मनसा वचसा कायसा** चार्षत्वात् कायेन **च**शब्दो भङ्गोपलक्षकः, तेन नारम्भयेत्, न चारभमाणानप्यन्याननुमन्येत । **एवा**वधारणे ।

[पाठान्तरं-**जगनिस्सियाणं भूयाणं, तसाणं थावराण य ।**
**नो तेसिमारभे दंडं, मणसा वयसा कायसा ॥१॥**]

गतार्थमेव । **न तेष्वारभेत दण्डम्** ।

**अत्रावन्तीश्राद्धपुत्रदृष्टान्तः—अवन्त्यां** श्राद्धसुतश्चौरैर्हृत्वा **मालवके** राट्सूपकारहस्ते विक्रीतः, तेन लावकादीन्यमारयेत्युक्तेऽमारयंश्चपेटया हतस्तथाऽप्यमारयन् गाढं कुट्यमान आरटन् राज्ञा श्रुत्वाऽऽकारित उक्तश्च, रे किं न जीवान् हंसि ? सोऽवक् अहो अहं श्राद्धो न हन्मि, ततो राज्ञा बलात् प्रेर्यमाणो जीवानघ्नन् हस्त्यग्रे क्षिप्तोऽपि नाऽहन् । ततः प्रसन्नो राजा तं स्वाङ्गरक्षकं चकार । यथा स मारेऽपि न मनोऽपि वधेऽकार्षीदेवं प्राणत्यागेऽपि अन्यैर्यत् ॥१०॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

उक्ता मूलगुणाः, अथोत्तरगुणा वाच्याः, तेष्वप्येषणासमितिः प्रधानेति तामाह–

**सुद्धेसणाओ नच्चा णं, तत्थ ठवेज्ज भिक्खू अप्पाणं ।**
**जायाए घासमेसिज्जा, रसगिद्धे ण सिया भिक्खाए ॥११॥**

**व्याख्या**–शुद्धिमत्यो निर्दोषाः **शुद्धैषणाः** सप्त संसृष्टाद्याः, ताश्च–

**संसट्ठमसंसट्ठा, उद्धड तह अप्पलेवडा चेव ।**
**उग्गहिया पग्गहिया, उज्झियधम्मा य सत्तमिया ॥१॥ [ सं.प्र.गा.७८३ ]**

**ज्ञात्वा तत्रैषणासु स्थापयेन्निवेशयेद्भिक्षुरात्मानं** । जिनकल्पे पञ्च शुद्धैषणा उदाहृताः स्थविरकल्पे पुरःपश्चात्कर्महीनाः सप्त । **यात्रायै** संयमनिर्वाहार्थं **ग्रासमेषयेत्** ।

**जह सगडक्खोवंगो, कीरइ भरवहणकारणा न वरं ।**
**तह गुणभरवहणत्थं, आहारो बंभयारीणां ॥१॥ [ गा.स./३५६ ]**

शुद्धमादाय ग्रासविधिमाह–**रसेषु** स्निग्धमधुरादिषु **गृद्धो न स्याद्भिक्षादो भिक्षाको** वा, अनेनाऽरागोऽद्वेषश्चायमुक्तस्ततश्चाऽरक्तद्विष्टो भुञ्जीत ॥११॥

रसाऽगृद्धविधिमाह–

**पंताणि चेव सेविज्जा, सीय पिंडं पुराणकुम्मासं ।**
**अदु बुक्कसं पुलागं वा, जवणट्ठाए निसेवए मंथुं ॥१२॥**

**व्याख्या–प्रान्तानि** नीरसान्यन्नपानानि, **चात्** अन्तानि च, **एव** अवधारणे, **सेवेतैव**। न त्वसाराणीति परिष्ठापयेत् । गच्छनिर्गतस्तु प्रान्तानि चैव सेवेत, तस्य तादृग्ग्रहणानुज्ञानात्, प्रान्तान्येवाह–**शीतं** शीतलं, **पिण्डमा**हारं, शीतोऽपि शाल्यादिपिण्डः सरसः स्यादत आह–**पुराणान्** बहुवर्षधृतान् **कुल्माषान्** राजमाषान्, एते पुराणाः पूतयो नीरसाश्च स्युः, एवं पुराणमुद्गादीनपि, 'अदु' इत्य**थवा** 'बुक्कसं' **मुद्गमाषादि** नखिका-निष्पन्नमन्नं निष्पीडितरसं वा, **पुलाक**मसारं वल्लचनकादि, **वा** समुच्चये, 'जवणट्ठाए' **यापनार्थं** शरीरनिर्वाहार्थं **निषेवते**, यदि त्वतिवातोद्रेकादिना तद्यापनैव न स्यात्ततो न निषेवतेऽपि । गच्छगतापेक्षमेतत् । जिनकल्पी त्वेतान्येव सेवते । **मन्थुं** बदरादिचूर्णं, अतिरूक्षतयाऽस्य प्रान्तत्वम् ॥१२॥

शुद्धैषणाया बाधकानाह–

**जे लक्खणं च सुमिणं च, अंगविज्जं च जे पउंजंति ।**
**न हु ते समणा वुच्चंति, एवं आयरिएहिं अक्खायं ॥१३॥**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या–ये लक्षणं** शुभाऽशुभसूचकं, पुरुषस्त्रीलक्षणादि, तद्वाची ग्रन्थोऽपि लक्षणं, एवं सर्वत्र ज्ञेयम् ।

**अस्थिष्वर्थाः सुखं मासं, त्वचि भोगाः स्त्रियोऽक्षिषु ।**
**गतौ यानं स्वरे चाज्ञा, सर्वं सत्वे प्रतिष्ठितम् ॥१॥** [ ] इत्यादि ।

**स्वप्नं** यथा–

**अलङ्कृतानां द्रव्याणां, वाजिवारणयोस्तथा ।**
**वृषभस्य च शुक्लस्य, दर्शने प्राप्यते यशः ॥२॥** [ ]

**मूत्रं वा कुरुते स्वप्ने, पुरीषमथ लोहितं ।**
**प्रतिबुद्ध्येत सोऽर्थस्य, नाशनं लभते नरः ॥३॥** [ ] इत्यादि ।

**अङ्गविद्यां "सिरप्फुरणे किर रज्जं"** [ ] इत्यादिकां प्रणवमायाबीजादिवर्णविन्यासात्मिकां, वा यद्वा **अङ्गानि** अङ्गविद्योक्तानि भौमान्तरिक्षादीनि, **विद्याश्च** हिलिहिलिमातङ्गिनीस्वाहेत्याद्या **विद्यानुवाद**प्रसिद्धा **ये प्रयुञ्जन्ते** व्यापारयन्ति, **च** एवार्थे, **'न हु' नैव ते श्रमणा उच्यन्ते,** पुष्टालम्बनं विना एतद्व्यापारणे निषेधः, **एवमार्यैराचार्यै**र्वा **आख्यातम्** ॥१३॥

एषां फलमाह–

**इह जीवियं अनियमित्ता, पब्भट्ठा समाहिजोगेहिं ।**
**ते कामभोगरसगिद्धा, उववज्जंति आसुरे काए ॥१४॥**

**व्याख्या–इह** जन्मनि **जीवितं** संयमजीवित**मनियम्य** द्वादशधा तपोनिधानादि-नाऽनियन्त्र्य, **प्रभ्रष्टाः, समाधि**श्चित्तस्वास्थ्यं, तेन प्रधाना **योगा** शुभमनोवाक्कायव्यापारा-**स्तेभ्यो,** यद्वा **समाधिः** शुभचित्तैकाग्र्यं, **योगाश्च** प्रत्युपेक्षणादयो व्यापारा**स्तेभ्यः, ते, कामभोगेषु रसो**ऽत्यन्तासक्तिरूपस्**तेन गृद्धा** असुरसम्बन्धिकाये **आसुरे काये उत्पद्यन्ते** । अयमर्थः–एवंविधाः किञ्चिदनुष्ठानं कुर्वन्तोऽपि असुरेष्वेवोत्पद्यन्ते । रसाः शृङ्गाराद्याः मधुराद्या वा, भोगान्तर्गतत्वेऽपि रसानां पृथगादानमतिगार्द्ध्यहेतुज्ञप्त्यै ॥१४॥

ततोऽपि फलमाह–

**तत्तो वि य उवट्टित्ता, संसारं बहुं अणुपरियट्टंति ।**
**बहुकम्मलेवलित्ताणं, बोही होइ सुदुल्लहा तेसिं ॥१५॥**

**व्याख्या–ततो**ऽप्यसुरनिकायद**ुद्वृत्य संसारं बहुं** चतुरशीतिलक्षयोन्यात्मकं **अनु-परियन्ति** पर्यटन्ति (पाठान्तरे–**अनुचरन्ति**) **बहुकर्मलेपलिप्तानां तेषां बोधिः** प्रेत्यार्हद्ध-र्माप्तिः **सुदुर्लभा**ऽतिदुरापा यत्र संसारे स्यात् ॥१५॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

लोभादेते एवं कुर्युरतो लोभार्त्तस्य दुःपूरतामाह—

**कसिणं पि जो इमं लोगं, पडिपुन्नं दलिज्ज इगस्स ।**
**तेणावि से न संतुस्से, इइ दुप्पूरिए इमे आया ॥१६॥**

**व्याख्या—कृत्स्नं** पूर्ण**मपि** इन्द्रादिः **इमं** प्रत्यक्षं **लोकं** जगत् **परिपूर्णं** हिरण्यधन-धान्यादिभृतं **दद्यात्**, किं बहुभ्यः ? इत्याह—**एकस्मै** कस्मैचित् कथञ्चिदाराधकाय, **तेनापि स न सन्तुष्टेत्** न हृष्येत्, एतावतापि न तृप्तिः स्यात् । **इत्येवं** कृच्छ्रेणापि पूरयितुमशक्यो **दुःपूरकोऽ**यमा**त्मा** । एवं यद्येकः सर्वलोकदानेन न पूर्यते, तदा बहूनां तृप्तिः कथं कर्त्तुं शक्या !! ॥१६॥

असन्तोषे स्वविदितं हेतुमाह—

**जहा लाभो तहा लोभो, लाभा लोभो पवड्ढइ ।**
**दोमासकयं कज्जं, कोडीए वि न निट्ठियं ॥१७॥**

**व्याख्या—यथा लाभो**ऽर्थाप्तिस्**तथा लोभः** स्यात्, **लाभाल्लोभः प्रवर्द्धते,** इति-कथनाद्यथातथेत्यत्र वीप्सा ज्ञेया । **द्वाभ्यां माषाभ्यां** पञ्चरत्तिकमानाभ्यां **कृतं** कर्त्तव्यं कार्यं दास्याः पुष्पताम्बूलमूल्यं **स्वर्णकोट्यापि न निष्ठितं,** उत्तरोत्तरविशेषवाञ्छतः ॥१७॥

तदनिष्ठितिः स्त्रीतो जातेति तत्त्यागमाह—

**नो रक्खसीसु गिज्झिज्जा, गंडवच्छासु णेगचित्तासु ।**
**जाओ पुरिसं पलोभित्ता, खेल्लंति जहा व दासेहिं ॥१८॥**

**व्याख्या**—नो नैव राक्षसीष्विव **राक्षसिषु** ज्ञानादिजीवितापहारात् स्त्रीषु **गृद्ध्येत्** काङ्क्षावान् स्यात्, 'गंडवच्छासु' गण्डं गडुं तन्निभे मांसपिण्डतया गलत्पूतिरुधिरार्द्रतया च **गण्डे** कुचौ **वक्षसि** यासां **तासु** स्त्रीषु, वैराग्योत्पादनार्थं चेत्थमुक्तं । अनेकान्यनेक-सङ्ख्यानि चञ्चलतया चित्तानि यासां तासु **अनेकचित्तासु** ।

**हृद्यन्यद्वाच्यन्यत्, कायेऽप्यन्यत् पुरोऽथ पृष्ठेऽन्यत् ।**
**अन्यत्तव मम चान्यत्, स्त्रीणां सर्वं किमप्यन्यत् ॥१॥ [ ]**

**याः** स्त्रियः **पुरुषं** कुलीनमपि **प्रलोभ्य** त्वमेव मे शरणं, त्वमेव च मे प्रीतिकृदि-त्यादिकाभिर्वाग्भिर्विप्रतार्य **क्रीडन्ति, वा**शब्दस्य एवार्थत्वात् **यथैव दासै**रेहि ! गच्छ ! वेत्यादिक्रीडाभिर्विलसन्ति ॥१८॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

ततः—

**नारीसु नो पगिज्झिज्जा, इत्थीविप्पजहे अणगारे ।**
**धम्मं च पेसलं णच्चा, तत्थ ठवेज्ज भिक्खू अप्पाणं ॥१९॥**

**व्याख्या—नारीषु नो प्रगृह्येत्**, प्रशब्द आदिकर्मणि, ततो गृद्धिमारभेतापि न, किं पुनः कुर्यात् !! स्त्रियो विविधैः प्रकारैः प्रकर्षेण जहाति त्यजतीति **स्त्रीविप्रजहोऽनगारः**, यद्वा **स्त्रियो विप्रजह्यात्**, पूर्वमत्र नारीग्रहणान्मानव्य एवोक्ताः, इह तु तिर्यग्देवसम्बन्धिन्योऽपि त्याज्या इत्युक्तम् । यद्वा उपदेशाद्वा पौनरुक्त्यम् । **धर्ममेव च** ब्रह्मचर्यादिरूपं, 'चः निश्चये', **पेशलमिह** परत्र चैकान्तहितत्वेनातिमानोज्ञं **ज्ञात्वा तत्र** धर्मे **स्थापयेद्भिक्षुरात्मानं** विषयाभिलाषनिषेधेन ॥१९॥

अध्ययनार्थं निगमयति—

**इइ एस धम्मे अक्खाए, कविलेणं च विसुद्धपन्नेण ।**
**तरिहिंति जे उ काहिंति, तेहिं आराहिया दुवे लोगु ॥२०॥ त्ति बेमि**

**व्याख्या—इत्येष धर्मो** यतिधर्म **आख्यातः, कपिलेने**त्यात्मानमेव निर्दिशति, पूर्वसङ्गतिकत्वादमी मद्वचनं प्रपद्यन्तां, **चः** पूर्त्तौ, **विशुद्धपज्ञेन तरिष्यन्ति** भवाब्धिं, **ये, तुः** पूर्त्तौ, **करिष्यन्ति** अमुं धर्मं **तैराराधितौ** सफलीकृतौ **द्वौ लोकौ**, इहलोकपरलोकौ, इह महाजनार्च्यतया परत्र च शिवप्राप्त्या, **इति** समाप्तौ **ब्रवीमी**ति प्राग्वत् ॥

**इति निर्लोभज्ञप्त्यै कापिलीयाध्ययनमष्टममुक्तम् ॥८॥**

• • •

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

# नवमं नमिप्रव्रज्याध्ययनम् ॥

निर्लोभश्चेन्द्रादिपूज्यः स्यादिति नवमं **नमिप्रव्रज्या**ध्ययनमाह–

इह यद्यपि **नमे**रेव **प्रव्रज्या** प्रक्रान्ता, तथापि यथायं प्रत्येकबुद्धस्तथान्येऽपि **कर-कण्ड**वाद्यास्त्रयस्तत्समकालसुरलोकच्युतिप्रव्रज्याज्ञानोत्पत्तिसिद्धिगतिभाजो जाताः, अतः प्रसङ्गतोऽत्र तद्वृत्तानि स्वयं ज्ञेयानि, **अत्र तु नमिचरित्रलेशः**–

इह **जम्बूद्वीपे भरतेऽवन्तीदे**शे **सुदर्शनपुरे मणिरथो** राजा, तस्य सहोदरो **युगबाहुर्युवराट्**, **युगबाहोर्मदनरेखा** प्रिया सुश्राविकाऽतिरूपलावण्या, पुत्रश्च **चन्द्रयशाः**, अन्यदा **मणिरथो मदनरेखां** दृष्ट्वा जातानुरागस्तस्या वश्यतार्थं पुष्पवस्त्रादि ताम्बूलालङ्काराद्यं च प्रैषीत्, **मदनरेखापि** प्राञ्जलिपूर्वकं तदलात् ।

अथ **मणिरथेन मदनरेखोक्ता** चेन्मां त्वमिच्छसि तदाहं त्वां राज्यस्वामिनीं कुर्वे । तयोक्तं नूनं त्वं क्लीबोऽसि, यल्लघुभ्रातृवधूं निजपुत्रीस्थानीयां मामिच्छसि । यतः–सत्पुरुषा वरं म्रियन्ते, नत्विहपरलोकविरुद्धं सेवन्ते, परस्त्रीसेवया नरकगतिरेव, ततो दुष्टभाव त्यज ! अनाचारं च मा कृथाः ! राजा तूष्णीं स्थितः, **युगबाहौ** सत्येषा न मंस्यते, इत्येनं प्रस्तावे हन्मीति स दध्यौ । अथैकदा **मदनरेखा** चन्द्रं स्वप्ने दृष्ट्वा **युगबाहु**मूचे, सोऽवक् पृथ्वी-शृङ्गारो जीवलोकप्रियो द्वितीयः सुतस्ते भावी । तृतीयमासे तस्या अर्हन्मुनिभक्त्यर्हद्द्रव-कथाश्रवणादिरूपो दोहदोऽभवत्, **युगबाहु**ना च सोऽपूरि । अथ वसन्ते **युगबाहु-र्मदनरेखया** सह क्रीडायै गत उद्याने । तत्र च रात्रिः पतिता । तदा कदलीगृहे **मदनरेखायुगबाहू** सुप्तौ, चतुर्दिक्षु च यामिकाः स्थिताः, **मणिरथो** राजा दध्यौ एष **युगबाहु**मारणावसरः, यतो **युगबाहुः** पुराद्बहिः स्तोकतन्त्रोऽस्ति, रात्रिरपि तमोघोरा स्थानं च काननमस्ति ।

इति विचार्य **मणिरथ**राजा उद्यतासिः सौधान्निःसृत्य मार्गे आयात् । कार्या-ऽकार्यमविचार्य जनापवादं त्यक्त्वा परलोकभयं च मुक्त्वा स तीक्ष्णासिना **युगबाहु**कन्धर-

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

मच्छिनत् । तेन स किञ्चिल्लग्नत्रुटितशीर्षोऽभूत् । **मदनरेखया** पूत्कारः कृतः, **मणिरथो**ऽवक् मद्धस्तात् खड्गं पतितं । यामिकै**र्मणिरथ**चेष्टितं ज्ञात्वा **युगबाहु**सुत**चन्द्रयसो**ऽग्रे कथितं । **चन्द्रयशसा** वैद्यानाकार्योपचारः कारितः, परं स निश्चेतनीभूतः तस्याङ्गानि रुधिरलिप्तानि जातानि । अथ **मदनरेखा** तस्य मरणावस्थां ज्ञात्वा कर्णमूले स्थित्वा मधुरस्वरमूचे । भो महाभागः सर्वात्मसु मैत्रीं कुरु ? कस्योपरि द्वेषं मा कार्षीः, प्रपद्यस्व चतुःशरणं, गर्ह स्वदुश्चरितं, प्राक्कर्मवशेन प्राग्वैरेण चेयं ते दशा जाता ।

**जं जेण कयं कम्मं, अण्णभवे इह भवे य सत्तेणं ।**
**तं तेण वेइयव्वं, निमित्तमित्तं परो होइ** ॥१॥ [ ]

ततो गृहाण परत्र पाथेयम् ।

**सर्वज्ञं प्रतिपद्यस्व, तत्वानि श्रद्धयानय ।**
**सुसाधून् गुरुभावेन, स्वीकुर्वऽव्रतनिग्रहं** ॥१॥

**पञ्चधा कुरु जन्मान्तं, त्रिविधं त्रिविधेन च ।**
**प्रतिक्रमाष्टादशभ्यः, पापस्थानेभ्य उद्यतः** ॥२॥

**अनित्यं भवभावं च, नमस्कारपरः स्मर ।**
**त्यज स्वजनसङ्गं य-न्न मातृजनकादयः** ॥३॥

**शरणं ते जिनाः सिद्धाः, शरणं गतकल्मषाः ।**
**मुनयः शमभाजश्च, शरणं धर्म आर्हतः** ॥४॥

एतत्सर्वं शिरोञ्जलि**र्युगबाहुः** प्रपद्य सुध्यानान्मृतो **ब्रह्मलोके** सामानिकः सुरोऽभूत् । **मणिरथ**स्तस्यां निश्येवाऽहिदष्टस्तुर्यनरकं गतः, मन्त्रिभि**श्चन्द्रयशा** राजाऽस्थापि । अथ भर्त्तरि मृते मदनरेखा, एष मच्छीलं भङ्क्ष्यति मत्पुत्रं च हनिष्यतीति ध्यात्वाऽर्द्धरात्रौ उद्यानात् पूर्वां दिशं गत्वा महाटवीं प्राप्ता, मध्याह्ने फलादिभिः प्राणवृत्तिं कृत्वाऽध्वखिन्ना कदलीगृहे सुप्ता, निशि च तया साकारं प्रत्याख्यानं कृतं । तत्र व्याघ्रा घुरक्खयन्ति, सिंहा गर्जन्ति, वराहा घुर्घुरयन्ति, शिवाः फेत्कुर्वन्ति । एवं भीमारण्ये नमस्कारं परावर्त्तयन्त्यास्तस्या अर्द्धरात्रे उदरवेदनया कृच्छ्रात् पुत्रोऽभूत् । प्राता रत्नकम्बल**युगबाहु**नामाङ्कितग्रीवाभरणयुतं पुत्रं कदलीगृहे मुक्त्वा अङ्गशुद्ध्यै सा सरः प्रति गता । इतो जलात् करी धावितः, शुण्डयोत्पाट्य च तां नभसि प्रोच्छालितवान् ।

तावद् देवयोगेन **नन्दीश्वरं** याता विद्याधरेशेन सा दृष्टा, नीता च **वैताढ्यं,** तत्रोक्तः स तयाऽहं वने कदलीगृहेऽद्य सुतमजीजनम्, स बालःश्वापदैर्हनिष्यते, अनाहारो वा

Jain Education International 2010_02	For Private & Personal Use Only	www.jainelibrary.org

मरिष्यति, ततोऽपत्यदानेन त्वं प्रसीद ? विद्याभृदूचे मां पतीकुरु ? येन ते यथेष्टं कुर्वे । अन्यच्च **गन्धार**देशे **रत्नपथ**पुरे **मणिचूड**विद्याधरराट्**कमलावती**राज्ञीपुत्रोऽहं **मणिप्रभः**, मत्पिता द्वयोः श्रेण्यो राज्यं प्रपाल्य त्यक्तभोगो मां च राज्ये संस्थाप्य चारणर्षेः पार्श्वे प्राव्राजीत् । मया तन्मुनिवन्दनाय याता त्वं दृष्टा, अथ त्वं सर्वविद्याधरीणां स्वामिनी भव ! ततस्तेन तत्पुत्रवार्त्तां पृष्टा **प्रज्ञप्ती**विद्योवाच, अस्याः पुत्रमश्वहृतो **मिथिला**पतिरपुत्रः **पद्मरथ**राजा कदलीगृहाल्लात्वा निज**पुष्पमालायै** महिष्यै ददौ, सुतोत्सवश्च तेन चक्रे । अथ तमुदन्तं **मदनरेखायै** कथयित्वा स जगौ त्वं मा खेदीः, ते सुतः सुखेऽस्ति । अथ त्वं मया सह सुखं भुङ्क्ष्व ! सा दध्यौ हा किं मयाथ कर्त्तव्यम् ।

**कामग्रस्तो जीवः, कार्याऽकार्यं न वेत्ति गुणदोषौ ।**
**इहपरलोकविरुद्धो, जनापवादं न चिन्तयति ॥१॥**

तत उपायं कुर्वे, इति विचिन्त्य तयोक्तं त्वं मां **नन्दीश्वरे** लाहि ? ततस्त्वदिष्टं करिष्यामि ।

अथ स तां **नन्दीश्वरं** नीत्वा **ऋषभचन्द्राननवर्द्धमानवारिषेणा**ख्यदेवानवन्दयत्, पितृमुनिं **मणिचूडं** च । तद्देशनया प्रतिबुद्धेन तेन **मणिप्रभेण** सा **मदनरेखा** क्षमायाचनपूर्वकं निजस्वसृत्वेन प्रतिपन्ना सर्वा अन्याः स्त्रियश्चापि । अथ **मदनरेखया** निजसुतसम्बन्धं पृष्ट ऋषिरूचे–**जम्बूद्वीपे पूर्वविदेहे पुष्कलावती**विजये **मणितोरण**पुरे **अमिततेजाश्च**क्र्यासीत् । प्रिया **सुव्रता**, पुत्रौ च **पुष्पशिखरत्नशिखौ** । तौ चतुरशीतिपूर्वलक्षराज्यं कृत्वा भवोद्विग्नौ चारणर्ष्युपान्ते प्रव्रज्य षोडशपूर्वलक्षाणि च प्रव्रज्यां प्रपाल्यायुःक्षयेऽ**च्युत**कल्पे सामानिकसुरौ द्वाविंशतिसागरायुषौ भूत्वा **धातकीखण्डभरतार्द्धे हरिषेण**हरेः **समुद्रदत्ता**कुक्ष्युद्भवौ **सागरदेव-सारदत्ताख्यौ** पुत्रौ जातौ । असारं राज्यं ज्ञात्वा द्वादशार्हत्**सुव्रत**तीर्थे गुरुपार्श्वे दीक्षां गृहीत्वा निष्क्रान्तौ, तृतीयाहे विद्युत्पातान्मृतौ **महाशुक्रे** सप्तदशसागरायुषौ सुरौ भूत्वाऽत्र द्वाविंश**नेम्यर्ह**त्केवलमहं कर्त्तुं गतौ, पप्रच्छतुश्च प्रभो आवां च्युत्वा क्वोत्पत्स्यावः ? अर्हतोक्तं अत्रैव **भरते मिथिलायां जयसेन**नृपस्यैकः **पद्मरथः** पुत्रोऽन्यश्च **सुदर्शनपुरे युगबाहु-मदनरेखयोर्नमिः** पुत्रो भावी । तत् श्रुत्वा तौ गतौ । आदावेकश्च्युत्वा **मिथिलायां जयसेन-वनमालयोः** सुतः **पद्मरथ**ऽभूत्, पिता च तस्मै यौवनस्थाय राज्यं दत्वा प्राव्राजीत् । तस्य **पद्मरथस्य** च **पुष्पमाला**भिधाना राज्ञी बभूव । एवं काले द्वितीयो देवस्त्वत्पुत्रो जातः, अश्वहृतेन **पद्मरथे**नाटवीं प्राप्तेन भ्रमता दृष्ट्वा त्वत्पुत्रः प्राग्भवस्नेहादतिहृष्टेनात्तः, सैन्ये एते स गजारूढः पुरे गतः, **पुष्पमालायै** च तं सुतमदात्, जातं वर्द्धापनं, एवं स तत्र वर्द्धते ।

Jain Education International 2010_02  For Private & Personal Use Only  www.jainelibrary.org

एवं साधौ वदति मणिस्तम्भलम्बितमुक्तमालं सतोरणं किङ्किणीजालरवमुखरं विमानमेकं नभोङ्गणे प्राप्तम् । ततः सुर एक उत्तीर्य त्रिःप्रदक्षिणय्य **मदनरेखां**ह्योः पतित्वोपविष्टः, तदा **मणिप्रभ**स्तमविनीतं दृष्ट्वोचे हे देव ! न्यायाः सुरनरेशैः स्थापितास्ते च यदि तैरेव लुप्यन्ते तदा को दोषोऽन्येषां ? यत्सर्वगुणर्षिं मुक्त्वाऽऽदौ श्राविकां त्वमनमः, सुरोऽवक् सत्यं परमियं मे धर्मगुरुः, तेनोक्तं कथं ? ततः स स्वीयं **युगबाहु**-वृत्तान्तमुवाच । एवमेषा मे गुरुस्थाने सम्यक्त्वादिधर्मदत्वात् । यतः—

**संयतो वा गृही वापि, शुद्धधर्मे नियोजयेत् ।**
**स गुरुस्तस्य कोट्या-पकारैर्नाऽनृणीयते ॥१॥ [ ]**

तत् श्रुत्वा खेटोऽर्हद्धर्मसामर्थ्यं मेने । अथ स सुरो मुनिं नत्वा **मदनरेखा**मूचे हे साधर्मिणि किं त्वदिष्टं कुर्वे ! तयोक्तं मम सर्वदुःखक्षयं शिवमिष्टं, परं प्रथमं **मिथिला**यां मां नय ? यथा **पुत्र**स्यास्यं दृष्ट्वा परलोकं साधये । तदा सुरेण सा **मिथिला**यां निन्ये । तत्र श्री**मल्लिनम्यो**र्जन्मदीक्षाभूरस्ति ।

अथ सा चैत्यानि नत्वा साध्व्युपाश्रये गता, देवेन सह च साध्वीर्नत्वोपविष्टा । साध्व्यो धर्ममूचुः—

**यथा निशि खगानां स्याद् , योगोऽध्वन्यध्वयायिनां ।**
**तथा स्वजनसंयोगो, वियोगसहितोऽङ्गिनां ॥१॥**

**पितृमातृभ्रातृभार्या-स्वसृपुत्रादिभावतः ।**
**सर्वे जीवास्तु सर्वेषा, जाता लोके ह्यनन्तशः ॥२॥**

**एतेनैषां प्रतिबन्धो, न कार्यो हि मनीषिणा ।**
**प्रतिबन्धाद्भवेद्दुःख-मत्रामुत्र शरीरिणां ॥३॥**

**भवकोटीषु दुःप्राप्यं, लब्ध्वा नरभवं बुधैः ।**
**अर्हद्धर्मो महाशर्म-कार्मणं क्रियते लघु ॥४॥**

देशनान्ते तां सुरोऽवक् यामो नृपसौधं पश्यामश्च सुतं । **मदनो**चे अथालं स्नेहेन । यतः—

**सर्वात्मानो ममाभूवन्, स्वजना अहितास्तथा ।**
**एकैकस्यात्मनस्तत्को, मोहो बन्धुषु चिन्त्यते ॥१॥ [ ]**

इति साध्वीपार्श्वे सा प्राव्राजीत् । सुरोऽपि साध्वी**र्मदनां** च नत्वा स्वर्गतः, **सुव्रता**ख्या सा साध्वी तपःक्रियापरा व्यहरत् । अथ तस्य बालस्य **पद्मरथे**न राज्ञा विपक्षराज्ञां नमनकारित्वा**न्नमि**रिति नाम दत्तं । स बालोऽष्टमे वर्षे सर्वकलाज्ञो जज्ञे, यौवने चाष्टोत्तर-

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सहस्रकन्या उद्वाहितः, **पद्मरथो नमौ विदेह**राज्यं न्यस्य प्रव्रज्य ज्ञानात्सिद्धः, अन्यदा **नमि**हस्ती स्तम्भं भङ्क्त्वा **विन्ध्याट**वीन् प्रति चलितः, **सुदर्शनपुरा**सन्नं गच्छन् **चन्द्रयशो**नरैर्बाह्यक्रीडायै गतैर्धृत्वा स पुरे प्रावेशि । **नमि**ना चरास्यात्तद् ज्ञात्वा **चन्द्रयशसे** दूतः, प्रेषितो मार्गितश्च हस्ती, **चन्द्रो**ऽवक् रत्नानि न कस्यापि नामाङ्कितानि, बलाधिक्यस्यै स्युः, एवमसन्मानितोऽपूजितो दूतः पश्चाद्वलितः ।

अथ **नमि**रपि सर्वबलेन **चन्द्रयशसं** प्रत्यागात् । **चन्द्रो**ऽपि निजसैन्ययुतस्तत्सन्मुखं गन्तुं लग्नः, परमशकुनैर्निवारितो मन्त्र्युक्त्या तत्रैव गोपुरद्वाराणि दत्वा स्थितः, **नमि**रेत्य सर्वं **सुदर्शन**पुरमरौत्सीत् । इतो **मिथिलास्था सुव्रता** जनोदन्तेन तद्विग्रहं श्रुत्वा जनक्षयवारणाय तयोरुपशमाय च महत्तरामनुज्ञाप्य साध्वीयुता **सुदर्शन**पुरे **नमि**सैन्ये गत्वा **नमि**मवन्दापयत् । **नमि**रपि तस्या आसनं दत्वा भुव्युपविष्टः, साद्ध्व्याऽर्हद्धर्म उक्तः, उपदेशान्ते चोक्तं असारा राज्यश्रीः, दुःखं विषयसुखं, पापकार्यान्नियमान्नरकगतिः, अतो ज्येष्ठभ्रात्रा सह सङ्ग्रामात्त्वं निवर्त्तस्व ? **नमि**रूचे कथमसौ मे भ्राता ? ततः साध्व्या यथास्थमुक्तम् । स तथापि न निवृत्तः, अथ साध्वी पुरान्तर्गता नृपौकः, परिवारेण चोपलक्षिता, **चन्द्रे**णापि नत्वासनं मुक्तम् । क्ष्मायां निविष्टो भूपो मातरमपृच्छत्, हे आर्ये ! कथमिदं दुष्करं व्रतमात्तं ? तदा तया यथास्थवृत्तान्त उक्तः, पुनस्तेन पृष्टं क्व मे स सहोदरो गर्भस्थः ? साध्व्योक्तं यस्त्वां रुद्ध्वा स्थितोऽस्ति । ततश्चन्द्रो हर्षाद्बहिर्निर्गत्य **नमि**मिलनायागतः, **नमि**रपि सन्मुखमेतः, **चन्द्रा**ह्र्योश्च पतितः, **चन्द्रे**ण तं पुर्यां नीत्वा राज्यं च दत्वा प्रव्रज्यात्ता । अथ **नमिर्द्वे** राज्ये शशास ।

एवं **विदेह**देशे **मिथिला**यां **नमे** राज्ञो राज्यं कुर्वतोऽन्यदाङ्गे दाहोऽभूत् । वैद्यैः कैरपि नाशमत् । षण्मासा जाताः, असाध्यो व्याधिरयमिति वैद्योक्ते घृष्टचन्दनरसभृतकुण्डिकान्तः क्षणं दाहज्वरशान्त्यै स राजाऽस्थात् । अष्टोत्तरसहस्रं राज्ञीनां भक्त्या स्वयं युगपच्चन्दनानि घर्षति । महास्तासां वलयखलत्कारध्वनी राज्ञः कर्णकटुर्बभूव । इति ता एकैकं वलयं मङ्गलहेतवे स्थापयित्वाऽन्यानि तान्युत्तार्य चन्दनमघर्षयन् । राज्ञा तद् ज्ञात्वा परमार्थोत्कण्ठितेनाऽचिन्ति नूनं बहूनां सङ्गमे दोषाः, नैकस्य दोषः, यथा बहूनि वलयान्यास्फाल्यास्फाल्य कलकलन्ति तथा मिलिता बहवः कलहायन्ते, अतोऽस्माद्रोगान्मुक्तः प्रव्रज्यैव मे शरणं । तदा च कार्त्तिकपूर्णिमासीत्, अथैवं ध्यायन्नेवाप्तनिद्रः प्रातःप्रायायां निशि स स्वप्नेऽपश्यन्मेर्वारूढं स्वं । प्रातर्नान्दीतूर्यनिर्घोषैः प्रबुद्धो हृष्टस्तुष्टश्च स दध्यौ मयाद्य प्रधानं स्वप्नं दृष्टं । क्वापीदृग्गिरिर्दृष्टपूर्वोऽस्ति मे । तावत्तेन जातिः स्मृता । पूर्वभवेऽहं श्रामण्यं लब्ध्वा सप्तमे **शुक्र**देवलोके **पुष्पोत्तर**विमाने देवत्वेनोत्पन्नो जिनमहिमादिष्वागतो **मेरुं** दृष्टवानिति सम्बुद्धः प्रव्रजितः, अत्र निर्युक्तिः–

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

दोन्नि वि नमी विदेहा, रज्जाइं पयहिऊण पव्वइया ।
एगो नमि तित्थयरो, एगो पत्तेयबुद्धो य ॥१॥ [ उत्त. नि. / गा. २६७ ]

जो सो नमितित्थयरो, सो साहस्सिय परिवुडो भगवं ।
गंथमवहाय पव्वए, पुत्तं रज्जे ठविऊण ॥२॥ [ उत्त. नि. / गा. २६८ ]

बिइओ वि नमीराया, रज्जं चइऊण गुणगणसमग्गं ।
गंथमवहाय पव्वए, अहिगारो अत्थ बीएणं ॥३॥ [ उत्त. नि. / गा. २६९ ]

इत्थं सम्प्रदायमुक्त्वा सूत्रार्थमाह—

**चइऊण देवलोगाओ, उववण्णो माणुसंमि लोगंमि ।**
**उवसंतमोहणिज्जो, सरई पोराणियं जाइं ॥१॥**

**व्याख्या—च्युत्वा देवलोकात् उत्पन्नो मानुषे लोके उपशान्त**मनुदय प्राप्तं मोहनीयं दर्शनमोहनीयं यस्य स **उपशान्तमोहनीयः**, नमिर्नृपः **स्मरति पौराणिकीं** चिरन्तनीं **जातिं** प्राग्जन्मेत्यर्थः ॥१॥

ततः—

**जाइं सरित्तु भयवं, सहसंबुद्धो अणुत्तरे धम्मे ।**
**पुत्तं ठवित्तु रज्जे, अभिनिक्खमई नमी राया ॥२॥**

**व्याख्या—जातिं स्मृत्वा भगवान्**, भगवच्छब्दस्य बह्वर्थत्वेऽपीह भगो बुद्धिर्यस्यास्तीति भगवान्, 'सह'त्ति **स्वय**मात्मनैव **सम्बुद्धः** सम्यग् ज्ञाततत्त्वः, नान्येन बोधित इत्यर्थः, अथवाऽर्षत्वात्**सहसा** जातिस्मृतेरनु झगित्येव **बुद्धः**, **अनुत्तरे धर्मे** चारित्रधर्मे, **पुत्रं स्थापयित्वा राज्ये अभिनिःक्रामति** गृहपर्यायान्निर्गच्छति तदा काले **नमी राजा** ॥२॥

कथमित्याह—

**सो देवलोगसरिसे, अंतेउरवरगओ वरे भोए ।**
**भुंजित्तु णमी राया, बुद्धो भोए परिच्चयइ ॥३॥**

**व्याख्या—स नमि**र्देवलोकगैः सदृशान् **देवलोकसदृशान्**, **वरान्तःपुरगतः**, प्राकृतत्वाद्व्यत्ययः, कोऽपि **सुबन्धु**वत् च्युतोऽपि भोगान् भोक्तुं कुतोऽपि न शक्नोतीत्याह, **वरान् भोगान् भुक्त्वा नमी राजा बुद्धो** ज्ञाततत्वो **भोगान् परित्यजति** । पुनर्भोगग्रहणं विस्मरणशीला अनुग्राह्या एवेति ज्ञप्त्यै ॥३॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

ततश्च—

**मिहिलं सपुरजणवयं, बलमोरोहं च परियणं सव्वं ।**
**चिच्चा अभिनिक्खंतो, एगंतमहिट्ठिओ भयवं ॥४॥**

**व्याख्या—मिथिलां** नगरीं **सपुरजनपदां,** सह नैरेरन्यनगरैर्जनपदेन च वर्त्तते या सा तां, **बलं** हस्त्यश्वादिचतुरङ्गं, **अवरोधं** चान्तःपुरं, **परिजनं सर्वं त्यक्त्वाऽभिनिःक्रान्तः** प्रव्रजितः। एकोऽद्वितीयः कर्मणामन्तो यस्मिन्नित्ये**कान्तो** मोक्षस्त**मधिष्ठित**स्तदुपाय-सम्यग्दर्शनाद्यासेवनात् आश्रितः, यद्वा **एकान्तं** द्रव्यतो विजनमुद्यानादि, भावतस्तु-

**एकोऽहं नास्ति मे कश्चिन् , न चाहमपि कस्यचित् ।**
**न तं पश्यामि यस्याहं, नासौ दृश्योऽस्ति यो मम ॥१॥ [ ]**

एक एवाहमित्यन्तो निश्चयस्**तमाश्रितः, भगवान्** धैर्यवान् श्रुतवान् ॥४॥

तदा च—

**कोलाहलगभूयं, आसी मिहिलाए पव्वयंतंमि ।**
**तइया रायरिसिंमि, नमिम्मि अभिनिक्खमंतंमि ॥५॥**

**व्याख्या**—कोलाहलः क्रन्दितादिकलकलः स एव कोलाहलकः, स भूतो जातो यस्मिन् तत्**कोलाहलकभूतं** सर्वं विहारारामादि, **तदाऽसीद**भूत् **मिथिलायां, प्रव्रजति** दीक्षां गृह्णाति । राज्यावस्थायामपि ऋषिरिव ऋषिः क्रोधादिषड्वर्गजयात् , तथा च **राजनीतिः—**

**कामः क्रोधस्तथा लोभो, हर्षो मानो मदस्तथा ।**
**षड्वर्गमुत्सृजेदेनं, तस्मिंस्त्यक्ते सुखी नृपः ॥१॥ [ ]**

तस्मिन् **राजर्षौ नमौ** गृहात् कषायादिभ्यो वा **निःक्रामति** निर्गच्छति ॥५॥

पुनराह—

**अब्भुट्ठियं रायरिसिं, पव्वज्जाट्ठाणमुत्तमं ।**
**सक्को माहणरूवेण इमं वयणमव्ववी ॥६॥**

**व्याख्या—अभ्युत्थितं** अभ्युद्यतं **राजर्षिं,** प्रव्रज्यैव स्थानमाश्रयो ज्ञानादिगुणानां **प्रव्रज्यास्थानं,** तत्प्रतीति, **उत्तमं** श्रेष्ठं । **शक्रो ब्राह्मणस्य रूपेण** वेषेणागत्य **इदं** वक्ष्यमाणं **वचनमब्रवीत्** ॥६॥

Jain Education International 2010_02          For Private & Personal Use Only          www.jainelibrary.org

कोलाहलप्रश्नः १ अग्निदाहरक्षाप्रश्नः २ दुर्गादिकारणोक्तिः ३ प्रासादकारणोक्तिः ४ चौरनिग्रहोक्तिः ५ दुर्नमनृपनमनोक्तिः ६ यज्ञादिकरणोक्तिः ७ गृहाश्रमस्थापनं ८ हिरण्यादिसङ्ग्रहोक्तिः ९ भोगत्यागोक्तिः १० एते चाक्षेपा दश क्रमेण कृताः ।

तत्राद्यप्रश्नमाह—

**किन्नु भो अज्ज मिहिलाए, कोलाहलगसंकुला ।**
**सुच्चंति दारुणा सद्दा, पासाएसु गिहेसु य ॥७॥**

**व्याख्या—किं** प्रश्ने, **नुः** वितर्के, **भोः** आमन्त्रणे, **अद्य मिथिलायां कोलाहलकेन** बहुकलकलेन **सङ्कुला** व्याप्ताः **श्रूयन्ते, दारुणा** हृदुद्वेगकरा विलपिताः क्रन्दिताद्याः **शब्दाः प्रासादेषु** भूपसम्बन्धिषु सप्तभौमादिषु **गृहेषु** तदितरेषु, **चात्** त्रिकचतुष्कचत्वरादिषु ॥७॥

ततः—

**एयमट्ठं निसामित्ता, हेऊकारणचोइओ ।**
**तओ णमी रायरिसी, देविंदं इणमव्ववी ॥८॥**

**व्याख्या—एनमर्थं** अर्थवाचिध्वनिं **निशम्या**कर्ण्य, **हेतुः** पञ्चावयववाक्यरूपः, **कारणं** अन्यथाऽनुपपत्तिमात्रं, ताभ्यां **चोदितः** प्रेरितः पृष्टः, तथाहि—अनर्हं तव धर्मार्थिनो निःक्रमणं, इति प्रतिज्ञा, आक्रन्दादिदारुणशब्दहेतुत्वाद् इति हेतुः, यद्यदेवं तत्तद्धर्मार्थिनोऽनर्हं, प्राणिहिंसादिवदिति दृष्टान्तः, तथा चेदं त्वन्निःक्रमणमित्युपनयः, तस्मादाक्रन्दादिदारुणशब्दहेतुत्वादनर्हं तव निःक्रमणमिति निगमनमिति पञ्चावयवं वाक्यं । इह हेतुः शेषाऽवयवहीनं आक्रन्दादिदारुणशब्दहेतुस्तन्निःक्रमणाऽनर्हत्वं विना नोत्पद्यते इति कारणं, अनयोस्तु पृथगुक्तिः शेषभेदतः साधनवाक्यवैचित्र्यज्ञप्त्यै, **ततः प्रश्नानन्तरं नमी राजर्षिर्देवेन्द्रमिदमब्रवीत्** ॥८॥

यथा—

**मिहिलाए चेइए वच्छे, सीयच्छाये मणोरमे ।**
**पत्तपुप्फफलोवेए, बहूणं बहुगुणे सया ॥९॥**

**व्याख्या—मिथिलायां** पुरि, चयनं चितिः पत्रपुष्पादिचयस्तत्र साधु चित्यं, तदेव स्वार्थे णि **चैत्यमुद्यानं, तस्मिन्**, 'वच्छे'त्ति सूत्रत्वाद्**वृक्षैः शीतच्छाये,** मनो रमतेऽस्मिन्निति **मनोरमे** मनोरमाख्ये, **पत्रपुष्पफलोपेते, बहूनां** खगादीनां **बहुगुणो** फलाद्यैरुपकारिणि सदा ॥९॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तत्र—

**वाएण हीरमाणंमि, चेइयंमि मणोरमे ।**
**दुहिया असरणा अत्ता, एए कंदंति भो खगा ॥१०॥**

**व्याख्या—वातेन ह्रियमाणे** इतस्तः क्षिप्यमाणे, वातश्च तदा शक्रेणैव कृत इति । चितिरिहेष्टकादिचयस्तत्र साधुर्योग्यश्चित्यः, स एव **चैत्यस्तस्मिन्** । कोऽर्थः ? बद्धपीठके उपरि चोच्छ्रितपताके **मनोरमे** रम्ये वृक्षे । दुःखं जातं येषां ते **दुःखिताः, अशरणा**-स्त्राणरहिताः, अत एव **आर्त्ताः** पीडिताः, **एते** प्रत्यक्षाः **क्रन्दन्ति, भोः, खगाः** पक्षिणाः, इह च किमद्य मिथिलायां दारुणाः शब्दाः श्रूयन्ते ? इति यत्स्वजनाक्रन्दनमुक्तं तत्खग-क्रन्दनप्रायं । यतो ममात्मा वृक्षः कियत् कालं सहस्थितत्वेन, पश्चाच्च स्वस्वगतिगामितया द्रुमाश्रित्य खगोपमाः स्वजनाद्याः, उक्तं हि—

**यद्वद् द्रुमे महति पक्षिगणा विचित्राः,**
**कृत्वाश्रयं हि निशि यान्ति पुनः प्रभाते ॥**
**तद्वज्जगत्यसकृदेव कुटुम्बिजीवाः,**
**काले समेत्य पुनरेव दिशो भजन्ते ॥१॥** [ ]

ततश्चाक्रन्दादिदारुणशब्दहेतुत्वं हेतुत्वेनोच्यमानमसिद्धं, स्वजनादयश्च वातेर्यमाणद्रुम-विश्लेषिखगा इव स्वस्वकार्यहानिमेव शोचन्तः क्रन्दन्ति, न तु दीक्षां । ततस्तत्क्रन्दनं तत्कार्यहेतुकमेव, न मद्दीक्षाहेतुकं । यतः—

**आत्मार्थं सीदमानं स्वजनपरिजनो रौति हाहारवार्त्तो,**
**भार्या चात्मोपभोगं गृहविभवसुखं स्वं च कार्यं च यस्याः ।**
**क्रन्दन्त्यन्योऽन्यमन्यस्त्विह हि बहुजनो लोकयात्रानिमित्तं,**
**यो वान्यस्तत्र किञ्चिन्मृगयति हि गुणं रोदितीष्टः स तस्मै ॥१॥** [ ]

एवं च त्वदुक्ते हेतुकारणे असिद्धे कूटे एव ॥१०॥

ततश्च—

**एयमट्ठं निसामित्ता, हेऊकारणचोइओ ।**
**तओ नमिं रायरिसिं, देविंदो इणमव्ववी ॥११॥**

**व्याख्या—एतमर्थं निशम्य** हेतुकारणयोः पूर्वोक्तयोश्चोदितोऽसिद्धोऽयं भवदुक्तो हेतुः, कारणं च तवोक्तमिति प्रेरितो **हेतुकारणचोदितो** निषिद्धः, **ततो नमिं राजर्षिं देवेन्द्र इदमब्रवीत्** ॥११॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

उक्तः कोलाहलः, अथाग्निदाहरक्षाप्रश्नः, यथा—

**एस अग्गी य वाऊ य, एयं डज्झइ मंदिरं ।**
**भयवं अंतेउरंतेणं, कीस णं नावपिक्खह ? ॥१२॥**

**व्याख्या—एषोऽ**ध्यक्षदृशो**ऽग्निर्वातश्च,** तथै**तत्**प्रत्यक्षं **दह्यते** प्रक्रमाद्वातेरितेनाग्निनैव **मन्दिरं तव, हे भगवन् ! अन्तःपुरं** अन्तःपुरस्थानं, **कस्मात्** ? **णं** अलङ्कारे, **नावप्रेक्षसे** नावलोकसे ? यद्यादात्मनः स्वं तत्तद्रक्षणीयं, यथा ज्ञानादिः, स्वं चेदं भवतोऽन्तःपुर-मित्यादिहेतुकारणभावना प्राग्वत् ॥१२॥

ततो **नमिरु**वाच—

**एयमट्ठं निसामित्ता, हेऊकारणचोइओ ।**
**तओ नमी रायरिसी, देविंदं इणमब्बवी ॥१३॥**

**व्याख्या**—प्राग्वत् ।

**सुहं वसामो जीवामो, जेसिं मो नत्थि किंचणं**
**मिहिलाए डज्झमाणीए, न मे डज्झइ किंचणं ॥१४॥**

**व्याख्या—सुखं** यथास्यादेवं **वसामस्**तिष्ठामो, **जीवामः** प्राणान् धारयामः, **येषां** 'मो'**ऽस्माकं नास्ति किञ्चना**ल्पमपि वस्तु, अनेन प्रागुक्तहेतोरसिद्धत्वं, तत्वतो ज्ञानादि-भ्योऽन्यस्य सर्वस्याऽस्वीयत्वात्, किञ्चिदन्तःपुरादि न मत्सत्कं । ततो **मिथिलायां दह्यमानायां न मे दह्यति किञ्चन** ॥१४॥

यथा—

**चत्तपुत्तकलत्तस्स, निव्वावारस्स भिक्खुणो ।**
**पियं न विज्जए किंचि, अप्पियं पि ण विज्जए ॥१५॥**

**व्याख्या—त्यक्तपुत्रकलत्रस्य निर्व्यापारस्य** मुक्तकृषिपशुपाल्यादिक्रियस्य **भिक्षोः प्रिय**मिष्टं **न विद्यते, किञ्चि**दल्पमपि, **अप्रियमपि न विद्यते,** प्रियाऽप्रियविभागास्तित्वे सति प्रियापुत्रादित्यागं न कुर्यादेव, तयोरेवातिस्नेहहेतुत्वात् । एतेन यदुक्तं नास्ति किञ्चन तत् स्थापितं । तत्स्वीयत्वं च पुत्राद्यत्यागतो रागतः स्यात्, रागश्च निषिद्धः ॥१५॥

एवं कथं सुखेन वसनं जीवनं चेत्याह—

**बहुं खु मुणिणो भद्दं, अणगारस्स भिक्खुणो ।**
**सव्वओ विप्पमुक्कस्स, एगंतमणुपस्सओ ॥१६॥**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या**—**बहु, खु**: निश्चये, **मुनेर्भद्रं** श्रेय: सुखं वा, **अनगारस्य भिक्षो:, सर्वतो** बाह्यादान्तराच्च परिग्रहात्, यद्वा स्वजनात् परिजनाच्च **विप्रमुक्तस्य,** एक एवाहमित्यन्तं निश्चयं **एकान्तमनुपश्यतश्चि**न्तयत: ॥१७॥

**एयमट्ठं निसामित्ता, हेऊकारणचोइओ ।**
**तओ नमिं रायरिसिं, देविंदो इणमब्बवी ॥१७॥**

**व्याख्या**—प्राग्वत् ।

उक्तो द्वितीयोऽग्निरक्षाप्रश्न: ।२। अथ दुर्गाद्युक्ति:, शक्र: प्राह—

**पागारं कारइत्ताणं, गोपुरट्टालगाणि य ।**
**उसूलगसयग्घीओ, तओ गच्छसि खत्तिया ॥१८॥**

**व्याख्या**—प्रकुर्वन्ति धूलीष्टकाद्यैरमुमिति **प्राकारस्तं कारयित्वा, गोपुराट्टलकानि च,** गोपुराणि प्रतोलीद्वाराणि, अर्गलाकपाटादि च, अट्टालकानि प्रकाराकोष्टकोपपरिवर्त्तीनि स्थानानि, 'उसूलग'त्ति **खातिका:**, परबलतापार्थ**मुपरिच्छादितगर्त्तो** वा, 'सयग्घीउ'त्ति **शतघ्न्यो** यन्त्रभेदा:, **तत** एवं सर्वं निराकुलीकृत्य गच्छसीति **गच्छ** ? **हे क्षत्रिय** ! हेरूपलक्षणं चेदं। स चायं य: क्षत्रिय: स्यात् स पुररक्षां प्रत्यवहितो यथोदितोदयादि:, क्षत्रियश्च भवान् । शेषं प्राग्वत् ॥१८॥

**एयमट्ठं निसामित्ता, हेऊकारणचोइओ ।**
**तओ नमी रायरिसी, देविंदं इणमब्बवी ॥१९॥**

**व्याख्या**—प्राग्वत् ।

**नमि**राह—

**सद्धं नगरं किच्चा, तवसंवरमग्गलं ।**
**खंतीणिउणपागारं, तिगुत्तं दुप्पहंसयं ॥२०॥**

**व्याख्या**—**श्रद्धां** तत्वरुचिरूपां अशेषगुणाधारतया **नगरं कृत्वा**, तथा प्रशम-संवेगादीनि च गोपुराणि कृत्वा, **तपो**ऽनशनादि बाह्यं, तत्प्रधान: **संवर** आश्रवनिरोधस्तप:-संवरस्तं मिथ्यात्वादिदुष्टनिवारकत्वेनार्गल: परिघस्तत्प्रधानं कपाटमप्यर्गला । ततो**ऽर्गलां** अर्गलाकपाटं कृत्वा, **क्षान्ति** क्षमां, **निपुणं** शत्रुरक्षणे श्रद्धाविरोध्यनन्तानुबन्धि-कोपादिरोधितया **प्राकारं** शालं कृत्वा, एवं मानादिनिरोधान्मार्दवादींश्च शालान् कृत्वा,

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**त्रिगुप्तं** तिसृभिरट्टालकोच्छूलकशतघ्नीस्थानीयाभिर्मनोगुप्त्यादिगुप्तिभिर्गुप्तं, अत एव **दुःप्रधर्षकं** परैरपात्यं, इत्थं यदुक्तं प्राकारादीन् कारयित्वेति तदुत्तरमुक्तम् ॥२०॥

अथ शस्त्रं वैरिजयं चाह–

**धणुं परक्कमं किच्चा, जीवं च इरियं सया ।**
**धिइं च केयणं किच्चा, सच्चेणं पलिमंथए ॥२१॥**

**व्याख्या–धनुः** कोदण्डं **पराक्रमं** जीववीर्योल्लासरूपमुत्साहं, **जीवां** च प्रत्यञ्चा**मीर्यासमितिं**, शेषसमितीश्च । **सदा, धृतिं** धर्मरतिं **केतनं च** शृङ्गमयधनुर्मध्ये काष्टमयमुष्टिकात्मकं, तच्च धनुः, **सत्येन** मनःसत्यादिना, 'पलिमन्थए'त्ति **बध्नीयात्** ॥२१॥

**तवनारायजुत्तेणं, भेत्तूणं कम्मकंचुयं ।**
**मुणी विगयसंगामो, भवाओ परिमुच्चइ ॥२२॥**

**व्याख्या**–ततस्त**पः** षड्विधमान्तरं तदेव **नाराचो**ऽयोमयो बाणस्**तेन युक्तेन** धनुषा भित्वा ज्ञानावरणादि**कर्म**रूपं **कञ्चुकं**, कर्मकञ्चुकग्रहणेन चात्मैवोद्धतो वैरीत्युक्तं । वक्ष्यति च "**अप्पा मित्तममित्तं च, सुपट्ठियदुपट्ठिए**" [ ] त्ति कर्मणस्तु कञ्चुकत्वं तद्गतमिथ्यात्वाद्युदयवतः श्रद्धानगरं भञ्जते, आत्मनो दुर्निवारत्वात्, मुनिः कर्मभेदे जेयस्य जितत्वात् विगतः सङ्ग्रामो यस्य स **विगतसङ्ग्रामो** भवति, शारीरमानसानि दुःखान्यत्रेति **भवात्** संसारात् **परिमुच्यते** । एतेन यदुक्तं 'प्राकारं कारयित्वा' इत्यादि तस्य सिद्धता । श्रद्धापुररक्षणोक्त्या तव तत्त्वाऽज्ञतेति चोक्तं, न च त्वदुक्तदुर्गादिना क्लेशमुक्तमुक्तिः प्राप्या, इतस्तु तदवाप्तिः ॥२२॥

**शक्रः** प्राह–

**एयमट्ठं निसामित्ता, हेऊकारणचोइओ ।**
**तओ नमीं रायरिसीं, देविंदो इणमव्ववी ॥२३॥**

**व्याख्या**–प्राग्वत् ।

उक्ता तृतीया दुर्गाद्युक्तिः ।३। अथ प्रासादोक्तिः, शक्र प्राह–

**पासाए कारइत्ताणं, वद्धमाणगिहाणि य ।**
**वालग्गपोइयाओ य, तओ गच्छसि खत्तिया ॥२४॥**

**व्याख्या**–प्रासादान् कारयित्वा, **वर्द्धमानगृहाणि चा**ऽनेकधा वास्तुविद्योक्तानि ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

'वालग्गपोइयाइ'त्ति देश्योक्त्या **वलभीश्च कारयित्वा,** अन्ये त्वाकाशतलाग्रमध्ये लघु-प्रासादमेव 'वालग्गपोइयाइ'वि इति देशीपदार्थमाहुः, ततस्ताश्च क्रीडास्थानभूताः कारयित्वा, ततो गच्छ ? क्षत्रिय । एतेन च यः प्रेक्षावान्, स सति सामर्थ्ये प्रासादादि-कारयिता, यथा **ब्रह्मदत्तादिः,** प्रेक्षावांश्च सति सामर्थ्ये भवान्, इत्यादिहेतुकारणे सुचिते ॥२४॥

**नमिः** प्राह–

**एयमट्ठं निसामित्ता, हेऊकारणचोइओ ।**
**तओ नमी रायरिसी, देविंदं इणमव्ववी ॥२५॥**

**व्याख्या**–प्राग्वात् ॥

**संसयं खलु सो कुणई, जो मग्गे कुणई घरं ।**
**जत्थेव गंतुमिच्छिज्जा, तत्थ कुव्वेज्ज सासयं ॥२६॥**

**व्याख्या–संशयं, खलुः** एवकारार्थे, **स कुरुते** यथा मम कदाचिदेव गमनं भविष्यतीति **यो मार्गे कुरुते गृहं,** गमननिश्चये तदकरणात् । अहं त्वसंशयितः, सम्यग्दर्शनादीनां मुक्तिहेतुत्वेन मया निश्चितत्वादवाप्तत्वाच्च । अतो **यत्रैव गन्तुमिच्छेत्तत्रैव कुर्वीत स्वाश्रयं** आत्मनः स्थानं । यद्वा **शाश्वतं** नित्यं गृहं । ततोऽयमर्थः–इदं तावदि-हावस्थानं मार्गस्थितिप्रायमेव । यत्तु जिगमिषितमस्माभिस्तन्मुक्तिपदं, तदाश्रयकृतौ प्रवृत्ता एव वयं, किंपुनर्वक्षि ? ॥२६॥

**शक्रः** प्राह–

**एयमट्ठं निसामित्ता, हेऊकारणचोइओ ।**
**तओ नमिं रायरिसिं, देविंदो इणमव्ववी ॥२७॥**

**व्याख्या**–प्राग्वत् ।

उक्ता तुर्या प्रासादोक्तिः ।४। अथ पञ्चमश्चौरनिग्रहः–

**आमोसे लोमहारे य, गंठिभेए य तक्करे ।**
**नगरस्स खेमं काऊणं, तओ गच्छसि खत्तिया ॥२८॥**

**व्याख्या**–आ समन्तान्मुष्णन्ति स्तैन्यं कुर्वन्तीत्य**ामोषास्तान्, लोमहरा** ये निस्त्रिंशत्वादात्मघातभीत्या प्रथमं प्राणान् हत्वैव सर्वस्वं हरन्ति । **ग्रन्थिभेदा** द्रव्यग्रन्थि-च्छेदकाः, **तस्कराश्चौ**रास्तान् सर्वान्निवार्य **नगरस्य क्षेमं कृत्वा ततो गच्छ हे क्षत्रिय ।** यः

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सधर्मा नृपः स इहाऽधर्मकारिनिग्रहकृत्, यथा **भरतादिः**, सधर्मनृपस्त्वमित्यादिहेतुकारणे ज्ञेये ॥२८॥

**नमिः** प्राह—

**एयमट्ठं निसामित्ता, हेऊकारणचोइओ ।**
**तओ नमी रायरिसी, देविंदं इणमव्ववी ॥२९॥**

**व्याख्या**—प्राग्वत् ।

**असइं तु मणुस्सेहिं, मिच्छादंडो पउंजइ ।**
**अकारिणोऽत्थ बज्झंति, मुच्चइ कारओ जणो ॥३०॥**

**व्याख्या—असकृद**नेकधा, **तुः** एवार्थे, **मनुष्यैर्मिथ्या** व्यलीकोऽनपराधिष्व-ज्ञानगर्वादिभि**दण्डो** देशत्यागनिग्रहादिः **प्रयुज्यते, अकारिण** आमोषणाद्यविधायिनो**ऽत्र** नृलोके **बध्यन्ते** निगडाद्यैः, **मुच्यते कारको जनः**, आमोषणादिकर्त्ता, तस्य क्रूरत्वादल-भ्यत्वात् । भावतश्चौरो रत्नत्रयविराधनाकर्त्ता लोकः, तदाऽनेन यदुक्तं प्रागामोषणादीना-मुच्छेदेन नगरस्य क्षेमं कृत्वा गच्छेस्तदनेन तेषां ज्ञातुमशक्यतया क्षेमकरणाऽशकत्वमुक्तं । यत्तु 'यः सधर्म' इत्याद्युक्तं, तत्राऽज्ञत्वेनाऽमंत्वादिदण्डं (तत्राऽज्ञत्वेनाऽनपराधिनामपि दण्डं) कुर्वन्तां सधर्मनृपत्वं न स्यादित्यसिद्धता हेतोः ॥३०॥

शक्रः प्राह—

**एयमट्ठं निसामित्ता, हेऊकारणचोइओ ।**
**तओ नमिं रायरिसिं, देविंदो इणमव्ववी ॥३१॥**

**व्याख्या**—प्राग्वत् ।

एवं शक्रेण स्वजनान्तःपुरप्रासादादिनृपधर्मविषयः किमस्य रागोऽस्ति न वेति विमृष्टम् । अथ द्वेषाऽभावपरीक्षायै विजिगीषुतामूलत्वाद् द्वेषस्य जयेच्छामीक्षितुकामः शक्र इदं जगौ ॥३१॥

उक्तः पञ्चमश्चौरनिग्रहः ।५। षष्ठं दुर्नमनृपनमनमाह—

**जे केइ पत्थिवा तुब्भं, णानमंति नराहिव ।**
**वसे ते ठावइत्ताणं, तओ गच्छसि खत्तिया ॥३२॥**

**व्याख्या—ये केचित्** सामस्त्येन **पार्थिवा** भूपाः **तुभ्यं नाऽऽनमन्ति**, तान् **हे**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**नराधिप ! वशे** आत्मायत्तौ **स्थापयित्वा ततो गच्छ ? क्षत्रिय** इह यो नृपः सोऽनमन्नृप-नमयिता, यथा **भरता**दिरित्यादिहेतुकारणे ज्ञेये ॥३२॥

**नमिः** प्राह—

**एयमट्ठं निसामित्ता, हेऊकारणचोइओ ।**
**तओ नमी रायरिसी, देविंदं इणमव्ववी ॥३३॥**

**व्याख्या**—प्राग्वत् ।

**जो सहस्सं सहस्साणं, संगामे दुज्जए जिणे ।**
**एगं जिणेज्ज अप्पाणं, एस से परमो जओ ॥३४॥**

**व्याख्या—यः सहस्त्रं सहस्त्राणां** दशलक्षात्मकं सुभटानां **सङ्ग्रामे दुर्जयं जयेत्** वारयेत्, **एकं च जयेदात्मानं** पापप्रवृत्तं, **एष** 'से' **तस्य** जेतुर्भटदशलक्षजयात्परमो **जयः**, एतेनात्मन एव दुर्जेयतोक्ता ॥३४॥

तथा च—

**अप्पाणमेव जुज्झाहि, किन्नु जुज्झेण बज्झओ ।**
**अप्पाणमेव अप्पाणं, जिणित्ता सुहमेहइ ॥३५॥**

**व्याख्या**—'अप्पाणमेव'त्ति तृतीयार्थे द्वितीया । **आत्मनैव** सह **युद्धयस्व** ! स्वदोषानेव निगृहाण ! यद्वा युधेरन्तर्भावितण्यर्थत्वाद् **योधयेत्यर्थः** स्वकमात्मानमात्मनैव सह । **किं नु युद्धेन बाह्यतः**, बाह्यं पार्थिवादिमाश्रित्य । **आत्मनैवात्मानं जित्वा सुख-मे**कान्तिकात्यन्तिकमेधते **प्राप्नोति** ॥३५॥

आत्मनि जिते सुखाप्तिमाह—

**पंचिंदियाणि कोहं, माणं मायं तहेव लोहं च ।**
**दुज्जयं चेव अप्पाणं, सव्वमप्पे जिए जियं ॥३६॥**

**व्याख्या**—'**पंचिंदि**'त्ति [पञ्चेन्द्रियाणि] **क्रोधो, मानो, माया तथैव लोभो दुर्जयो** दुरभिभवः, **आत्मा** मनः, **च एवौ** पूर्त्तौ । सर्वत्र सूत्रत्वान्नपुंस्त्वं । अतति तानि तान्यध्यवसायस्थानान्तराणीत्यात्मा मनः, **सर्वमि**न्द्रियादि मिथ्यात्वादि च, **आत्मनि** जीवे **जिते** सति वशीभूते सति **जितमेव** । ततश्च यो नृपतिरित्याद्यपि तत्त्वतो विजिगीषुवत् दर्शनात् सिद्धतया प्रत्युक्तम् ॥३६॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**शक्रः** प्राह—

**एयमट्ठं निसामित्ता, हेऊकारणचोइओ ।**
**तओ नमिं रायरिसिं, देविंदो इणमव्ववी ॥३७॥**

**व्याख्या**—प्राग्वत् ।

दुर्नमनं षष्ठमुक्तं, सप्तमं यज्ञाद्याह, रागद्वेषत्यागं तस्य निश्चित्याऽर्हद्धर्मस्थैर्यं परीक्षितुमाह—

**जइत्ता विपुले जण्णे, भोइत्ता समणमाहणे ।**
**दत्ता भोच्चा य इट्ठा य, तओ गच्छसि खत्तिया ॥३८॥**

**व्याख्या—याजयित्वा विपुलान् यज्ञान्, भोजयित्वा श्रमणब्राह्मणान्**, श्रमणा निर्ग्रन्थाः, **दत्त्वा** द्विजादिभ्यो गोभूमिसुवर्णादीनि, **भुक्त्वा** च मनोज्ञशब्दादीन्, **इष्ट्वा च** राजर्षित्वात् स्वयं यागान्, **ततो गच्छ ! क्षत्रिय** ! यद्यत्प्राणिप्रीतिकरं तत्तद्धर्माय, यथाऽहिंसादिः, तथा चामूनि यागादीनीत्यादिनीत्या हेतुकारणे ॥३८॥

**नमिः** प्राह—

**एयमट्ठं निसामित्ता, हेऊकारणचोइओ ।**
**तओ नमी रायरिसी, देविंदं इणमव्ववी ॥३९॥**

**व्याख्या**—प्राग्वत् ॥

**जो सहस्सं सहस्साणं, मासे मासे गवं दए ।**
**तस्सावि संजमो सेओ, अदिंतस्स वि किंचणं ॥४०॥**

**व्याख्या—यः सहस्रं सहस्राणां** दशलक्षात्मकं **मासे मासे गवां दद्यात्, तस्यैवं**विधदातु**रपि** यदि कथञ्चिच्चारित्रमोहनीयक्षयोपशमेन **संयम** आश्रवविरमः स्यात्तदा स एव **श्रेयान**तिप्रशस्यः, **अददतः** किञ्चन स्वल्प**मपि** वस्तु । यद्वा 'तस्सावि'त्ति **तस्माद**प्युक्तस्वरूपाद्दातु**रपि संयमः** संयमवान् साधुः **श्रेयान्** प्रशस्यतरः, एवं संयमं वर्णयता तेन यागादीनां सावद्यतोक्ता । उक्तं च—

**षट् शतानि नियुज्यन्ते, पशूनां मध्यमेऽहनि ।**
**अश्वमेधस्य वचना-दूनानि पशुभिस्त्रिभिः ॥१॥ [ ]**

एवं च सावद्यत्वाद्यागादयो न प्राणिप्रीतिकरा इत्यसिद्धो हेतुः, प्रयोगश्च-यत्सावद्यं न तत्प्राणिप्रीतिकरं, यथा हिंसादि, सावद्यानि च यागादीनीति ॥४०॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

शक्रः प्राह—

**एयमट्ठं निसामित्ता, हेऊकारणचोइओ ।**
**तओ नमिं रायरिसिं, देविंदो इणमव्ववी ॥४१॥**

**व्याख्या**—प्राग्वत् ।

उक्तो यज्ञादिसप्तमः ।७। अष्टमं गार्हस्थ्यमाह—इत्थं जिनधर्मस्थैर्यं निश्चित्याथ तस्य प्रव्रज्यादार्ढ्यं परीक्षते—

**घोरासमं चइत्ताणं, अन्नं पत्थेसि आसमं ।**
**इहेव पोसहरओ भवाहि मणुयाहिवा ॥४२॥**

**व्याख्या—घोरो** दुरनुष्ठेय **आश्रमो** गार्हस्थ्यं तस्यैवाल्पसत्त्वैर्दुःकरत्वात्, यत आहुः-

**गृहाश्रमसमो धर्मो, न भूतो न भविष्यति ।**
**पालयन्ति नराः शूराः, क्लीबाः पाखण्डमाश्रिताः ॥१॥ [ ]**

**तं त्यक्त्वा अन्यं** कृषिपशुपालादिअशक्तकातरजनाश्रितं **प्रार्थयसे आश्रमं** प्रव्रज्यारूपं, नेदं क्लीबसत्त्वाचरितं त्वादृशार्हं, **इहैव** गृहाश्रमे स्थितः, पोषं धर्मपुष्टिं यो धत्ते, एवं-विधोऽष्टम्यादितिथिक्रियमाणव्रतविशेषस्तत्र रतः **पौषधरतो भव** ! अणुव्रताद्युपलक्षणमेतत् । अस्योपादानं पोषधदिनेष्ववश्यं भावतस्तपोऽनुष्ठानख्यापकं । यत आह **सिद्धसेनः—**

**सर्वेष्वपि तपो योगः, प्रशस्तः किल पर्वसु ।**
**अष्टम्यां पञ्चदश्यां च, नियतः पौषधं वसेत् ॥१॥ [ ]**

इति **हे मनुजाधिप** । अत्र घोरपदेन हेतुराक्षिप्तः, यद्यद् घोरं तत्तद्धर्मार्थिनाऽनुष्ठेयं, यथा-ऽनशनादि, तथा चायं गृहाश्रमः ॥४२॥

**नमिः** प्राह—

**एयमट्ठं निसामित्ता, हेऊकारणचोइओ ।**
**तओ नमी रायरिसी, देविंदं इणमव्ववी ॥४३॥**

**व्याख्या**—प्राग्वत् ।

**मासे मासे उ जो बालो, कुसग्गेणं तु भुंजइ ।**
**ण सो सुयक्खाय धम्मस्स, कलं अग्घइ सोलसिं ॥४४॥**

**व्याख्या—[मासे मासे]तुः** इह अग्रे चैवकारार्थः, **यो बालो**ऽविवेकः **कुशा-**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**ग्रेणैव** दर्भाग्रेण भुङ्क्ते, नत्वङ्गुल्याद्यैः, यद्वा यावत्कुशाग्रेऽवतिष्ठते तावदेव भुङ्क्ते, नाधिकं। **स** कष्टकृद्बालः, सुष्टु निरवद्यत्वादाख्यातो जिनैरिति **स्वाख्यातो धर्मो यस्य** चारित्रिण इत्यर्थः, **कलां भागं नार्घति** नार्हति **षोडशीं,** षोडशांससमोऽपि न स्यात्, किं पुनस्तुल्योऽधिको वा ? ततो यदुक्तं यद्यद् घोरं तत्तद्धर्मार्थिनाऽनुष्ठेयमनशनादिवदित्यत्र घोरत्वादित्यनैकान्तिको हेतुः, घोरस्यापि स्वाख्यातधर्मस्यैव धर्मार्थिनाऽनुष्ठेयत्वात्। अन्यस्य त्वात्महिंसादिवदन्यथा-त्वात्। प्रयोगश्चात्र—यत् स्वाख्यातधर्मरूपं न स्यात् तद् घोरमपि धर्मार्थिना नानुष्ठेयं, यथात्म-वधादि। न स्वाख्यातधर्मरूपो गृहाश्रमः सावद्यत्वाद्धिंसादिवदिति ॥४४॥

शक्रः प्राह—

**एयमट्ठं निसामित्ता, हेऊकारणचोइओ ।**
**तओ नमिं रायरिसिं, देविंदो इणमव्ववी ॥४५॥**

**व्याख्या**—प्राग्वत्।

उक्तमष्टमं गार्हस्थ्यं ।८। नवमं हिरण्यादिसङ्ग्रहमाह-यतिधर्मे दृढोऽयमिति निश्चित्य दुरन्तोऽयं राग इति तदभावं परीक्षते ॥४५॥

**हिरण्णं सुवण्णं मणिमुत्तं, कंसं दूसं च वाहणं ।**
**कोसं वड्ढइत्ताणं, तओ गच्छसि खत्तिया ॥४६॥**

**व्याख्या—हिरण्यं** घटितं, **स्वर्णम**घटितं सुवर्णं, मणयश्चेन्द्रनीलाद्याः मुक्ताश्च **मणिमुक्तं, कांस्यं** कांस्यभाजनादि, **दूष्यं** वस्त्राणि, **चः** अनेकभेदार्थः, **वाहनं** रथाश्वादि, **कोशं** च **वृद्धिं प्रापय्य, ततः** सर्ववस्तु विषयेच्छापूर्तौ **गच्छ क्षत्रिय** ? अयमाशयः-यः साकाङ्क्षः नासौ धर्मानुष्ठानार्हः, यथा **मम्मण**वणिक्, सकाङ्क्षश्च त्वं, काङ्क्षणीय-हिरण्यादिवस्त्वऽपरिपूर्तेः, तथाविध**द्रमक**वत् ॥४६॥

नमिः प्राह—

**एयमट्ठं निसामित्ता, हेऊकारणचोइओ ।**
**तओ नमी रायरिसी, देविंदं इणमव्ववी ॥४७॥**

**व्याख्या**—प्राग्वत्।

**सुवण्णरूप्पस्स उ पव्वया भवे, सिया हु केलाससमा असंखया ।**
**नरस्स लुद्धस्स न तेहि किंचि, इच्छा हु आगाससमा अणंतिया ॥४८॥**

**व्याख्या**—सुवर्णं च रूप्यं च **सुवर्णरूप्यं, तस्य, तुः** पूर्तौ, पर्वता इव **पर्वताः**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

पर्वतमाना राशयो **भवेयुः, सिया** स्यात् कदाचित्, हुर्निश्चये, **कैलाससमा** एव, **कैलासो मेरुः**' इति वृद्धाः, तेऽप्य**सङ्ख्याः,** न तु द्वित्रा एव। **नरस्योप**लक्षणात् स्त्रियः क्लीबस्य वा, **न तैः** कैलाससमैरसङ्ख्यैः स्वर्णरूप्यादिभिः **किञ्चि**दल्पमपि तोषापादानं स्यात्, 'न तेण'त्ति **न तेने**ति, सूत्रत्वाद्वचनव्यत्ययः, इच्छा हुरिति यस्मादाकाशसमा अनन्तिका अन्तरहिता। उक्तञ्च–

**न सहस्राद्भवेत्तुष्टि-र्न च लक्षान्न कोटितः।**
**न राज्यान्नैव देवत्वा-न्नेन्द्रत्वादपि देहिनाम्** ॥१॥ ॥४८॥ [ ]

किं सुवर्णरूप्ये केवले एव नेच्छापूर्त्तये? इत्याशङ्क्याह–

**पुढवी साली जवा चेव, हिरण्णं पसुभिस्सह।**
**पडिपुण्णं नालमेगस्स, इइ विज्जा तवं चरे ॥४९॥**

**व्याख्या–पुढवी** पृथ्वी मही, **शालयो** लोहितशाल्यादयो, **यवाः, चः** शेषान्नसमुच्चयार्थः, **एवा**वधारणे, स च भिन्नक्रमः, **हिरण्यं,** ताम्राद्युपलक्षणं, **पशुभि**र्गवाश्वादिभिः **सह सम्पूर्णं** समस्तं, **नैवालं** न समर्थं, इच्छापूर्त्यै **एकस्य** जन्तो। **एतत्** श्लोकद्वयोक्तं **विदित्वा,** यद्वा **इतीत्यस्माद्धेतोर्विद्वान् तपो** द्वादशविधं **चरेदासे**वेत। तत एवं निस्पृहतयैवेच्छापूर्तिः, अनेन सन्तोष एव निराकाङ्क्षत्वे हेतुर्न तु हिरण्यादिवर्द्धनमित्युक्तं। तथा च हिरण्यादि वर्द्धयित्वेत्यत्र यदनुमानमुक्तं तत्साकाङ्क्षत्वं हेतुर्ममाऽनीहत्वेनाऽसिद्धः, न चाकाङ्क्षणीयवस्तुपरिपूर्त्तेकस्तस्य सिद्धत्वं, सन्तुष्टतया ममाकाङ्क्षणीयवस्तुन एवाऽभावात् ॥४९॥

उक्तः स्वर्णादिसङ्ग्रहः ।९। अथ भोगत्यागप्रश्नः। **शक्रः** प्राह–

**एयमट्ठं निसामित्ता हेऊकारणचोइओ।**
**तओ नमिं रायरिसिं, देविंदो इणमव्ववी ॥५०॥**

**व्याख्या**–प्राग्वत्।

असत्सु विषयेषु निवृत्तोऽयमिति निश्चित्य, सत्सु तेष्वरागोऽस्त्युत नेति विवेकुमाह–

**अच्छेरगमब्भुदए, भोए जहसि पत्थिवा।**
**असंते कामे पत्थेसि, संकप्पेण विहम्मसि ॥५१॥**

**व्याख्या**–'अच्छेरगं'ति **आश्चर्यं** वर्त्तवे, यत्त्वमेवंविधोऽपि 'अब्भुदए' **अद्भूतका**नाश्चर्यरूपान् **भोगान् त्यजसि हे पार्थिव**। अथवा 'अब्भुयए'त्ति **अभ्युदये**ऽपि **भोगां**–

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**स्त्वं जहासि**, तथा तत्त्यागतश्चा**ऽसतो**ऽविद्यमानान् कामान् **प्रार्थयसे** यत्तदप्याश्चर्यं, अथवा कस्तवात्र दोषः ? **सङ्कल्पेनो**त्तरोत्तराऽप्राप्तभोगेच्छारूपेण **विहन्यसे** विविधं बाध्यसे, सद्विवेको हि न प्राप्तान् विषयानप्राप्ताकाङ्क्षया त्यजेत्, यथा **ब्रह्मदत्त**चक्र्यादिः, सद्विवेकश्च भवानित्यादिर्हेतुकारणे ॥५१॥

**नमिः** प्राह–

**एयमट्ठं निसामित्ता हेऊकारणचोइओ ।**
**तओ नमी रायरिसी, देविंदं इणमब्बवी ॥५२॥**

**व्याख्या**–प्राग्वत् ।

**सल्लं कामा विसं कामा, कामा आसीविसोवमा ।**
**कामे पत्थेमाणा, अकामा जंति दुग्गइं ॥५३॥**

**व्याख्या**–देहान्तःप्रविष्टं तोमरादि शल्यमिव **शल्यं**, विविधबाधाकर्तृत्वात्, **कामा** मनोज्ञाः शब्दादयः, यथाहि शल्यमन्तश्चलन् विविधबाधाकारि तथैतेऽपि । विषं तालपुटादि विषमिव **विषं कामाः** मुखमधुरायन्ति दारुणत्वात् । आस्यो दंष्ट्रास्तासु विषमस्यास्ती-**त्यासीविषस्तदुपमाः**, यथासीविषोऽज्ञैर्दृश्यमानः फणामणिना चारुरिव विभाव्यते, स्पृष्टश्च विनाशायैव स्यात्तथैतेऽपि कामाः, किञ्च **कामान् प्रार्थयमानाः**, अपिशब्दस्य लुप्तत्वात् प्रार्थयमाना अपि अकामा इष्यमाणकामाऽभावात्, **यान्ति दुर्गतिं** नरकादिकां । तथा च सद्विवेकत्वमित्यनैकान्तिको हेतुः, प्राप्तस्याप्यपायहेतोर्विवेकिभिस्त्यज्यमानत्वात् । मुमुक्षूणां न क्वचिदाकाङ्क्षाभावादसत्कामप्रार्थना स्यादित्यसिद्धोऽपि ॥५३॥

भोगैस्तु दुर्गतिः–

**अहे वयइ कोहेणं, माणेणं अहमा गई ।**
**मायागइपडिग्घाओ लोहाओ दुहओ भयं ॥५४॥**

**व्याख्या–अधो** नरके **व्रजति क्रोधेन, मानेन चाधमा** नीचा **गतिः** स्यात्, **मायया गते**र्नृगतेः **प्रतिघातो** विनाशः स्यात्, **लोभात्** 'दुहओ'त्ति **द्विधा** ऐहिकं पारत्रिकं च **भयं** दुःखं स्यात् । कामप्रार्थनेऽवश्यं भाविनः क्रोधाद्यास्ते चेदृशास्ततः कथं तत्प्रार्थनातो न दुर्गतिः ? ॥५४॥

उक्तो भोगत्यागो दशमः ।१०। एवं बहुभिरप्युपायैस्तत्क्षोभनेऽशक्त इन्द्रः–

**अवउज्झिऊण माहण-रूवं विउव्विऊण इंदत्तं ।**
**वंदइ अभिथुणंतो, इमाहिं महुराहिं वग्गूहिं ॥५५॥**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या**—**अपोह्य** त्यक्त्वा **ब्राह्मणरूपं**, च **विकृत्येन्द्रत्वं**, **वन्दतेऽभिष्टुवन्नाभि-र्मधुराभिः** श्रुतिसुखाभि**र्वाग्भिः** ॥५५॥

तद्यथा—

**अहो ते निज्जिओ कोहो, अहो ते माणो पराजिओ ।**
**अहो ते निरक्किया माया, अहो लोहो वसीकओ ॥५६॥**

**व्याख्या**—**अहो** इति विस्मये, 'ते' इति **त्वया** सर्वत्र गम्यं । निराधिक्येन जितो **निर्जितः क्रोधः**, यतस्त्वमनमन्नृपनामनप्रेरणयापि न क्षुब्धः, **अहो ते मानो**ऽहङ्कारः **पराजितः**, मन्दिरं दह्यते इत्याद्युक्तेऽपि 'कथं मयि जीवतीदम्' इति नाहङ्कृतवान् । **अहो ते माया निराकृता**ऽपास्ता, यतस्त्वं वैर्यपायपातहेतुषु प्राकाराट्टालकोच्छूलकादिषु निःकृति-हेतुकेष्वामोषिच्छेदनादिषु च मनो न चक्रे । **अहो ते लोभो वशीकृतो** नियत्रितः, यतस्त्वं हिरण्यादि वर्द्धयित्वा गच्छेत्युक्तोऽपीच्छाया आकाशसमत्वमेव जगौ ॥५६॥

अत एव—

**अहो ते अज्जवं साहू, अहो ते साहु मद्दवं ।**
**अहो ते उत्तमा खंती, अहो ते मुत्ति उत्तमा ॥५७॥**

**व्याख्या**—**अहो** 'ते' **तवार्जवम**ृजुत्वं मृदुक्तावुत्तरदत्वात् साधु शोभनं, **अहो** 'ते' **तव साधु मार्द्दवं** मृदुत्वं मदागमेऽपि सविलम्बत्वात्, **अहो ते उत्तमा क्षान्तिः** दुर्भाषणेऽपि समत्वात् । **अहो ते मुक्ति**र्निर्लोभ**तोत्तमा**, देहेऽप्यममत्वात् । व्यत्ययनिर्देश-स्त्वनानुपूर्व्यपि व्याख्याङ्गमिति कृत्वा ॥५७॥

गुणैः स्तुत्वा फलेन स्तौति—

**इहं सि उत्तमो भंते पिच्चा होहिसि उत्तमो ।**
**लोगुत्तमुत्तमं ठाणं, सिद्धिं गच्छसि नीरओ ॥५८॥**

**व्याख्या**—**इह** नृजन्मनि **असि** भवसि **उत्तमो** गुणान्वितत्वात् । **हे भदंत** पूज्य ! **प्रेत्य** परलोके **भविष्यस्तुत्तमः**, यतो लोकस्य चतुर्द्दशरज्ज्वात्मकस्योत्तममुपरिवर्त्ति **लोकोत्तममुत्तमं** स्वर्गाद्यपेक्षया प्रधानं, अथवा 'लोगुत्तममुत्तम'त्ति **मः** अलाक्षणिकः, ततो **लोकस्य लोके** वा **उत्तमोत्तमम**तिप्रधानं **स्थानं सिद्धिं गच्छसि**, सूत्रत्वाद् गमिष्यसि, **नीरजाः**, निर्गतो रजसः कर्मणः ॥५८॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

उपसंहरति—

**एवं अभित्थुणंतो, रायरिसिं उत्तमाए सद्धाए ।**
**पायाहिणं करंतो, पुणो पुणो वंदइ सक्को ॥५९॥**

**व्याख्या—एवमुक्तरीत्याऽभिष्टुवन् राजर्षिं नमिं उत्तमया श्रद्धया प्रदक्षिणां कुर्वन् पुनः पुनर्वन्दते शक्रः** ॥५९॥

**तो वंदिऊण पाए, चक्कंकुसलक्खणे मुणिवरस्स ।**
**आकासेणुप्पइओ, ललियचवलकुंडलकिरीडी ॥६०॥**

**व्याख्या—ततः** (पाठान्तरे-**स** इति शक्रः) **वन्दित्वा पादौ चक्राङ्कुशलक्षणौ** चक्राङ्कुशप्रधानौ **मुनिवरस्य** नमिनाम्नः, **आकाशेनोत्पतितः**, ऊर्ध्वं स्वर्गाभिमुखं गतः, ललिते च सविलासतया चपले च ते तथाविधे कुण्डले यस्य स ललितचपलकुण्डलः स चासौ किरीटी च मुकुटवान् स **ललितचपलकुण्डलकिरीटी** ॥६०॥

स्तूयमानः स उत्कर्षं नागादित्याह—

**नमी नमेइ अप्पाणं, सक्खं सक्केण चोइओ ।**
**चइऊण गेहं वइदेही, सामन्ने पज्जुवट्ठिओ ॥६१॥**

**व्याख्या—नमिर्नमयति** स्वं तत्त्वभावनया वशीकरोत्य**आत्मानं**, नतूत्सेकं नयति, साक्षात् प्रत्यक्षीभूय **शक्रेण चोदितः** प्रेरितः, **त्यक्त्वा गेहं,** सूत्रत्वाद्वि**देही** विदेहेषु भवां **वैदेहीं मिथिला**पुरीं सुब्व्यत्ययात्, त्यक्त्वा, **श्रामण्ये** श्रमणभावे **पर्युपस्थित** उद्यतोऽभून्न तु तत्प्रेरणतो धर्मे विप्लुतोऽभूत् ॥६१॥

यथैष एवमन्येऽपि स्युरित्याह—

**एवं करंति संबुद्धा, पंडिया पवियक्खणा ।**
**विणियट्टंति भोगेसु, जहा से णमी रायरिसि ॥६२॥ त्ति बेमि**

**व्याख्या—एवमिति** यथैतेन **नमि**ना निश्चलत्वं कृतं तथान्येऽपि **कुर्वन्ति**, उपलक्षण-त्वादकार्षुः करिष्यन्ति वा, **सम्बुद्धा** मिथ्यात्वादिहान्या ज्ञातजीवादितत्त्वाः **पण्डिताः** सुनिश्चितशास्त्रार्थाः, **प्रविचक्षणाः** अभ्यासातिशयक्रियां प्रति प्रधानाः, **विनिवर्त्तन्ते** विशेषेण निवर्त्तन्ते **भोगेभ्यो**, यथा स **नमि**राजर्षिर्निवृत्तः, **इति** समाप्तौ **ब्रवीमी**ति प्राग्वत् ॥६२॥

**इति चरणनिःप्रकम्पत्वाय नवमं नमिप्रवज्याध्ययनमुक्तम् ॥९॥**

• • •

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

# दशमं द्रुमपत्रकनामाध्ययनम् ॥

चरणनिश्चलता चानुशासनात् स्यादिति दशमं **दुमपत्रका**ख्याध्ययनं **गौतम**मुद्दिश्य-श्री**वीरो**क्तमाह—

**पृष्ठिचम्पायां शालो** राट्, तस्य भ्राता **महाशालो** युवराट्, तयोः स्वसा **यशोमती,** तद्भर्त्ता **पिठर**स्तयोः सुतो **गागलिः,** तत्र **सुभूमिभागो**द्याने श्री**वीरः** समवासार्षीत्, **शालो** धर्मं श्रुत्वा विरक्तो **महाशाल**मूचे त्वं राज्यं लाहि ? अहं संयमं लायामि, सोऽपि प्रबुद्ध-स्तन्नैच्छत् । ततो **गागलिं** भागिनेयं **काम्पील्या**दाहूय स्वपदेऽभिषिच्य **शालमहाशालौ गागलि**कृतदीक्षामहौ दीक्षितौ, जातौ चैकादशाङ्गिनौ, **यशोमती** श्रमणोपासिका जाता । **शालमहाशाला**भ्यां सहाऽर्हन् विहरन्नन्यदा **राजगृहे** समवसृतस्ततश्च **चम्पां** प्रति प्रस्थितः, ताभ्यां विज्ञप्त आवां भवदादेशात् **पृष्ठिचम्पां** यावश्चेत् कोऽपि तत्र बुद्ध्येत सम्यक्त्वं वा लभेत। स्वामी लाभाद् **गौतमे**न सह तौ प्रैषीत्। स्वामी **चम्पां** प्राप्तः, ते च **पृष्ठिचम्पां, गागलिः पिठरयशोमती**भ्यां सह तान् वन्दमानः श्री**गौतम**मोक्तधर्माद्बुद्धः पुत्रं राज्ये निवेश्य मातृपितृभ्यां सह दीक्षां जग्राह । **गौतम**स्तानादाय **चम्पा**मचालीत् । **शालमहाशालयोः** पथि व्रजतो**र्गागल्यादि**दीक्षाहर्षेण, **गागल्या**दीनां त्वमूभ्यां वयं तारिता इति शुभध्यानात् केवलं जातं। पश्चाप्युत्पन्नकेवलज्ञाना**श्चम्पां** प्राप्ताः, स्वामिनं प्रदक्षिणय्य केवलिसभायामासीनाः । **गौतमो**ऽर्हन्तं नत्वा तानूचे, भो अर्हन्तं वन्दध्वं ! स्वाम्यूचे **गौतम** मा केवलिन आशातय ! सोऽक्षामयत् संवेगाच्च दध्यौ किमहं सिद्धिं नाप्स्यामि ?

इतो यो भूमिगो**ऽष्टापद**मारुह्य देवान्नमेत् स तद्भवे सिद्ध्यतीति देवालापं श्रुत्वा तत्र देवान्नंतुं स स्वामिनं पप्रच्छ । स्वाम्यपि तदाशयं ज्ञात्वाऽस्य स्थैर्यार्थं तापसबोधार्थमनुमेने, यथा सुखं देवानुप्रिय इति, सोऽर्हन्तं नत्वा तपःशक्त्या चलन् पादचारे**णाष्टापदं** गतः, इतः **कोडिन्नदिन्नसेवाल**नामानस्त्रयस्तापसाः पञ्चपञ्चतापसशतसहिता **अष्टापद**देवनत्या तद्भव-सिद्धिकताप्रवादं श्रुत्वा**ऽष्टापद**मारोक्ष्याम इति दध्युः, **कोडिन्नः** सतन्त्रश्चतुर्थं कृत्वा

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

मूलकन्दानदन्नाद्यां मेखलामारूढः । **दिन्नः** सतन्त्रः षष्ठं कृत्वा शटितपत्राण्यदन् द्वितीयमेखलामारूढः । **सेवालः** सतन्त्रोऽष्टमं कृत्वा शुष्कसेवालमदन्स्तृतीयमेखलां विलग्नः, एवं ते तिष्ठन्ति, **गौतम**मुदाराङ्गं हुतभुक्तडित्तरुणार्काभमायान्तं ते वीक्ष्योचुरेषः स्थूलदेहः कथमारोहयिष्यति ? वयं महातपःशुष्का न शक्नुम आरोढुं । **गौतम**स्तु जङ्घाचारणलब्ध्या लूतातन्तुनिश्रयापि चलंस्तेषां पश्यतामेवागतो गतश्चाऽदृश्यतां । ते विस्मिताः पश्यन्तो यदैष उत्तरेत्तदाऽस्यैव शिष्या वयं भविष्याम इति दध्युः ।

अथ **गौतम**स्तत्र चैत्यानि नत्वेशान्यां दिशि पृथिवीशिलापट्टेऽशोकद्रोरधो रात्रिवासकं स्थितः, इतो **धनदोऽष्टापदे** चैत्यानि नन्तुमेतो **गौतमं** नत्वा देशनायां साधुगुणान् 'अन्ताहाराः प्रान्ताहाराः साधवः स्युः' इत्यादिकान् श्रुत्वा दध्यौ, यदेष गुरुरेवं साधुगुणान् वक्ति, स्वयं च तां रूपश्रियं धत्ते, या देवानामपि न, एवं तदाकूतं **गौतमो** ज्ञात्वा **पुण्डरीका**ध्ययनमूचे । यथा **पुष्कलावती**विजये **पुण्डरीकिण्यां** पुर्यां **महापद्म**राट्, **पद्मावती** राज्ञी, तत्कुक्षिसमुद्भवौ **पुण्डरीककण्डरीका**भिधौ पुत्रौ सगुणौ । **पुण्डरीको** युवराजोऽभूत् । तत्र **नलिनीगुल्मो**द्याने स्थविराः समवसृताः, तदन्ते धर्मं श्रुत्वा **महापद्मः** **पुण्डरीकं** राज्ये संस्थाप्य प्राव्राजीत् । चतुर्दशपूर्वाण्यधीत्य षष्ठाष्टमादिमहातपोभिर्बहुवर्षश्रामण्यान्मासिक्या संलेखनया च स सिद्धः, अन्यदा त एवाचार्याः पूर्वानुपूर्व्या विचरन्तः **पुण्डरीकिण्यां** समवसृताः, **पुण्डरीक**स्तदन्ते श्राद्धधर्मं प्रपन्नः, **कण्डरीको** विरक्तो व्रतार्थं **पुण्डरीकं** पप्रच्छ। स ऊचे भ्रातरं तुभ्यं राज्यं ददे, स तु नैच्छत् । तदा **पुण्डरीकेण** विषयसुखानि, दीक्षादुःपालनदृष्टान्तान् अष्टादशपापस्थानाऽऽधाकर्मादिदोषकान्तारभक्तदुर्भिक्षभक्तग्लानभक्तप्राघूर्णकभक्तवार्दलिकाभक्तादिबीजफलहरितभक्तत्यागशीतोष्णादिसहनान्युक्त्वा बहुवारितो बोधितोऽप्यतिष्ठन्ननिच्छया कृतमहः प्राव्राजीत् । एकादशाङ्गान्यधीत्य षष्ठाष्टमादितपः स चक्रे । अन्यदा तस्यान्तप्रान्ताहारेण रोगा जाताः, सोऽधिसहमानो विहरन् वर्षसहस्रेणाचार्यैः सह **पुण्डरीकिणीं** प्राप्तः, पुण्डरीको वन्दमानः **कण्डरीकं** रुजाक्रान्तं दृष्ट्वा स्थविरैः सह स्वयानशालामानीय शुभाहारेण क्षिप्रं तस्य रोगानशामयत् । स बलिष्ठाङ्गोऽप्याहारगृद्धो गुरुषु चलितेष्वपि तत्र स्थितः श्लथसंयमोऽभूत् । **पुण्डरीक**स्तद् ज्ञात्वा तस्मै वैराग्योपदेशमूचे, धन्यस्त्वं विषयदेहधनराज्याद्यसारमस्थिरं मलिनं रिपुचौरादिवश्यं त्यक्त्वा दीक्षितः, अहं त्वधन्योऽचारित्रीति ।

ततः स तूष्णीं स्थितः, एवं द्विस्त्रिरुक्तो लज्जयाऽनिच्छुरपि **पुण्डरीकं** पृष्ट्वा गुरूणां मिलितः, किञ्चित्कालं तैः समं विहृत्य पुनश्चारित्रावरणीयकर्मोदयवशाद्दीक्षानिर्विण्णो गुरून् मुक्त्वोत्प्रव्रजितुकामः **पुण्डरीकिण्यां** **पुण्डरीक**राजावासाऽ**शोकवनिका**या-

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**मशोक**तरोरधः पृथिवीशालापट्टकमेत्यारुह्य विमनाः सङ्कल्पविकल्पान् दध्यौ । **पुण्डरीक**-धात्र्या तं दृष्ट्वा राज्ञे प्रोक्तं । राजा सान्तःपुर एत्य तं त्रिःप्रदक्षिणय्य 'धन्यस्त्वमसि' इत्यादि सर्वं तथैवोचे, स तूष्णीं तस्थौ । राज्ञोचे अस्ति किं ते भोगैरर्थः ? तेन ओमित्युक्ते राजा तं राज्येऽभिषिच्य स्वयं च जातमहावैराग्य पञ्चमुष्टिलोचेन चातुर्यामं धर्मं प्रपद्य **कण्डरीक**स्यैव भाण्डोपधिं लात्वा 'कल्पते मे स्थविरेभ्यो धर्मप्रतिपत्तेरनु आहारः' इत्यभिगृह्य स स्थविराभिमुखं निर्ययौ । **कण्डरीक**स्तु प्रणीतं भोजनाद्यश्नन् राज्यान्तः-पुरादिषु महामूर्च्छावान् गूढविसूचिकावेदनार्त्तो रौद्रध्यानी अकाममरणेन मृत्वा सप्तमनरके ३३सागरायुर्जातः ।

**पुण्डरीको**ऽपि स्थविरान् प्राप्य द्विश्चातुर्यामं धर्मं प्रतिपद्याष्टमतपःपारणेऽदीनः कालातिक्रान्तशीतरूक्षाऽरसविरसाहारजातवेदनायाः प्राणान्तं ज्ञात्वा 'करयलपरि' जाव शीर्षकृताञ्जलिः 'नमो त्थु णं० जाव ठाणं संपत्ताणं, नमो त्थु णं थेराणं भगवन्ताणं मम धम्मायरियाणं', इत्यादिसर्वपापस्थानानि व्युत्सृज्यालोच्य प्रतिक्रान्तो मृत्वा **सर्वार्थसिद्धौ** देवोऽभूत्, **महाविदेहे** च सेत्स्यति । तस्मात्त्वं दुर्बलत्वं स्थूलत्वं वा मा ध्यायस्व ? दुर्बलोऽपि **कण्डरीको** दुर्ध्यानी सप्तमं नरकं गतः, **पुण्डरीकः** पुष्टोऽपि शुभध्यानी **सर्वार्थसिद्धौ** । तत एवं हे देवानुप्रिय ! 'दुर्बलो वा बलवान्' इति हेतुर्ध्यानविषये एव कार्य इति । **धनदः** प्रभुर्ममाकूतं जज्ञे इति संवेगमापन्नो नत्वा गतः, तेनैवं **धनद**नाम-सामानिकसुरेण **वैरिस्वामी**जीवेन **पुण्डरीका**ध्ययनमुद्ग्राहितं पञ्चशतानीति । ततश्च्युतोऽसौ **वैरिस्वाम्य**भूत् । केऽप्याहुः स **जृम्भक**देव इति ।

अथ प्रातर्गणी चैत्यानि नत्वोत्तरन् **कोडिन्नाद्यै**रुक्तो यूयं गुरवो वयं च शिष्याः, गणी जगौ युष्माकं मम चार्हन् गुरुः, ते ऊचुर्भवतामप्याचार्यः ! स्वाम्यर्हद्गुणस्तवं चक्रे । दशमपारणे श्री**गौतमे**न ते सुरीदत्तवेषाः प्रव्राजिताः, तैः सह **गौतम**श्चचाल । भिक्षावेलायां केन वः पारयामीति वदन् पायसेनेति तैरूचे । ततो गणी सर्वलब्धिः कस्यापि गृहिणो गृहे सशर्कराज्यपायसं प्रासुकं लब्ध्वा पात्रमापूर्यागतः, विधिना तान् परिपाट्यमुपावेश्य लाभं ज्ञात्वाऽक्षीणमहानसिकस्तेषां यथेष्टं परिवेषयामास । सर्वे ध्राता विस्मिताः, स्वाम्यप्य-पारयत्। सर्वेऽथ समवसरणं प्रस्थिताः । सेवालाशिनां पायसं भुञ्जतामेवाहो शुभकर्मोदयो-ऽस्माकं, सर्वश्रुतोदधिर्गुणनिधिः सिद्धिपुरसार्थवाहः श्री**गौतमो** मिलितः **स्वयम्भूरमर**णान्तः पतितरत्नमिव, सुदुर्लभा संसारार्णवतारिण्यर्हद्धर्मबोधिः, प्राप्तस्त्रिभुवनचिन्तामणिः सर्वजग-ज्जीववत्सलो भगवान् श्री**महावीरः**, ततो निस्तीर्ण एवास्माभिर्जन्मजरामृतिरोगशोक-जलवीचिवान् भवाब्धिरित्यादिसंवेगं प्राप्तानां **सेवाला**दीनामपूर्वकरणादिक्रमेणर्द्धभुक्ते एव,

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**दिन्ना**दीनां शुष्कपत्राद्यशिनां भगवच्छत्रातिच्छत्रं पश्यतां, **कोडिन्ना**दीनां नीलकन्दाशिनां स्वामिनं पश्यतां केवलं जातम् ॥

**गौतम**स्तत्पुरोगः प्रभुं प्रदक्षिणय्याऽनमत्, ते तु सर्वे प्रभुं प्रदक्षिणय्य केवलिपर्षदं गताः, **गौतमो**ऽवक् एत भोः प्रभुं नमत ? स्वाम्यूचे **गौतम** केवलिनां माशातय ! तत् श्रुत्वा गणी मिथ्यादुःकृतं दत्वा, नाद्यापि मे केवलमित्यधृतिं दधौ । जिनो जगौ न किं देवानां वचनं **अष्टापद**गतस्य मुक्तिरित्येवंरूपं त्वया ग्राह्यमथार्हतः ? गणी जगौ अर्हद्वाक् प्रमाणं । ततः काऽधृतिः ? सुंठ १ वंश २ चर्म ३ कम्बलकट ४ चतुष्कदृष्टान्ततेनात्मनि कम्बलकटसमं स्नेहं ज्ञापयन्नन्ते केवलज्ञानतुल्यावावां भविष्यावः, माऽधृतिं धेयाः, ततस्तदग्रे **द्रुमपत्रकं** नामाध्ययनं प्रभुर्जगौ । अथ निर्युक्तिगाथा–

**दुमपत्तेणोवम्मं, अहाठिईए उवक्कमेणं च ।**
**एत्थ कयं आदिंमि, तो दुमपत्तं च अज्झयणं ॥१॥** [ उत्त.नि./गा.२८३ ]

अर्थः–द्रुमपत्रेणौपम्यं आयुषः, केन गुणेनेत्याह–यथास्थित्या स्वकालेन, तथा उपक्रमेण च, दीर्घकालस्थितेः प्रतिघातात् स्वल्पकालकरणेन, आदावत्राध्ययने कृतं, ततो द्रुमपत्रमित्यध्ययनमिदं ॥१॥

**मगहापुरनगराओ, वीरेण विसज्जणं तु सीसाणं ।**
**सालमहासालाणं, पिट्ठीचंपं च आगमणं ॥२॥** [ उत्त.नि./गा.२८४ ]

**पव्वज्जा गागलिस्स, केवलिनाणुप्पयाय तिण्हं पि ।**
**आगमणं चंपपुरिं, वीरस्स अवंदणं तेसिं ॥३॥** [ उत्त.नि./गा.२८५ ]

**चंपाए पुण्णभद्दंमि, चेइए नायओ पहियकित्ती ।**
**आमंतेउं समणे, कहेइ भगवं महावीरो ॥४॥** [ उत्त.नि./गा.२८६ ]

नायको ज्ञातजः ज्ञायतो वा, प्रथितकीर्त्तिः

**अट्ठविहकम्ममहणस्स, तस्स पयत्तीए सुद्धलेसस्स ।**
**अट्ठावए नगवरे निसीहिया निट्ठियट्ठस्स ॥५॥** [ उत्त.नि./गा.२८७ ]

अष्टविधकर्ममथनस्य तस्य प्रकृत्या शुद्धलेशस्य **अष्टापदे** नगवरे निषीधिकी निर्वाणं तया निष्ठितार्थस्य ।

**उसहस्स भरहपिउणो, तिलुक्कपगासनिग्गयजसस्स ।**
**जो आरोढुं वंदइ, चरिमसरीरो उ सो साहू ॥६॥** [ उत्त.नि./गा.२८८ ]

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**ऋषभस्य भरत**पित्रोः त्रैलोक्यप्रकाशकनिर्गतयशसः, निर्गतं विस्तृतं, यो गिरिं आरुह्य प्रतिमां नैषेधिकीं क्ष्मां वा वन्दते, चरमशरीरी तु सः साधुः

**साहुं संवासेइ अ, असाहुं न किर संवसावेई ।**
**अह सिद्धसंवओ( पव्वओ ), सो पासे वेयड्ढसिहरस्स ॥७॥** [ उत्त.नि./गा.२८९ ]

साधुं संवासयति दिवा रात्रौ वा स्थित्यै । संहृतोऽपि ऋषिरचरमतनुस्तत्र न तिष्ठति ।

★**चरिमसरीरो साहू, आरुहई णगवरं पायचारेण ।**
**रोहइ न अण्णो त्ति, कासीय तहिं जिणवरिंदो ॥८॥** [ उत्त.नि./गा.२९० ]

एतत्तूदाहरणं ।

**सोऊण तं भगवंतो, गच्छइ तहिं गोयमो पहितकित्ती ।**
**आरुहइ तं नगवरं, पडिमा तो वंदइ जिणाणं ॥९॥** [ उत्त.नि./गा.२९१ ]

तं अर्हत उपदेशं श्रुत्वा देवेभ्यो वा

**अह आगओ सपरिसो, सव्विड्ढिए तहिं तु वेसमणो ।**
**वंदित्तु चेइयाइं, अह वंदइ गोयमं भयवं ॥१०॥** [ उत्त.नि./गा.२९२ ]

**अह पुंडरीयणायं, कहेइ तेहिं गोयमो पहियकित्ती ।**
**दसमस्स य पारणए, पव्वावेसीअ कोडिण्णं ॥११॥** [ उत्त.नि./गा.२९३ ]

**कोडिन्ना**दीन् प्राव्राजयत

**तस्स य वेसमणस्स, परिसाए सुरवरो पयणुकमो ।**
**तं पुंडरीयनायं, गोयमकहियं निसामेइ ॥१२॥** [ उत्त.नि./गा.२९४ ]

**घित्तूण पुंडरीयं, वग्गुविमाणाओ सो चुओ संतो ।**
**तुंबवणे धणगिरिस्स, अज्जसुनंदासुओ जाओ ॥१३॥** [ उत्त.नि./गा.२९५ ]

सामानिकसुरः **पुण्डरीका**ध्ययनं मुखपाठे गृहीत्वा

**दिण्णे कोडिण्णे य, सेवाले चेव होइ तइएओ ।**
**इक्किक्कस्स य तेसिं, परिवारो पंचपंचसया ॥१४॥** [ उत्त.नि./गा.२९६ ]

**हिट्ठिल्लाण चउत्थं, मज्झिल्लाणं तु होइ छट्ठं तु ।**
**अट्ठममुवरिल्लाणं, आहारो तेसिमो होइ ॥१५॥** [ उत्त.नि./गा.२९७ ]

---

★ अत्र स्थाने – चरिमसरीरो साहू, आरुहइ नगवरं न अन्नोत्ति ।
एयं तु उदाहरणं कासीअ तहिं जिणवरिंदा [उत्त.नि./गा.२९०]

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**कंदादिसचित्तो, हेट्ठिल्लाणं तु होइ आहारो ।**
**बिइयाणं च अचित्तो, तइयाणं सुक्कसेवालो ॥१६॥** [ उत्त.नि./गा.२९८ ]

**तं पासिऊण इड्ढिं, गोयमरिसिणो तिवग्गावि ।**
**अणगारा पव्वइया, सपरिवारा विगयमोहा ॥१७॥** [ उत्त.नि./गा.२९९ ]

अनगारा अगृहाः, भाविनिभूतबद्धाः, प्रकर्षेण व्रजिता गताः मिथ्यात्वादिभ्यो निर्गताः

**एगस्स खीरभोयणहेऊ नाणुप्पया मुणेयव्वा ।**
**एगस्स य परिसादंसणेण, एगस्स य पयाहिएण जिणंमि ॥१८॥** [ उत्त.नि./गा.३०० ]

'नाणुप्पया' ज्ञानोत्पत्तिः, 'पयाहिणं' प्रदक्षिणां कृत्वा-

**केवलिपरिसं तत्तो, वच्चंता गोयमेण ते भणिया ।**
**इह एह वंदह जिणं, कयकिच्च जिणेण सो भणिओ ॥१९॥** [ उत्त.नि./गा.३०१ ]

कृतकृत्याः केवलित्वादेते इति जिनेन स गौतमोऽभाणि-

**★सोऊण तो अरहो, ओहियएणं गोयमो वि चिंतेइ ।**
**नाणं मे नो उप्पज्जइ, भणिओ य जिणेण से ताहे ॥२०॥** [ उत्त.नि./गा.३०२ ]

**चिरसंसट्ठं चिरपरिचियं च, चिरमाणुगयं च मे जाण ।**
**देहस्स य भेयंमि, दोण्णि वि तुल्ला भविस्सामो ॥२१॥** [ उत्त.नि./गा.३०३ ]

मम चिरसंसृष्टं प्रभूतकालं स्वस्वस्यादिसम्बन्धेन प्राग्भवेषु सम्बन्धं चिरपरिचितं प्राग्भवेषु देवलोकेषु चानन्तरमेव चिरमनुगतं अस्मदाशयानुवर्त्तिनमात्मानं जानीहि ! इति मा त्वमधृतिं कृथाः-

**जह मन्ने एयमट्ठं, अम्हे जाणामो खीणसंसारा ।**
**तह मन्नए तमट्ठं विमाणवासी वि जाणंति ॥२२॥** [ उत्त.नि./गा.३०४ ]

त्वं एवं मन्यसे यथा क्षीणसंसारा एतं ज्ञानप्राप्तिरूपमर्थं वयं जानीमः, तथा त्वं मन्यसे विमानवासिनोऽपि जानन्ति, एवं केवलिनां देवानामपि समं तवेष्टं, अहो ते विवेक इत्युपालब्धः-

**जाणगपुच्छं पुच्छइ, अरहा किर गोयमं पहितकित्ती ।**
**किं देवाणं वयणं, गज्झि आओ जिणवराणं ॥२३॥** [ उत्त.नि./गा.३०५ ]

---

★ सोऊण तं अरहओ हियएणं गोयमोऽवि चिंतेइ । इति पाठः उत्त. नि. प्रतौ ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**सोऊण तं भगवओ, मिच्छाकारस्स सो उवट्ठाइ ।**
**तण्णिस्साए भगवं, सीसाणं देइ अणुसिट्ठिं ॥२४॥** [ उत्त.नि./गा.३०६ ]

ज्ञापकपृच्छया पृच्छत्यर्हन्, किल सत्ये, **गौतमं** प्रथितकीर्त्तिः, प्रबोधयितुमुपालम्भेन यथा किं देवानां वचनं ग्राह्यं 'आओ' उत जिनवराणां ? यतः 'देहस्स य भेयंमि। दोण्णि वि तुल्ला भविस्सामो' इत्यस्मदुक्ते शतशः श्रुतेऽप्यनिश्चयाद्देवगिरा सकृत् श्रुतया-**प्यष्टापदं** गतः, इत्यहो ते मोहचेष्टेति भगवत उपालम्भवचः श्रुत्वा स गौतमो 'मिच्छाकारस्य' प्रतिक्रमितुमुपतिष्ठति, तन्निश्रया **गौतम**निश्रया शिष्याणामनुशिष्टिं प्रभुर्दत्ते । अप्रमादादेव मुक्तिर्न तु बाह्योपक्रमादिति । सूत्रम्—

**दुमपत्तए पंडुए जहा, निवडइ रायगणाण अच्चए ।**
**एवं मणुयाण जीवियं, समयं गोयम मा पमायए ॥१॥**

**व्याख्या**—द्रुमस्य वृक्षस्य पत्रं, तदेव तादृगवस्थयाऽनुकम्प्यं **द्रुमपत्रकं**, 'पंडुए'त्ति आर्षत्वात् **पाण्डुरकं** कालपरिणामतः, तथाविधरोगादेर्वा श्वेतं, यथा **निपतति** श्लथवृन्तबन्धनत्वात् भ्रस्यति द्रुमात्, **रात्रिगणानां** दिनगणाविनाभावित्वात्, रात्रीणां अहोरात्रा**णामत्यये**ऽतिक्रमे, **एवं** प्रकारं **मनुष्याणां** शेषात्मनां च **जीवितं** दिवारात्रिगणानामतिक्रमे स्थितिखण्डकक्षयेणाऽध्यवसायादिजनितोपक्रमणेन वा जीवप्रदेशेभ्यो भ्रस्यति, अपेर्गम्यत्वात् **समयमपि** अत्यन्तसूक्ष्मकालमपि, आस्तामावलिकादि, **गौतमे**ति हे **गौतम**सगोत्रे**न्द्रभूते** ! मा प्रमादीः प्रमादं मा कृथाः, शेषशिष्योपलक्षणं च **गौतमा**मन्त्रणं, अत्र च पाण्डुपदातिक्षिप्तं यौवनस्याप्यनित्यत्वमाविःकर्त्तुमाह निर्युक्तिकृत्—

**परियट्टियलायन्नं, चलंतसंधिं मुयंतबिटागं ।**
**पत्तं च वसणपत्तं, कालपत्तं भणइ गाहं ॥१॥** [ उत्त.नि./गा.३०७ ]

**जह तुब्भे तह अम्हे, तुब्भे वि य होहिया जहा अम्हे ।**
**अप्पाहेइ पडंतं, पंडुअपत्तं किसलयाणं ॥२॥** [ उत्त.नि./गा.३०८ ]

अप्पाहेइ त्ति वक्ति-

**न वि अत्थि न वि य होही, उल्लावो किसलपंडुपत्ताणं ।**
**उवमा खलु एस कया, भवियजणविबोहणट्ठाए ॥३॥** [ उत्त.नि./गा.३०९ ]

यथेह किसलयानि पाण्डुपत्रेणानुशिक्ष्यन्ते तथान्योऽपि यौवनगर्वितो वृद्धेन शिक्ष्यते ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

आयुषोऽनित्यत्वमाह–

**कुसग्गे जह उसबिंदुए, थोवं चिट्ठइ लंबमाणए ।**
**एवं मणुयाण जीवियं, समयं गोयम मा पमायए ॥२॥**

**व्याख्या–कुशो** दर्भसदृशं, तृणं, तनुतरत्वात् तस्यादानं, **तस्याग्रं** प्रान्तस्तस्मिन् यथाऽ**वश्यायः** शरत्कालभावी श्लक्ष्णवर्षस्तस्य **बिन्दुकः** स्तोकं तिष्ठति, **लम्बमानको** मनाग् निपतन् बद्धास्पदो हि कदाचित् कालान्तरमपि क्षमेतेत्येवं विशिष्यते, **एवं** दृढस्यापि कालाऽविलम्बेन मृतिदर्शना**न्मनुजानां जीवितं** कुशाग्रबिन्दुसमं, ततश्च **समयमपि मा प्रमादीः** ॥२॥

अमुमर्थमुपसंहरति–

**इइ इत्तरियंमि आउए, जीवियए बहुपच्चवायए ।**
**विहुणाहि रयं पुरे कडं, समयं गोयम मा पमायए ॥३॥**

**व्याख्या–इतीत्युक्तन्यायेन इत्वरे** स्वल्पकालभाविनि, एति उपक्रमहेतुभिरन-पवर्त्यतया यथास्थित्यैवानुभवनमित्**यायुः**, तच्चैवं निरुपक्रममेव, **तस्मिंस्**तथा **जीवितके च,** चस्य गम्यत्वात्, सोपक्रमायुषि बहवः प्रत्यपाया उपघातहेतवो अध्यवसाननिमित्ताद्या यस्मिन्, अत एवानुकम्प्यत्वा**द्बहुप्रत्यपायके,** एवं द्रुमपत्रदृष्टान्तकुशाग्रजलबिन्दुदृष्टान्ताभ्यां मनुजायुर्निरुपक्रमं सोपक्रमं चेत्वरमतोऽस्याऽनित्यतां मत्वा **विधुनीहि** जीवात्पृथक्कुरु ! **रजः** कर्म **पुरा** पूर्वं तत्कालापेक्षया **कृतं** विहितं, ततः **समयमपि मा प्रमादीः** ।

इह सोपक्रमायुषि क्षीण एव मृतिः स्यान्न तु सत्यायुषि म्रियते, परं सा काऽपि भवितव्यतास्ति, यया तत्र मर्त्तव्यमेव । परं तस्या अज्ञानाज्जीवा भीता यत्र तत्र यान्ति, यत्तत्कुर्वन्ति । येषां रोगादावपि मृतिः स्यात् सा निबद्धैव, नत्वनिबद्धा । यथा नृभवो दुर्लभस्तथा मृतिरपि सम्बद्धैव । सदप्यायुरपवर्त्तते, तया बद्धमेवाऽपवर्त्तते, नान्यत् । तेन रक्षाः सर्वा निबद्धानुयायिन्यः, निर्णीते मरणे रक्षा अफलाः, तस्मान्मिथ्यात्वं त्याज्यं । सम्यक्त्वे च स्थैर्यं धार्यं । ये चाध्यवसानाद्या आयुरुपक्रमा उक्तास्ते आयुर्द्वयेऽपि स्युः, परं मृतिकालो निबद्ध एव सदैव तेषां सद्भावेऽपि मृतेः कदाचिदेव भावात् चरमदेहानामपि यन्त्रादिप्रतिघाताच्च ॥३॥

न पुनर्नृभवं लप्स्यामहे इत्याह–

**दुलहे खलु माणुसे भवे, चिरकालेण वि सव्वपाणिणं ।**
**गाढा य विवाग कम्मुणो, समयं गोयम मा पमायए ॥४॥**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या**–**दुर्लभः** खलुशब्दादपुण्यानां **मानुषो भवश्चिरकालेनापि**, आस्तामल्पकालेनेत्यपेरर्थः, तथा **सर्वप्राणिनां गाढा** स्फेटयितुमशक्या **विपाका** उदयाः **कर्मणां**, नृगतिविघातिकर्मप्रकृतीनां, ततः **समयमपि०** ॥४॥

नृत्वदुर्लभत्वं स्पष्टयति–

**पुढवीक्कायमइगओ, उक्कोसं जीवो उ संवसे ।**
**कालं संखाईयं, समयं गोयम मा पमायए ॥५॥**

**व्याख्या**–'पुढवी' इत्यादिसूत्रदशकं । पृथ्वी कठिनरूपा सैव कायः शरीरं **पृथ्वीकायस्तमतिशयेन** मृत्वा [तदुत्पत्तिलक्षणेन गतः प्राप्तोऽ**तिगतः**] **उत्कर्षतो जीवः**, **तुः** पूर्त्यै, **संवसेत्** तद्रूपतयैवावतिष्ठेत्, **कालं सङ्ख्यातीतं** असङ्ख्यं, असङ्ख्योत्सर्पिण्यवसर्पिणीमानं, तत एव **समयमपि०** ॥५॥

**आउक्कायमइगओ, उक्कोसं जीवो उ संवसे ।**
**कालं संखाईयं, समयं गोयम मा पमायए ॥६॥**

**तेउक्कायमइगओ, उक्कोसं जीवो उ संवसे ।**
**कालं संखाईयं, समयं गोयम मा पमायए ॥७॥**

**वाउक्कायमइगओ, उक्कोसं जीवो उ संवसे ।**
**कालं संखाईयं समयं गोयम मा पमायए ॥८॥**

अप्तेजोवायुष्वसङ्ख्यं कालम् ॥६-७-८॥

**वणस्सइ कायमइगओ, उक्कोसं जीवो उ संवसे ।**
**कालमणंतदुरंतं, समयं गोयम मा पमायए ॥९॥**

**व्याख्या**–**अनन्तम**न्तोत्सर्पिण्यवसर्पिणीमानमनन्तकालं, तथा दुष्टोऽन्तोऽस्येति **दुरन्तं**, साधारणानां प्रायो विशिष्टनृत्वाद्यलाभात्, तथा प्रत्येकवनस्पतिषु त्वसङ्ख्यं कालं संवसेत् ॥९॥

**बेइंदियकायमइगओ, उक्कोसं जीवो उ संवसे ।**
**कालं संखेज्जसन्नियं, समयं गोयम मा पमायए ॥१०॥**

**तेइंदियकायमइगओ, उक्कोसं जीवो उ संवसे ।**
**कालं संखेज्जसन्नियं, समयं गोयम मा पमायए ॥११॥**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**चउरिंदियकायमइगओ, उक्कोसं जीवो उ संवसे ।**
**कालं संखेज्जसन्नियं, समयं गोयम मा पमायए ॥१२॥**

**व्याख्या**—द्वे इन्द्रिये स्पर्शनरसनाख्ये येषां ते **द्वीन्द्रियाः** कृम्यादयः, **तत्कायमतिगतः, सङ्ख्येयसञ्ज्ञितं** सङ्ख्यातवर्षसहस्रात्मकं, एवं **त्रीन्द्रियचतुरिन्द्रिय**सूत्रे अपि ज्ञेये ॥१२॥

**पंचिंदियकायमइगओ, उक्कोसं जीवो उ संवसे ।**
**सत्तट्ठभवग्गहणे, समयं गोयम मा पमायए ॥१३॥**

**व्याख्या**—**पञ्चेन्द्रिया** अग्रे देवनारकयोर्भवनादत्र च नृत्वस्य दुर्लभत्वेन प्रक्रान्तत्वा**त्तिर्यञ्चो** ग्राह्याः, यन्मनुष्याणां सप्ताष्टभवग्रहणान्युक्तानि तत्कादाचित्कं पुण्यात्मनामेव । सप्त चाष्ट च सप्ताष्टानि, तानि च भवग्रहणानि जन्माः **सप्ताष्टभवग्रहणानि**, सप्तभवाः सङ्ख्यातायुषि, अष्टमस्त्वसङ्ख्यायुषि ॥१३॥

तथा—

**देवे नेरइए य अइगओ, उक्कोसं जीवो उ संवसे ।**
**एक्केकभवग्गहणे, समयं गोयम मा पमायए ॥१४॥**

**व्याख्या**—**देवानां नैरयिकाणां च** एकैकभवग्रहणं, ततः परमवश्यं नरेषु तिर्यक्षु चोत्पादात् । यद्वा 'उक्कोसं'ति उत्कर्षते तदन्येभ्य इत्युत्कर्षस्त**मुत्कृष्टं** कालं त्रयस्त्रिंशत्सागरमानं, एकैकभवग्रहणमिति अपेर्गम्यत्वा**देकैकभवग्रहणमपि**, यतो **जीवः संवसेत्** । इति सूत्रदशकार्थ उक्तः ॥१४॥

उक्तार्थमुपसंहरति—

**एवं भवसंसारे, संसरइ सुहासुहेहिं कम्मेहिं ।**
**जीवो पमायबहुलो, समयं गोयम मा पमायए ॥१५॥**

**व्याख्या**—**एवमु**क्तप्रकारेण पृथ्व्यादिकायस्थितौ भवास्तिर्यगादिजन्मान्येव संस्रियमाणत्वात्संसारस्तस्मिन् **भवसंसारे संसरति** पर्यटति **शुभैः** शुभप्रकृतिभिः, **अशुभैर**शुभप्रकृतिभिः **कर्मभिः** पृथ्वीकायादिभवहेतुभि**र्जीवः प्रमादैर्बहुलो** व्याप्तः, यद्वा बहून् भेदान् लातीति बहुलो मद्याद्यनेकभेदतः प्रमादो धर्माऽनुद्यमो यस्य स **बहुलप्रमादः**, सूत्रत्वाद्वयत्ययः, यतोऽयं जीवः प्रमादबहुलः सन् शुभाऽशुभानि कर्माण्युपचिनोति, उपचित्य च तदनुरूपासु गतिष्वाजवं जवीभावं गतो भ्राम्यति, ततो दुर्लभं पुनर्नृत्वं, प्रमादमूलत्वात् सकलाऽनर्थपरम्परायाः ॥१५॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

नृत्वाप्तावप्युत्तरोत्तरगुणाप्तिर्दुरापैतेत्याह–

**लद्धूण वि माणुसत्तणं, आयरियत्तं पुणरावि दुल्लहं ।**
**बहवे दसुया मिलक्खुया समयं गोयम मा पमायए ॥१६॥**

**व्याख्या**–सूत्रपञ्चकं । **लब्ध्वापि मानुष्यं** इदं वक्ष्यमाणमतिदुर्लभमेव, कथञ्चिल्लब्ध्वापि इत्यपेरर्थः, **आर्यत्वं** मगधाद्यार्यदेशोत्पत्तिं, **पुनरपि**, अकारस्त्वलाक्षणिकः, दुर्लभं, यतः **बहवो दस्यवो** देशप्रात्यन्तवासिनश्चौराः, 'मिलक्खुय'त्ति **म्लेच्छाः**, अव्यक्तवाचो, न यदुक्तमार्यैरवधार्यते, ते च शकयवनशबरादिदेशजा नरा अपि धर्माऽधर्मगम्याऽगम्यभक्ष्याऽभक्ष्यादिसकलार्यव्यवहारबहिष्कृतास्तिर्यक्प्राया एवेति ॥१६॥

**लद्धूण वि आयरियत्तणं, अहीणपंचिंदियया हु दुल्लहा ।**
**विगलिंदियया हु दीसई, समयं गोयम मा पमायए ॥१७॥**

**व्याख्या**–**लब्ध्वाप्यार्यत्वं** अहीनान्यविकलानि पञ्चेन्द्रियाणि स्पर्शादीनि यस्य स अहीनपञ्चेन्द्रियः, तथा तद्भावोऽ**हीनपञ्चेन्द्रियता, हुः** निश्चये भिन्नक्रमश्च । **दुर्लभैव** । यद्वा **हुः** पुनरर्थे**ऽहीनपञ्चेन्द्रियता पुनर्दुर्लभा** । हेतुमाह–**विकलेन्द्रियता** रोगाद्युपहतेन्द्रियता, **हुः** इति बाहुल्येन **दृश्यते** ॥१७॥

**अहीणपंचिंदियत्तं पि से लहे, उत्तमधम्मसुइ हु दुल्लहा ।**
**कुतित्थिनिसेवए जणे, समयं गोयम मा पमायए ॥१८॥**

**व्याख्या**–**अहीनपञ्चेन्द्रियत्वमपि स** जीवो लभते, तथापि **उत्तमः** प्रधानो यो **धर्मस्तस्य श्रुतिः** श्रवणं **दुर्लभं**, यतः कुतीर्थिनः **शाक्या**द्यास्तान्नितरां सेवते यः स **कुतीर्थिनिषेवको जनो** लोकः, तेषां सत्कारयशोलोभार्थित्वेन प्राणिविषयाद्युपदेशत्वेन सुकरैव सेवा ॥१८॥

किञ्च–

**लद्धूण वि उत्तमं सुइं, सद्दहणा पुणरावि दुल्लहा ।**
**मिच्छत्तनिसेवए जणे, समयं गोयम मा पमायए ॥१९॥**

**व्याख्या**–**लब्ध्वाप्युत्तमां श्रुतिं** धर्मश्रुतिं **श्रद्धानं** तत्त्वरुचिः **पुनरपि दुर्लभं**, मिथ्याभावो मिथ्यात्वं अतत्वे तत्त्वप्रत्ययः, तन्निषेवते यः स **मिथ्यात्वनिषेवको जनो**ऽनादिभवाभ्यस्ततया गुरुकर्मतया च तत्रैव प्रायः प्रवृत्तेः ॥१९॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अन्यच्च–

**धम्मं पि हु सद्दहंतया, दुल्लभया काएण फासया ।**
**इह कामगुणेसु मुच्छिया, समयं गोयम मा पमायए ॥२०॥**

**व्याख्या–धर्मं** सर्वज्ञोक्तं, **अपि** भिन्नक्रमः, **हुः** वाक्यालङ्कारे, **श्रद्दधतोऽपि** कर्त्तुमिच्छतोऽपि **दुर्लभकाः कायेन** मनसा वाचा च **स्पर्शका** अनुष्ठातारः, कारणमाह–**इह** जगति **कामगुणेषु** शब्दादिषु **मूर्च्छिता** मूढा गृद्धिमन्तो जन्तवः, प्रायेण ह्यपायेषु रागः प्राणिनां ॥२०॥ इति सूत्रपञ्चकार्थः ॥

अन्यच्च सति देहे तत्सामर्थ्ये च धर्मस्पर्शना, इति तदनित्यताख्यापनेनाऽप्रमादोपदेशं सूत्रषट्केनाह–

**परिजूरइ ते सरीरयं, केसा पंडुरया हवंति ते ।**
**से सोयबले य हायइ समयं गोयम मा पमायए ॥२१॥**

**व्याख्या–परिजीर्यति** सर्वप्रकारं वयोहानिमनुभवति शरीरं 'ते' **तव,** जरादिभिरभिभूयमानतयाऽनुकम्प्यं **शरीरकं** । यद्वा 'परिजूरइ'त्ति 'निन्देर्जूर, इति प्राकृतलक्षणात् **परिनिन्द्यती**वात्मानं, यथा धिगहं कीदृशं जातमिति । यतः **केशाः** रोमाणि च **पाण्डुरका भवन्ति,** 'ते' **तव,** पुनस्ते शब्दोपादानं भिन्नवाक्यत्वाददुष्टं । 'से' **तत्** यत्पूर्वमासीत् श्रोत्रयोः कर्णयोर्बलं **श्रोत्रबलं** दुरादिशब्दश्रवणसामर्थ्यं, **चः** समुच्चये, **हीयते** जरातः स्वयमपैति । पूर्वं श्रोत्रोपादानं तद्भावेन शेषेन्द्रियाऽवश्यम्भावेन पटुतरत्वेन च प्राधान्यात् ॥२१॥

**परिजूरइ ते सरीरयं, केसा पंडुरया हवंति ते ।**
**से चक्खुबले य हायइ, समयं गोयम मा पमायए ॥२२॥**

**परिजूरइ ते सरीरयं, केसा पंडुरया हवंति ते ।**
**से घाणबले य हायइ समयं गोयम मा पमायए ॥२३॥**

**परिजूरइ ते सरीरयं, केसा पंडुरया हवंति ते ।**
**से जिब्भबले य हायइ समयं गोयम मा पमायए ॥२४॥**

**परिजूरइ ते सरीरयं, केसा पंडुरया हवंति ते ।**
**से फासबले य हायइ, समयं गोयम मा पमायए ॥२५॥**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**परिजूरइ ते सरीरयं, केसा पंडुरया हवंति ते ।**
**से सव्वबले य हायइ, समयं गोयम मा पमायए ॥२६॥**

**व्याख्या—चक्षुर्बलं, घ्राणबलं, जिह्वाबलं, स्पर्शबलं,** 'से' **तस्य सर्वबलं,** सर्वेषां करांह्र्याद्यवयवानां स्वस्वव्यापारसामर्थ्यं, यद्वा सर्वेषां मनोवाक्कायानां ध्यानाध्ययन-गमनादिचेष्टाविषया शक्ति**र्हीयते**, इति सूत्रषट्कार्थः ॥२६॥

जरातोऽशक्तिरुक्ता, अथ रोगात्तामाह—

**अरई गंडं विसूइया, आयंका विविहा फुसंति ते ।**
**विहडइ विद्धंसइ ते सरीरयं, समयं गोयम मा पमायए ॥२७॥**

**व्याख्या—अरति**र्वातादिजश्चित्तोद्वेगो, **गण्डं** गडु, **विसूचिका** अजीर्णभेदः, **आतङ्काः** सद्यो घातिरोगाः, **विविधाः स्पृशन्ति,** 'ते' **तव** शरीरं **विपतति** विशेषेण बलादपैति, **विध्वस्यति** जीवमुक्तं विशेषेणाधः पतति **शरीरकं** । केशपाण्डुरत्वादि यद्यपि **गौतमे** न सम्भवेत्तथापि तन्निश्रया शेषशिष्यबोधार्थाददुष्टम् ॥२७॥

अप्रमादविधिमाह—

**वोच्छिंद सिणेहमप्पणो, कुमुयं सारईयं व पाणियं ।**
**से सव्वसिणेहवज्जिए, समयं गोयम मा पमायए ॥२८॥**

**व्याख्या—व्युच्छिन्द्धि** विविधैः प्रकारैरुत्प्राबल्येन छिन्द्धि अपनय ! कं ? **स्नेहं** रागं, कस्य ? **आत्मनः** किमिव ? **कुमुद**मिव यथा कुमुदं चन्द्रविकाश्युत्पलं शरदि भवं **शारदं पानीयमिवे**त्युपमार्थो भिन्नक्रमश्च । यथा तत्पूर्वं जलमग्नमपि जलं त्यक्त्वा वर्त्तते तथा त्वं मद्विषयं स्नेहं छिन्द्धि ! ततः 'से' इत्यनन्तरं **सर्वस्नेहवर्जितः** सन् **समयमपि** हे **गौतम मा प्रमादीः**, शारदशब्दोपादानं शारदजलस्येव स्नेहस्याप्यतिरम्यत्वज्ञप्त्यै ॥२८॥

किञ्च—

**चिच्चाण धणं च भारियं, पव्वईओ हि सि अणगारियं ।**
**मा वंतं पुणो वि आविए, समयं गोयम मा पमायए ॥२९॥**

**व्याख्या—त्यक्त्वा, ण** इत्यलङ्कारे, **धनं** चतुष्पदादि, **चः** भिन्नक्रमः, ततो **भार्यां** च, **प्रव्रजितः** प्रपन्नो, **हिर्यस्मादसि** भवसि **अनगारिकं** भावं भिक्षूणामनुष्ठानं **अनगारितां** वा । अतो **मा** निषेधे, **वान्तं** 'पुणो वि' **पुनरपि आपिबसि,** किन्तु **समयमपि हे गौतम मा प्रमादीः** ॥२९॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

वान्तं निषेधयति—

**अवउज्झिय मित्तबंधवं, विउलं चेव धणोहसंचयं ।**
**मा तं बीयं गवेसए, समयं गोयम मा पमायए ॥३०॥**

**व्याख्या—अपोह्य** त्यक्त्वा मित्राणि बान्धवांश्च स्वजनान्, **मित्रबान्धवं, विपुलं चः** समुच्चये, **एवः** पूर्त्तौ, **धनं** कनकादिद्रव्यं, **तस्यौघः** समूहस्तस्य **सञ्चयं** कोशं, **मा तन्मित्रादिकं द्वितीयं** पुनर्ग्रहणार्थं **गवेषय** ! तत्त्यागाच्छ्रामण्यमादृत्य पुनस्तत्सङ्गकृत् वान्तापायी स्यात्, अतः **समयं०** ॥३०॥

इत्थं ममत्वच्छेदायोक्त्वा दर्शनशुद्ध्यै आह—

**न हु जिणे अज्ज दीसइ, बहुमए दीसइ मग्गदेसिए ।**
**संपइ णेआउए पहे, समयं गोयम मा पमायए ॥३१॥**

**व्याख्या**—'न हु' **नैव जिनोऽद्यास्मिन्** काले **दृश्यते** यद्यपि, तथापि **'बहुमए'**त्ति पन्थाः, स च द्रव्यतो नगरादिमार्गः, भावतस्तु ज्ञानदर्शनचारित्राणि मुक्तिमार्गः, इह भावमार्गो गृह्यते, **दृश्यते** उपलभ्यते, किम्भूतः पन्थाः ? 'मग्गदेसिए'त्ति **मार्गत्वेनार्थान्मुक्तेर्देशित** उक्तोऽर्हता, अयमाशयः—यद्याप्यधुनाऽर्हन्नास्ति तदुपदिष्टस्तु मार्गो दृश्यते, न चेदृगयमतीन्द्रियार्थदर्शिजिनं विना स्यादित्यसन्दिग्धचित्ता भविष्यत्कालेऽपि भव्या न प्रमादं विधास्यन्ति, ततः **सम्प्रति** मयि **नैयायिके** निश्चयेन मुक्त्याख्यलाभप्रयोजने पथि, केवलाऽनुत्पत्तिसंशयविधानेन **मा प्रमादीः** ॥३१॥

**अवसोहिय कंटयापहं, उत्तिण्णो सि पहं महालयं ।**
**गच्छसि मग्गं विसोहिया, समयं गोयम मा पमायए ॥३२॥**

**व्याख्या—अवशोध्य** परिहृत्य, अकारोऽलाक्षणिकः, कण्टका द्रव्यतो बब्बूलशूलाद्याः, भावतश्च**रकादिकु**श्रुतयः, तैराकुलः पन्थाः **कण्टकपथस्त्वं, अवतीर्णोऽसि** अनुप्रविष्टोऽसि **पन्थानं, महालयं** महान् आलय आश्रयः, स द्रव्यतो राजमार्गः, भावतो महद्भिरर्हदाद्यैराश्रितः सम्यग्दर्शनादिमुक्तिमार्गस्त्वं, **गच्छसि मार्गं** न पुनः स्थित एवासि, ज्ञानाद्युत्सर्पणेन **विशोध्य** विनिश्चित्य, तदेवं प्रमत्तः सन् **मा प्रमादीर्गौतम** ! ॥३२॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

एवं पूर्वेण दर्शनशुद्धिमनेन च मार्गप्रतिपत्तिमुक्त्वा तत्प्रतिपत्तावपि कस्यचिदनुतापः स्यादिति तन्निराचिकीर्षयाह—

**अबले जह भारवाहए, मा मग्गे विसमे विगाहिया ।**
**पच्छा पच्छाणुतावए, समयं गोयम मा पमायए ॥३३॥**

**व्याख्या—अबलो** देहसामर्थ्यहीनो **यथा भारवाहको, मा मार्गं विषमं** मन्दसत्त्वैर्दुस्तरं **अवगाह्य** प्रविश्य त्यक्ताङ्गीकृतभारः सन् **पश्चात्** कालानन्तरं **पश्चादनुतापकः** पश्चात्तापकृद्भूरिति । यथा कश्चिद्देशान्तरगतो बहूपायैः स्वर्णाद्युपार्ज्य गृहमायानतिभीरुरन्यवस्तुगुप्तं स्वर्णादि शिरस्यारोप्य कत्यहानि सम्यगुदूह्य, ततः क्वाप्युपलादिकष्टमार्गे भारेणाक्रान्तोऽहमिति तं त्यक्त्वा गृहागतो निर्धनतयानुतप्यते, किं मयाऽभाग्येन तत्त्यक्तमिति। एवं त्वमपि प्रमादितया त्यक्तसंयमभारः सन्नेवंविधो माभूः ॥३३॥

बह्वद्यापि तार्यमल्पं तीर्णमित्याशयेनोत्साहभङ्गः स्यादिति तन्निषेधायाह यद्वा बहु तीर्णमल्पं च तार्यं, ततः का प्रमादभीरिति ध्यातुर्वारणार्थमाह—

**तिन्नो हु सि अन्नवं महं, किं पुण चिट्ठसि तीरमागओ ।**
**अभि तुर पारं गमित्तए, समयं गोयम मा पमायए ॥३४॥**

**व्याख्या—तीर्ण एवासि अर्णवं महान्तं,** किमिति प्रश्ने, पुनरिति वाक्यारम्भे, भवः, उत्कृष्टस्थितीनि वा कर्माणि, स द्विविधोऽप्यर्णवस्त्वयोत्तीर्णप्रायः, **किं पुनस्तिष्ठसि** ? केन हेतुना औदासीन्यं भजसे ? **तीरं** पारं **आगतः**, आसन्नीभूतो भवस्य उत्कृष्टस्थितिकर्मणां वा **तीरमागतः** 'अभितुर'त्ति **अभिमुखेन त्वरस्व** शीघ्रो भव ! **पारं** परतीरं भावतो मुक्तिपदं **गन्तुं** । यथा पोतं तीरासन्नागतमपि तीरमप्राप्तं द्वितीयवेलायां मज्जति, तथा साधुर्निर्ग्रन्थत्वे प्राप्तेऽपि प्रमादानन्तभवं पतति ॥३४॥

अप्रमादफलमाह—

**अकलेवरसेणिमुसिया, सिद्धिं गोयम लोयं गच्छसि ।**
**खेमं च सिवं अणुत्तरं, समयं गोयम मा पमायए ॥३५॥**

**व्याख्या—अकलेवराः** सिद्धास्तेषां **श्रेणिं** उत्तरोत्तरशुभपरिणामेन क्षपकश्रेणिं **उत्सृत्यो**त्तरोत्तरसंयमस्थानाप्त्योच्छ्रितामेव कृत्वा, **सिद्धिं हे गौतम ! लोकं** स्थानं **गमिष्यसि क्षेमं** परचक्राद्युपद्रवहीनं, **चः** समुच्चये, **शिवं** सर्वदुरितशान्तियुक्, **अनुत्तरं** सर्वोत्कृष्टं इति ॥३५॥

Jain Education International 2010_02          For Private & Personal Use Only          www.jainelibrary.org

अथ निगमयति—

**बुद्धे परिनिव्वुए चरे, गामगए नगरे व संजए ।**
**संतिमग्गं च वूहए, समयं गोयम मा पमायए ॥३६॥**

**व्याख्या—बुद्धो**ऽवगतहेयादिविभागः **परिनिर्वृतः** कषायस्योपशमतः शीतीभूतः **चरेः** संयमं, **ग्रामे गतः** स्थितो, **नगरे वा**ऽरण्यादिषु वा, सर्वत्राऽरागवान् **संयतः** सम्यग् यतः, पापस्थानेभ्य उपरतः, **शान्तिर्**निर्वाणं तस्या **मार्गं** यद्वा **शान्तिः** शमो मार्दवाद्याश्च तान् **मार्गं** मुक्तेः पन्थानं प्रति बृंहयेर्भव्यजनोपदेशैर्वृद्धिं नयेः, ततः समयमपि० ॥३६॥

ततः—

**बुद्धस्स निसंम भासियं, सुकहियं अट्ठपओवसोहियं ।**
**रागं दोसं च छिंदिया, सिद्धिं गए गोयमे ॥३७॥ त्ति बेमि**

**व्याख्या—बुद्धस्य** केवलिनः श्रीवीरस्य **निशम्य भाषितं, सुकथितं** प्रबन्धेन, अत **एवार्थपदै**रर्थप्रधानपदै**रुपशोभितं रागद्वेषौ छित्वा** कालेन **सिद्धिगतिं गतो गौतमः, इति** समाप्तौ, **ब्रवीमी**ति प्राग्वत् ॥

**इत्यप्रमादानुशास्त्यै दशमं द्रुमपत्रकनामाध्ययनमुक्तम् ॥१०॥**

• • •

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

# एकादशं बहुश्रुतपूजाध्ययनम् ॥

अप्रमत्तता विवेकित्वात्, तच्च बहुश्रुतपूजातः स्यादित्येकादशं **बहुश्रुतपूजाध्ययनमाह**—

अत्र निर्युक्तिः—

**दव्वबहुएण बहुगा, जीवा तह पोग्गला चेव ।** [ उत्त.नि./गा.३१० उ. ]
**भावबहुएण बहुगा, चउदसपुव्वा अणंतगमजुत्ता ॥१॥** [ उत्त.नि./गा.३११ पू. ]

**भवसिद्धिया उ जीवा, सम्मदिट्ठी उ जं अहिज्जंते ।**
**तं सम्मसुएण सुयं, कम्मट्ठविग्घस्स सोहिकरं ॥२॥** [ उत्त.नि./गा.३१३ ]

**मिच्छदिट्ठी जीवा, अभवसिद्धी य जं अहिज्जंति ।**
**तं मिच्छसुएण सुयं, कम्मादाणं च तं भणियं ॥३॥** [ उत्त.नि./गा.३१४ ]

**ईसरतलवरमाडंबियाण, सिवइंदखंदविण्हूणं ।**
**जा किर कीरइ पूया, सा पूया दव्वओ होइ ॥४॥** [ उत्त.नि./गा.३१५ ]

**तित्थगरकेवलीणं, सिद्धायरियाण सव्वसाहूणं ।**
**जा किर कीरइ पूया, सा पूया भावओ होइ ॥५॥** [ उत्त.नि./गा.३१६ ]

**जे किर चउदसपुव्वी, सव्वक्खरसन्निवाइणो णिउणो ।**
**जा तेसिं पूया खलु, सा भावे तीए अहिगारो ॥६॥** [ उत्त.नि./गा.३१७ ]

चतुर्दशपूर्विणः सर्वाक्षरसन्निपातेन एव स्युः, सर्ववाच्यार्थविषयिणश्चोत्कृष्टचतुर्दशपूर्विणः ।

अथ सूत्रम्—

**संजोगाविप्पमुक्कस्स, अणगारस्स भिक्खुणो ।**
**आयारं पाउकरिस्सामि, आणुपुव्विं सुणेह मे ॥१॥**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या**—**संयोगान्**मात्रादे: कषायादेश्च **विप्रमुक्तस्य अनगारस्य भिक्षोराचार**मुचितक्रियाविनयबहुश्रुतपूजात्मकं **प्रादु:करिष्यामि आनुपूर्व्या शृणुत** 'मे' वदत: ॥१॥

बहुश्रुतज्ञापनाय बहुश्रुतस्वरूपमाह—

**जे आवि होइ निव्विज्जे, थद्धे लुद्धे अणिग्गहे ।**
**अभिक्खणं उल्लवई, अविणीए अबहुस्सुए ॥२॥**

**व्याख्या**—**य:** कश्चित्, **च अपि** शब्दौ भिन्नक्रमौ, अपिरग्रे योक्ष्यते । **भवति निर्विद्योऽपि** विद्यारहितोऽपि, **स्तब्धो**ऽहङ्कारी, **लुब्धो** रसादिगृद्ध:, न विद्यते निग्रह इन्द्रियमनसोरस्ये**त्यनिग्रह:**, **अभीक्ष्ण्यं** पुन: **उत्**प्राबल्येनाऽसम्बद्धादिभाषणेन **लपति, अविनीतश्च** सो**ऽबहुश्रुत** उच्यते । सविद्यस्याप्यबहुश्रुतत्वं तत्फलाऽभावात् । एतद्विपरीतोऽर्थो बहुश्रुतस्य ॥२॥

कुतोऽबहुश्रुतत्वं चेत्याह—

**अह पंचहिं ठाणेहिं, जेहिं सिक्खा न लब्भइ ।**
**थंभाकोहापमाएणं, रोगेणालस्सेण य ॥३॥**

**व्याख्या**—**अथे**त्युपन्यासे, **पञ्चभि: स्थानै:** प्रकारै:, **यै**रिति वक्ष्यमाणैर्हेतुभि: **शिक्षा** ग्रहणासेवनात्मिका **न लभ्यते**, तैरबहुश्रुत: स्यात् । कै: ? **स्तम्भान्**मानात्, **क्रोधात्**, **प्रमादेन** मद्यविषयादिना, **रोगेण** गलत्कुष्ठादिना, **आलस्येन** अनुत्साहादिना, **च:** समस्तानां व्यस्तानां चैषां हेतुत्वं द्योतयति ॥३॥

**अह अट्ठहिं ठाणेहिं, सिक्खासीले त्ति वुच्चइ ।**
**अहस्सिरे सया दंते, न य मम्ममुदाहरे ॥४॥**

**व्याख्या**—बहुश्रुतत्वे हेतूनाह—**अथाष्टभि: स्थानै:**, शिक्षायां शीलं स्वभावो यस्य, शिक्षां वा शीलयत्यभ्यस्यतीति **शिक्षाशील:** शिक्षाभ्यासकृत् बहुश्रुत **इत्युच्यते**ऽर्हदाद्यै:, 'अहस्सिरे' **अहसन:**, हेतुं विना न हसन्नास्ते । **सदा दान्त** इन्द्रियनोइन्द्रियदमी, **न च** नैव **मर्म** परम्लानिकृ**दुदाहरेत्** ॥४॥

**नासीले ण विसीले, ण सिया अइलोलुए ।**
**अकोहणे सच्चरए, सिक्खासीले त्ति वुच्चइ ॥५॥**

**व्याख्या**—**नाऽशील:** अविद्यमानशील: नष्टचारित्रधर्म:, **न विशीलो** विरूपशील: सातीचारव्रतो, **न स्यात्**, **च:** सम्भावने, **अतिलोलुपो** रसलम्पट:, **अक्रोधनो**ऽपराध्यन-

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

पराधिनोर्न कथञ्चित् कुप्यति, **सत्यरतः**, सम्भावने, अतिलोलुपो रसलम्पटः, **इति शिक्षाशील उच्यते** ॥५॥

अबहुश्रुतबहुश्रुतत्वहेतोरविनीतविनीतयोः स्वरूपमाह—

**अह चउदसहिं ठाणेहिं, वट्टमाणे उ संजए ।**
**अविणीए वुच्चई सो उ, निव्वाणं च न गच्छइ ॥६॥**

**व्याख्या**—सूत्राष्टकं सुब्व्यत्ययाच्च**चतुर्दशसु स्थानेषु वर्त्तमान**स्तिष्ठन्, **तुः** पूर्त्तौ, **संयतोऽविनीत उच्यते, स चाऽ**विनीतो **निर्वाणं** मोक्षं, **चात्** इहापि ज्ञानादींश्च **न गच्छति** ॥६॥

चतुर्दशस्थानान्याह—

**अभिक्खणं कोही हवई, पबंधं च पकुव्वई ।**
**मित्तिज्जमाणो वमई, सुयं लद्धूण मज्जइ ॥७॥**

**व्याख्या—अभीक्ष्णं** पुनः पुनर्यद्वा क्षणं क्षणं **अभिक्षणं** अनवरतं **क्रोधी भवति** स निमित्तमनिमित्तं वा कुप्यन्नेवास्ते । **प्रबन्धं च** क्रोधस्यैवोत्सेकं **प्रकर्षेण कुरुते**, कुपितः सान्त्वनैरनेकैर्न शाम्यति, विकथादिषु वा प्रबन्धं क्रोधवृद्धिं कुरुते । **मित्रीयमाणोऽपि** मित्रं ममास्त्वयमितीष्यमाणोऽपि, अपेर्लुप्तनिर्देशात्, **वमति** त्यजति मैत्रीं मित्रीयितारं वा, यथा कोऽपि धर्मी वक्त्यहं तव कार्यं कुर्वे, स प्रत्युपकारभीरुतया प्रतिवक्ति ममालमेतेन, कृतमपि वा कृतघ्नतया न मन्यते इति **वमिते**त्युच्यते । अपेर्गम्यत्वात् **श्रुतमप्या**गममपि **लब्ध्वा माद्यति** दर्पं याति, श्रुतं हि मदापहं, स तु तेनापि दृप्यति ॥७॥

तथा—

**अवि पावपरिक्खेवी, अवि मित्तेसु कुप्पइ ।**
**सुप्पियस्सावि मित्तस्स, रहे भासइ पावगं ॥८॥**

**व्याख्या—अपिः** सम्भावने, सम्भाव्यत एव तत्, यथासौ पापैः कथञ्चित् समित्यादिषु स्खलितैः परिक्षिपति तिरस्कुरुते इत्येवंशील **पापपरिक्षेपी** आचार्यादीनां, अपि भिन्नक्रमः, ततो **मित्रेभ्योऽपि,** आस्तामन्येभ्यः, **कुप्यति** क्रुध्यति, चतुर्थ्यर्थे सप्तमी । **सुप्रियस्यापि मित्रस्यै**कान्ते **भाषते पापं,** अयमर्थः—अग्रतः प्रियं वक्ति पृष्ठौ च दोषं वक्ति ॥८॥

तथा—

**पइन्नवाई दुहिले, थद्धे लुद्धे अणिग्गहे ।**
**असंविभागी अवियत्ते, अविणीए त्ति वुच्चइ ॥९॥**

Jain Education International 2010_02  For Private & Personal Use Only  www.jainelibrary.org

**व्याख्या**—प्रकीर्णं असम्बद्धं वदतीति, अथवा यः पात्रमिदमिति चाऽपरीक्ष्यैव कथञ्चिदधिगतश्रुतरहस्यं वदतीत्येवंशीलः **प्रकीर्णवादी**, प्रतिज्ञया वेदमित्थमेवेति वदनशीलः **प्रतिज्ञावादी** । तथा **द्रोहणशीलो** द्रोग्धा मित्रस्यापि । **स्तब्ध**स्तपस्व्यहमित्याद्यहङ्कृतिमान्, तथा **लुब्धोऽ**न्यादिष्वतिश्रद्धावान्, **अनिग्रहः** प्राग्वत्, **असंविभागी** नाऽऽहारादिमाप्य गृद्ध्याऽन्यस्मै स्वल्पमपि दत्ते, आत्मानमेव केवलं पोषयति । 'अवियत्ते'ति **अप्रीतिकारो** दृश्यमानः सम्भाष्यमाणो वा, ईदृग**विनीत इत्युच्यते** ॥९॥

विनीतस्थानान्याह—

**अह पन्नरसहिं ठाणेहिं, सुविणीए त्ति वुच्चइ ।**
**नीयावित्ती अचवले, अम्माई अकुतूहले ॥१०॥**

**व्याख्या—अथ पञ्चदशभिः स्थानैः सुष्ठु विनीत** इत्युच्यते, नीचं अनुद्धतं यथा स्यादेवं नीचेषु शय्यादिषु वा वर्त्तत इत्येवंशीलो **नीचवर्त्ती** गुरुषु न्यग्वृत्तिमान्। "**नीयं सिज्जं गयं ठाणं**" [ द.९।१-१७ ] इत्यादि । **अचपलो** नारब्धकार्यं प्रत्यस्थिरः, अथवा चपलो **गतिस्थानभाषाभाव**भेदतश्चतुर्द्धा, **गतिचपलो** द्रुतचारी १ **स्थानचपलो** यस्तिष्ठन्नपि चलहस्तादिः २ **भाषाचपलोऽसदऽसभ्याऽसमीक्ष्याऽदेशकालप्रलापि**भेदाच्चतुर्धा । तत्राऽसदविद्यमानं, असभ्यं खरपरुषादि, असमीक्ष्य अनालोच्य प्रलपन्त्येवंशीलाः असदऽसभ्याऽसमीक्ष्यप्रलापिनः, प्रायोऽदेशकालप्रलापी तु चतुर्थोऽतीते कार्ये तु यो वक्ति यदीदं तत्र देशकाले वाऽकरिष्यत् ततः सुन्दरमभविष्यत् । **भावचपलः** सूत्रेऽर्थे वाऽसमाप्ते एव योऽन्यं गृह्णाति । **अमायी** मनोज्ञाहारादि प्राप्य गुर्वादीनामवञ्चकः, **अकुतूहलो** न कुहकेन्द्रजालाद्यवलोकते ॥१०॥

**अप्पं च अहिक्खिवई, पबंधं न च कुव्वई ।**
**मित्तिज्जमाणो भयइ, सुयं लद्धुं न मज्जइ ॥११॥**

**व्याख्या—अल्प**शब्दोऽभावार्थः, ततो नैव कञ्च**नाधिक्षिपति, प्रबन्धं** क्रोधाधिक्यं **न करोति, मित्रीयमाणोऽपि** मित्रकृत्यं **भजते,** मित्रीयितारमुपकुरुते, न तु प्रत्युपकारं प्रत्यसमर्थः कृतघ्नो भवेत्, **श्रुतं च लब्ध्वा न माद्यति** किन्तु मददोषज्ञानाद् गाढं नमितः ॥११॥

**न य पावपरिक्खेवी, न च मित्तेसु कुप्पई ।**
**अप्पियस्सावि मित्तस्स, रहे कल्लाण भासइ ॥१२॥**

**व्याख्या—न च पापपरिक्षेपी,** स्खलितेऽपि गुरौ भक्तः, **न च मित्रेभ्यः** कृत-

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

ज्ञतया कथञ्चिदपराधेऽपि **कुप्यति, अप्रियस्यापि मित्रस्य रहसि कल्याणं भाषते** । मित्रमिति यः प्रपन्नः स यद्यपकृतिशतानि विधत्ते तथाप्येकमपि तत्सुकृतमनुस्मरन् रहसि अरहस्यपि तस्य दोषं न वक्ति । यतः—

**एकसुकृतेन दुःकृत-शतानि ये नाशयन्ति ते धन्याः ।**
**नत्वेकदोषजनितो, येषां दोषशतः कृतघ्नः ॥१॥ [ ] ॥१२॥**

**कलहडमरवज्जए, बुद्धे अभिजायए ।**
**हिरिमं पडिसंलीणो, सुविणीए त्ति वुच्चइ ॥१३॥**

**व्याख्या—कलहो** वाचिको विग्रहः, **डमरं** प्राणघातादिजं, **तद्वर्जको, बुद्धो** बुद्धिमानिति सर्वत्रानुगम्यमेवेति न प्रकृतिसङ्ख्याविरोधः, अभिजातिं कुलीनतां गच्छतीत्य**भिजातिगः**, उत्क्षिप्तभारनिर्वहणात्, **ह्रीमान्** कलुषाशयत्वेऽप्यकार्यमाचरन् लज्जते । **प्रतिसंलीनो** गुरुसकाशे, अन्यत्र वा विना कार्यं यतस्ततो न चेष्टते । एवंगुणः **सुविनीत इत्युच्यते** ॥१३॥ इति सूत्राष्टकार्थः ।

स कीदृक् स्यादित्याह—

**वसे गुरुकुले निच्चं, जोगवं उवहाणवं ।**
**पियंकरे पियंवाई, से सिक्खं लद्धुमरिहई ॥१४॥**

**व्याख्या—वसेद् गुरुकुले** गच्छे **नित्यं** यावज्जीवमपि गुर्वाज्ञायामेव । योगो व्यापारो धर्मस्य तद्वान्, यद्वा योगः समाधिः सोऽस्यास्तीति **योगवान्** । **उपधानवान्** अङ्गाऽनङ्गाऽध्ययनादौ यथायोग्यमाचाम्लादितपोविशेषवान्, केनचिदपकृतोऽपि **प्रियङ्करः**, न तत्प्रतिकूलमाचरति, मत्कर्मणामेव दोषोऽयमिति ध्यायन् अप्रियकारेऽपि प्रियं चेष्टते, यद्वाऽऽचार्यादेरिष्टाहाराद्यै**रनुकूलकारी** । **प्रियवादी** अप्रियमुक्तोऽपि प्रियमेव वदतीत्येवंशीलो यद्वाऽऽचार्या**द्याशयानुवर्त्तितयैव वक्ता** । तथा चास्य को गुण इत्याह—स एवंगुणः **शिक्षां** शास्त्रार्थग्रहणाद्यां **लब्धुमर्हति**, स बहुश्रुतः स्यात् नान्यः ॥१४॥

बहुश्रुतस्य पूजा कार्येति तस्य स्तवं षोडशदृष्टान्तैराह—

**जहा संखंमि पयं णिहितं, दुहओ वि विरायइ ।**
**एवं बहुस्सुए भिक्खू, धम्मो कित्ती तहा सुयं ॥१५॥**

**व्याख्या—यथा** जलजे **शङ्खे पयो** दुग्धं **निहितं** न्यस्तं **द्वाभ्यां** प्रकाराभ्यां

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

स्वौज्ज्वल्यमाधुर्याभ्यां, आश्रयस्य च शोभनत्वादविनाशित्वशोभाभ्यां **विराजते**, तत्र न कालुष्यं नाम्लतां च भजते, न च परिस्रवति । **एवं बहुश्रुते भिक्षौ** द्वाभ्यां हेतुभ्यां **धर्मो** यतिधर्मः **कीर्त्तिस्तथा श्रुतमा**गमो विराजते, यद्यपि धर्मकीर्त्तिश्रुतानि निरुपलेपनादिगुणेन स्वयं शोभाभाञ्जि, तथापि मिथ्यात्वादिकालुष्यविगमान्नैर्मल्यादिगुणेन शङ्ख इव बहुश्रुते स्थितान्याश्रयगुणेन विशेषतः शोभन्ते, अन्यथा तान्यपि मालिन्याकुलाश्रयेण हानिमाप्नुवन्ति ॥१५॥

**जहा से कंबोयाणं, आइन्ने कंथए सिया ।**
**आसे जवेण पवरे, एवं हवइ बहुस्सुए ॥१६॥**

**व्याख्या—यथा** येन प्रकारेण, **स** इति प्रतीतः, **कम्बोजानां** कम्बोजदेशजानामश्वानां मध्ये 'निर्द्धारणे षष्ठी' **आकीर्णो** व्याप्तः शीलादिगुणैः, **कन्थकः** प्रधानोऽश्वोऽश्मखण्डभृत्कुतपपातध्वनेरत्रस्यन् **स्यात्** , **अश्वो जवेन प्रवरः**, **एवं** ईदृशो **भवति बहुश्रुतः** । जैना हि व्रतिनः काम्बोजा इवाश्वेषु जातिजयादिगुणैरन्यतीर्थ्यपेक्षया श्रुतशीलादिभिर्वरा एव। अयं त्वाकीर्णकन्थकाश्ववत्तेष्वधिको गुणैः ॥१६॥

**जहाइन्नसमारूढो, सूरे दढपरक्कमे ।**
**उभओ नंदिघोसेणं, एवं भवइ बहुस्सुए ॥१७॥**

**व्याख्या—यथा आकीर्णं** जात्यादिगुणमश्वं **सम्यगारूढो**ऽध्यासितः **शूरो**ऽश्ववारसुभटः, **दृढपराक्रमो** गाढदेहबलः, **उभयतो** वामे दक्षिणे, अग्रे पृष्ठे वा, **नान्दीघोषेण** द्वादशतूर्यनिनादेन यद्वा जीयास्त्वमित्याद्या**शीर्वा**चो बन्दिकृता**स्तद्घोषेण,** यथैवंविधः शूरो न केनचिदभिभूयते, न चान्यस्तदाश्रितोऽभिभूयते, **एवं भवति बहुश्रुतः** । जिनप्रवचनाऽश्वाश्रितो दृप्यत्परवादिदर्शनेऽप्यत्रस्तस्तज्जये क्षमः, उभयतश्चाह्नि रात्रौ स्वाध्यायरूपेण स्वपरपक्षयोर्वा चिरं जीवत्वसौ प्रवचनोद्दीपक इत्याद्याशीर्नान्दीघोषेणान्यतीर्थ्यैर्महोद्धतैरपि नाभिभूयते, न चैतदाश्रितोऽपि वा ॥१७॥

**जहा करेणुपरिकिण्णे, कुंजरे सट्ठिहायणे ।**
**बलवंते अप्पडिहए, एवं भवइ बहुस्सुए ॥१८॥**

**व्याख्या—यथा करेणुकाभि**र्हस्तिनीभिः परिकीर्णः परिवृतो यः [कुञ्जरो] स **षष्टिहायनः** षष्टिवर्षीयः, तस्य ह्येतावत् कालं यावत् प्रतिवर्षं बलवृद्धिः, अत एव **बलवान्** , बलं देहसामर्थ्यमस्यास्तीति, **अप्रतिहतो**ऽन्यैर्मदमुखैरपि गजैर्न भज्यते, **एवं भवति बहुश्रुतः**, सोऽपि करेणुभिरिव परवादिप्रसररोधक्षमौत्पातिक्यादिबुद्धिभिर्वृतः, षष्टिहायनतया

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

चातिगाम्भीर्यादिगुणैः स्थिरीभूतः, धीरत्वाच्च बलवानऽप्रतिहतो दर्शनोपबृंहिभिर्बहुभिरपि प्रतिहन्तुं न शक्यत इति ॥१८॥

**जहा से तिक्खसिंगे, जायखंधे विरायइ ।**
**वसहे जूहाहिवई, एवं भवइ बहुस्सुए ॥१९॥**

**व्याख्या—यथा स तीक्ष्णशृङ्गो**, जातोऽत्यन्तमुपचितः स्कन्धोऽस्येति **जातस्कन्धः** समाङ्गोपाङ्गैरुपचितो **विराजते** विशेषेण भाति **वृषभः**, यूथस्य गवां स्वामी **यूथाधिपतिः, एवं भवति बहुश्रुतः** । सोऽपि परपक्षभेतृतया तीक्ष्णाभ्यां स्वाशास्त्राभ्यां शृङ्गाभ्यां युतः गच्छगुरुकार्यधुर्यत्वाज्जातस्कन्ध इव जातस्कन्धः, यूथस्य साध्वादिसमूहस्याधिपतिराचार्यत्वं गतः सन् विराजते ॥१९॥

**जहा से तिक्खदाढे, उदग्गे दुप्पहंसए ।**
**सीहे मियाण पवरे, एवं भवइ बहुस्सुए ॥२०॥**

**व्याख्या—यथा स तीक्ष्णदंष्ट्रः, उदग्र** उत्कटः अग्रवयःस्थत्वेन वा उदग्रः, दुःप्रधर्ष एव **दुःप्रधर्षको**ऽन्यैर्दुरभिभवः, **सिंहो मृगाणामा**रण्यप्राणिनां **प्रवरो भवति, एवं भवति बहुश्रुतः**, अयं हि परपक्षभेतृत्वात्तीक्ष्णदंष्ट्रादिभिरिव नैगमादिनयैः, प्रतिभादिगुणोदग्रतया दुरभिभवोऽन्यतीर्थ्यानां मृगस्थानीयानां प्रवर एवेति ॥२०॥

**जहा से वासुदेवे, संखचक्कगयाधरे ।**
**अप्पडिहए बले जोहे, एवं भवइ बहुस्सुए ॥२१॥**

**व्याख्या—यथा स वासुदेवो** विष्णुः, शङ्खं पाञ्चजन्यं, चक्रं सुदर्शनं, गदां च कौमोदकीं धरतीति **शङ्खचक्रगदाधरः**, अप्रतिहतमन्यैरस्खलितं बलं सामर्थ्यमस्येत्य**प्रतिहतबलः**, कोऽर्थः ? एकं सहजसामर्थ्यवान्, परं च तादृशायुधान्वितो **योधः** सुभटो भवति, **एवं भवति बहुश्रुतः**, सोऽपि ह्येकं स्वाभाविकप्रागल्भ्यवान्, अपरं शङ्खचक्रगदाभिरिव सम्यग्ज्ञानदर्शनचारित्रैरुपेत इति । योधः कर्मारिपराभवं प्रति स्यात् ॥२१॥

**जहा से चाउरंते, चक्कवट्टी महिड्ढिए ।**
**चउदसरयणाहिवई, एवं भवइ बहुस्सुए ॥२२॥**

**व्याख्या—यथा स** चतुर्भिर्हयगजरथनरात्मकैरन्तः शत्रुनाशात्मको यस्य स **चतुरन्तचक्रवर्त्ती** षट्खण्डभरताधिपो **महर्द्धिको** दिव्यश्रीकः, **चतुर्दशरत्नानि**, तानि च—

**सेणावइ १ गाहावइ २, पुरोहि ३ गय ४ तुरग ५ वड्ढइग ६ हत्थी ७ ।**
**चक्कं ८ छत्तं ९ चम्मं १० मणि ११, कागिणी १२ खग्ग १३ दंडो १४ य ॥१॥**

**[ वि.सा./गा.५४९ ]**

**तेषामधिपतिः** एवं बहुश्रुतो भवति, सोऽप्यासमुद्रहिमवत्स्थविद्याधरवृन्दख्यातकीर्तित्वाच्चतुरङ्गतो, दानाद्यैश्चतुर्भिवान्तः कर्मारिनाशोऽस्येति चतुरन्तः, ऋद्धयश्चामर्षौषध्याद्याश्चक्रिभङ्गकपुलाकलब्ध्याद्या महत्य एवास्य स्युः, चतुर्दशरत्नोपमानि च पूर्वाणि ॥२२॥

**जहा से सहस्सक्खे, वज्जपाणी पुरंदरे ।**
**सक्के देवाहिवई, एवं भवइ बहुस्सुए ॥२३॥**

**व्याख्या–यथा स सहस्राक्षः**, देवमन्त्रिपञ्चशतानां सहस्रं लोचनानि, अथवा सहस्रेण लोचनानामन्ये यत् पश्यन्ति स द्वाभ्यामेव पश्यतीति **सम्प्रदायः, वज्रपाणिः**, लोकोक्त्या पूर्दारणात्**पुरन्दरः, शक्रो, देवाधिपतिः, एवं भवति बहुश्रुतः** । सोऽपि श्रुतज्ञानेनाऽशेषातिशयविधानेन लोचनसहस्रेणेव जानीते, वज्रलक्षणस्य च पाणौ सम्भवः, पुरं शरीरं विकृष्टतपसा दारयतीति, शक्रवत् देवैरपि धर्मेऽत्यन्तनिश्चलत्वात् पूज्यते इति तत्पतिरुच्यते ॥२३॥

**जहा से तिमिरविद्धंसे, उत्तिट्ठंते दिवायरे ।**
**जलंते इव तेएणं, एवं हवइ बहुस्सुए ॥२४॥**

**व्याख्या–यथा** सती(**सः**) तिमिरं अन्धकारं विध्वंसयतीति **तिमिरध्वंसी,** (**तिमिरविध्वंसः**) **उत्तिष्ठन्** ऊद्ध्वं गच्छन् **दिवाकरः** सूर्यः, ऊद्ध्वं नभोभागमाक्रमन् अतितेजस्वितां भजते, **ज्वलन्निव** ज्वालां मुञ्चन्निव **तेजसा, एवं भवति बहुश्रुतः** । सोऽप्यज्ञानतिमिरापहः, संयमस्थानेषु विशुद्धाध्यवशायत उत्सर्पन् तपस्तेजसा ज्वलन्निव स्यात् ॥२४॥

**जहा से उडुवई चंदे, नक्खत्तपरिवारिए ।**
**पडिपुण्णे पुण्णमासिए, एवं हवइ बहुस्सुए ॥२५॥**

**व्याख्या–यथा स उडूनां** नक्षत्राणां **पतिश्चन्द्रो** नक्षत्रैर्ग्रहैस्ताराभिश्च परिवारः सञ्जातोऽस्येति **नक्षत्रपरिवारितः प्रतिपूर्णः पूर्णिमास्यां** स्यात्, **एवं भवति बहुश्रुतः**, सोऽनेकर्षीणामधिपस्तत्परिकरितः सम्यक्त्वपौर्णिमास्यां शुभ्रायां सर्वकलावत्त्वेन प्रतिपूर्णश्च स्यात् ॥२५॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**जहा से सामाईयाणं, कोट्ठागारे सुरक्खिए ।**
**नाणाधण्णपडिपुन्ने, एवं हवइ बहुस्सुए ॥२६॥**

**व्याख्या–यथा (सः)** समाजः समूहस्तं समवयन्तीति **सामाजिकाः**, समूहवृत्तयो लोकास्तेषां, **कोष्ठागारो** धान्याश्रयः, सुष्ठु प्राहरिकादिव्यापारद्वारेण रक्षितो दस्युमूषकादिभ्यः **सुरक्षितः, नानाधान्यानि** शालिमुद्गादीनि **तैः प्रतिपूर्णो** भृतो भवेत्, **एवं भवति बहुश्रुतः** । सोऽपि सामाजिकलोकानामिव गच्छवासिनामुपयोगिभिर्नानाधान्यैरिवाङ्गोपाङ्गप्रकीर्णकादिभेदैः श्रुतज्ञानविशेषैः प्रतिपूर्णो भवति, सुरक्षितश्च प्रवचनाधारतया परवादिरागादिभ्यः साधुपरिचर्यायोग्याहारादिना, "**जेण कुलं आयत्तं**" [ ] इत्यादि ॥२६॥

**जहा सा दुमाण पवरा, जंबूनाम सुदंसणा ।**
**अणाढियस्स देवस्स, एवं हवइ बहुस्सुए ॥२७॥**

**व्याख्या–यथा सा द्रुमाणां** मध्ये **प्रवरा जम्बू**र्नाम्नाभिधानेन **सुदर्शना नाम जम्बू**रिति । न हि यथेयममृतोपमफला देवाद्याश्रया च तथाऽन्यः कश्चिद् द्रुमोऽस्ति । द्रुमत्वं फलव्यवहारश्चास्यास्तत्प्रतिरूपतयैव वस्तुतः पार्थिवत्वात् । **अनादृत**नाम्नो **देवस्य जम्बू**द्वीपव्यन्तरस्य आश्रयत्वेन तत्सम्बन्धिनी सा **जम्बूः** ।

यथा **उत्तरकुरायां (उत्तरकुरौ) सीता**नद्याः पूर्वतः पञ्चशतयोजनायामविष्कम्भं **जम्बू**पीठं, मध्ये द्वादशयोजनपिण्डं, क्रमात् प्रदेशहान्या तद् द्विक्रोशपिण्डं स्वर्णमयं, वेदिकया वनेन वृतं चतुर्द्वारं त्रिसोपानं, पीठमध्ये मणिपीठकाष्टयोजनदीर्घपृथुः योजनचतुष्कपिण्डात्, तदुद्ध्वं **जम्बू**वृक्षोऽर्द्धयोजनमवगाढोऽष्टयोजनोच्चः, तत्र स्कन्धो योजन द्वयोच्चोऽर्द्धयोजनपिण्डः । चतस्रस्तस्य मूलशाखाः षड्योजनोच्चाः, जम्बूमध्यदेशेऽष्टयोजनानि वृत्ताः, वज्रमयं मूलं, रूप्यशाखाः, शाखामध्ये चैत्यं क्रोशदीर्घं, अर्द्धक्रोशपृथु, देशोनक्रोशमुच्चं, द्वाराणि ५००धन्वोच्चानि, तन्मध्ये मणिपीठिका ९००धन्वायामविस्तराभ्यां, २५०धन्वबाहुल्या, ऊद्ध्वं देवच्छन्दः ५००धन्वदैर्घ्यपृथुत्वे, साधिक ५००धन्वोच्चः, तत्र १०८प्रतिमाः **जम्ब्वाः** पूर्वशाखायां भवनं, शेषदिक्षु प्रासादाः, सिंहासनानि **अनादृत**देवस्य वायव्योत्तरेशानदिक्षु, **अनादृत**देवस्य चतुःसहस्राः (४०००) **जम्बू**सामानिकानां, इत्यादि यावत् सर्वा**ऽनादृत**देवपरिवारसक्त**जम्बू**सर्वसङ्ख्या एका कोटी, विंशतिलक्षाः, पञ्चाशत्सहस्राणि, विंशत्यधिकं शतं, एतच्चैव मानं **पद्महृद**पद्मानामपि **श्रीदेव्याः** । **एवं भवति बहुश्रुतः**, सोऽप्यमृतोपमफलकल्पश्रुतान्वितो देवादीनामपि पूज्यः, शेषवृक्षोपमसाधुश्रेष्ठः, **अनादृत**देवस्थानीयार्हन् स्यात् ॥२७॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**जहा सा णदीणं पवरा, सलिला सागरंगमा ।**
**सीया नीलवंतप्पवहा, एवं हवइ बहुस्सुए ॥२८॥**

**व्याख्या–यथा सा नदीनां** मध्ये **प्रवरा सलिला** नित्यजला नदी, सागरं गच्छतीति **सागरङ्गमा** समुद्रपातिनीत्यर्थः, न तु क्षुद्रनदीवदन्तरा विशीर्यते, सा **सीता** नाम्नी नदी **नीलवन्त**नामवर्षधराद्रेः **प्रभवा प्रवहा** वा, सा च पञ्चलक्षद्वात्रिंशत्सहस्रनदीयुक्ता पञ्चशतयोजनविस्तृता दशयोजनोच्चाब्धौ पतति, **एवं भवति बहुश्रुतः** । सोऽपि सरितामिवान्यसाधूनामशेषश्रुतज्ञानिनां मध्ये प्रवरः शुद्धाम्भःसमश्रुतान्वितः सागरमिव मुक्तिमेवासौ याति, तदर्हानुष्ठाने एवास्य प्रवृत्तेः, न ह्यन्यदर्शनिवद्देवादिभवेऽस्य विवेकिनो वाञ्छा, तथा च कथमस्यान्तरास्थानं नीलवत्तुल्योच्छ्रितकुलप्रसूतेः, तेनैवेदृग्योग्यता स्यात् ॥२८॥

**जहा से णगाण पवरे, सुमहं मंदरो गिरि ।**
**नाणोसहिपज्जलिए, एवं हवइ बहुस्सुए ॥२९॥**

**व्याख्या–यथा स नगानां** गिरीणां **प्रवरः सुमहान्** अत्युच्चः, सर्वेष्वपि भूमेर्नवनवतिसहस्रोच्चत्वा**न्मन्दरो मेरुगिरिर्नानौषधीभिः प्रकर्षेण ज्वलितो** दीप्तः, ता ह्यतिशायिन्यः प्रज्वलन्त्य एव स्युः, तेन गिरिरपि प्रज्वलितः स्यात्, **एवं भवति बहुश्रुतः** । सोऽपि श्रुतबलेनातिस्थिरः शेषाद्रिकल्पाऽन्यस्थिरसाध्वपेक्षया प्रवरः, तमस्यपि प्रकाशक आमर्षौषध्यादिलब्धिभिः ॥२९॥

किं बहुना ?–

**जहा से सयंभुरमणे, उदही अक्खओदए ।**
**नाणारयणपडिपुन्ने, एवं हवइ बहुस्सुए ॥३०॥**

**व्याख्या–यथा ( सः ) स्वयम्भूरमणा**भिधान **उदधिः, अक्षयम**विनाश्य**युदकं यस्मिन्** स, तथा **नानारत्नै**र्मरकतादिभिः **प्रतिपूर्णो** भवेत् **एवं भवति बहुश्रुतः** । सोऽप्यक्षयसम्यग्ज्ञानोदको नानाऽतिशयरत्नवांश्च स्यात्, यद्वा अक्षत उदयः प्रादुर्भावो यस्यासावक्षतोदयः ॥३०॥

अथोक्तगुणानुवादात्फलोक्तेश्च बहुश्रुतमाह–

**समुद्दगंभीरसमा दुरासया, अचक्किया केणइ दुप्पहंसया ।**
**सुयस्स पुन्ना विउलस्स ताइणो, खवित्तु कम्मं गइमुत्तमं गया ॥३१॥**

**व्याख्या**–आर्षत्वात् गाम्भीर्येणाऽलब्धमध्यात्मकेन गुणेन समा गाम्भीर्यसमाः,

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

समुद्रस्य गाम्भीर्यसमाः **समुद्रगाम्भीर्यसमाः**, अभिभवबुद्ध्या केनापि **दुराश्रयाः दुरासदा** वा, **अचकिता** अत्रासिताः परिषहपरवाद्यादिना, तथा दुःखेन प्रधर्ष्यन्ते न पराभूयन्ते केनापीति **दुःप्रधर्षकाः**, सुब्व्यत्ययात् **श्रुतेन पूर्णाः**, **विपुलेन** अङ्गाऽनङ्गादिभेदतो विस्तीर्णेन **तायिनस्त्रायिणो** वा, ईदृशा बहुश्रुताः **क्षपयित्वा कर्म**, **गतिमुत्तमां** मुक्तिं **गता** यान्ति यास्यन्ति च, एकवचनप्रक्रमेऽपि बहुवचनं पूज्यताद्याप्तिज्ञप्त्यै ॥३१॥

इत्थं बहुश्रुतस्य गुणवर्णनां पूजामुक्त्वा शिष्योपदेशमाह—

**तम्हा सुयमहिट्ठेज्जा, उत्तमट्ठगवेसए ।**
**जेणप्पाणं परं चेव, सिद्धिं संपाउणिज्जासि ॥३२॥ त्ति बेमि**

**व्याख्या**—यस्मादमी मुक्तिफलाः श्रुतगुण**स्तस्मात् श्रुतमधितिष्ठेत्**, अध्ययन-श्रवणचिन्तनादिनाऽऽश्रयेत्, उत्तममर्थं मोक्षं गवेषयती**त्युत्तमार्थगवेषकः । येन** श्रुताश्रयणेन **आत्मानं** स्वं **परं चान्यं** तपस्व्यादिकं, **एवः** निश्चये भिन्नक्रमः, सिद्धिं मुक्तिं सम्यक् प्रापयेदेव, **इति** समाप्तौ, **ब्रवीमी**ति प्राग्वत् ॥३२॥

**इति बहुश्रुतपूजाख्यमेकादशाध्ययनमुक्तम् ॥११॥**

• • •

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

# द्वादशं हरिकेशीयाध्ययनम् ॥

बहुश्रुतेनापि तपोयत्नः कार्य इति ज्ञप्त्यै तपऋद्धिवाचि **हरिकेशीया**ध्ययनमाह–

प्रथमं तत्सम्प्रदाय उच्यते–**मथुरा**यां पुर्यां **शङ्खो** युवराजा धर्मं श्रुत्वा दीक्षितो विहरन् **गजपुरं** गतः, तत्र भिक्षायै भ्रमन् अत्युष्णां मुर्मुरसमां तप्तवालुकां हुतभुग्रूपामिव हुतवहाख्यां एकां रथ्यां प्राप्य, यस्तस्यां चलित स तदैव म्रियते, साधुना तामसञ्चारां दृष्ट्वा पुरोहितसुतोऽपृच्छीयं रथ्या किं वहति ? तेनापि दह्यतामयमिति दुष्टाशयेन वहतीत्युक्ते सोऽत्वरितं तस्यामेव ययौ । तत्तपःप्रभावात् सा रथ्या शीतीभूता, पुरोहितसुतो गवाक्ष-स्थस्तमत्वरितं यान्तं दृष्ट्वाऽहोऽयं महातपस्वीति विस्मितस्तमुद्यानस्थं नत्वोचे, भगवन् कथमस्माद्भवदवज्ञामहापापतोऽहं छुटिष्यामीत्युक्ते प्रव्रजेति तेनोक्ते स दीक्षितो निर्दोषां दीक्षां प्रपाल्य जातिरूपमदौ कृत्वा मृत्वा स्वर्गत्वा च्युतः ।

अथ **गङ्गा**तीरे **हरिकेशा**धिपो **बलकोष्ठा**भिधानः स्मशानवृत्तिरन्त्यजो वसति, तस्य **गौरीगान्धार्य**भिधे द्वे भार्ये आस्तां । तयो**र्गौर्याः** कुक्षौ स आगतः, तदा सा वसन्त-सश्रीकमाम्रं फलितं स्वप्ने दृष्ट्वाऽजागरीत् । स्वप्नपाठकैश्चानुपमपुत्रः फलमूचे । क्रमेण सुतोऽभूत् । प्राग्भवजातिरूपमदात् स कालो विरूपश्च जातः, स **बल**नामा बालोऽन्त्य-जामामपि हसनीयो भण्डनशीलोऽसहनो विषतरुरिव द्वेष्य उद्वेगकृदवर्द्धत । अन्यदा पानगोष्ठीपराणां बन्धूनां मध्ये डिम्भैः सह भण्डचेष्टादिभिः कलहायमानः स तैर्बहिष्कृतः पार्श्वेऽस्थात् । तावत्तत्राऽहिर्निःसृतः, तदा तैः सहसोत्थाय सविष इति स हतः, क्षणेन दीपकसर्पो निःसृतः, ततस्तैः स निर्विष इति कृत्वा मुक्तः, बलेन तद् दृष्ट्वाऽचिन्ति यद्विषभृदहिर्हन्यते, दीपकोऽहिश्च मुच्यते, तर्हि सर्वः कोऽपि स्वदोषैरेव क्लेशभागिति भद्रकैरेव भाव्यं ।

**भद्दएण व होयव्वं, पावइ भद्दाणि भद्दओ ।**
**सविसो हम्मइ सप्पो, भेरुंडो तत्थ मुच्चइ ॥१॥** [ उत्त. नि./गा.३२६ ]

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

इति ध्यायन् जातजातिस्मृतिः स स्वं विमानवासं जातिमदं च दुष्टं भावयन् संविग्नः, साधुमूले धर्मं श्रुत्वा सम्बुद्धः, प्रव्रज्य विहरन् **काशीं** गत्वा **तिन्दुको**द्याने यक्षालये **गण्डिकतिन्दुकं** यक्षं तत्रस्थमनुज्ञाप्यास्थात्, यक्षोऽप्युपशान्तः, इतोऽन्यः कश्चिद्यक्षोऽन्यस्मिन् वने वसति, तत्स्थानेऽपि तत्रानेके साधवः स्थिताः सन्ति । स च तत्रागतो **गण्डिक**यक्षमूचेऽधुना त्वं कथं न दृश्यसे ? सोऽवक् अमुं मुनिं सेवे । सोऽपि तं साधुं दृष्ट्वोपशान्तो जगौ ममोद्यानेऽपि घना यतयः सन्ति, ततस्तौ तत्र गतौ, **गण्डिकः** साधूंस्तत्रस्थान् विकथादिपरान् दृष्ट्वोचे—

**इत्थीण कहित्थ वट्टइ, जणवयरायकहित्थ वट्टइ ।**

**पडिगच्छह रम्मं तिंदुगं, अइ सहसा बहुमुंडिए जणे** ॥१॥ [उत्त. नि./गा.३२७]

इत्युक्त्वा स स्वस्थानं समेत्य तं साधुं प्रतिमास्थमसेवत । अन्यदा **कोशलिक**स्य राज्ञो दुहिता **भद्राख्या** बहुतन्त्रा गन्धमाल्याद्युपेता तत्रागता । यक्षस्य प्रदक्षिणां कुर्वन्ती तं कालं विकरालं मुनिं दृष्ट्वा सा थूच्चकार । यक्षो रुष्टस्तां परवशां चक्रे । पित्रादिदुःखे यक्षोऽवक् तस्या मुखेऽवतीर्य, यदनया यतिं प्रति थूत्कृतं तेन यतिं पतीयन्तीं तां मुञ्चे । राज्ञा जीवत्वसाविति सा तस्मै दत्ता । रात्रौ महत्तरादिभिः सा तत्र यक्षालये आनीता, ताभिरनुज्ञाता च सा यक्षालयं प्रविष्टा । स मुनिस्तु प्रतिमास्थस्तां नैच्छत् । तदा यक्ष ऋषिमाच्छाद्य तां चोदुह्य स्वं दिव्यरूपमदीदृशत् पुनर्मुनिरूपं च । एवं सर्वां रात्रिं तां विडम्बय प्रातः साधुरिमां नेच्छतीति यक्षो जगौ । सा विमनाः पितुर्गृहं यान्ती पुरोहितेन दृष्टा। राज्ञा पृष्टेन तेन पुरोहितेनोक्तं ऋषिपत्नी द्विजाय दीयते, तदा राज्ञा सा तस्मै दत्ता । सोऽपि तां स्वपत्नीं कृत्वा सप्रियो यज्ञमारभतेति तत्सम्बन्धः ।

अथ सूत्रम्—

**सोवागकुलसंभूओ, गुणुत्तरधरो मुणी ।**

**हरिएसबलो नाम, आसि भिक्खू जिइंदिओ ॥१॥**

**व्याख्या—स्वपाककुलसम्भूत**श्चाण्डलकुलोत्पन्नः, उत्तरान् प्रधानान् ज्ञानादीन् गुणान् धारयतीत्युत्तरगुणधरः, प्राकृतत्वात् पूर्वापरनिपाते **गुणोत्तरधरो** मुनिः, **हरिकेशो** हरिकेशतया प्रतीतः स्वपाकतयेत्यर्थः, **बलो** नामासीत् भिक्षुः, भिनत्ति यथाप्रतिज्ञातानुष्ठानेन क्षुधमष्टविधं कर्मेति **भिक्षुर्जितेन्द्रियः** ॥११॥

तथा—

**इरिएसणभासाए, उच्चारे समिईसु य ।**

**जओ आयाणनिक्खेवे, संजओ सुसमाहिओ ॥२॥**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या–इर्याएषणाभाषायां** तथा **उच्चारे** पुरीषे, अन्येष्वपि परिस्थापने, एषु स्थानेषु **समितिषु** सम्यक् प्रवर्त्तनेषु यतते इति यतो **यत्नवान्**, तथा आदानं पीठफलकादेर्निक्षेपः स्थापनं **आदाननिक्षेपं**, अपवादे तयोः । समित्यां च यतः **संयतः** संयमान्वितः **सुसमाहितः** सुष्ठु समाधिवान् ॥२॥

तथा–

**मणगुत्तो वयगुत्तो, कायगुत्तो जिइंदिओ ।**
**भिक्खट्ठा बंभइज्जंमि, जन्नवाडमुवट्ठिओ ॥३॥**

**व्याख्या**–मनो गुप्तमस्येति **मनोगुप्तः**, एवं **वाग्गुप्तादिः**, भिक्षार्थं ब्राह्मणानां इज्या यजनं तस्मिन् **ब्राह्येज्ये( ब्रह्मेज्ये )यज्ञवाटके उपस्थितः** प्राप्तः ॥३॥

**तं पासिऊणमेज्जंतं, तवेण परिसोसियं ।**
**पंतोवहीउवगरणं, उवहसंति अणारिया ॥४॥**

**व्याख्या–तं** मुनिं **दृष्ट्वाऽयान्तं, तपसा** षष्ठाष्टमादिना **परिशोषितं** कृशीकृतमांसरक्तं, प्रान्तं जीर्णं मलिनाद्यसारमुपधिर्वर्षाकल्पादिः, स एवोपकरणं धर्मशरीरोपष्टम्भहेतुरस्येति, तं **प्रान्तोपध्युपकरणमुपहसन्ति अनार्या** म्लेच्छा इवाऽनार्याः साधुनिन्दादिना ॥४॥

ततश्च–

**जाईमयपडिथद्धा, हिंसगा अजिइंदिया ।**
**अबंभचारिणो बाला, इमं वयणमव्ववी ॥५॥**

**व्याख्या–जातिमदेन** द्विजा वयं, इति **परिस्तब्धाः** (पाठान्तरे-**प्रतिबद्धा** वा) **हिंसकाः** प्राणिघातकाः, **अजितेन्द्रिया** इन्द्रियवशाः, अत एवाऽ**ब्रह्मचारिण** अब्रह्मधर्मवादिनः । यतः–

**ऋतुकाले विधानेन, तत्र दोषो न विद्यते ।** [ ]

तथा, "**अपुत्रस्य गतिर्नास्ति**" [ ] इत्यादि च । अत एव बाला इव **बालाः**, बालक्रीडानिभेष्वग्निहोत्रादिषु प्रवृत्तत्वात् । उक्तं च–

**अग्निहोत्रादिकं कर्म, बालक्रीडेव लिख्यते ॥** [ ] इति ।

ते **इदं वचनमब्रुवन्** ॥५॥

**कयरे आगच्छइ दित्तरूवे, काले विकराले फुक्कनासे ।**
**ओमचेलए पंसुपिसायभूए, संकरदूसं परिहरिय कंठे ॥६॥**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या—कतरः**, एकारः प्राकृतत्वात्, **आगच्छति** ? (पाठान्तरे–'कोरे आगच्छइ'त्ति, **कोरे** इति लघोरामन्त्रणं) **दीप्तरूपो**ऽतिबीभत्सो, विकृततया वा दुर्दर्शनः, **कालो** वर्णेन, **विकरालो** दन्तुरतादिना भीकृत्, 'फुक्क'त्ति अग्रदेशे स्थूलोन्नता च नासाऽस्येति **फोक्कनासः**, **अवमचेलको** निकृष्टवस्त्र, पांशुना रजसा पिशाचवद्भूतो जातः **पांशुपिशाचवद्भूतः**, पिशाचो हि लौकिकानां दीर्घश्मश्रूनखरोमा पांशुगुण्डितश्चेष्टः, ततः सोऽपि निःप्रतिकर्मत्वरजोऽवगुण्ठितदेहतया चैवं । सङ्करस्तृणभस्मगोमयाङ्गारादिराशिरुत्कुरुडिका, तत्रस्थं दूष्यं वस्त्रं **संकरदूष्यं**, तत्र हि यदत्यन्तनिकृष्टं निरुपयोगि च स्यात्तदेव लोकैरुज्झ्यते, ततस्तत्प्रायं **वस्त्रं**, तत् **परिवृत्य** निक्षिप्य **कण्ठे** गले कण्ठैकपार्श्वे इत्यर्थः, अनिक्षिप्तोपधिः स्वोपधिं लात्वैव स भ्रमतीति ॥६॥

इत्थं दूरादागच्छन् स उक्तः, सन्निकृष्टं त्वेवमूचुः—

**कयरे तुमं इय अदंसणिज्जे, का एव आसा इहमागओ सि ।**
**ओमचेलगा पंसुपिसायभूया, गच्छ खलाहि किमिहं ठिओ सि ॥७॥**

**व्याख्या—कतरस्त्वं** ? (पाठान्तरे–**कोरे त्वं** ?) **इतीत्येवमदर्शनीयो** द्रष्टुमनर्हः, **कया वा**, प्राकृतत्वादेकारलोप, मश्चागमिकः, तत **आशया** वाञ्छया **इह** यज्ञपाटके **आगतो**ऽसि ? **अवमचेलकः** पांशुपिशाचभूतः प्राग्वत् । पुनरनयोरुपादानमत्यन्ताधिक्षेपे । **गच्छे**तो यज्ञपाटकात् । 'खलाहि' देश्युक्त्याऽपसरास्मद्दृष्टेः, **किमिह स्थितोऽसि** त्वं ? नैवेह त्वया स्थेयं ॥७॥

एवमधिक्षिप्तेऽपि तस्मिन् मुनौ प्रशमितया किञ्चिदजल्पति तत्सान्निध्यं चक्रे **गण्डीतिन्दुक**यक्षः—

**जक्खो तहिं तिंदुयरुक्खवासी, अणुकंपओ तस्स महामुणिस्स ।**
**पच्छायइत्ता नियगं सरीरं, इमाइं वयणाइमुदाहरित्था ॥८॥**

**व्याख्या—यक्षो** व्यन्तरः **तिन्दुको** नामा **वृक्षस्तद्वासी**, यतस्तिन्दुकवनान्तर्महांस्तिन्दुकवृक्षस्तत्रासौ वसति, तदधस्ताच्च तच्चैत्यं यत्र स साधुस्तिष्ठति । **अनुकम्पको**ऽनुकूलकृपाप्रवृत्तिः, **तस्य बलस्य** महामुनेः प्रति । **प्रच्छाद्य निजकं शरीरं** यक्षो निजदेहं गुप्तीकृत्य, तपस्विशरीरे च प्रविश्य**इमानि** वक्ष्यमाणानि **वचनानि उदाहृतवान्** ॥८॥

यथा—

**समणो अहं संजओ बंभयारी, विरओ धणपयणपरिग्गहाओ ।**
**परप्पवित्तस्स उ भिक्खकाले, अन्नस्स अट्ठा इहमागओ म्हि ॥९॥**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या–श्रमणो** मुनिरहं, सम्यग्यतः **संयतो**ऽसद्व्यापारेभ्यो निवृत्तः, **ब्रह्मचारी,** तथा **विरतो** निवृत्तो **धनपचनपरिग्रहात्,** धनं चतुष्पदादि, पचनं आहारनिष्पादनं, परिग्रहो द्रव्यादिषु मूर्छा, अत एव परस्मै प्रवृत्तं परार्थं निष्पन्नं, तस्य, **तुः** एवार्थे, ततः **परप्रवृत्तस्यैव** न तु मदर्थस्य, **अन्नस्यार्थं भिक्षाकाले** न त्वकाले **इह** यज्ञपाटके **आगतोऽस्मि** । अनेन यदुक्तं कतरस्त्वं ? किमिहागतोऽसीति तत्प्रत्युत्तरम् ॥९॥

एवमुक्ते ते चैतद् ब्रूयुर्यन्नेह किञ्चित् कस्मैचिद्दीयते, तत्राह–

**वियरिज्जइ खज्जइ भोज्जइ य, अन्नं पभूयं भवयाणमेयं ।**
**जाणाहि मे जायणजीविणो त्ति, सेसावसेसं लहऊ तवस्सी ॥१०॥**

**व्याख्या–वितीर्यते** दीयते दीनाऽनाथादिभ्यः, **खाद्यते** खण्डखाद्यादि, **भुज्यते च** भक्तसूपादि, अद्यते **इत्यन्नं** अशनं **प्रभूतं भवतां, एतत्** प्रत्यक्षं, तथा च न **जानीत** 'मे' **मां** याचनेन जीवनं प्राणधारणमस्येति **याचनजीवनं,** आर्षत्वादिकारः, द्वितीयार्थे षष्ठी, इति **शेषावशेषं** उद्धरितस्याप्युद्धरितं, अन्तं प्रान्तं **लभतां** मल्लक्षण**स्तपस्वी,** यतिर्वराको वा भवदाशयेन ॥१०॥

एवं यक्षोक्ते यज्ञवाटकस्था ब्राह्मणा आहुः–

**उवक्खडं भोयण माहणाणं, अत्तट्ठियं सिद्धमिहेगपक्खं ।**
**न ऊ वयं एरिसमन्नपाणं, दाहामु तुब्भं किमिहं ठिओ सि ॥११॥**

**व्याख्या–उपस्कृतं** लवणवेसरादिसंस्कृतं **भोजनं ब्राह्मणानां** आत्मनोऽर्थे भव**मात्मार्थिकं** ब्राह्मणैरप्यात्मनैव भोज्यं, नत्वन्यस्मै देयं । यतः **सिद्धं** निष्पन्न**मिहा**स्मिन् यज्ञे एत**देकपक्षं,** एकः पक्षो ब्राह्मणलक्षणो यस्येत्येकपक्षं, यदत्रोपस्क्रीयते तद् ब्राह्मणायैव दीयते, न शूद्राय, यत उक्तम्–

**न शूद्राय मतिं दद्या-न्नोच्छिष्टं न हविःकृतं ।**
**न चास्योपदिशेद्धर्मं, न चास्य व्रतमादिशेत् ॥१॥ [ ]**

ततो न **नैव वयमी**दृशमन्नमोदनादि, पानं द्राक्षापानादि **अन्नपानं तुभ्यं दास्यामः,** अतः **किमिह स्थितोऽसि ?** नैवेहावस्थितावपि तव किञ्चिन्मिलिष्यति ॥११॥

यक्षः प्राह–

**थलेसु बीयाइं ववंति कासया, तहेव णिण्णेसु य आससाए ।**
**एयाए सद्धाए दलाहि मज्झं, आराहए पुण्णमिणं खु खित्तं ॥१२॥**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या–स्थलेषु** जलावस्थितिमुक्तेषु उच्चभूभागेषु **बीजानि वपन्ति कर्षकाः, तथैव** स्थलेष्विव **निम्नेषु** नीचभूभागेषु च **आशंसया,** यदि घना वृष्टिस्तदा स्थलेषु फलानि, अन्यथा तदा निम्नेषु, इतीच्छया, **एतया** एतदुपमया कर्षकाशंसातुल्यया **श्रद्धया ददध्वं मह्यं** ? यद्यपि वो निम्नोपमत्वबुद्धिरात्मनि, मयि तु स्थलतुल्या धीः, तथापि मह्यमपि दातुमर्हथ, अथ स्यादेवं दत्तेऽपि न फलाप्तिरित्याह–**खुः** एवार्थे, **आराधयेदेव** समन्तात् साधयेत्, नात्राऽन्यथाभावः, **पुण्यं** शुभं **इदं** दृश्यमानं क्षेत्रं । पुण्यशस्यप्ररोहहेतुतयात्मानमेव पात्रभूतमाह (पाठान्तरे–'आराहगा होहिम पुण्णखित्तं'ति) **आराधकाः** पुण्यस्य भवत ! अनेन च दानफलमाह यत इदं **पुण्यक्षेत्रं** पुण्यप्राप्तिहेतुक्षेत्रम् ॥१२॥

इति यक्षोक्ते ते आहुः–

**खित्ताणि अम्हं विदियाणि लोए, जहिं पकिन्ना विरुहंति पुण्णा ।**
**जे माहणा जाइविज्जोववेया, ताइं तु खेत्ताइं सुपेसलाइं ॥१३॥**

**व्याख्या–क्षेत्राणि** क्षेत्रोपमानि पात्राण्य**स्माकं विदितानि** वर्त्तन्ते, **जगति येषु** क्षेत्रेषु **प्रकीर्णानि** दत्तान्यशनादीनि **विरोहन्ति** जन्मान्तरे प्रादुर्भवन्ति **पूर्णानि** समस्तानि, न तु तन्मध्ये त्वं, यतः **ये ब्राह्मणा** द्विजास्तेऽपि न नाम्नैव, किन्तु ब्राह्मणा **जातिः, विद्या** चतुर्दशविद्यास्थानानि, **ताभ्यामुपेताः, तान्येव च क्षेत्राणि सुपेशलानि** शोभनानि प्रीतिकराणि वा, यतः–

**सममश्रोत्रिये दानं, द्विगुणं ब्राह्मणब्रुवे ।**
**सहस्रगुणमाचार्ये, अनन्तं वेदपारगे [ ]** ॥१३॥

यक्षः प्राह–

**कोहो य माणो य वहो य जेसिं, मोसं अदत्तं च परिग्गहो य ।**
**ते माहणा जाइविज्जाविहूणा, ताइं तु खित्ताइं सुपावगाइं ॥१४॥**

**व्याख्या–क्रोधश्च मानश्च, चात् माया लोभो वधश्च, येषामिति** भवतां ब्राह्मणानां, **मृषा** त्वलीकोक्तिः, **अदत्तम**दत्तादानं, **चकारान्मैथुनं, परिग्रहश्च** गोभूम्यादि-स्वीकारोऽस्ति, **ते** इति क्रोधाद्युपेता यूयं **ब्राह्मणा जातिविद्याहीनाः** । क्रियाकर्मविभागेन हि चातुर्वर्ण्यव्यवस्था, यतः–

**एकवर्णमिदं सर्वं, पूर्वमासीद्युधिष्ठिर ! ।**
**क्रियाकर्मविभेदेन, चातुर्वर्ण्यं व्यवस्थितम्** ॥१॥ [ ]

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**ब्राह्मणो ब्रह्मचर्येण, यथा शिल्पेन शिल्पिकः ।**
**अन्यथा नाममात्रं स्या-दिन्द्रगोपककीटवत् ॥२॥ [ ]**

न चेवंविधा क्रिया ब्रह्मचर्यात्मिका कोपाद्युपेतेषु त्वतः सम्भवति, अतो न तावद्युष्मासु जातिसम्भवः । तथा विद्या अपि सच्छास्त्रात्मिकाः, सच्छास्त्रेषु च सर्वेष्वपि अहिंसादि-पञ्चकमेव वाच्यं । यत उक्तं–"**पञ्चैतानि पवित्राणि**" [ ] इत्यादि । अतस्तद्युक्तत्वं तज्ज्ञानादेव स्यात्, ज्ञानस्य तु विरतिफलं रागाद्यभावश्च–

**तज्ज्ञानमेव न भवति, यस्मिन्नुदिते विभाति रागगणः ।**
**तमसः कुतोऽस्ति शक्ति-र्दिनकरकिरणाग्रतः स्थातुम् ॥१॥ [ ]**

न चैवमग्न्याद्यारम्भिषु कोपादिमत्सु विरतेः रागाद्यभावस्य च सम्भवोऽस्ति, **तुः** एवार्थे, तत**स्तानि** भवद्भिर्दितानि **ब्राह्मणक्षेत्राणि सुपापकान्येव,** न तु सुपेशलानि, क्रोधाद्यु-पेतत्वेनापि पापहेतुत्वात् ॥१४॥

अथ ते ब्रूयुर्वेदविदो वयं ब्राह्मणजातास्तत्कथं जातिविद्याहीनाः, इत्युक्तवानसीत्याह–

**तुब्भेत्थ भो भारधरा गिराणं, अत्थं न जाणेह अहिज्ज वेए ।**
**उच्चावयाइं मुणिणो चरंति, ताइं तु खित्ताइं सुपेसलाइं ॥१५॥**

**व्याख्या–यूयमत्र** लोके **भो विप्रा भारधराः** (पाठान्तरे-**भारवाहाः**) **गिरां** वाचां वेदसम्बन्धिनीनां, भारोक्तिस्तासामकरणात्, तथा**ऽर्थं न जानीथ, अधीत्यापि वेदान्** **ऋग्वेदादीन्** । तथाहि-"**आत्मा रे ज्ञातव्यो मन्तव्यो निदिध्यासितव्यः, तथा मृत्युमृषयो निषेदुः, प्रजावन्तो द्रविणमन्विच्छमाणा ईहमानाः, अथापरं कर्मभ्योऽमृतत्वमानशुः,** [1]**परेण कर्मणा नोऽस्माकं, नाकं सुखं निहितं गुहायां विभ्राजते, यद्यत्तयो विशन्ति, वेदाहमेनं पुरुषं महान्तमेवं विदित्वाऽमृतत्वमेव, इति नान्यः पन्थाः अयनाय**" [ ] इत्यादिवचसां यद्यर्थवेत्तारः स्युस्तदा किमर्थं यागादि कुर्वीरन् । ततस्तत्त्वतो न वेदविद्याज्ञा यूयं, तत्कथं जातविद्याऽसम्पन्नत्वेन क्षेत्रभूताः स्युः ? कानि तर्हि क्षेत्राणीत्याह–**उच्चावचा-न्युत्तमाऽधमानि** गृहाणि **मुनयश्चरन्ति** भिक्षानिमित्तं पर्यटन्ति, ये न तु यूयमिव वचनाद्यारम्भवृत्तयः, त एव च परमार्थतो वेदार्थं विदन्ति, तत्रापि भिक्षावृत्तेरेवोक्तत्वात् ।

---

१. परेण नाकं निहितं गुहायां, विभ्राजते यद्यतयो विशन्ति ।
वेदाहमेनं पुरुषं महान्तं, तमेव विदित्वा अमृतत्वमेति ॥ [ ]
इति श्लोकः उ.अ.१२ गा.१४ वृ. ॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तथा च **वेदानुवादिनः**—

**चरेन्माधुकरीं वृत्ति-मपि म्लेच्छकुलादपि ।**
**एकान्नं नैव भुञ्जीत, बृहस्पतिसमादपि ॥१॥ [ ]**

**यद्वोच्चावचानि** विकृष्टानि विकृष्टतया नानाविधानि तपांसि, **उच्चव्रतानि** वा, शेषव्रतापेक्षया महाव्रतानि ये **मुनयश्चरन्त्या**सेवन्ते, न तु यूयमिवाऽजितेन्द्रिया अशीला वा, **तान्येव** मुनयः क्षेत्राणि सुपेशलानि ॥१५॥

इत्थमध्यापकं यक्षेण निर्मुखीकृतं ज्ञात्वा तच्छात्रा आहुः—

**अज्झावयाणं पडिकूलभासी, पभाससे किं नु सगासि अम्हं ।**
**अवि एयं विणस्सउ अण्णपाणं न य णं दाहामु तुमं नियंठा ॥१६॥**

**व्याख्या—अध्यापकानामु**पाध्यायानां **प्रतिकूल**भाषी सन् त्वं **प्रभाषसे** प्रकर्षेण ब्रूषे, **किमिति** क्षेपे, नुरित्यक्षमायां, ततश्च धिक् त्वां, न वयं क्षमामहे यदित्थं त्वं ब्रूषे, **सकाशेऽ**स्माकं, **अपिः** सम्भावने, एतद् दृश्यमानं **विनश्यतु** क्वथितादिभावं प्राप्नोतु **अन्नपानं**, परं **न च** नैव, **णं** वाक्ये, **दास्याम**स्तव, **हे निर्ग्रन्थ** ! निःकञ्चन ! गुरुप्रत्यनीको हि त्वं, अन्यथा तु कदाप्यनुकम्पया किञ्चिदन्तप्रान्तादि तुभ्यं दद्मोऽपि ॥१६॥

यक्ष आह—

**समिईहिं मज्झं सुसमाहियस्स, गुत्तीहिं गुत्तस्स जिइंदियस्स ।**
**जइ मे न दाहस्स अहेसणिज्जं, किमज्ज जन्नाण लभित्थ लाभं ॥१७॥**

**व्याख्या—समितिभिरी**र्यासमित्यादिभि**र्मह्यं सुष्ठु समाहिताय** समाधिमते, **गुप्तिभिर्गुप्ताय जितेन्द्रियाय**, चतुर्थ्यर्थे षष्ठी । यदीत्यभ्युपगमे 'मे' **मह्यं न दास्यथ**, अथेत्युपन्यासे, **एषणीयमे**षणाशुद्धमन्नादिकं । तर्हि **किं अद्य**, हे आर्या वा **यज्ञानां**, सूत्रत्वाल्लप्स्यध्वे **लाभं** पुण्याप्ति ! पात्रदानादेव पुण्याप्तिः, अन्यथा हानिरेव, उक्तं हि—

**दधिमधुघृतान्यऽपात्रे, क्षिप्तानि यथाशु नाशमुपयान्ति ।**
**एवमपात्रे दत्तानि, केवलं नाशमुपयान्ति ॥१॥ [ ]** ॥१७॥

इत्थं तेनोक्ते अध्यापक आह—

**के इत्थ खित्ता उवजोइया वा, अज्झावया वा सह खंडिएहिं ।**
**एयं तु दंडेण फलेण हंता, कंठंमि घित्तूण खलेज्ज जो णं ॥१८॥**

**व्याख्या—केऽत्रास्मिन्** स्थाने **क्षत्राः** क्षत्रियाः, **उपज्योतिष्का** अग्निसमीपवर्त्तिनो

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

महानसिकाः ऋत्विजो वा, **अध्यापकाः** पाठकाः, ते वा, उभयत्र वा विकल्पे । **सहे**ति युक्ताः **खण्डिकै**श्छात्रैः, एनं श्रमणं **दण्डकेन** वंशयष्ट्यादिना, **फलेन** बिल्वादिना **हत्वा**, यद्वा **दण्डेन** कूर्परघातेन, **फलेन** च मुष्टिप्रहारेणेति वृद्धाः, ततश्च **कण्ठे** गले **गृहीत्वा स्खलयेयु**र्निष्कासयेयुः, 'जो'त्ति वचनव्यत्ययाद् **ये** अभिघातेन निष्कासने शक्ताः, **णं** वाक्यालङ्कारे ॥१८॥

ततश्च–

**अज्झावयाणं वयणं सुणित्ता, उद्धाइया तत्थ बहू कुमारा ।**
**दंडेहिं वेत्तेहिं कसेहिं चेव, समागया तं इसि तालयंति ॥१९॥**

**व्याख्या–अध्यापकानामे**कत्वेऽपि पूज्यत्वाद्बहुवचनं, **वचनं** श्रुत्वा **उद्धाविता** वेगेन धाविता**स्तत्र** यत्रासौ मुनिरस्ति, **बहवः कुमारा** द्वितीयवयोवर्त्तिनश्छात्राद्याः, ते अहो क्रीडनकमागतमिति **दण्डै**र्वंशदण्डाद्यै**र्वेत्रै**र्जलवंशैः, **कशै**र्वध्रविकारैः, **चः** समुच्चये, **एव** पूर्त्तौ समागता मिलितास्**तमृषिं ताडयन्ति** घ्नन्ति ॥१९॥

तदा च–

**रन्नो तहिं कोसलियस्स धूया, भद्द त्ति नामेण अणंदियंगी ।**
**तं पासिया संजय हम्ममाणं, क्रुद्धे कुमारे परिनिव्ववेइ ॥२०॥**

**व्याख्या**–तदा च **राज्ञस्तत्र** यज्ञवाटके, **कोशलायां** भवः **कौशलिकस्तस्य दुहिता भद्रेति नाम्नी अनिन्दिताङ्गी** चार्वङ्गी **तं हरिकेशबलं दृष्ट्वा, संयतं** तस्यामप्यवस्थायां हिंसादेः सम्यगुपरतं, **हन्यमानं** दण्डाद्यैः **क्रुद्धान् कुमारान् परिनिर्वापयति** उपशमयतीति ॥२०॥

सा च तान्निर्वापयन्ती तस्य माहात्म्यमतिनिस्पृहतां चाह–

**देवाभिओगेण निओइएणं, दिन्ना मु रन्ना मणसा न झाया ।**
**नरिंददेविंदऽभिवंदिएणं, जेणाम्हि वंता इसिणा स एसो ॥२१॥**

**व्याख्या–देवस्याभियोगेन** बलात्कारेण **नियोजितेन** व्यापारितेन **दत्तास्म्य**हं यस्मै **राज्ञा**, तथा अपेर्गम्यत्वा**न्मनसापि** तेनाहं **न ध्याता**, च(?) **नरेन्द्रदेवेन्द्राभिवन्दितेन येनास्म्यहं वान्ता** त्यक्ता **ऋषिणा, स एष** मुनिरस्ति, युष्माभिर्यः कदर्थयितुमारब्धः, ततोऽसौ न कदर्थयितुमर्हः ॥२१॥

इयमर्थं समर्थयति–

**एसो हु सो उग्गतवो महप्पा, जिइंदिओ संजओ बंभयारी ।**
**जो मे तया णेच्छति दिज्जमाणां, पिउणा सयं कोसलिएण रन्ना ॥२२॥**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

*व्याख्या*—हुः निश्चये, **एष एव स उग्रतपाः**, अत एव **महात्मा जितेन्द्रियः, संयतो, ब्रह्मचारी, यो मां तदा नेच्छति दीयमानां** [केन ? **पित्रा** जनकेन] **कौशलिकेन राज्ञा स्वय**मात्मनैव, न तु प्रधानादिना, तदनेन तस्य निस्पृहत्वमुक्तम् ॥२२॥

पुनस्तन्माहात्म्यमाह—

**महाजसो एस महाणुभागो, घोरव्वओ घोरपरक्कमो य ।**
**मा एयं हीलह अहीलणिज्जं, मा सव्वे तेएण भे निद्दहिज्जा ॥२३॥**

**व्याख्या—महायशा एष** मुनि**र्महाभाग्यो**ऽचिन्त्यशक्तिः (पाठान्तरे-**महानुभावो** वा) तत्र चानुभावः शापाऽनुग्रहसामर्थ्यं, **घोरव्रतो** धृतात्यन्तदुर्धरमहाव्रतः, **घोरपराक्रमश्च** कषायादिजयं प्रति रौद्रसामर्थ्यः, यतोऽयमीदृक् ततो **मा** इति निषेधे **एनं** यतिं **हीलयत,** अहीलनीयं अवज्ञातुमयोग्यं । **मा सर्वांस्तेजसा** तपोमाहात्म्येन 'भे' **भवतो निर्द्धाक्षीत्** भस्मसात्कार्षीदिति । अयं हि रुष्टो भस्मसादेव कुर्यात् । ॥२३॥

तथा मा भूदेतदुक्तं मृषेति यक्षो यत् करोति तदाह—

**एयाइं तीसे वयणाइं सोच्चा, पत्तीए भद्दाए सुभासियाइं ।**
**इसिस्स वेयावडियट्ठयाए, जक्खा कुमारे विणिवारयंति ॥२४॥**

**व्याख्या—एतानि तस्याः पत्न्याः** यज्ञवाटकेशस्य **सोमदेव**पुरोधसः, **वचनानि श्रुत्वा भद्रायाः सुभाषितानि** सूक्तानि, **ऋषेस्तस्यैव,** ['वेयावडियट्ठयाए'त्ति] सूत्रत्वाद् **वैयावृत्त्यार्थे** एतत्प्रतिकूलवारणार्थे, व्यावृत्ता भवाम इत्येवमर्थं, **यक्षाः,** यक्षपरिवारस्य बहुत्वाद्बहुवचनं, **कुमारानेवा**पहन्तॄन् **विनिवारयन्ति** ॥२४॥

**ते घोररूवा ठिय अंतलिक्खे, असुरा तहिं तं जणं तालयंति ।**
**ते भिन्नदेहे रुहिरं वमंते, पासित्तु भद्दा इणमाहु भुज्जो ॥२५॥**

**व्याख्या—ते** इति **घोररूपा** रौद्राकारधारिणः **स्थिता अन्तरिक्षे** आकाशे **असुराः,** असुरभावान्वितत्वात्, **तत्र** यज्ञपाटके **तमु**पसर्गकारिणं **जनं** छात्रलोकं **ताडयन्ति** घ्नन्ति । तत**स्तान् भिन्नदेहान्** विदारिताङ्गान् **रुधिरं वमतो दृष्ट्वा भद्रा इदमाह भुयः** पुनः ॥२५॥

यथा—

**गिरिं नहेहिं खणह, अयं दंतेहिं खायह ।**
**जायतेयं पाएहिं हणह, जे भिक्खुं अवमन्नह ॥२६॥**

**व्याख्या**—सूत्रत्रयं । गिरिं नखैः खनथ, सर्वत्र इवार्थो ज्ञेयः, ततो **नखैरिव गिरिं**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**खनथ, अयो** लोहं **दन्तैः खादथ, जाततेजस**मग्निं **पादैर्हथ, ये** यूयं **भिक्षुमेनं अवमन्यथा**ऽवधीरयथाऽनर्थफलत्वात् भिक्ष्वपमानस्य ॥२६॥

यतः—

**आसीविसो उग्गतवो महेसी, घोरव्वओ घोरपरक्कमो य ।**
**अगणीव पक्खंद पयंगसेणा, जे भिक्खुअं भत्तकाले वहेह ॥२७॥**

**व्याख्या—आसीविष** आसीविषलब्धिमान् शापानुग्रहक्षमः, यद्वाऽऽसीविष **इवासीविषो**, यथा हि तमवजानानो मृत्युमाप्नोति, एवमेनमप्यवजानतामवश्यं मृतिः स्यात्, यतोऽय**मुग्रतपाः**, महान् स्वर्गाद्यपेक्षया मोक्षस्तमिच्छतीति **महदेषी महर्षिर्वा, घोरव्रतो घोरपराक्रमश्च । अग्निं, वा** इवार्थे भिन्नक्रमश्च, ततः **प्रस्कन्दथेव** आक्रामथेव, इवार्थस्य गम्यत्वात्, **पतङ्गानां** शलभानां **सेनेव** सन्ततिरिव, यथासौ तत्र पतन्त्याशु म्रियते, एवं भवन्तोऽपि । **ये यूयं भिक्षुकं भक्तकाले**, तत्र दीनादेरवश्यं देयमिति शिष्टसमये, केवलं न यच्छथेति न, किन्तु **वध्यथ** ताडयध्वमिति ॥२७॥

एवं तेषां तन्माहात्म्यं निवेद्य कृत्योपदेशमाह—

**सीसेण एयं सरणं उवेह, समागया सव्वजणेण तुम्हे ।**
**जइ इच्छह जीवियं वा धणं वा, लोयं पि एसो कुविओ डहिज्जा ॥२८॥**

**व्याख्या—शीर्षेण एतं** मुनिं **शरणमुपेत** ? शिरःप्रणामपूर्वं 'अयं नः शरणमिति' प्रपद्यध्वं ? **समागता** मिलिताः **सर्वजनेन यूयं, यदीच्छत जीवितं धनं वा**, नास्मिन् कुपिते जीवितादिरक्षाक्षममन्यच्छरणमस्ति, किमित्येवमत आह—**लोकमपि** विश्वमप्ये**ष कुपितो दहेत्** ॥२८॥

अथ तस्याः पतिर्यत्करोति तदाह—

**अवहेडियपिट्ठिसउत्तमंगे, पसारियाबाहुअकम्मचिट्ठे ।**
**णिब्भेरियच्छे रुहिरं वमंते, उड्ढंमुहे निग्गयजीहनित्ते ॥२९॥**

**व्याख्या—अवहेठितानि** अधोनामितानि (पाठान्तरे-**अवकोटितानि** अधस्तादामोटितानि) 'पिट्ठि'त्ति पृष्ठिं यावत् सन्ति शोभनानि उत्तमाङ्गानि येषां ते **अवहेठितपृष्टिसदुत्तमाङ्गाः**, प्रसारिता बाहवो येषां ते तथा, कर्माण्यग्नौ समित्प्रक्षेपणादीनि, तद्विषया चेष्टा येषां न ते तथा, ततः कर्मधारये **प्रसारिबाह्वकर्मचेष्टास्तान्** । 'णिब्भेरियच्छे'त्ति प्रसारितान्यक्षीणि येषां ते **प्रसारिताक्षास्तान्, रुधिरं वमतः, उद्ध्वमुखान्, निर्गतजिह्वानेत्रान्** ॥२९॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**ते पासिया खंडिय कट्ठभूए, विमणो विसन्नो अह माहणो सो।**
**ईसिं पसाएति सभारियाओ, हीलं च निंदं च खमेह भंते ॥३०॥**

**व्याख्या—तान् खण्डिकान्** छात्रान् **दृष्ट्वा काष्ठभूतान्** निश्चेष्टकाष्ठोपमान्, विगतं मनोऽस्येति **विमनाः, विषण्णः** कथममी सज्जा भविष्यन्तीतिचिन्ताव्याकुलितः, **अथेति** दर्शनानन्तरं **ब्राह्मणः** स **सोमदेवः, ऋषिं** तं **प्रसादयति सभार्यो** भार्यायुक्तः, **हीलां** चावज्ञां **निन्दां** च दोषोद्भावनां **क्षमस्व ! हे भदन्त** ! ॥३०॥

तावाहतुः—

**बालेहिं मूढेहिं अयाणएहिं, जं हीलिया तस्स खमाह भंते।**
**महप्पसाया इसिणो हवंति, न हु मुणी कोवपरा हवंति ॥३१॥**

**व्याख्या—बालैः** शिशुभिर्**मूढैः** कषायमोहनीयोदयाद्विचित्ततां गतैर**ज्ञै**र्हिताऽहित-ज्ञानहीनैर्**यद् हीलिता** यूयं, 'तस्से'त्ति **तस्यापराधस्य क्षमध्वं भदन्त** ! यतोऽमी शिशवो मूढा अज्ञानाश्च, तत्किमेषामुपरि कोपेन ? यतोऽनुकम्पनीया एवामी। उक्तञ्च—

**आत्मद्रुहममर्यादं, मूढमुज्झितसत्पथं।**
**सुतरामनुकम्पेत, नरकार्चिष्मदिन्धनं ॥१॥ [ ]**

किञ्च महान् प्रसादश्चित्तप्रसत्तिरूपो येषां ते **महाप्रासादा ऋषयो भवन्ति, न पुनर्मुनयः कोपपरा भवन्ती**ति ॥३१॥

मुनिराह—

**पुव्विं च इण्हिं च अणागयं च, मणप्पओसो न मेत्थि कोइ।**
**जक्खा हु वेयावडियं करेंति, तम्हा हु एए निहया कुमारा ॥३२॥**

**व्याख्या—पूर्वं च** पुरा, **इदानीम**स्मिन् काले, **अनागते च** भविष्यत्काले मनःप्रद्वेषो **न** 'मे' **ममास्ति,** आसीद्भविष्यति च **कोऽप्य**ल्पोऽपि। **यक्षा** देवविशेषा हुरिति **यस्माद्वैयावृत्त्यं कुर्वन्ति,** तस्माद् हुरेवार्थे, **तस्मादेव** एते पुरोवर्त्तिनो नितरां हता निहताः कुमारास्तैरिति शेषः, न तु मम मनःप्रद्वेषो हेतुः ॥३२॥

अथ तद्गुणाकृष्टचित्ता उपाध्यायाद्या इदमाहुः—

**अत्थं च धम्मं च वियाणमाणा, तुब्भे ण वि कुप्पह भूइपण्णा।**
**तुब्भं तु पाए सरणं उवेमो, समागया सव्वजणेण अम्हे ॥३३॥**

**व्याख्या—अर्थं** शुभाऽशुभकर्मविभागं रागद्वेषविपाकं वा, यद्वा अर्थं शास्त्राणां,

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**च**कारात्तद्गतानेकभेदान्, **धर्मं** सदाचारं दशधा यतिधर्मं **विजानन्तो यूयं नापि** नैव **कुप्यथ**। भूतिर्मङ्गलं वृद्धिः रक्षा चेति, ततो भूतिर्मङ्गलं सर्वमङ्गलोत्तमत्वेन, वृद्धिर्वा विशिष्टत्वेन, रक्षा वा प्राणिरक्षकत्वेन, प्रज्ञा बुद्धिरेषामिति **भूतिप्रज्ञाः**, एवंविधा यूयं स्थ, अतस्तुरेवार्थे, **युष्माकमेव पादौ शरणमुपेमः, समागताः** सर्वजनेन सह **वय**मिति ॥३३॥

किञ्च–

**अच्चेमु ते महाभागा, ण ते किंच ण अच्चिमो ।**
**भुंजाहि सालिमं कूरं, नाणावंजणसंजुयं ॥३४॥**

**व्याख्या**–अर्चयामः 'ते' **तव** सम्बन्धि सर्वमपि **हे महाभाग** ! 'णे' इति **नैव ते किञ्चिदि**ति चरणरेणवादिकमपि यद्वयं **नार्चयामः**, तथा **भुङ्क्ष्व** इतो लात्वा 'सालिमं'ति **शालिमयं कूरं, नानाव्यञ्जनैर्द**ध्यादिभिः **संयुतम्** ॥३४॥

अन्यच्च–

**इमं च मे अत्थि पभूयमन्नं, तं भुंजसू अम्ह अणुग्गहट्ठा ।**
**बाढं ति पडिच्छइ भत्तपाणं, मासस्स ऊ पारणए महप्पा ॥३५॥**

**व्याख्या–इदं** प्रत्यक्षं **ममास्ति प्रभूतमन्नं** मण्डकखण्डखाद्यादि समस्तमपि भोजनं, **तद्भुङ्क्ष्वास्माकमनुग्रहार्थं** लाभार्थं, एवं तेनोक्ते मुनिराह **बाढ**मेवं कुर्मः, **इत्येवं** ब्रुवाणः स **प्रतीच्छति,** द्रव्यादितः शुद्धमिति गृह्णाति **भक्तं पानं मासस्यैवा**न्ते पार्यते पर्यन्तः क्रियते नियमस्याऽनेनेति पारणं तस्मिन् **पारणके महात्मा** ॥३५॥

तदा च–

**तहियं गंधोदयपुप्फवासं, दिव्वा तहिं वसुहारा य वुट्ठा ।**
**पहयाओ दुंदुभीओ सुरेहिं, आगासे अहो दाणं च घुट्ठं ॥३६॥**

**व्याख्या–तस्मिन्** मुनौ भक्तपानं प्रतीच्छति सति यज्ञवाटके **गन्धोदकपुष्पवर्षः** सुरैः कृतः, **दिव्या** अतिश्रेष्ठाः, **वसु** द्रव्यं, **तस्य धाराः** पातश्रेण्यो वृष्टाः सुरैः, **प्रहता दुन्दुभयो** देवानकाः **सुरैः**, शेषातोद्यानि **च, आकाशे च अहो दानं** ! कोऽन्यः किलैवं शक्नोति दातुमेवं देवै**र्घुष्टं** शब्दितम् ॥३६॥

ते द्विजा अपि हृष्टा आहुः–

**सक्खं खु दीसइ तवो विसेसो, न दीसई जाइविसेस कोइ ।**
**सोवागपुत्तं हरिएससाहूं, जस्सेरिसा रिद्धि महाणुभागा ॥३७॥**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या–साक्षात्** प्रत्यक्षं, खुर्निश्चये, **दृश्यते तपसो विशेषो** माहात्म्यं, **न दृश्यते जातिविशेषो** जातिमाहात्म्यं **कोऽपि** स्वल्पोऽपि, यतः **स्वपाकपुत्रं हरिकेशसाधुं** पश्यत ! **यस्येदृशी** दृश्यमानरूपा **ऋद्धिर्देवसान्निध्यसम्पद्युता महानुभागा** सातिशयमाहात्म्या वर्त्तते ॥३७॥

अथ मुनिस्तान् शान्तमिथ्यावान् प्रति उपदेशमाह–

**किं माहणा जोइसमारभंता, उदएण सोहिं बहिया विमग्गहा ।**
**जं मग्गहा बाहिरियं विसोहिं, ण तं सुदिट्ठं कुसला वयंति ॥३८॥**

**व्याख्या–किमा**क्षेपे, ततो न युक्तमिदं, हे **ब्राह्मणा ! ज्योतिरग्निं समारभमाणा** यागं कुर्वन्तः, **उदकेन** च **शुद्धिं बाह्यां** कुर्वन्तः स्थ, तत्र ते यागस्नाने एव त्वनिष्टे, ते च बाह्ये एव **विमार्गयथ** विजानीथ । यूयं **यद्विमार्गयथ बाह्यां** यागस्नानहेतुकां **विशुद्धिं** नैर्मल्यं **नैतत् सुदृष्टं कुशला**स्तत्त्वज्ञा **वदन्ति** ॥३८॥

ततः–

**कुसं च जूवं तणकट्ठमग्गिं, सायं च पायं उदगं फुसंता ।**
**पाणाइं भूयाइं विहेडयंता, भुज्जो वि मंदा पकरेह पावं ॥३९॥**

**व्याख्या–कुशं** दर्भं, **यूपं** यज्ञस्तम्भं, तृणं वीरण्यादि, काष्ठं समिदादि, **तृणकाष्ठं, अग्निं च सायं** सन्ध्यायां, **प्रातश्चोदकं स्पृशन्त** आचमनादौ, प्राणयोगात् प्राणिनः, प्रकर्षेण अनन्ति श्वसन्तीति वा **प्राणास्तान्** द्वीन्द्रियादीन् जले पूतरादिरूपान्, **भूतांश्च** तरून् पृथ्व्यादीन् **विहेडयन्तो** विविधं बाधमानान् विनाशयन्तः, **भूयोऽपि,** न केवलं पुरा, किन्तु शुद्धिकालेऽपि, जलाग्न्यादिजीवारम्भान्**मन्दा** जडाः **[प्रकुरुथ]** प्रकर्षेणोपचिनुथ **पापम**शुभं कर्म, अयं भावः-कर्ममलक्षये एव तात्त्विकी शुद्धिर्मन्यते, भवदिष्टयागस्नाने तु भूतघातहेतू प्रत्युत कर्ममलकरे एव, नातस्ते भव्ये, इति कथं तद्धेतुकशुद्धिमार्गेण सुदृष्टं ते कुशला ब्रूयुः ? तथा च वाचकः–

**शौचमाध्यात्मिकं त्यक्त्वा, भावशुद्ध्यात्मकं शुभं ।**
**जलादिशौचं यत्रेष्टं, मूढविस्मापनं हि तत् ॥१॥ [ ]** ॥३९॥

इत्थं तद्वाचोत्पन्नशङ्कास्ते धर्मं पप्रच्छुः–

**कहं चरे भिक्खु वयं जयामो, पावाइं कम्माइं पणोल्लयामो ।**
**अक्खाहि णो संजय जक्खपूइया, कहं सुजट्ठं कुसला वयंति ॥४०॥**

**व्याख्या–**कथं वचनव्यत्ययाच्**चरेमहि** यागार्थं प्रवर्त्तेमहि ? **हे भिक्षो ! वयं,** कथं

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तथा **यजामो** यागं कुर्मः ? कथं [**पापानि**-अशुभानि]**कर्माणि** अवद्यरूपाणि **प्रणुदामः** प्रेरयामः प्रस्फेटयाम इति। **आख्याहि नो**ऽस्माकं हे संयत ! पापस्थानेभ्यः सम्यग् निवृत्त ! **हे यक्षपूजित** ! योऽस्मद्विदितः कर्मप्रणोदोपायो यागः स युष्माभिर्दूषितः, इति यूयमेवाथाऽपरं यागमुपदिशथ ! **कथं स्विष्टं** शोभनयजनं **कुशला वदन्ति** ? ॥४०॥

मुनिः प्राह—

**छज्जीवकाए असमारभंता, मोसं अदत्तं च असेवमाणा ।**
**परिग्गहं इत्थीओ माणमायं, एयं परिन्नाय चरंति दंता ॥४१॥**

**व्याख्या—षड्जीवकायान्** पृथ्व्यादीन् **असमारम्भमाणा** अनुपमर्दयन्तः, **मृषा**-मलीकभाषणं **अदत्तादानं च असेवमानाः, परिग्रहं** मूर्च्छां, **स्त्रियो, मानं, मायां,** तत्सहचरत्वात् क्रोधलोभौ च, **एतत्** पूर्वोक्तं **परिज्ञाय** ज्ञपरिज्ञया ज्ञात्वा, प्रत्याख्यानपरिज्ञया च प्रत्याख्याय **चरेयु**र्धर्मे प्रवर्तेरन् **दान्ता** यतयः, यत एवं दान्ताश्चरन्ति, अतो भवद्भिरप्येवं चरितव्यम् ॥४१॥

कथं चरेम यागायेत्याद्यप्रश्नस्योत्तरमुक्तं, अथ कथं यजाम इति द्वितीयस्याह—

**सुसंवुडा पंचहिं संवरेहिं, इह जीवियं अणवकंखमाणा ।**
**वोसट्ठकाया सुइचत्तदेहा, महाजयं जयइ जन्नसिट्ठं ॥४२॥**

**व्याख्या—सुसंवृताः** स्थगितसर्वाश्रवद्वाराः **पञ्चभिः संवरैः** प्राणातिपातविरत्यादि-वृतैः, **इह** नृजन्मे **जीवितं** परत्र च जीवितं असंयमजीवितं **अनवकाङ्क्षमाणा** अनिच्छन्तः, विशेषेण परिषहोपसर्गसहिष्णुतयोत्सृष्टः कायो यैस्ते **व्युत्सृष्टकायाः,** शुचयोऽकलुषितव्रताः, ते च ते त्यक्तदेहाश्च अत्यन्तनिःप्रतिकर्मतया **शुचित्यक्तदेहाः,** महान् जयः कर्मारीणां यत्र यज्ञे श्रेष्ठेऽसौ **महाजयस्तं,** सुब्व्यत्यया**ज्जयन्ति** यतयः, ततो भवन्तोऽप्येवं यजन्तां, प्राकृतत्वात् **श्रेष्ठयज्ञं,** श्रेष्ठवचनेन चैतद्यजनमेव स्विष्टं, एष एव च कर्मणां प्रणोदोपाय इत्युक्तम् ॥४२॥

तं ऋषिं यजमानस्योपकरणानि यजनविधिं च प्रश्नयन्ति—

**के ते जोई के व ते जोइठाणं, का ते सूया किं च ते कारिसंगं ।**
**एहा य ते कयरा संति भिक्खू, कयरेण होमेण हुणासि जोइं ॥४३॥**

**व्याख्या**—'के' इति **किं 'ते' तव ज्योतिर**ग्निः ? **किं 'ते' तव ज्योतिःस्थानं** ? यत्र ज्योतिर्निधीयते, **काः शुचो** घृतादिप्रक्षेपिका दर्व्यः ? **किं वा** करीष एवाङ्गं

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अग्न्युद्दीपनकारणं **करीषाङ्गं** ? येनासौ सन्धुक्ष्यते । **एधाश्च** समिधो यकाभिरग्निः प्रज्ज्वाल्यते **ताः** कतराः काः ? चस्य गम्यत्वात् **शान्तिश्च** दुरितोपशमहेतुरध्ययनपद्धतिः का ? ['भिक्खु'त्ति **भिक्षुः**] **कतरेण** कस्य सम्बन्धिना **होमेन** हवनविधिना **जुहोषि** ? आहूतिभिः प्रीणयसि **ज्योतिरग्निं** ? षड्विधजीवनिकायारम्भनिषेधेनास्मन्मतहोमोपकरणानि पूर्वं निषिध्य कथं तव यज्ञः ? ॥४३॥

मुनिः प्राह—

**तवो जोई जीवो जोइठाणं, जोगा सुया सरीरं कारिसंगं ।**
**कम्मं एहा संजमजोगसंती, होमं हुणामि इसिणं पसत्थं ॥४४॥**

**व्याख्या—तपो** बाह्याभ्यन्तरभेदभिन्नं **ज्योतिरग्निर्भावेन्धनैः** कर्मदाहकत्वात्, **जीवो ज्योतिःस्थानं,** तपोज्योतिषस्तदाश्रयत्वात्, **योगा** मनोवाक्कायाः **शुचः**, ते हि शुभव्यापाराः स्नेहस्थानीयास्तपोऽग्नेर्ज्वलनहेतवः, तत्र संस्थाप्यते **शरीरं करीषाङ्गं**, तेन तपोऽग्निरुद्दीप्यते, **कर्म एधाः**, तस्यैव तपसा भस्मीभावात् । **संयमयोगशान्तिः**, सर्वप्राण्युपद्रवहृत्त्वात् तेषां, तथा **होमेन जुहोमि** तपोज्योतिः, **ऋषीणां** सम्बन्धिना **प्रशस्तेन**, सम्यक्चारित्रेणेति, अनेन च कतरेण होमेन जुहोषीति तैः पृष्टं यज्ञस्वरूपं मुनिनोक्तम् ॥४४॥

अथान्तरशुद्धिस्नानस्वरूपं पृच्छन्ति—

**के ते हरए के य ते संतितित्थे, कहिं सिण्हाओ व रयं जहासि ।**
**आइक्ख णे संजय जक्खपूइया!, इच्छामो नाउं भवओ सगासे ॥४५॥**

**व्याख्या—कस्ते ह्रदः ? किं च ते** शान्त्यै पापोपशमाय यत्तीर्थं पुण्यक्षेत्रं **शान्तितीर्थं ?** अथवा **कानि च** किंरूपाणि ते **सन्ति तीर्थानि** संसाराब्धितारणानि ? वाशब्दस्य भिन्नक्रमत्वात् **कस्मिन् वा स्नातः** शुचीभूतो **रजः** कर्म **जहासि** ? गम्भीराशयस्त्वं, तत्किमस्माकमिव तवापि ह्रदतीर्थे एव शुद्धिस्थानमन्यद्वेति न विद्मः, **तदाचक्ष्व नो**ऽस्माकं **हे संयत यक्षपूजित ! इच्छामो ज्ञातुं तद्भवतः सकाशे** ॥४५॥

मुनिराह—

**धम्मे हरए बंभे संतितित्थे, अणाविले अत्तपसन्नलेसे ।**
**जहिं सिण्हाओ विमलो विसुद्धो, सुसीईभूओ पजहामि दोसं ॥४६॥**

**व्याख्या—धर्मो**ऽहिंसादि**र्ह्रदः**, कर्मरजोहृत्त्वात्, **ब्रह्मचर्यं शान्तितीर्थं,** तदासेवनेन सर्वमलमूलं रागद्वेषौ क्षपितावेव, सत्याद्यप्येवं ज्ञेयं । उक्तं च—

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**ब्रह्मचर्येण सत्येन, तपसा संयमेन च ।**
**मातङ्गर्षिर्गतः शुद्धिं, न शुद्धिस्तीर्थयात्रया ॥१॥ [ ]**

किञ्च भवत्तीर्थानि प्राणिपीडाहेतुत्वात् प्रत्युत मलं चिन्वन्ति, अतः कुतस्तेषां शुद्धिहेतुता ? तथा चोक्तं–

**कुर्याद्वर्षसहस्त्रं तु, अहन्यहनि मज्जनं ।**
**सागरेणापि कृच्छ्रेण, वधको नैव शुद्ध्यति ॥१॥ [ ]**

ह्रदशान्तितीर्थे एव विशिनष्टि, **अनाविले** मिथ्यात्वाऽगुप्तिभिरकलुषे, अनाविलत्वादेवात्मनो जीवस्य प्रसन्ना मनागप्यकलुषा लेश्याः पीताद्या यस्मिन् **तदात्मप्रसन्नलेश्यं तस्मिन्**, अथवा आप्ता वा तैः प्रसन्नलेश्या यस्मिस्त**दाप्तप्रसन्नलेश्यं तस्मिन्** धर्मे ह्रदे, ब्रह्माख्य-शान्तितीर्थ एव, **यस्मिन् स्नातो विमलो** भावमलरहितोऽत एव **विशुद्धो** गतकलङ्कः, **सुशीतीभूतो** रागाद्यतप्तेः (पाठान्तरे-सुष्ठु शोभनं शीलं समाधानं चारित्रं वा भूतः प्राप्तः **शीलभूतः**) **प्रजहामि** प्रकर्षेण त्यजामि, दूषयति जीवं विकृतिं नयतीति दोषस्तं **दोषं** कर्म। एवं ममापि ह्रदतीर्थे एव शुद्धिस्थानं, परमेवंविधे एव ॥४६॥

अथ निगमयति–

**एयं सिणाणं कुसलेहि दिट्ठं, महासिणाणं इसिणं पसत्थं ।**
**जहिं सिण्हाया विमला विसुद्धा, महारिसी उत्तमं ट्ठाणं पत्ते ॥४७॥ त्ति बेमि**

**व्याख्या–एतदुक्तं स्नानं** रजोहीनं **कुशलैर्दृष्टं,** इदमेव च **महास्नानं,** न तु युष्मत्प्रतीतं, अस्यैव भावमलक्षालित्वात्, अत एव च **ऋषीणां** तत् **प्रशस्तं** प्रशस्यं, न तु जलस्नानवत् सदोषत्वान्निन्द्यं, अस्य तु फलं–सुब्व्यत्ययात्, **येन स्नाता विमला विशुद्धा महर्षय उत्तमं स्थानं** मुक्तिं **प्राप्ताः** । एवं ते द्विजा बुद्धाः, साधुश्च संयमाराध-कोऽभूत्, **इति** समाप्तौ, **ब्रवीमी**ति च प्राग्वत् ॥४७॥

**इति तपःस्मृद्धिवाचि द्वादशं हरिकेशीयाध्ययनमुक्तम् ॥१२॥**

• • •

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

# त्रयोदशं चित्रसम्भूतीयाध्ययनम् ॥

तपसि निदानं त्याज्यं, महाऽपायहेतुरिति त्रयोदशं **चित्रसम्भूतीया**ध्ययनमाह–

सम्प्रदायोऽयं–अस्ति **कोशल**देशे **साकेतपुरं,** तत्राभूद् ज्ञातजीवाऽजीवादितत्व-**श्चन्द्रावतंसको** राट्, राज्ञी **धारिणी,** सुतो **मुनिचन्द्रः,** राट् संवेगात् सुते राज्यं दत्वा प्रव्रज्य सिद्धः । **सागरचन्द्रा**चार्या एकदा बहुशिष्यास्तत्रागुः, **मुनिचन्द्र**राट् तान् स्तुत्वा नत्वा धर्मं श्रुत्वा सुते राज्यं दत्वा दीक्षितो ग्रहणासेवनाशिक्षाज्ञः सूरिभि सगच्छैः सार्थेन सह प्रस्थितः, गुर्वादेशादेकोऽन्नपानार्थं प्रत्यन्तग्रामे प्रविष्टः, तावता सार्थे चलिते गुरवोऽपि चेलुः, **मुनिचन्द्रो** गुरूणां विस्मृतः । अथागृहीतान्नपानः स सार्थस्य मार्गेण यान् दिङ्मूढो विन्ध्याटवीं सिंहेभाद्याकीर्णामाप । तां भ्रमंस्तृट्क्षुत्क्षामकुक्षिस्तृतीयेऽह्नि स शुष्कोष्ठकण्ठता-लुर्वृक्षच्छायायां मूर्छया पतन् चतुर्भिर्गोपैः कृपया सिक्तो गोरसमिश्रद्रत्यम्बुना, पायितश्च तत्, स्वस्थीभूतो नीतोऽसौ गोकुलं, प्रतिलाभितश्च शुद्धान्नपानैः, साधुनोक्तस्तेषां धर्मः, आद्दतश्च तैर्भावात्, ततः प्रापितस्तैः स मुनिर्गुरुपार्श्वे । अथ तमृषिं मलाक्ताङ्गं वीक्ष्य तेषु द्वयोर्जुगुप्साऽभूत् । चत्वारोऽपि सम्यक्त्वादि लात्वा स्वर्ययुः । अकृतजुगुप्सयोः कथाऽग्रेतने **इषुकारीया**ध्ययने वक्ष्यते । यौ तु जुगुप्सकौ तौ स्वर्गाच्च्युत्वा **दशार्ण**देशे विप्रकुले दासौ भूतौ । मृत्वा **कालिञ्जरे**ऽद्रौ मृगौ जातौ । ततः शुष्क**गङ्गा**तीरे हंसौ, ततः **काश्यां** चण्डालेशस्य **चित्रसम्भूता**ख्यौ पुत्रौ जातौ । तत्र **नमुचि**र्विप्रोऽन्तपुरघर्षणकोपाद्राज्ञा मारणायाऽर्पि मातङ्गेशस्य तत्पितुः, तेन स उक्तश्चेन्मत्सुतौ सर्वकलाज्ञौ विधत्से तत्त्वां जीवयामि, तेन तदाद्दतं प्रारब्धं च तद्गृहेऽतिगुप्तस्थाने तत्पाठनं । ग्राहितौ तौ लक्षणगीताद्याः सर्वाः कलाः, स तु शुश्रूषाकारिणीं तदम्बां रमे । ज्ञातं तत् तत्पित्रा, स हन्तुं दध्यौ, ज्ञातं तत्ताभ्यां ज्ञापितं चास्मै उपाध्यायोऽयं नौ इति । अथ स नष्टः प्राप्तो **गजपुरं,** कृतश्च स **सनत्कुमार**चक्रिणा मन्त्रीति । अथ **चित्रसम्भूतौ** स्वसद्गीतकलाक्षिप्तस्त्रीजनौ, अत्यासक्तिहेतुत्वात्त्याजितस्पृश्याऽस्पृश्यरीति, जनेन राज्ञे उक्तौ विनाशितं पुरमाभ्यामिति राज्ञा

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

निषिद्धः पुरे तत्प्रचारः । कदापि तावतिकुतूहलात् कौमुदीमहेक्षणायागतौ, दृष्टौ जनैः कदर्थितौ गाढं, दीक्षितौ स्वयं वैराग्याज्जातौ विकृष्टतपःकृशाङ्गौ, प्राप्ता आभ्यां तेजोलेश्यादिलब्धयः, गतौ **गजपुरं** । प्रविष्टो मासपारणे भिक्षार्थं **सम्भूत**यतिः, दृष्टो **नमुचिना** ध्यातं मद्दुर्वृत्तमयं कथयिष्यतीति निर्भर्त्सितो धिग् मुण्डचण्डाल ! क्व पुरे प्रविष्टोऽसीत्यादि वाग्भिः, अथ तेन जनैश्च हतोऽश्मादिभिर्मुनिः, रुष्टे साधौ तेभ्यो दहनाय तेजोलेश्यां मोक्तुमुपक्रामति सति, मुखाद्घोरान्धकारधूमे निस्सृते महात्मो व्याकुलिते जने चक्री सान्तःपुरः सर्वपुरलोकश्च तं क्षमयितुमागात् । तदुदन्तश्रुत्या तत्र तत्पार्श्वे **चित्रो**ऽप्यागात् । प्रारब्धं च तैर्बहुधा सान्त्वनवाग्भिस्तं क्षमयितुं, तथापि तस्मिन् स्वमस्मरति, कोपेनास्य मा भूदस्माकं भस्मत्वमिति स्त्रीरत्नयुक् चक्री तमक्षमयत् । तदा स्त्रीरत्नकोमलालकस्पर्शोत्पन्नतदिच्छोदग्रतानुशयश्चाण्डालजातिरियमेवं बहुकष्टेति ध्यायं**श्चित्र**वारितोऽपि चेन्मत्तपःफलमस्ति तदान्यजन्मनि चक्र्यहमीदक्स्त्रीविलासः स्यां, उत्तमजातिश्चेति निदानं कृत्वाऽनशनान्**नलिनीगुल्मे** स सुरोऽभूत् । ततश्च्युत्वा **पञ्चालेषु काम्पिल्ये** नगरे **ब्रह्म**-नृप**चुलन्योर्ब्रह्मदत्तः** सुतोऽभूत् । तदा च **धनु**सेनापते**र्वरधनुः** सुतोऽभूत् । द्वावपि सर्वाः कलाः शिक्षितौ । **चित्र**साधुरनिदानो वैराग्याऽनशनान्**नलिनीगुल्मे सम्भूत**देवस्य मिलितः, च्युत्वा च **पुरिमताले** श्रेष्ठिगृहे सुतो महर्द्धिरभूत् । अथ **ब्रह्मदत्त**सम्बन्धे निर्युक्तिः—

**राया य तत्थ बंभो १, कडगो २ तइओ कणेरदत्तो ति ३ ।**
**राया य पुप्फचूलो, दीहो पुण होइ कोसलिओ ॥१॥** [ उत्त. नि./गा.३३६ ]

**ब्रह्मः काम्पिल्येशः** १ **काशीशः कटकः** २ **कुरुषु गजपुरेशः कणेरदत्तः** ३ **अङ्गेषु चम्पेशः चुलनी**भ्राता **पुष्पचूलः** ४ **कौशलिकः साकेतपुरेशो दीर्घः** ५

**एए पञ्च वयसा, सव्वे सह दारदरिसिणो भोच्चा ।**
**संवच्छरं अणूणे, वसंति एक्केक्करज्जंमि ॥२॥** [ उत्त. नि./गा.३३७ ]

ते पञ्च वयस्याः सर्वे सहदारदर्शिनः समकालोढाः समवयसो भूत्वा अनूनं सम्पूर्णं संवत्सरं एकैकराज्ये वसन्ति । तदा काले **ब्रह्म**राजस्य **इन्द्रयशा** १ **इन्द्रश्री** २ **इन्द्रवसु** ३ **चुलन्यश्च**तस्रः प्रियाः, **ब्रह्मदत्तो वरधनु**श्च सहाध्यायिनौ । **ब्रह्म**राट् मृतो, मित्रैश्च **ब्रह्मदत्तो** राज्येऽस्थापि । परं **ब्रह्मदत्त**स्य लघुत्वा**द्दीर्घपृष्ठो** राज्ये कति वर्षाणि रक्षायै सर्वमित्रैः स्थापितः, **कटका**द्याश्च देशे गताः, **दीर्घश्चुलन्यां** लग्नः, शुद्धान्तरक्षकस्त्रिया तद् ज्ञात्वा **धनुर्नाम्नः** सेनेशमन्त्रिणोऽज्ञापि, तेन **वरधनु**रुक्तस्त्वया **ब्रह्मदत्तः** कदापि न मोच्यः, **वरधनुश्चुलनी**वृत्तं ज्ञात्वा तद्वारणाय विजातिपक्षियुग्मं गाढबद्धमानीयोचेऽन्योऽप्येवं

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

कुशीलोऽस्माभिर्वध्यः, **दीर्घपृष्ठेन** तद् ज्ञात्वा कुमारहननार्थं **चुलनी** पृष्टा, तयोक्तं **पुष्पचूलेन** मातुलेन सुता **कुरुमत्य**स्मै दत्तास्ति, तदुद्वाहमिषाज्जतुसौधं कृत्वाऽयं हन्यते ।

अथ तेन तद्गृहाद्यारब्धं, तच्छुद्धान्तरक्षिकोक्त्या **धनु**ना ज्ञात्वा कुमाररक्षायै **दीर्घः** पृष्टोऽहं वृद्धस्तीर्थानि कुर्वे, **दीर्घेणा**चिन्ति एष दूरस्थो न भव्यः, इति विचार्य तेन तस्मै प्रोक्तं त्वमत्रैव धर्मं कुरु ? ततो **गङ्गा**तीरे स स्थितिं सत्रं च कृत्वा, सुरङ्गां जतुगृहं यावद्दत्वा **वरधनो**रज्ञापय तं वृत्तान्तं । मातुलेनापि तदुक्त्या लग्नाहेऽन्या कन्या प्रहिता । अथ महद्धर्योदुह्य जतुगृहे सुप्ते कुमारेऽग्नौ दत्ते **वरधनु**ज्ञापितः प्रबुद्धः कुमारस्तेन सह सुरङ्गाया निःसृतः, ततोऽश्वारूढौ तौ द्वावपि विदेशं प्रति चलितौ, ततो **वरधनू**क्त्या कुमारश्चु**लनी**वृत्तं ज्ञातवान् । अथात्र **ब्रह्मदत्तहिण्डिः**–

**चित्ते य विज्जुमाला, विज्जुमई चित्तसेणओ भद्दा ।**
[१]**पंथगनागजसा पुण,** [२]**कित्तिमई कित्तिसेणाए ॥१॥** [ उत्त. नि./गा.३३९ ]

**चित्रो** जनकः, चः पूर्त्तौ, सुते **विद्युन्मालाविद्युन्मत्यौ, चित्रसेनकः** पिता, **भद्रा** सुता। **पन्थकनागस्य जसा** सुता, **कीर्त्तिसेना कीर्त्तिमती** सुता–

**देवी नागदत्ता, जसवइ रणवइ जक्खहरिलो ।**
**वच्छी य चारुदत्तो, उसभो कच्चाइणी सिला ॥२॥** [ उत्त. नि./गा.३४० ]

**यक्षहरिलस्य** सुता **देवीनागदत्तायशोवतीरत्नवत्यः**, च अन्यच्च **चारुदत्तस्य वत्सी** सुता, **वृषभस्य कात्यायन**गोत्रा **शिला** सुता

**धणदेवे वसुमित्ते,** [३]**दंसणे दारए य नियडिल्ले ।**
**पोत्थी पिंगल पोए, सागरदत्ते च दीवसिहा ॥३॥** [ उत्त. नि./गा.३४० ]

**धनदेवो** वणिक्, **वसुमित्रः**, पुन**र्दर्शनदारक**श्च निकृतिमान्, चत्वारोऽमी कुर्कुटयुद्धे मिलिताः, तत्र **पुस्ती** कन्या **पिङ्गला** कन्या **पोतस्य सागरदत्तस्य दीपशिखा**–

---

१. 'पंथगनागजसा' एतत्पाठस्थाने उत्त. नि. गा. ३३९ मध्ये 'पंथग नागजसा' इति पाठः । अर्थः पन्थकः पिता नागजसा कन्यका ॥ सम्पा.

२. 'कित्तिमई कित्तिसेणाए' एतत्पाठस्थाने उत्त. नि. गा. ३३९ मध्ये 'कित्तिमई कित्तसेणो य' इति पाठः । अर्थः-कीर्त्तिमत्ती कन्या कीर्तिसेनश्च तत्पिता ॥ सम्पा.

३. 'दंसणे दारए य' एतत्पाठस्थाने उत्त. नि. गा. ३४१ मध्ये सुदंसणे दारुए य' इति पाठः । अर्थः सुदर्शनो दारुकश्च ॥ सम्पा.

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**कंपिल्लो मलयवई, वणराई सिंधुदत्त सोमा य ।**

**तह सिंधुसेण-पज्जुन्नसेणा वाणीर-वयगा[1] य ॥४॥** [ उत्त. नि./गा.३४२ ]

**काम्पिल्यस्य मलयवती, सिन्धुदत्तस्य वनराजी सोमा** च सुते, **सिन्धुसेनप्रद्युम्नसेनयोः** क्रमाद् **वानीरव्रतिके** सुते-

**हरिएसा गोदत्ता, करेणुदत्ता करेणुपइगा य ।**

**कुंजरकरेणुसेणा, इसिवुड्ढी कुरुमई देवी ॥५॥** [ उत्त. नि./गा.३४३ ]

**हरिकेशा, गोदत्ता, करेणुदत्ता, करेणुपतिका** च, **कुञ्जरसेना,** [**करेणुसेना** च,] **ऋषिवृद्धिः, कुरुमती,** देवी स्त्रीरत्नं, एता अष्टाग्रराज्यः ॥

अथ भ्रमणस्थानानि–

**कांपिल्लि गिरितडागं, चंपा हत्थिणपुरं च साकेयं ।**

**समकडगं उस्साणं, वंसीपासाय कडगं च ॥१॥** [ उत्त. नि./गा.३४४ ]

**काम्पिल्यं** जन्मभूः, ततो **गिरितटकं,** तत**श्चम्पां,** ततो **गजपुरं,** ततः साकेतं, ततः **समकटकं** सन्निवेशं, ततोऽ**वश्यानकं** स्थानं, ततोऽरण्यं **वंशीगहनं सप्रासादं** [वंशीति-वंशगहनं तदुपलक्षितं प्रासादं वंशीप्रसादं] गतः, ततः **समकटकं** गतोऽसौ ॥१॥

**समकडगाओ अडवी, तण्हा वडपायवम्मि संकेओ ।**

**गहणं वरधणुयस्स य, बंधणमक्कोसणं चेव ॥२॥** [ उत्त. नि./गा.३४५ ]

**समकटकाद**टवीं गच्छतस्तृष्णा कुमारस्य गाढाभूत्, मन्त्रिणा वटाधः स्रस्तरे कुमारः शायितः, सङ्केत उक्तः, **दीर्घ**जनग्रहेऽहं त्वामन्योक्त्या नाशयिष्ये, अम्भसे गतोऽब्जपुटेन सरसोम्बु लात्वा यान् **दीर्घ**जनैः पृच्छां कुर्वद्भिर्दृष्टो बद्धो वल्लीभिराक्रुष्टश्च ॥२॥

**सो हम्मई अमच्चो, देहि कुमारं करे तुमे नीओ ? ।**

**गुलियविरेयणपीओ, कवडमओ छड्डिओ तेहिं ॥३॥** [ उत्त. नि./गा.३४६ ]

सोऽमात्यो हन्यते, अतः कुमारं दर्शयत ? क्व रे त्वया नीतः ? तदा सङ्केतनाय मन्त्र्युचे,

**सहकारमञ्जरीमनु-धवति मधुपो विमुच्य मधु मधुरं ।**

**कमलं कलयन् पश्चात्, संकोचकृतां स्वतनुबाधाम् ॥१॥** [ उत्त. नि./गा.३४६ वृ. ]

अथ मन्त्री गुटिकां विरेचनकर्त्री पीतवान्, विरेचात्यन्तभावे मुखनिःसृतफेनबुद्बुदः कपटमृतस्तैः स छड्डितो मुक्तः ॥३॥

---

१. 'वयगा य' एतत्पाठस्थाने उत्त. नि. गा. ३४२ मध्ये 'पइगा य' इति पाठः । अर्थः प्रतिकाभिधाना चेति ॥ सम्पा.

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**तं सोऊण कुमारो, भीओ अह उप्पहं पलाइट्ठो ।**

**काऊण थेररूवं, [1]थेरा वाहेसिय कुमारं ॥४॥** [ उत्त. नि./गा.३४७ ]

कुमारः अथोत्पथं पलायिष्ट, देवः कुमारसत्त्वज्ञानाय स्थविररूपं कृत्वा वाहितवान्, स्कन्धे स्वे रोपयित्वार्दितवान् ॥४॥

ततः—

**वडपुरगबंभथलयं, वडथलगं होइ चेव कोसंबी ।**

**वाणारसी रायगिहं, गिरिपुर महुरा[ य ] अहिच्छत्ता ॥५॥** [ उत्त. नि./गा.३४८ ]

**वटपुर, ब्रह्मस्थल, वटस्थल, कौशाम्बी, वाराणसी, राजगृहं, गिरिपुर, मथुरा, अहिच्छत्रा** ॥५॥

ततो गच्छन् वने तापसैर्ज्ञातो ब्रह्मसूश्चतुर्मासीं स्थापितः ।

**[2]वणहत्थि च कुमारो, जणइ अरण्णो वसणगुणलुद्धं ।**

**वच्चंतो[ अ ] वडपुरओ, सावत्थी अंतरागामो ॥६॥** [ उत्त. नि./गा.३४९ ]

कुमारः क्रीडन् वनगजं दृष्ट्वाऽवाहयत्, गजं मुक्त्वा तर्वारूढः कुमारः, ततोऽरण्यं भ्रान्त्वा **वटपुरं** गतः, ततः **श्रावस्तीं** गच्छन्नन्तरा ग्रामे वृक्षच्छायायां निविष्टो, नैमित्तिकोक्त्या श्रेष्ठी कुमारमाहूय सुतां विवाहितवान्, कुमारस्तत्र सुतां जनयति, श्रेष्ठिदत्तदिव्यवस्त्ररत्नभूषादिगुणैर्लुब्धः ।

इतो **दीर्घ**नरा यमसमा एयुः, तद्भयाच्च**चक्रपुरं** गच्छति । अन्तरा—

★[3]**गहनं नदीकुडंगं, गहणतरगाणि पुरिसहिययाणि ।**

**देहाणि पुन्नपत्तं, पियं खु णो दारओ जाओ ॥७॥** [ उत्त. नि./गा.३५० ]

---

१. देवो इति पाठः । उत्त. नि. गा. ३४७ मध्ये ॥

२. अत्र 'वणहत्थी अ कुमारं जणयइ वसरणगुणलुद्धो ।
वच्यंतो अ पुराओ (वडपुरओ) अहिच्छत्तं अंतरा गामो ॥ इति पाठः ॥
[उत्त.नि.गा. ३४९] सम्पा.

३. आ भाग घणोज सङ्कुचित होवाथी तेनो कथासम्बन्धि भावार्थ बरोबर बेसतो नथी । तेथी जेम परतमां छे, तेमज अत्रे ग्रहण कर्युं छे ।

★ एवं च कियतीमपि वेलामतिक्रम्य विनिर्गताऽसौ कुडङ्गात्, उक्तं चात्मानं ख्यापयितुं कुमारं प्रति, यथा - गहनं नदीकुडङ्गं ततोऽपि गहनतराण्येव गहनतरकाणि पुरुषहृदयानि भवन्ति, अयं चानेन ध्वनितोऽर्थः-यथा वयं जानीमः स्त्रीहृदयान्यतिगहणानि भवच्चितेन च तान्यपि जितानीत्युक्त्वा पतिं प्रत्याययितुमाह--'देहाणि'त्ति देहीदानीं 'पूर्णपात्रम्' अक्षतभृतभाजनं प्रियं खलु 'नः' अस्माकं यद्दारको जात इति, ते (इति) वक्तव्ये यत्र इत्युक्तं तदैक्यं द्योतयितुं, इत्युक्त्वा च तया धूर्त्या गृहीतं ब्रह्मदत्तोत्तरीयं, गता च पत्यैव सह । [उत्त. नि. गा. ३५० वृत्तौ] सम्पा.

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

वटे सङ्गते मिलिते, तस्य छायायां सम्मुखागतपान्थस्त्रियो जातायां, **ब्रह्मदत्ते**नास्मत्स्त्रियः प्रसवकाले पान्थस्त्रियं गहनकुडङ्गे प्रेषयेत्युक्तं । पान्थेन स्त्री प्रैषीत्यादि । ततः पान्थेनोक्तं गहनं नदीकुडङ्गं, ततो गहनतराणि पुरुषहृदयानि, देहीदानीं पूर्णाक्षतपात्रं प्रियं, खुः निश्चितं, नोऽस्माकं दारको जातः, अत्र न इत्युक्तौ ऐक्यं द्योतितं । तया ब्रह्मदत्तवस्त्रं गृहीतं । एवमुक्ता धूर्त्तया, इयं वार्त्ता कथायां न व्याख्येया ॥७॥

**सुपइट्ठे कुसकुंडी( डिं), भिकुंडिवित्तासियम्मि जियसत्तू ।**
**महुराओ अहिच्छत्तं, वच्चंतो अंतरा लभइ ॥८॥** [ उत्त. नि./गा.३५१ ]

[१] ततः प्रस्थितः **सुप्रतिष्ठितं** पुरं, **भिकुण्डि**राजवित्रासितात् राज्यत्या(?)**जितशत्रो** राज्ञः **कुसकुण्डी**नामकन्यां **मथुरा**तोऽ**हिच्छत्रां** व्रजन्नन्तरा लभते ॥८॥

**इंदपुरे भद्दपुरे, सिवदत्त विसाहदत्त धूयाओ ।**
**बडूयत्तणेण लब्भइ, कन्नाऊ दुन्नि रज्जं च ॥९॥** [ उत्त. नि./गा.३५२ ]

**इन्द्रपुरे शिवदत्त**स्य, **भद्रपुरे विशाखदत्त**स्य पुत्र्यौ, बटुकत्वेन **दीर्घपृष्ठ**नृभीत्या कृतद्विजवेषो द्वे कन्ये लभते राज्यं च ॥९॥

**रायगिहमिहिलहत्थिण-पुरं च चंपा तहेव सावत्थि ।**
**एसा उ नगरहिंडी, बोधव्वा बंभदत्तस्स ॥१०॥** [ उत्त. नि./गा.३५३ ]

ततो **राजगृहा**दिनी क्रमाद् भ्रान्तः कुमारः, एवं भ्रमतोऽस्य मिलिताः **कटककरेणुदत्ता**द्याः पितुः सुहृदः प्रत्यन्तनृपाश्च, उत्पन्नं चक्रं, प्रारब्धस्तन्मार्गेण तेन दिग्विजयः, प्राप्तः **काम्पिल्ये,** निर्गतः सम्मुखं **दीर्घः,** रणे च स हतो **ब्रह्मदत्ते**न, एवं **ब्रह्मदत्त**स्य रोषमोक्षोऽभूत् । मिलिता उदूढकन्यापितरः, उत्पन्नानि यथावसरं शेषरत्नान्यपि, साधितं **भरतं** प्राप्ता निधयः, परिणतं चक्रित्वं । एवं राज्यं भुञ्जानस्य कति काले याति सुर्यानीतमन्दारदामदर्शनात्तस्य जातिस्मृतिर्जाता, यथा मयेदृक् पुष्पदामानुभूतं, अहं **नलिनीगुल्मे** देवोऽभवमिति ।

अथ सूत्रं–

## जाइपराजिओ खलु, कासि नियाणं तु हत्थिणपुरंमि ।
## चुलणीइ बंभदत्तो, उववण्णो पउमगुम्माओ ॥१॥

---

१. ततश्च निर्गतोऽसौ कुडङ्गात् कृतपरिहासः प्रवृत्तो गन्तुं, प्राप्तः सुप्रतिष्ठं, तत्र च कुसकुण्डी नाम कन्या 'भिकुंडिवित्तासियंमि जियसत्तुं'ति आर्षत्वादुभयत्र सुब्व्यत्ययः, 'भिकुण्डिवित्रासिताद्' भिकुण्डिनामनृपतिनिष्काशितात् 'जितशत्रोः' जितशत्रुनामनृपतेः सकाशान्मथुरातोऽहिच्छत्रां व्रजन् 'अन्तरे' अन्तराले 'लभते' प्राप्नोति । [उत्त. नि. गा. ३५१ वृत्तौ] सम्पा.

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या**—जातिश्चाण्डलाख्या, तया पराजितोऽभिभूतो **जातिपराजितः**, प्राग्भवे **नमुचि**विप्रेण चाण्डाल इत्यपमानितः, यद्वा **जातिभि**र्दासादिनीचस्थानोत्पत्तिभिः, उपर्युपरि-जाताभिः **पराजितः** पराभवं मन्यमानोऽहो अधन्योऽहं यन्नीचास्वेव जातिषूत्पन्न इति, **खलु** वाक्यालङ्कारे, **अकार्षीन्निदानं** चक्रित्वाप्तिर्मम स्तादिति । तुः पूर्तौ, **हस्तिनागपुरे चुलन्यां ब्रह्मदत्त** उत्पन्नः, **पद्मगुल्मा**दिति नलिनीगुल्मविमानाच्च्युत्वा ॥१॥

स **ब्रह्मदत्तः** प्राग्भवे **सम्भूत**श्चाण्डालोऽभूदित्याह—

**कंपिल्ले संभूओ, चित्तो पुण जाओ पुरिमतालंमि ।**
**सिट्ठिकुलंमि विसाले, धम्मं सोऊण पव्वईओ ॥२॥**

**व्याख्या**—गङ्गातटस्थ**पञ्चाल**देशे **पुण्ड्रकाम्पील्ये सम्भूतो**ऽभूच्चक्री **ब्रह्मदत्तः**, इत्थं **काम्पील्ये सम्भूत**श्चक्र्यभूत **चित्रः** पुनर्जातः **पुरिमताले** । स हि **चित्र**महर्षिस्तत्र **सम्भूत**नाम्नि बन्धौ तथा निदानयुताऽनशनं प्रपन्नेऽहो दुष्टो मोहः, चित्रा कर्मपरिणतिः, चलं चित्तमित्यादि ध्यात्वा चतुराहारत्यागान्मृत्वा पण्डितमरणेनोत्पन्नस्तत्रैव **नलिनी-गुल्म**विमाने, ततश्च्युतो जातः **पुरिमताले** पुरे **श्रेष्ठिकुले** वणिक्प्रधानान्वये, **विशाले** पुत्रपौत्रादिवृद्ध्या, प्राप्तवयाश्च स्थविरान्ते **धर्मं श्रुत्वा** स **प्रव्रजितः** ॥३॥

ततः—

**कंपिल्लंमि य नयरे, समागया दो वि चित्तसंभूया ।**
**सुहदुक्खफलविवागं, कहिंति ते एक्कमिक्कस्स ॥३॥**

**व्याख्या—काम्पिल्ये च नगरे ब्रह्मदत्तो**त्पत्तिस्थाने समागतौ मिलितौ **द्वावपि चित्रसम्भूतौ** प्राग्जन्मनाम्ना । सुखदुःखफलविपाकं सुकृतदुःकृतकर्मानुभवं **कथयतः** स्म **तौ चित्र**जीवर्षि**ब्रह्मदत्तौ एकैकस्य** मिथः । भावार्थस्तु—सुर्यानीतमन्दारदामदर्शनोत्पन्न-जातिस्मृतिना **ब्रह्मदत्तेन**—

**दासा दसण्णे आसी, मिया कालिंजरे नगे ।**
**हंसा मयंगतीराए, सोवागा( चंडाला ) कासिभूमिए ॥१॥ [ उत्त. १३/६ ]**
**देवा य देवलोगम्मि, आसी अम्हे महड्डिया । [ उत्त. १३/७ पूर्वा. ]**

इति सार्द्धश्लोकमुक्त्वा द्वितीयश्लोकपूरयित्रे राज्यार्द्धं यच्छामीत्युदघोषि । तच्च ग्रामपुराकरादिषु जनैः पठ्यमानं चाकर्ण्य **चित्र**जीवर्षिर्ज्ञानोपयोगात्ताः स्वजातीर्जज्ञे ।

अथ स श्री**ऋषभो**क्त्या चक्रिगतिं जानन्नपि स्नेहातिरेकात्तं प्राग्भवबन्धुं **सम्भूत**जीवं बोधये प्रस्थितः, प्राप्तः क्रमेण **काम्पिल्यं**, स्थितस्तद्बहिरुद्याने, श्रुतश्चारघट्टिकपठ्यमानः स सार्द्धः श्लोकोऽपूरि च तेन स द्वितीयश्लोको यथा—

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

"**इमा णो छट्ठिया जाई, अण्णमण्णेण जाविणा**" ॥ [उत्त. १३/७ उत्त.]

एवं श्लोकद्वयं निश्चित्यारघट्टकोऽगान्नृपपार्श्वं, राज्यलोभेन च पपाठ पूर्णश्लोक-युगं। तदा जातावेशो मूर्च्छितो राजाऽपतत् पृथ्व्यां तन्त्रेणारघट्टिकस्ताडितः पार्ष्णिघाताद्यैः, स रुदन्नूचे, न मयाऽपूरि, किन्तु भिक्षुणैतत्कलिमूलेन, तदाप्तसञ्ज्ञश्चक्र्यूचे क्वासौ श्लोक-पूरकोऽस्ति ? आरघट्टिकोक्त्या तद्वाटिकास्थं तं मुनिं श्रुत्वा राजाऽचालीत् सबलवाहनान्तः-पुरस्तद्दर्शनाय। दृष्टो मुनिर्वन्दितश्च, सबहुमानं उपवेशितश्चैकासने ततस्तौ मिथो यथानुभूत-सुखदुःखफलविपाकमूचतुः, ततोऽवर्णि स्वऋद्धिश्चक्रिणा, उक्तस्तद्विपाकोक्तिपूर्वकं तत्त्यागश्चित्रर्षिणा।

अथैतयोरुक्तं सूत्रे आह—

**चक्कवट्टी महिड्डीओ, बंभदत्तो महायसो।**
**भायरं बहुमाणेणं, इमं वयणमब्बवी ॥४॥**

**व्याख्या—चक्रवर्त्ती महर्द्धिको ब्रह्मदत्तो महायशाः भ्रातरं** जन्मान्तरसौन्दर्यं बहुमानेन मानसस्नेहेने**दं** वक्ष्यमाणं **वचनमब्रवीत्** ॥४॥

**आसिमो भायरा दो वि अण्णमण्णवसाणुगा।**
**अण्णमण्णमणुरत्ता, अण्णमण्णहिएसिणो ॥५॥**

**व्याख्या**—यथा 'आसिमो'त्ति **अभूव** आवां भ्रातरौ द्वावप्यन्योऽन्यं मिथः 'वसाणुय'त्ति वशं आयत्ततां गच्छन्तौ यौ ताव**न्योऽन्यवशानुगौ**, तथा**ऽन्योऽन्यमनुरक्तौ**, तता**ऽन्योऽन्यहितैषिणौ**, पुनः पुनरन्योऽन्यग्रहणं तुल्यचित्ततातिशयज्ञप्त्यै। मश्च सर्वत्राऽलाक्षणिकः ॥५॥

भवावाह—

**दासा दसण्णे आसि, मिया कालिंजरे नगे।**
**हंसा मयंगतीराए, सोवागा (चंडाला) कासिभूमिए ॥६॥**

**व्याख्या—दासौ दशार्णदेसे** 'आसी'त्ति **अभूव, मृगौ कालिञ्जरे कालिञ्जर-**नामनि **नगे, हंसौ मृतगङ्गातीरे, श्वपाकौ चाण्डालौ काशीभूम्यां काशी**जनपदे ॥६॥

**देवा य देवलोए, आसि अम्हे महिड्डिया।**
**इमा णो छट्ठिया जाई, अण्णमण्णेण जाविणा ॥७॥**

**व्याख्या—देवौ च देवलोके सौधर्मे**ऽभूव, आवां महर्धिकौ, न तु किल्बिषिकौ,

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

'इमा' **इयं नौ** आवयोः **षष्ठिका** जातिः, 'अण्णमण्णेण'त्ति **अन्योऽन्येन** परस्परेण **यावनिका**, मिथः साहित्यहीना ॥७॥ इति सूत्रचतुष्कार्थः ॥

इत्थं चक्रिणोक्ते मुनिराह–

**कम्मा णियाणपगडा, तुमे राय विचिंतिया ।**
**तेसिं फलविवागेणं, विप्पओगमुवागया ॥८॥**

**व्याख्या–कर्माणि**, निदानं भोगप्रार्थनं, तेन प्रकर्षेण कृतानि **निदानप्रकृतानि** निदानवशबद्धानि, **त्वया राजन् विचिन्तितानि** तद्धेतुभूतार्त्तध्यानतः कर्माण्यपि तथोच्यन्ते, **तेषां फलविपाकेन** शुभाऽशुभकृत**विप्रयोगमुपागतौ** आवां, यत्तदा त्वयाऽस्मद्वारितेनापि निदानं कृतं, तत्फलमेतत्, यदावयोस्तथाभूतयोरपि वियोग इति ॥८॥

इत्थं ज्ञातवियोगहेतुश्चक्री पुनः पृच्छति–

**सच्चसोयप्पकडा, कम्मा मए पुरा कडा ।**
**ते अज्ज परिभुंजामो किं णु चित्तो वि से तहा ॥९॥**

**व्याख्या–सत्यं, शौचं**, ममायमनुष्ठानं, ताभ्यां **प्रकटानि कर्माणि** शुभानुष्ठानानि **मया पुरा कृतानि** यानि, **तान्यद्यास्मिन् अहनि** शेषतद्भवकाले च **परिभुञ्जे**, तद्विपाकानि स्त्रीरत्नादिभोगद्वारेण वेदये यथा । **किं** प्रश्ने, **नु** वितर्के, **चित्रोऽपि चित्र**नामापि ? कोऽर्थः ? त्वं 'से' इति **तानि** किं **तथा** परिभुङ्क्षे ? नैव भुङ्क्षे, भिक्षुकत्वात् । तव तु तानि मया सहार्जितानि शुभकर्माणि विफलानि जातानीति चर्चः ॥९॥

मुनिराह–

**सव्वं सुचिन्नं सफलं नराणं, कयाण कम्माण न मोक्ख अत्थि ।**
**अत्थेहिं कामेहि य उत्तमेहिं, आया ममं पुण्णफलोववेओ ॥१०॥**

**व्याख्या–सर्वं सुचीर्णं** तपःप्रभृति **सफलं नराणां**, शेषाङ्गिनां च, सुब्व्यत्ययात्, यतः **कृतेभ्यो**ऽवश्यवेद्येभ्यः **कर्मभ्यो न मोक्षोऽस्ति**, ददति तानि फलमवश्यं । **अर्थै**-र्द्रव्यैः, **अर्थै**र्वा प्रार्थनीयैर्वस्तुभिः, **कामैश्च** सुशब्दाद्यै**रुत्तमैर्युक्त आत्मा ममापि पुण्य-फलेनोपेतो**ऽन्वितोऽस्ति ॥१०॥

**जाणाहि संभूत महाणुभागं, महड्ढियं पुण्णफलोववेयं ।**
**चित्तं पि जाणाहि तहेव रायं, इड्ढी जुई तस्स वि यप्पभूया ॥११॥**

**व्याख्या**–यथा त्वं **जानासि** हे **सम्भूता**ख्य ! स्वं **महानुभागं** बृहन्माहात्म्यं **महर्द्धिकं**, अत एव **पुण्यफलोपेतं** । **चित्रमपि जानीहि तथैव** विशिष्टमेव हे **राजन्** !

Jain Education International 2010_02     For Private & Personal Use Only     www.jainelibrary.org

**ऋद्धिः** द्युतिश्च, तस्य प्राग्भवनाम्न**श्चित्रा**ख्यस्य ममापि, च **यस्मादर्थे प्रभूता** बह्वी । अयमर्थः—हे **सम्भूत** ! यथा त्वमात्मानं महानुभागादिविशेषणयुतं वेत्सि, तथा **चित्र**नाम्नो ममापि गृहीत्वे ईदृगेव ऋद्धिरासीत् ॥११॥

तत्किं दीक्षित इत्याह—

**महत्थरूवा वयणप्पभूया, गाहाणुगीया णरसंघमज्झे ।**
**जं भिक्खुणो सीलगुणोववेया, इहऽज्जयंते समणो मि जाओ ॥१२॥**

**व्याख्या**—इहायं वृद्धाम्नायः—निदानो **ब्रह्मदत्त**चक्र्यभूत्, तथाऽयमनिदानः श्रेष्ठिकुले चक्रिसमर्द्धिः प्रातः कोटिस्वर्णादिदाता, प्रत्यहं प्रासादादिक्षेत्राणि स्पृशन् महागजतुरगादिऋद्धिः, बहुशतस्त्रीपरिवृतः, प्रासादेषु नाट्यं कारयन् भोग्यभूत्, ततः काले दीक्षां लेभे । 'महेत्थे'त्ति महानऽपरिमितो द्रव्यपर्यायात्मकतयाऽर्थो वाच्यं यस्य तन्**महार्थरूपं** स्वरूपं यस्याः, महतो वाऽर्थान् जीवादितत्वान् निरूपयति दर्शयतीति **महार्थरूपा, वचनेनाऽप्रभूताऽल्पभूता** वा स्तोकाक्षरा, गीयते इति **गाथा** धर्मार्थसूत्रश्रेणिः, अनु इति अर्हद्गणादिभ्यः पश्चाद्गीताऽ**नुगीता,** अर्हदादिभ्यः श्रुत्वोक्ता स्थविरैरित्यर्थः, अनुकूलं वा गीताऽ**नुगीता**, श्रोतुरनुकूलैव देशना क्रियते इति ख्यापितं स्यात् । **नराणां सङ्घः** समूहस्**तन्मध्ये, यां** गाथां श्रुत्वा **भिक्षवः, शीलं** चारित्रं, **गुणो** ज्ञानं, ताभ्या**मुपेताः, इह** जगति **अर्जयन्ति** पठनश्रवणतदर्थानुष्ठानादिभिर्लाभं । इह प्रवचने **यां** गाथां क्रियया मुनय **आवर्जयन्ति** सोपस्कारत्वात्सूत्रस्य, सा गाथा मयापि श्रुता, ततः **श्रमणोऽस्म्यहं जातः**, न तु दुःखदग्धः ॥१२॥

इत्थं मुनिनोक्ते **ब्रह्मदत्तः** स्वऋद्ध्या निमन्त्रयति—

**उच्चोदए महु कक्के य बंभे, पवेइया आवसहा य रम्मा ।**
**इमं गिहं वित्तधणप्पभूयं, पसाहि पंचालगुणोववेयं ॥१३॥**

**व्याख्या**—[1]**उच्चोदयो** १ **मधुः** २ **कर्क्कः** ३ **चात् मध्यः** ४ **ब्रह्म** ५ च, एते पञ्च प्रधानाः प्रासादाः **प्रवेदिताः**, मम वर्द्धकिपुरःसरैः सुरैः कृताः, **आवसथाश्च** शेषभवनप्रकारा **रम्याः** (पाठान्तरे-**अतिरम्याः सुरम्या** वा) एते तु यत्रैव चक्रिणो रोचन्ते तत्रैव स्युरिति वृद्धाः, किं च **इदं गृहमवस्थितः** प्रासादः, **वित्तं** द्रव्यं, **धनं** हिरण्यादि, तेनोपेतं [2]**वित्तद्रव्योपेतं** ([3]पाठान्तरे-प्रभूतं बहु, चित्रं आश्चर्यकारि, अनेकप्रकारं वा, धनमस्मिन्निति **प्रभूतचित्रधनं**)

---

१. उच्चः १ उदयः २ मधुः ३ कर्कः ४ ब्रह्म ५ इत्यन्यटीकायाम् ।

२. 'वित्तधनोपेतं' इति पाठः उत्त. बृ. वृत्तौ । सम्पा.

३. पठन्ति च 'चित्तधणप्पभूयं' ति, तत्र प्रभूतं-बहु चित्रम्-आश्चर्यमनेकप्रकारं वा धनमस्मिन्निति प्रभूतचित्रधनं, सूत्रे तु प्रभूतशब्दस्य परनिपातः प्राग्वत् । उत्त. बृ. वृत्तौ ॥ सम्पा.

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**प्रसाधि** ! प्रपालय ! **पञ्चालदेशस्तस्मिन् गुणा** इन्द्रियोपकारिणो रूपाद्यास्तैरुपेतं । कोऽर्थः ? पञ्चालेषु यानि सारवस्तूनि तान्यस्मिन् गृहे सर्वाण्यपि सन्ति । तदा **पञ्चाला**नामत्युदीर्णत्वात्तद्-ग्रहणं। एवं **भरते**ऽपि यत्सारं वस्तु तत्तद्ग्रह एव तदासीत् ॥१३॥

**नट्टेहिं गीएहि य वाइएहिं, नारीजणाइं परिवारयंतो ।**
**भुंजाहि भोगाइं इमाइं भिक्खू, मम रोयई पव्वज्जा हु दुक्खं ॥१४॥**

**व्याख्या**—किञ्च 'नट्टेहिं'त्ति द्वात्रिंशत्पात्रोपलक्षितै**र्नाट्यै**रङ्गहाराद्यै**र्गीतै**र्ग्रामस्वर-मूर्छनाभिः, **चस्य** भिन्नक्रमत्वा**द्वादित्रैश्च** मृदङ्गमुकुन्दाद्यैः, **नारीजनान्** स्त्रीजनान् **परिवारी-**कुर्वन् (पाठान्तरे—'पवियारयन्तो' **प्रविचारयन्** सेवमानो) **भुङ्क्ष्व भोगान्[इमान्]** प्रत्यक्षान्, सूत्रत्वात् सर्वत्र लिङ्गव्यत्ययः, **हे भिक्षो** ! इह तु यद्गजतुरङ्गमाद्युक्त्वा स्त्रीणामाख्यानं, तत्स्त्रीलोलुपत्वात्तस्य तासामेवाऽत्यन्ताक्षेपत्वज्ञप्त्यै । **मह्यं रोचते** प्रतिभाति **प्रव्रज्या** हुर्निश्चये **दुःखमेव**, नेषदपि सुखं दुःखहेतुत्वात् ॥१४॥

इत्थं चक्रिणोक्ते मुनिराह—

**तं पुव्वनेहेण कयाणुरागं, नराहिवं कामगुणेसु गिद्धं ।**
**धम्मंसिओ तस्स हियाणुपेही, चित्तो इमं वयण(वक्क)मुदाहरित्था ॥१५॥**

**व्याख्या—तं ब्रह्मदत्तं पूर्वस्नेहेन कृतानुरागं नराधिपं कामगुणेषु** शब्दादिषु **गृद्धं, धर्माश्रितस्तस्य** चक्रिणो हितमनुप्रेक्षते पर्यालोचयतीत्येवंशीलो **हितानुप्रेक्षी चित्र**जीवयतिरिदं वाक्यं (पाठान्तरे-**वचनं**) **उदाहृतवान्** ॥१५॥

यथा—

**सव्वं विलवियं गीयं, सव्वं नट्टं विडंबणा ।**
**सव्वे आभरणा भारा, सव्वे कामा दुहावहा ॥१६॥**

**व्याख्या—सर्वं विलपित**मिव **गीतं** निरर्थकतया रुदितयोनितया च, तत्र निरर्थकतया मत्तबालकगीतवत्, रुदितयोनितया विरहावस्थमृतप्रोषितभर्तृकारुदितवत् । **सर्वं नृत्यं** गात्रविक्षेपरूपं **विडम्बना**प्रायं, यक्षाविष्टपीतमद्याद्यङ्गविक्षेपवत् । **सर्वाण्याभरणानि** मुकुटाङ्गदादीनि **भारा**स्तत्वतो भारत्वात्तेषां, यथा कस्यचित् श्रेष्ठिपुत्रस्य भार्या स्नेहवत्यासीत्, सान्यदा श्वश्वा शिलापुत्रकं गृहमध्यादानायितोचे न शक्नोम्येनमतिभारमुत्पाटयितुं । तद्भर्त्ता तत् श्रुत्वा दध्यौ अस्या देहरक्षिकाया इदमलीकोत्तरं, तच्छिक्षयाम्येनामिति विचिन्त्य तेन शिलापुत्रकाकारमानोपेतस्वर्णालङ्कारणं तस्याः कण्ठभूषायै चैकदा समर्पितं, तयापि हृष्टया

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तत्परिहितं । अथान्यदा तेन स्मित्वा तत्पूर्वोक्तवचनं तस्याः स्मारितं, तदा सा विलक्षीभूता । तथा **सर्वे कामाः** शब्दाद्या **दुःखावहा** मृगादीनामिव, यतो दुःखाप्तिहेतुत्वात्, मत्सरेर्ष्याविषादाद्याश्चित्ताधिकृत्त्वान्नरकादिहेतुत्वाच्च ॥१६॥

**बालाभिरामेसु दुहावहेसु, न तं सुहं कामगुणेसु रायं ।**
**विरत्तकामाण तवोधणाणं, जं भिक्खुणो सीलगुणे रयाणं ॥१७॥**

**व्याख्या–बालानाम**विवेकाना**मभिरामेषु** चित्तरतिदेषु **दुःखावहेषु** उक्तरीत्या **दुःखप्रापकेषु न तत्सुखं कामगुणेषु** मनोज्ञशब्दादिषु सेव्यमानेषु, **हे राजन् ! विरक्तकामानां** कामविरक्तानां, प्राकृतत्वाद्व्यत्ययः, **तपोधनानां भिक्षूणां, शीलगुणयोः शीलगुणेषु वा रतानां यत्सुखम्** ॥१७॥

अथ निदर्शनेनोपदेशः–

**नरिंद जाई अहमा नराणां, सोवागजाई दुहओ गयाणं ।**
**जहिं वयं सव्वजणस्स वेसा, वसीय सोवागणिवेसणेसु ॥१८॥**

**व्याख्या–नरेन्द्र** ! हे चक्रिन् ! **जातिरधमा नराणां** मनुष्याणां मध्ये **श्वपाकजाति**श्चाण्डलजातिस्तां **गतयोर्द्वयोर**प्यावयोः साऽधमा जातिरभूत् । कदाचित्तज्जातावुत्पद्यान्यगृहे वृद्धावभूवेति । **यस्यां जातावावां सर्वजनस्य द्वेष्याव**प्रीतिकराव**वसाव श्वपाकानां निवेशनेषु** गृहेषु ॥१८॥

कदाचित्तत्रापि विज्ञानविशेषादिना हीलनीयौ स्यातामित्याह–

**तीसे य जाईइ उ पावियाए, वुच्छा मु सोवागणिवेसणेसु ।**
**सव्वस्स लोगस्स दुहंछणिज्जा, इहं तु कम्माइं पुरेकडाइं ॥१९॥**

**व्याख्या–तस्यां च जातौ** श्वपाकसम्बन्धिन्यां, तुर्विशेषणे, ततश्च शेषजातिभ्यः कुत्सितत्वं विशिनष्टि, **पापिकायां** 'वुच्छा' **उषितौ** 'मु' इत्यावां **श्वपाकनिवेशनेषु सर्वस्य लोकस्य जुगुप्सनीयौ । इह** जन्मनि 'तु' **पुनः कर्माणि** शुभानुष्ठानानि **पुराकृतानि** पूर्वजन्मार्जितानि विशिष्टजात्यादीनि फलितानीति, तत उत्पन्नप्रत्ययाभ्यामावाभ्यां पुनस्तदर्जनायैव यत्नः कार्यो न तु विषयाकुलैः स्थेयम् ॥१९॥

अतः–

**सो दाणि सिं राय महाणुभागो, महिड्ढिओ पुण्णफलोववेओ ।**
**चइत्तु भोगाइं असासयाइं, आयाणहेउं अभिनिक्खमाहि ॥२०॥**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या**—यः सम्भूतः पुरासीत्, **स** त्वं **इदानीम**स्मिन् काले, '**सिं**' पूर्त्तौ, यद्वा 'दाणिसिं'ति देश्युक्त्या **इदानीं राजा महानुभागो महर्द्धिकः पुण्यफलोपेत**श्च जातोऽसि, चाण्डालस्यापीदृक्चक्रिऋद्ध्या दृष्टफलत्वेन त्वं **त्यक्त्वा भोगान्** द्रव्यचयान् कामान् वा **अशाश्वतान्**, आदीयते सद्विवेकैरित्या**दानश्चा**रित्रधर्मस्त**द्धेतोरभिनिःक्रम** आभिमुख्येन प्रव्रजेः! (पाठान्तरे-'**आयाणमेवाणुचिन्तयाहि**' **आदानमेवानुचिन्तय**) ॥२०॥

एवमकरणे दोषमाह—

**इह जीविए राय असासयंमि, धणियं तु पुण्णाइं अकुव्वमाणो ।**
**से सोयइ मच्चुमुहोवणीए, धम्मं अकाऊण परम्मि लोए ॥२१॥**

**व्याख्या**—**इह जीविते** मनुष्यसम्बन्धिन्यायुषि **राजन्नशाश्वते** 'धणियं' **अत्यर्थं, तुः** एवार्थे, चञ्चलधिया **पुण्यान्यकुर्वाणः स** जीवः **शोचते** पश्चात्तापपरः स्यात् । **मृत्युमुखं** श्लथीभवद्बन्धनाद्यवस्थं **उपनीतः** प्राप्तः कर्मभिः, **धर्ममकृत्वा परस्मिन् लोके** गतः शोचते, नरकादिष्वसह्याऽसातवेदनार्द्दितः **शशिनृपवत्** किं मया तदैव पुण्यं न कृतमिति खिद्यते, तदा च स्वजनैर्न त्राणम् ॥२१॥

**जहेह सीहो व मियं गहाय, मच्चू णरं नेइ हु अंतकाले ।**
**न तस्स माया व पिया व भाया, कालम्मि तस्संसहरा भवंति ॥२२॥**

**व्याख्या**—**यथेह** लोके **सिंहः, वा** इति पूर्त्तौ विकल्पार्थे वा, ततो व्याघ्रादिर्वा **मृगं गृहीत्वा** नयति, एवं **मृत्युर्नरं नयति, हुः** एवार्थे, **अन्तकाले**, यथासौ सिंहेन नीयमानो न तस्मै अलं, एवं जन्तुरपि मृत्युना नीयमानो न तस्मै अलं, तस्य मृत्युना नीयमानस्य **माता वा पिता वा भ्राता वा, काले तस्मिन्** जीवितान्ते, अंशं स्वायुर्भागं धारयन्ति ददति मृत्युना नीयमानं रक्षन्तीत्य**ंशधराः**, एवंविधा ते मात्रादयो **न भवन्ति** । यथा नृपादौ स्वजनसर्वस्वं हरति सति स्ववित्तदानात् स्वजनैस्तद्रक्ष्यते, नैवं तैः स्वजीवितव्यांश-दानतस्तदायुर्भागोऽवधार्यते । अथवा अंशो दुःखभागस्तं हरन्तीत्य**ंशहराः**, एवंविधा अपि ते **मात्रादयो न भवन्ति** । उक्तं हि—

न पिता भ्रातरः पुत्रा, न भार्या न च बान्धवाः ।
शक्ता मरणात् त्रातुं, मग्नाः संसारसागरे ॥१॥ [ ] ॥२२॥

**न तस्स दुक्खं विभयंति णाइओ, न मित्तवग्गा ण सुता ण बंधवा ।**
**एगो सयं पच्चणुहोइ दुक्खं, कत्तारमेवं अणुजाइ कम्मं ॥२३॥**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या—न तस्य दुःखं** मनोवाक्कायजं **विभजन्ति** विभागीकुर्युर्**ज्ञातयः** स्वजनाः, **न मित्रवर्गाः** सुहृत्समूहाः, **न सुताः, न बान्धवाः, एकः स्वयं प्रत्यनुभवति** वेदयते दुःखं, यतः **कर्त्तारमेवानुयाति कर्म** ॥२३॥

इत्थमशरणभावनामुक्त्वैकत्वभावनामाह—

**चिच्चा दुपयं चउप्पयं च, खित्तं गिहं धणधण्णं च सव्वं ।**
**कम्मप्पबीओ अवसो पयाई, परं भवं सुंदर पावगं वा ॥२४॥**

**व्याख्या—त्यक्त्वा द्विपदं** भार्यादि, **चतुष्पदं** हस्तादि, **क्षेत्रं** इक्षुक्षेत्रादि, **गृहं** धवलगृहादि, **धनं** कनकादि, **धान्यं** शाल्यादि, **च**काराद्वस्त्रादि सर्वं, कर्मैवात्मनो द्वितीयमस्येति **कर्मात्मद्वितीयः**, यद्वा स्वकर्मैवात्मनो द्वितीयमस्येति **स्वकर्मद्वितीयः, अवशोऽ**स्वतन्त्रः, **प्रयाति परं भवं सुन्दरं** स्वर्गादि, **पापकं** नरकादि ॥२४॥

**तमेकगं तुच्छसरीरगं से, चिईगयं दहिउं पावगेणं ।**
**भज्जा य पुत्तो वि य नाइओ य, दायारमन्नं अणुसंकमंति ॥२५॥**

**व्याख्या—तदेकं** त्यक्तं औदारिकं **शरीरकं** कुत्सितं शरीरं विनाशित्वात्, **एकं** जीवाऽभावात्, **तुच्छ**मसारं, **'से' तस्य, चितिगतं** चिताप्राप्तं, **दग्ध्वा, तुः** पूर्त्तौ, **पावकेना**ग्निना, **भार्या च पुत्रोऽपि च, ज्ञातयश्च, दातार**मिष्टकार्यकर**मन्यमनुसङ्क्रामन्ति** यान्ति, ते हि अनेन गृहमशुचीति तच्छरीरं बहिर्निष्कास्य छटां क्षिप्त्वा जनलज्जादिना भस्मीकृत्य लौकिकेनाक्रन्द्य च कत्यहानि, पुनः स्वार्थायान्यमनुवर्त्तन्ते, न तु तच्छुद्धिं पृच्छन्ति ॥२५॥

किञ्च—

**उवणिज्जइ जीवियमप्पमायं, वन्नं जरा हरइ नरस्स रायं ।**
**पंचालरायं वयणं सुणाहि, मा कासि कम्माइं महालयाइं ॥२६॥**

**व्याख्या—उपनीयते** ढौक्यते मृत्येव कर्मभि**र्जीवितं अप्रमादं** प्रमादं विनैव । आवीचीमरणतो निरन्तरमिति । सत्यपि जीविते **वर्णं** सुस्निग्धच्छायात्मकं **जरा हरति नरस्य** मनुष्यस्य **राजन्** ! अतो हे **पञ्चालराज** ! **पञ्चाल**देशोद्भवनृप ! **वचनं शृणु ! मा कार्षीः कर्माणि** असदारम्भरूपाणि, **महालयान्य**तिमहति, **महान्** वा **आलयः** कर्मश्लेषो येषु **तानि** मांसभक्षणादिनीति ॥२६॥

नृपः प्राह—

**अहं पि जाणामि जहेह साहू, जं मे तुमं साहसि वक्कमेयं ।**
**भोगा इमे संगकरा हवंति, जे दुज्जया अज्जो अम्हारिसेहिं ॥२७॥**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या–अहमपि,** न केवलं त्वमेवेत्यर्थः, **जानामि, यथा इह** जगति **हे साधो ! यन्मम त्वं साधयसि** वक्षि **वाक्यमु**पदेशवच **एतत्,** तत्किं ? यत्त्वं विषयान् कथं न परित्यजसीति वाक्यं । किन्तु **भोगाः** शब्दादय इमे प्रत्यक्षाः **सङ्गकराः** प्रतिबन्धोत्पादका **भवन्ति, ये दुर्जया** दुस्त्यजा वा **हे आर्य ! अस्मादृशै**र्गुरुकर्मभिर्जीवैः (पाठान्तरे–'**अहं पि जाणामि जो इत्थ सारो' अहमपि जानामि योऽत्र सारो,** यदिह नृभवे सारं चारित्रधर्मः) **च**कारस्य गम्यत्वात्, **यच्च त्वमेवं साधयसि,** शेषं प्राग्वत् ॥२७॥

किञ्च–

**हत्थिणपुरंमि चित्ता, दट्ठूणं नरवइं महड्ढियं ।**
**कामभोगेसु गिद्धेणं, नियाणमसुहं कडं ॥२८॥**

**व्याख्या–हस्तिनागपुरे,** 'चित्ता' इत्यकारोऽलाक्षणिकः, **हे चित्र** ! प्राग्भवे हे **चित्र**नामन् मुने ! **दृष्ट्वा नरपतिं सनत्कुमार**नामानं तुर्यचक्रिणं **महर्द्धिकं** सातिशयसम्पदं, **कामभोगेषु गृद्धेना**काङ्क्षावता **निदानं** जन्मान्तरे भोगाशंसारूपं **अशुभं** अशुभानुबन्धि **कृतं,** तत्र काम्यन्ते इति कामाः शब्दरूपाणि, भुज्यन्ते इति भोगाः रसगन्धस्पर्शाः ॥२८॥

कदाचित्तत्र कृतेऽपि ततः प्रतिक्रान्तं स्यादत आह–

**तस्स मे अप्पडिकंतस्स, इमं एयारिसं फलं ।**
**जाणमाणावि जं धम्मं, कामभोगेसु मुच्छिओ ॥२९॥**

**व्याख्या**–सुब्व्यत्ययात्त**स्मा**न्निदाना**न्मेऽप्रतिक्रान्तस्य,** तदा हि त्वया बहुधोच्यमानेऽपि न मच्चेतसः प्रत्यावृत्तिरभूदि**तीदमेतादृशं** वक्ष्यमाणं **फलं** जातं । **जानन्नपि यदहं धर्मं** श्रुतधर्मादिकं, **कामभोगेषु मूर्च्छितो** गृद्धोऽस्मि । तदेतत्कामभोगेषु मूर्छारूपं मम निदानकर्मणः फलं । अन्यथा ज्ञानस्य फलं विरतिं जानतोऽपि मम कथं न धर्मानुष्ठानाप्तिः ? ॥२९॥

पुनर्निदानफलमेवोदाहरणतो दर्शयति–

**नागो जहा पंकजलावसन्नो, दट्ठुं थलं नाभिसमेइ तीरं ।**
**एवं वयं कामगुणेसु गिद्धा, न भिक्खुणो मग्गमणुव्वयामो ॥३०॥**

**व्याख्या–नागो** हस्ती **यथा** पङ्कप्रधानं जलं **पङ्कजलमि**त्युच्यते, **तत्रावसन्नो** निमग्नः सन् **दृष्ट्वा**पि **स्थलं** निर्जलभूतलं न **नैवाभिसमेति** प्राप्नोति **तीरं,** अपेर्गम्यत्वात्तीरमपि, आस्तां स्थलं, **एवं** पङ्कमग्नेभ इव वयं **कामगुणेषु गृद्धा न भिक्षोर्मार्गं**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सदाचारं **अनुव्रजामो**ऽनुसरामः, पङ्कजलोपमाः कामभोगाः, ततस्तैर्बद्धा न तत्त्यागान्निरपायं स्थलमिव मुनिमार्गं जानन्तोऽपि अनुगन्तुं शक्नुमः ॥३०॥

मुनिरनित्यतां स्पष्टयति—

**अच्चेइ कालो तुरियंति राइओ, न यावि भोगा पुरिसाण निच्चा ।**
**उविच्च भोगा पुरिसं चयंति, दुमं जहा खीणफलं व पक्खी ॥३१॥**

**व्याख्या—अत्येति** अतिक्रामति **कालो** यथायुष्ककालः, **त्वरयन्ति** शीघ्रं यान्ति **रात्रयो** दिना अपि सहचारित्वात्, ततोऽनेनायुषोऽनित्यतोक्ता, यतः—

**क्षणयामदिवसमास-च्छलेन गच्छंति जीवितदलानि ।**
**इति विद्वानपि कथमिह, गच्छसि निद्रावशं रात्रौ ॥१॥ [ ]**

**न च भोगा अपि पुरुषाणां नित्याः,** न केवलमायुरनित्यं, किन्तु भोगा अपि अनित्याः, यतस्ते **उपेत्य** स्वप्रवृत्त्या, न तु पुरुषेच्छया, **भोगाः पुरुषं त्यजन्ति । द्रुमं यथा क्षीणफलं, वे**त्यौपम्ये, ततः पक्षीव, फलोपमानि हि पुण्यानि, ततस्तदपगमे क्षीणफलं वृक्षमिव पुरुषं पक्षिवद्भोगा विमुञ्चन्तीति ॥३१॥

यत एवमतः—

**जइ तं सि भोगे चइउं असत्तो, अज्जाइं कम्माइं करेहि रायं ।**
**धम्मेट्ठिओ सव्वपयाणुकंपी, तो होहिसि देवो इओ विउव्वी ॥३२॥**

**व्याख्या—यदि** तावद**सि त्वं** भोगांस्**त्यक्तुमशक्तो**ऽक्षमः (पाठान्तरे-'**जइ ताव भोगे चइओ असत्तो**'त्ति) स्पष्टमुभयत्र चायमाशय एव, अनित्यभोगत्यागाद्भिक्षुत्वमेव तवार्हं, यदि च तत्राऽशक्तस्तदा**ऽर्याणि** हेयधर्मेभ्यो हिंसादिभ्यो दूरं यातानि शिष्टार्हाणि **कर्माणि** अनुष्ठानानि **कुरु ! हे राजन्** ! धर्मे गृहिधर्मेऽपि **स्थितः सन् सर्वप्रजानुकम्पी** सर्वात्मदयापरः, **तत** आर्यकर्मतो **भविष्यसि देवो** वैमानिकः, इतो नृभवात् 'विउव्वी' **वैक्रियदेही** । गृहिधर्मस्यापि सम्यक्त्वदेशविरतिरूपस्य स्वर्गफलत्वात् । एतत्साधुवचनं धर्मस्य स्वर्गेण सहाऽन्यथाऽनुपपत्तिज्ञप्त्यै छाद्मस्थ्याद्वा ॥३२॥

एवमुक्तेऽपि तं किञ्चिदऽप्रपद्यमानं अविनीतं च ज्ञात्वा मुनिराह—

**न तुज्झ भोगे चइऊण बुद्धी, गिद्धो सि आरंभपरिग्गहेसु ।**
**मोहं कओ एत्तिउं विप्पलावो, गच्छामि रायं आमंतिओ सि ॥३३॥**

**व्याख्या—तव, भोगान्** अनार्यकर्माणि च **त्यक्तुं**, यद्वा **भोगांस्त्यक्त्वा** धर्मो मया

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

कार्य इति **बुद्धिर्नास्ति,** किन्तु त्वं **गृद्धः** प्रसक्तोऽसि **आरम्भपरिग्रहेषु । मोघं** निष्फलं यथास्यादेवं **एतावान् विप्रलापो** विविधव्यर्थवागालापः **कृतो** मयेति शेषः, अथ **गच्छामि राजन्नामन्त्रितोऽसि,** अनेकार्थत्वाद्धातूनां पृष्टोऽसि । यतोऽनाश्रवे उपेक्षैव श्रेयसी ॥३३॥

इत्थमुक्त्वा गतो मुनिः, यथायं मुनिर्हिताय तस्मै अश्रद्धान्वितायापि उपदिदेश, तथाऽन्यस्यापि छद्मस्थस्याऽन्यहितोक्तौ न दोषः, वक्तुररागद्वेषस्यैकान्तधर्मभावादेव—

**पंचालरायावि य बंभदत्तो, साहुस्स तस्सावयणं अकाउं ।**
**अणुत्तरे भुंजिय कामभोगे, अणुत्तरे सो नरए पविट्ठो ॥३४॥**

**व्याख्या—अपिः** पुनरर्थः, **चः** पूर्तौ, ततः **पञ्चालराजः** पुन**र्ब्रह्मदत्तस्तस्य साधोर्वचनं अकृत्वा** वज्रतण्डुलवद् गुरुकर्मतयाऽत्यन्तदुर्भेदः, **अनुत्तरान्** सर्वोत्तमान् **कामभोगान् भुक्त्वा, अनुत्तरे** स्थित्यादिना सर्वनरकज्येष्ठे **अप्रतिष्ठाने [स ब्रह्मदत्तः] नरके प्रविष्ट**स्तत्रोत्पन्न इति ॥३४॥

अनेन निदानस्य नरकान्तफलं दर्शितं । अथ प्रसङ्गाच्चि**त्र**वृत्तान्तमाह—

**चित्तो वि कामेहिं विरत्तकामो, उदत्तचारित्ततवो महेसी ।**
**अणुत्तरं संजम पालयित्ता, अणुत्तरं सिद्धिगइं गओ ॥३५॥ त्ति बेमि**

**व्याख्या—चित्रोऽपि** पूर्वं चित्राह्वोऽपि, **अपिः** पुनरर्थे, **कामेभ्यो**ऽभिलषणीय-शब्दादिभ्यो विरक्तः पराङ्मुखीभूतः कामोऽभिलाषोऽस्येति **विरक्तकामः,** उदात्तं प्रधानं चारित्रं सर्वविरतिरूपं, **तपश्च** द्वादशविधं यस्य स **उदात्तचारित्रतपाः** (पाठान्तरे-**उदग्र-चारित्रतपाः** ) **महेषी महर्षिर्वा, अनुत्तरं** सर्वसंयमस्थानोपरिवर्त्तिनं **संयममा**श्रवविरत्यादिकं **पालयित्वाऽनुत्तरां** सर्वलोकाकाशोपरिस्थामतिप्रधानां वा **सिद्धिगतिं गत** इति **ब्रवीमी**ति प्राग्वत् ॥३५॥

**इति निदानफले त्रयोदशं चित्रसम्भूतीयाध्ययमुक्तम् ॥१३॥**

• • •

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

# चतुर्द्दशमिषुकारीयाध्ययनम् ॥

अथ चतुर्द्दश**मिषुकारीया**ख्यमनिदानफलवाच्यध्ययनं । इषुकाराज्जातं इषुकाराय हितं वेतीषुकारीयं । अस्य प्रस्तावनार्थं इषुकारवक्तव्यतोच्यते–

पुरा यौ गोपदारकौ **चित्रसम्भूतयोः** सुहृदौ पूर्वभवे आस्तां, तौ साध्वनुकम्पया लब्धसम्यक्त्वौ कालं कृत्वा स्वर्गाच्च्युत्वा **क्षितिप्रतिष्ठिते** पुरे इभ्यकुले द्वौ बन्धू जातौ । तत्र तयोरन्ये चत्वार इभ्यसुता वयस्या जाताः, भोगान् भुङ्क्त्वा स्थविराणामन्ते धर्मं श्रुत्वा सर्वे प्राव्रजन् । चिरं संयमं प्रपाल्य भक्तं प्रत्याख्याय **सौधर्मे नलिनीगुल्मविमाने** षडपि चतुःपल्योपमस्थितिदेवा जाताः, तेषु गोपवर्ज्जा देवाश्चत्वारश्च्युत्वा **कुरु**देशेषु **इषुकार**पुरे **इषुकार**नामा राजाऽभूत्, द्वितीयस्तस्यैव **कमलावती**नाममहादेवीत्वेन जातः, तृतीयोऽस्यैव राज्ञो **भृगु**नामा पुरोधाः, तुर्योऽस्य पुरोधसो **यशा**नाम्नी भार्याभूत् । स **भृगु**रपुत्रः पुत्रार्थं देवदैवज्ञप्रश्नादिषु भृशं क्लिश्यति । अथ तौ गोपदेवौ **भृगु**गृहे सुतत्वेनावां उत्पत्स्याव इत्यवधिना ज्ञात्वा यतिरूपं कृत्वा **भृगु**गृहे समेतौ । **भृगुः** सभार्यो धर्मं ताभ्यां पृष्टवान् । तदुक्तं श्राद्धधर्मं प्रपद्य **भृगु**रपत्यार्थे तावपृच्छत् । तौ द्रव्ययती प्रोचतुस्तव भविष्यतो द्वौ पुत्रौ । तौ चेल्लघू एव प्रव्रजिष्यतस्ततो त्वया तयोर्दीक्षाविघ्नो न कार्यः, तौ बहुं जनं च बोधयिष्यतः, इत्युक्त्वा तौ गतौ । काले च तौ तत्रोत्पन्नौ । तयो**र्यशा**गर्भस्थयो**र्भृगुः** प्रत्यन्तग्रामे गत्वा तस्थौ । तत्र पुत्रौ जातौ । वर्द्धमानौ चैतौ मा प्रव्रजतां कथमपीति मातृपितृभ्यां व्युद्ग्राहितौ, यथैते साधवो मनुष्यादिमांसाहाराः, मैतेषामन्ते गच्छतमिति । अन्यदा तौ रममाणौ साधून् दृष्ट्वा भिया वटमारूढौ । पूर्वात्तान्नपानेषु साधुषु तेषु वटस्यैवाधः स्थित्वा भुञ्जानेषु स्वाभाविकं भक्तपानं तौ पश्यन्तौ, मांसाशिनोऽमीति पित्रोक्तं व्यर्थमासीदिति ध्यायन्तौ, पुनश्चेदृशा भिक्षवः क्वापि दृष्टा इति विमृशन्तौ जातिं स्मृत्वा सम्बुद्धौ वटादुत्तीर्य साधून्नत्वा गृहे गत्वा मातापितरौ प्रबोध्य ताभ्यां सह प्रव्रजितौ । देव्या बोधितो राजा देवीयुक् प्राव्रजीत् । षडपि केवलमाप्य सिद्धाः ॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अथ सूत्रम्–

**देवा भवित्ताण पुरे भवंमि, केई चुआ एगविमाणवासी ।**
**पुरे पुराणे उसुयारणामे, खाए समिद्धे सुरलोअरम्मे ॥१॥**

**व्याख्या–केचिदनुक्ताह्वाः पूर्वभवे देवा भूत्वा,** ततश्च्युता **एकस्मिन् पद्मगुल्म-विमाने वासिनः पुरे पुराणे** चिरन्तने **इषुकारनाम्नि व्याख्याते समृद्धे सुरलोकरम्ये** ॥१॥

**सकम्मसेसेण पुराकएणं, कुलेसुदग्गेसु य ते पसूया ।**
**निव्विन्नसंसारभया जहाय, जिणिंदमग्गं सरणं पवन्ना ॥२॥**

**व्याख्या–स्वस्वकर्मणः** पुण्यप्रकृतिलक्षणस्य **शेषेण** अङ्शेन कर्मांशिने **पुराकृतेन** प्राग्जन्मार्जितेन **कुलेषु उग्रेषु, चः** पूर्त्तौ, **ते प्रसूताः, निर्विण्णा** उद्विग्नाः **संसारभयात्, हित्वा** परित्यज्य भोगान्, **जिनेन्द्रो**पदिष्टं सम्यग्ज्ञानदर्शनचारित्रात्मकं मुक्ति**मार्गं शरणं** कष्टरक्षाश्रयं **प्रपन्नाः** ॥२॥

**पुमत्तमागम्म कुमार दो वि, पुरोहिओ तस्स जसा य पत्ती ।**
**विसालकित्ती य तहेसुयारो, रायत्थ देवी कमलावई य ॥३॥**

**व्याख्या–पुंस्त्वं** नृत्व**मागम्य कुमारा**वकृतविवाहौ **द्वौ, अपिः** पूर्त्तौ, सुलभबोधि-कत्वेन प्राधान्यादनयोः प्राक्कथनं । **पुरोहित**स्तृतीयः, **तस्य यशा** नाम्नी **पत्नी** तुर्यः, **विशालकीर्त्ति**र्विस्तीर्णयशाश्च **तथेषुकारो** नामा **राजा** पञ्चमः, **अत्रै**तस्मिन् भवे **देवी** तत्पत्नी **कमलावती** नाम्नी षष्ठः, इति ते षडपि जाताः ॥३॥

अथैतेष्वर्हन्मार्गः प्रपन्नः कुमाराभ्यां तथा चाह–

**जाईजरामच्चुभयाभिभूया, बहिंविहाराभिणिविट्ठचित्ता ।**
**संसारचक्कस्स विमुक्खणट्ठा, दट्ठूण ते कामगुणे विरत्ता ॥४॥**

**व्याख्या–जातिजरामृत्युभयाभिभूतौ** (पाठान्तरे–**जातिजरामृत्युभयाभिभूते** संसारिजने) बहिः संसाराद्विहारः स्थानं **बहिर्विहारो** मोक्षस्त**स्मिन्नभिनिविष्टं** बद्धाग्रहं **चित्तं ययोस्तौ** । **संसारश्चक्र**मिव चक्रं, भ्रमणात्, **तस्य विमोक्षणार्थं** त्यागार्थं, **दृष्ट्वा** साधून्, यद्वा **दृष्ट्वा** मुक्त्यरयोऽमी **कामगुणाः** शब्दाद्याः, इति पर्यालोच्य **तौ,** सुब्व्यत्यात् **कामगुणेभ्यो विरक्तौ** ॥४॥

**पियपुत्तगा दोन्न वि माहणस्स, सकम्मसीलस्स पुरोहियस्स ।**
**सरित्तु पोराणिय तत्थ जाइं, तहा सुचिन्नं तवसंजमं च ॥५॥**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या**–प्रियौ वल्लभौ, तौ च तौ पुत्रावेव पुत्रकौ **प्रियपुत्रकौ, द्वावपि माहनस्य स्वकर्मशीलस्य** यजनयाजनादिरतस्य **पुरोहितस्य** शान्तिकर्त्तुः । **स्मृत्वा** सूत्रत्वात् [पुराणामेव] **पौराणिकीं** चिरन्तनीं, **तत्रैव** सन्निवेशे कुमारत्वे वा वर्त्तमानौ, **जातिं** जन्म, **तथा सुचीर्णं सुचरितं** वा, अनिदानादिनाऽनुपहतत्वात्, **तपो**ऽनशनादि **संयमं च** ॥५॥

**ते कामभोगेसु असज्जमाणा, माणुस्सएसु जे यावि दिव्वा ।**
**मोक्खाभिकंखी अभिजायसद्धा, तायं उवागम्म इमं उदाहु ॥६॥**

**व्याख्या**–**तौ** पुरोहितपुत्रौ **कामभोगेषु असजन्तौ** सङ्गमकुर्वन्तौ **मानुष्यकेषु, ये चापि दिव्याः,** देवानां कामभोगास्तेषु च । **मोक्षाभिकाङ्क्षिणौ, अभिजातश्रद्धौ** उत्पन्नतत्वरुची, **तातं** पितर**मुपागम्येदं** वक्ष्यमाण**मुदाहरताम्** ॥६॥

यथा–

**असासयं दट्ठु इमं विहारं, बहुअंतरायं न य दीहमाउं ।**
**तम्हा गिहिंसि न रइं लभामो, आमंतयामो चरिस्साम मोणं ॥७॥**

**व्याख्या**–**अशाश्वतं दृष्ट्वेमं** प्रत्यक्षं **विहारं** नृत्वेऽवस्थानं, **बह्वन्तरायं** बहुव्याध्याद्यन्तरायं तदपि, **न** च नैव **दीर्घमायुः** सम्प्रति पल्योपमस्याऽभावात्, **तस्माद्** गृहे **न रतिं लभावहे** । अतश्चामन्त्रयावः पृच्छावो भवन्तं प्रति, यदावां **चरिष्यावो मौनं** मुनित्वम् ॥७॥

एवं ताभ्यामुक्ते–

**अह ताइओ (तायगो) तत्थ मुणीण तेसिं, तवस्स वाघायकरं वयासी ।**
**इमं वयं वेदविदो वयंति, जहा न होई असुयाण लोगो ॥८॥**

**व्याख्या**–**अथ** तात एव **तातकस्तत्र** तस्मिन् सन्निवेशेऽवसरे वा, **मुन्यो**र्भावश्रमणयोः पुत्रयो**स्तयोः** कुमारयो**स्तपसः** शेषधर्मानुष्ठानस्य च **व्याघातकरं** वचन**मवादीत्**, **इमां वाचं वेदविदो वदन्ति, यथा न भवत्यसुतानाम**जातपुत्राणां **लोकः** परलोकः, यतः पुत्रं विना पिण्डदानाद्यभावेन गत्याद्यभावात् । तथा च **वेदवचः**–"**अनपत्यस्य लोका न सन्ति**" । तथान्यैरप्युक्तम्–

**पुत्रेण जायते लोक, इत्येषा वैदिकी श्रुतिः ।**
**अथ पुत्रस्य पुत्रेण, स्वर्गलोके महीयते ॥१॥** [ ]

**अपुत्रस्य गतिर्नास्ति, स्वर्गो नैव च नैव च ।**
**गृहधर्ममनुष्ठाय, ततः स्वर्गे गमिष्यते ॥२॥** [ ]

तस्मात्—

**अहिज्ज वेए परिविस्स विप्पे, पुत्ते परिठप्प गिहंसि जाया ।**
**भोच्चाण भोए सह इत्थियाहिं, आरण्णया होह मुणी पसत्था ॥९॥**

**व्याख्या**—**अधीत्य वेदान्**, **परिवेष्य** भोजयित्वा **विप्रान्**, तथा **पुत्रान् परिष्ठाप्य** कलाभार्याग्रहणादिना गृहधर्मे निवेश्य, **गृहे हे जातौ** ! हे पुत्रौ ! **भुक्त्वा भोगान् सह स्त्रीभिः**, **आरण्यकौ** आरण्यव्रतधारिणौ **होह** भवतं युवां **मुनी सुप्रशस्तौ** श्लाघ्यौ । इत्थमेव ब्रह्मचर्याद्याश्रमव्यवस्था । उक्तं हि—

**ब्रह्मचारी गृहस्थश्च, वानप्रस्थो यतिस्तथा ॥** [ ]

इहीधीत्य वेदानिति **ब्रह्मचर्याश्रमः**, परिवेष्य विप्रानिति **गृहस्थाश्रमः**, आरण्यकाविति **वानप्रस्थाश्रमः**, मुनिग्रहणेन च **यत्याश्रम** उक्तः ॥९॥

इत्थं तेनोक्ते कुमारकौ यदकार्ष्टां तदाह—

**सोयग्गिणा आयगुणिंधणेणं, मोहानिलपज्जलणाहिएणं ।**
**संतत्तभावं परितप्पमाणं, लोलप्पमाणं बहुहा बहुं च ॥१०॥**

**व्याख्या**—सुतवियोगचिन्तनोत्थं मनोदुःखं शोकस्तेन **शोकाग्निना**, आत्मनो गुणा आत्मगुणाः कर्मक्षयोपशमादिजाः सम्यक्त्वाद्याः, ते इन्धनं दाह्यतया यस्य स तथा, यद्वा अनादिकालसहचारित्वेन रागादयो वात्मगुणास्ते इन्धनमुद्दीपकतया यस्य स तथा, तेना**त्म-गुणेन्धनेन**, मोहानिलादज्ञानपवनादधिकं प्रज्वलनमस्येति तेन **मोहानिलप्रज्वलनाधिकेन** सन्तप्तौ भावोन्तःकरणं यस्येति **सन्तप्तभावं**, अत एव **परितप्यमानं** सम्मताद्दह्यमानं, देहे तद्दाहस्यापि शोकावेशत उत्पत्तेः, **लोलुप्यमानं** च, तद्वियोगशङ्कोत्पन्नदुःखपर्शुना भृशं हृदि छिद्यमानं **बहुधा**ऽनेकप्रकारं यथा स्यादेवं **बहु** लोलुप्यमानं लालप्यमानं वा ॥१०॥

**पुरोहियं तं कमसोऽणुणंतं, निमंतयंतं च सुए धणेणं ।**
**जहक्कमं कामगुणेहिं चेव, कुमारगा ते पसमिक्ख वक्कं ॥११॥**

**व्याख्या**—पूर्वोक्तावस्थं **पुरोहितं**, [**तम्** इति प्रकान्तं] क्रमेण परिपाट्या**ऽनुनयन्तं** शनैः शनैः स्वाशयेन प्रज्ञापयन्तं, **निमन्त्रयन्तं च सुतौ धनेन** द्रव्येण, **यथाक्रमं** यथाकालं **कामगुणैः** सुशब्दाद्यैर्निमन्त्रयन्तं, **चः** समुच्चये, **एवेति** पूर्त्तौ **कुमारकौ** तौ **प्रसमीक्ष्य** प्रकर्षेणाऽज्ञानाच्छादितमतिमालोक्य **वाक्यमु**क्तवन्तौ वक्ष्यमाणम् ॥११॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**वेया अहीया न भवंति ताणं, भुत्ता दिया निंति तमंतमे णं ।**
**जाया य पुत्ता न भवंति ताणं, को नाम ते अणुमन्नेज्ज एयं ॥१२॥**

**व्याख्या—वेदा अधीता न भवन्ति त्राणं** शरणं, उक्तं हि—

**अकारणमधीयानो, ब्राह्मणस्तु यधिष्ठिर ! ।**
**दुःकुलेनाप्यधीयन्ते, शीलं तु मम रोचते ॥१॥ [ ]**
**शिल्पमध्ययनं नाम, वृत्तं ब्राह्मणलक्षणं ।**
**वृत्तस्थं ब्राह्मणं प्राहु-र्नेतरान् वेदजीवकान् ॥२॥ [ ]**

तथान्तर्भावितणिगर्थत्वा**द्भोजिता द्विजा नयन्ति** प्रापयन्ति, **तमसो**ऽपि **यत्तमस्तस्मिन्** अतिरौद्रे रौरवादिनरके, **णं** अलङ्कारे, ते भोजिताः कुमार्गे पशुवधादावेव प्रवर्त्तन्ते, अतस्तेषां निस्तारकत्वं निरस्तं, **जाताश्चो**त्पन्नाः **पुत्रा** नरकादौ पततां **त्राणं न भवन्ति** । उक्तं च **वेदानुगै**रपि—

**यदि पुत्राद्भवेत् स्वर्गो, दानधर्मो न विद्यते ।**
**मुषतस्तत्र लोकोऽयं, दानधर्मो निरर्थकः ॥१॥ [ ]**
**बहुपुत्रा दुली गोधा, ताम्रचूडा तथैव च ।**
**तेषां च प्रथमं स्वर्गः, पश्चाल्लोको गमिष्यति ॥२॥ [ ]**

ततः **को नाम** ? न कोऽपीत्यर्थः, यस्ते **तवानुमन्येत** वचनं शोभनमित्यनुजानीयात् सविवेकः ? **एतद्वे**दाध्ययनादिवाक्यत्रयोत्तरम् ॥१२॥

अथ भुक्त्वा भोगानिति चतुर्थोपदेशप्रतिवचनमाह—

**खणमित्तसोक्खा बहुकालदुक्खा, पकामदुक्खा अणिगामसोक्खा ।**
**संसारमोक्खस्स विपक्खभूया, खाणी अणत्थाण उ कामभोगा ॥१३॥**

**व्याख्या—क्षणमात्रसौख्यास्**तथा बहुकालं नरकादिषु दुःखं येभ्यस्ते **बहुकालदुःखाः**, प्रकाममतिशयेन दुःखं येभ्यस्ते **प्रकामदुःखाः**, **अनिकामसौख्या** अप्रकृष्टसुखाः । ईदृशा अप्यायतौ किं शुभफलाः स्युः ? अत आह—**संसारान्मोक्षो** विश्लेषः संसारमोक्षो निर्वृतिस्**तस्य विपक्षभूता**स्तद्वारकतया अत्यन्तप्रतिकूलाः, **खानिरनर्थानामि**हलोकदुःखाप्तिरूपाणां, **तु**रेव, **कामभोगा** इति ॥१३॥

अनर्थखनित्वं स्पष्टयति—

**परिव्वयंते अनियत्तकामे, अहो य राओ परितप्पमाणे ।**
**अन्नप्पमत्ते धणमेसमाणे, पप्पोइ मच्चुं पुरिसो जरं च ॥१४॥**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या—परिव्रजन्** विषयसुखलाभार्थमितस्ततो भ्रमन्, **अनिवृतकामः**, आर्षत्वात् **अह्नि रात्रौ चा**हर्निशं **परितप्यमानः**, तदनाप्तौ समन्ताच्चिन्ताग्निना दह्यमानः, अन्ये जनाः, यद्वान्नं भोजनं तदर्थं प्रमत्तः, तत्कृत्याऽऽसक्तचेता **अन्यप्रमत्तः अन्नप्रमत्तो** वा, **धनमन्वेषयन्** विविधोपायैः, 'पप्पोइ'त्ति **प्राप्नोति मृत्युं पुरुषो जरां च** ॥१४॥

किञ्च—

**इमं च मे अत्थि इमं च णत्थि, इमं च मे किच्चमिमं अकिच्चं ।**
**तं एवमेवं लालप्पमाणं, हरा हरंति त्ति कहं पमाओ ॥१५॥**

**व्याख्या—इदं च मेऽस्ति** स्वर्णरूप्यादि, **इदं च नास्ति** पद्मरागादि । **इदं च मे कृत्यं** गृहप्रकारादि, **इदं मे अकृत्यं** आरब्धमपि वाणिज्यादि न कर्त्तुमुचितं । **तं** पुरुषं **एवमेवं** वृथैव **लालप्यमानं** अत्यर्थं व्यक्तवावदन्तं, हरन्त्यायुरिति **हरा** दिनरजन्यादयः, व्याधिविशेषा वा **हरन्ति** भवान्तरं नयन्ति, इत्यस्माद्धेतोः **कथं प्रमादो** धर्मे कर्त्तुं युक्तः ? ॥१५॥ इति सूत्रषट्कार्थः ॥

अथ तौ धनादिभिर्लोभयितुं पुरोहितः प्राह—

**धणं पभूयं सह इत्थियाहिं, सयणा तहा कामगुणा पकामं ।**
**तवं कए तप्पइ जस्स लोको, तं सव्व साहीणमिहेव तुब्भं ॥१६॥**

**व्याख्या—धनं प्रभूतं सह स्त्रीभिः, स्वजनाः** पितृपितृव्याद्याः, **तथा कामगुणाः** शब्दाद्याः **प्रकामं** अतिशायिनः सन्ति । **तपः** कष्टानुष्ठानं यस्य धनादेः **कृते** निमित्तं **लोकस्तत्सर्वं** स्वाधीनमात्मायत्तमिहै**वास्मिन्नेव** गृहे **युवयोर**स्तीति शेषः । यद्यपि स्त्रियस्तयोस्तदा न सन्ति तथापि लोकमान्यत्वाद्योग्यतास्तीति तासां कथनम् ॥१६॥

पुत्रावाहतुः—

**धणेण किं धम्मधुराहिगारे, सयणेण वा कामगुणेहिं चेव ।**
**समणा भविस्साम गुणोघधारी, बहिंविहारा अभिगम्म भिक्खं ॥१७॥**

**व्याख्या—धनेन किं** ? न किञ्चिदित्यर्थः, धर्म एवातिसात्त्विकैरुह्यमानतया धूरिव **धर्मधुरा, तदधिकारे** तत्प्रस्तावे, **स्वजनेन वा कामगुणैश्च** किं ? तथा चोक्तं—"**न प्रजया, न धनेन, न त्यागेनैकेनामृतत्वमानशुः**" इत्यादि । तत आवां श्रम**णौ भविष्यावः**, गुणौघं सम्यग्दर्शनादिकं धारयत इत्येवंशीलौ **गुणौघधारिणौ, बहि**र्ग्रामनगरादिभ्यो बहिर्वर्त्तित्वा द्रव्यतः, भावतश्च क्वचिदप्रबुद्ध(प्रतिबद्ध)त्वाद्विहारो विहरणं ययोस्तौ **बहिर्विहारौ, अभिगम्य भिक्षां** शुद्धोञ्छं भुञ्जानौ ॥१७॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

आत्मास्तित्वमूलत्वात् सकलधर्मानुष्ठानस्य तन्निराकरणायाह **भृगुः**–

**जहा य अग्गी अरणी असंतो, खीरे घयं तिल्लमहा तिलेसु ।**
**एमेव जाया सरीरंमि सत्ता, संमुच्छई नासइ नावचिट्ठे ॥१८॥**

**व्याख्या–चः** अवधारणे, **यथैवाग्निररणितो**ऽग्निमथनकाष्ठाद**सन्न**विद्यमान एव सम्मूछति, तथा **क्षीरे घृतं, तिलेषु तैलं, एवमेव हे जातौ** ! पुत्रौ ! **शरीरे सत्वाः** प्राणिनः सम्मूर्च्छन्ति । पूर्वमसन्त एव शरीराकारपरिणतभूतसमुदयादुत्पद्यन्ते । तथा चाहुः– ''**पृथिव्यप्तेजोवाय्वाकाशा इति तत्वानि, एतेभ्यश्चैतन्यं जायते, मद्याङ्गेभ्यो मदशक्तिवत्**'' । तथा 'नासइ' **नश्यत्य**भ्रपटलवत्, **न** पुन**रवतिष्ठते**, शरीरनाशे तन्नाशात्, यद्वा शरीरे सत्यप्यमी सत्त्वा नश्यन्ति, नावतिष्ठन्ते जलबुद्बुदवत् ॥१८॥

पुत्रौ कथयतः–

**नो इंदियगिज्झो अमुत्तभावा, अमुत्तभावावि य होइ णिच्चो ।**
**अज्झत्तहेउं निययऽस्स बंधो, संसारहेउं च वयंति बंधं ॥१९॥**

**व्याख्या–नो** निषेधे, आत्मा **इन्द्रियैः** श्रोत्राद्यै**र्ग्राह्यः, अमूर्त्तभावात्** इन्द्रियग्राह्य-रूपाद्यभावात् । **अमूर्त्तभावादपि च भवति नित्यः**, यद्द्रव्ये सत्यमूर्तं तन्नित्यं, व्योमवत्, न चैवममूर्त्तत्वादेव तस्य सम्बन्धाऽसम्भवः, यतः–'अज्झत्त'त्ति **अध्यात्म**शब्देनात्मस्था मिथ्यात्वाद्या इहोच्यन्ते, ततस्त**द्धेतु**स्तन्निमित्तो **नियतो** निश्चितो बन्धः कर्मभिः संश्लेषः, यथा अमूर्त्तस्यापि नभसो मूर्त्तैर्घटादिभिः सम्बन्धः, एव**मस्या**पि कर्मभिर्मूर्त्तैरपि सम्बन्धो न विरुद्ध्यते । तथा **संसारहेतुं च वदन्ति बन्धमि**ति । यत एवमस्तत्यात्मा नित्योऽत एव भवान्तरयायी, तस्य चाऽसम्बन्धादेव मोक्षः ॥१९॥

ततः–

**जहा वयं धम्ममजाणमाणा, पावं पुरा कम्ममकासि मोहा ।**
**ओरुज्झमाणा परिरक्खयंता, तं णेव भुज्जो वि समायरामो ॥२०॥**

**व्याख्या–यथा वयं**[**धर्मं**]सम्यग्दर्शनादि**कमजानानाः पापं** पापहेतुकं **कर्म पुरा पूर्वमकार्ष्म मोहात्** तत्वाऽज्ञानात्, **अवरुद्ध्यमाना** गृहान्निर्गममलभमानाः, **परिरक्ष्यमाणा** अनुजीविभिरनुपाल्यमानाः, **तदि**ति पापकर्म **नैव भूयोऽपि समाचरामो**ऽनुतिष्ठामः । यतः प्राप्तमस्माभिर्वस्तुतत्वमिति । 'सर्वत्र वाऽस्मदो द्वयोः' इति द्वित्वेऽपि बहुवचनम् ॥२०॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अन्यच्च—

**अब्भाहयंमि लोगंमि, सव्वओ परिवारिए ।**
**अमोहाहिं पडंतीहिं, गिहंसि न रइं लभे ॥२१॥**

**व्याख्या—अभ्याहते** पीडिते **लोके** जने, **सर्वतः** सर्वासु दिक्षु **परिवारिते** परिवेष्टिते, **अमोघाभि**रवन्ध्यशस्त्रालीभिः **पतन्तीभिः, गृहे** गृहवासे **न रति**मासक्तिं **लभावहे**। यथा वागुरया परिवेष्टितो मृगोऽमोघैः स्वशस्त्रैर्व्याधेनाहतो न रतिं लभते । एवमावामपि ॥२१॥

**भृगुः** कथयति—

**केण अब्भाहओ लोओ, केण वा परिवारिओ ।**
**का वा अमोहा वुत्ता, जाया चिंतावरो हुम्मि ॥२२॥**

**व्याख्या—केन** व्याधतुल्ये**नाभ्याहतो लोकः ? केन** वा वागुरास्थानीयेन **परिवारितः** ? **का वा अमोघा** ? अमोघप्रहरणोपमा अभ्याहतक्रियां प्रति प्रकरणत**योक्ता ? हे जातौ** ! पुत्रौ ! **चिन्तापरो भवामि** । ततो ममावेदयतमिममर्थम् ! ॥२२॥

पुत्राववदताम्—

**मच्चुणाऽब्भाहओ लोगो, जराए परिवारिओ ।**
**अमोहा रयणी वुत्ता, एवं ताय वियाणह ॥२३॥**

**व्याख्या—मृत्युनाभ्याहतो लोक**स्तस्य सर्वेष्वपि भावात्, **जरया परिवारित**स्तस्या एव लोकाभिघातत्वात्, **अमोघा रजन्य उक्ता** दिवसाश्च, तत्पतने ह्यवश्यं जनाभिघाताः, **हे तात ! एवं विजानीहि** ! ॥२३॥

किञ्च—

**जा जा वच्चइ रयणी, न सा पडिनियत्तइ ।**
**अधम्मं कुणमाणस्स, अहला जंति राइओ ॥२४॥**

**व्याख्या—या या व्रजति रजनी** दिनं च, **न सा प्रतिनिवर्त्तते** नागच्छति, तदागमने हि सर्वदा सैवैका जन्मरात्रिः स्यात्, ततो न द्वितीया मरणरात्रिः स्यात् । ततश्चा**ऽधर्मं कुर्वतो** जन्तो**रफला यान्ति रात्रयः**, अधर्ममूलं च ग्रहितेत्यायुषोऽनित्यत्वादधर्मकरणे च तस्य निष्फलत्वात्तत्त्याग एव श्रेयान् ॥२४॥

Jain Education International 2010_02  For Private & Personal Use Only  www.jainelibrary.org

इत्थं व्यतिकरेण प्रव्रज्याप्रतिपत्तिहेतुमुक्त्वा तमेवान्वयेनाह–

**जा जा वच्चइ रयणी, न सा पडिनियत्तइ ।**
**धम्मं च कुणमाणस्स, सहला जंति राइओ ॥२५॥**

**व्याख्या–च पुनर्धर्मं कुर्वतः सफला**, धर्मफलत्वात् जन्मनः, न च व्रतं विना धर्मः, इत्यतो व्रतं प्रपत्स्यावहे ॥२५॥

इत्थं तद्वचनात् सम्बुद्धो **भृगुः** प्राह–

**एगओ संवसित्ताणं, दुहओ सम्मत्तसंजुया ।**
**पच्छा जाया गमिस्सामो, भिक्खमाणा कुले कुले ॥२६॥**

**व्याख्या–एकत** एकस्मिन् स्थाने **समुष्य** सहेव वसित्वा, द्वयं च द्वयं च **द्वये** आवां युवां च व्यक्त्यपेक्षया, पुरुषप्राधान्याच्च पुल्लिङ्गता, **सम्यक्त्वेन** तत्वरुच्या देशविरत्या च **संयुताः । पश्चाद्वृद्धत्वे हे जातौ ! गमिष्यामो** वयं ग्रामपुरादिषु मास-कल्पादिक्रमेण, प्रव्रज्य **भिक्ष्यमाणा** याचमानाः पिण्डादिकं, **कुले कुले** गृहे गृहे ज्ञात्वोञ्छेन, न त्वेकगृहे ॥२६॥

पुत्रावाहतुः–

**जस्सऽत्थि मच्चुणा सक्खं, जस्स वत्थि पलायणं ।**
**जो जाणइ ण मरिस्सामि, सो हु कंखे सुए सिया ॥२७॥**

**व्याख्या–यस्य मृत्युना** सह **सख्यमस्ति, यस्य चास्ति पलायनं** नाशनं मृत्योः, **यो जानीतेऽहं न मरिष्यामि, स हुरेवार्थे, काङ्क्षाति** प्रार्थयते **श्वः** आगामिदिने **स्यादि**दमिति ॥२७॥

न कस्यचिदिदं त्रयमस्त्यतः–

**अज्जेव धम्मं पडिवज्जयामो, जहिं पवन्ना न पुणब्भवामो ।**
**अणागयं णेव य अत्थि किंची, सद्धाखमं नो विणइत्तु रागं ॥२८॥**

**व्याख्या–अद्यैव धर्मं** यतिधर्मं **प्रतिपद्यामहे**, आर्षत्वाद् **यं धर्मं प्रपन्ना** आश्रिता **न पुनर्भविष्यामः**, न पुनर्जन्मानुभविष्यामः, तद्धेतुभूतकर्मापगमात्, जरामरणाद्यभावात् । किं च **अनागतं** अप्राप्तं **नैव चास्ति** किञ्चित् सुन्दरमपि विषयसौख्यादि, सर्वभावानामनन्तशः प्राप्तत्वात् । यद्वा **अनागतं** यत्र मृत्योरागतिर्नास्ति, तन्न किञ्चित् स्थान**मस्ति**, अतः **श्रद्धाक्षमं** युक्तमिहपरलोकयोः श्रेयःप्राप्तिहेत्वनुष्ठानं कर्तुं **नो**ऽस्माकं, विनीय अपसार्य **रागं** । तत्त्वतो हि

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

कः कस्य स्वजनो न वा अस्वजन इति । उक्तं च—"**अयं णं भंते जीवे एगमेगस्स जीवस्स माइत्ताए (पियत्ताए) भाइत्ताए पुत्तत्ताए धूयत्ताए सुण्हत्ताए भज्जत्ताए सुहिसंबंधत्ताए उववन्ने पुव्वे ? हन्ता गोयमा ! असइं अदुवा अणन्तखुत्तो**"त्ति ॥२८॥

ततस्तद्वचनात् पुरोहितो जातव्रतेच्छो ब्राह्मणीं विघ्नकारिणीं मत्वेदमाह—

**पहीणपुत्तस्स हु नत्थि वासो, वासिट्ठि भिक्खायरियाए कालो ।**
**साहाहि रुक्खो लहई समाहिं, छिण्णाहिं साहाहिं तमेव खाणुं ॥२९॥**

**व्याख्या**—प्राकृतत्वेन **पुत्राभ्यां प्रहीणस्त्यक्तो यस्तस्य, हुः** पूर्त्तौ, **नास्ति** गृहे **वासो** मे, **हे वाशिष्ठि** ! हे वाशिष्टगोत्रोद्भवे ! यशोगौरवहेतुगोत्राभिधानं, यथाऽस्या अभिधानं धर्माभिमुख्यं स्यात् इति । **भिक्षाचर्याया** अयं **कालः** प्रस्तावो वर्त्तते । यतः **शाखाभिर्वृक्षो लभते समाधिं** स्वास्थ्यं, **छिन्नाभिः शाखाभिस्तमेव द्रुमं स्थाणुं** जानीहि ? यथा शाखाद्रोः शोभारक्षणादिना समाधिहेतवः, एवं ममैतौ सुतौ, अतस्तद्विरहितोऽहं स्थाणुकल्प एव ॥२९॥

किञ्च—

**पंखाविहूणो व जहेह पक्खी, भिच्चविहूणो व रणे नरिंदो ।**
**विवण्णसारो वणिउ व्व पोए, पहीणपुत्तो मि तहा अहं पि ॥३०॥**

**व्याख्या—वा** दृष्टान्तान्तरे, **पक्षाभ्यां विहीनो यथेह** लोके **पक्षी** नंष्टुमशक्त ओत्वादिभिर्हन्यते, तथा **भृत्यैर्विहीनो वा रणे नरेन्द्रो** जीयते, तथा **विपन्नसारो** विहिरण्यरत्नादिर्**वणिक्** सांयात्रिको [वेति प्राग्वत्] **पोते** प्रवहणे भिन्ने नार्वाक् न च परत इत्यब्धिमध्यवर्त्ती विषीदति, **पुत्रप्रहीणस्तथाहमपि** पक्षभृत्पार्श्वसारैस्तुल्याभ्यां सुताभ्यां त्यक्तोऽहमपीदृगित्यर्थः ॥३०॥

अथ **यशाह**—

**सुसंभिया कामगुणा इमे ते, संपिंडिया अग्गरसा पभूया ।**
**भुंजामु ता कामगुणा पगामं, पच्छा गमिस्साम पहाणमग्गं ॥३१॥**

**व्याख्या—सुसम्भृताः** सुष्ठु संस्कृतास्ते तव **कामगुणा** वेणुवीणाकलगीतादय **इमे** स्वगृहवर्त्तिनः, ['ते' **तव**] तथा **सम्पिण्डिताः** सम्यक्पूञ्जीकृताः, **अग्र्याः** प्रधानाः **रसा** मधुराद्याः **प्रभूताः**, पृथग्ग्रहणं रसानामतिगृद्धिहेतुत्वात् । **भुञ्जीमहि तत्** तस्मात् **कामगुणान् प्रकामं** । **पश्चाद्** वृद्धावस्थायां **गमिष्यामः** प्रतिपत्स्यामहे **प्रधानमार्गं**, महापुरुषसेव्यं प्रव्रज्यारूपं मुक्तिपथम् ॥३१॥

Jain Education International 2010_02          For Private & Personal Use Only          www.jainelibrary.org

भृगुराह—

**भुत्ता रसा भोइ जहाइ णे वओ, न जीवियट्ठा पयहामि भोए ।**
**लाभं अलाभं च सुहं च दुक्खं, संविक्खमाणो चरिसामि मोणं ।।३२।।**

**व्याख्या—भुक्ता रसा** मधुरादयः शेषकामगुणाश्च, **हे भवति** ! ब्राह्मण्या आमन्त्रण-वचनमेतत् । **जहाति** त्यजति **नोऽस्मान् वयो** यौवनं क्रियाकरणक्षमं आयुश्च । ततो यावन्नैतत्त्यजति तावद्दीक्षां प्रपद्यामहे इत्याशयः । तत्किं वयःस्थैर्याद्यर्थं दीक्षां प्रतिपद्यसे ? उच्यते हि कैश्चिद्दीक्षा वयःस्थैर्यादिविधायिनीत्याशङ्क्याह—नेति निषेधे, **न जीवितार्थं** वयःस्थैर्यार्थं **प्रजहामि भोगान्** , किं तु **लाभं** वस्त्राद्याप्ति, **अलाभं** तदाद्यप्राप्ति, **सुखं** विषयोत्थं, **दुःखं** व्याध्यात्मकं **समीक्षमाणः** पश्यन् जीवितमरणादीनां च समतामेव विभावयं**श्चरिष्यामि मौनं** मुनिभावं । ततो मुक्त्यर्थमेव मम दीक्षाप्रतिपत्तिः ।।३२।।

**यशा** प्राह—

**मा हू तुमं सोयरियाण संभरे, जुन्नो व हंसो पडिसुयगामी ।**
**भुंजाहि भोगाइं मए समाणं, दुक्खं खु भिक्खायरिया विहारो ।।३३।।**

**व्याख्या—मा** निषेधे, **हूः** अलङ्कारे, **त्वं सौदर्याणां** सहोदराणां शेषस्वजनानां भोगानां च **स्मार्षीः, जीर्णो हंस इव प्रतिश्रोतोगामी,** यथासौ नदीश्रोतसि प्रतिकूलगमनं अतिकष्टमारभ्यापि तत्राऽशक्तः पुनरनुश्रोत एव धावति, एवं त्वमपि संयमासक्तः पुनः पुनः सोदरान् भोगांश्च स्मरिष्यसि, ततो **भुङ्क्ष्व भोगान् मया** सह, **खु**र्निश्चितं **भिक्षाचर्या विहारो** ग्रामादिष्वप्रतिबद्धविहारः शिरोलुञ्चनादिना **दुःखमेव** ।।३३।।

भृगुः प्राह—

**जहा य भोई तणुजं भुजंगमो, निम्मोइणीं हिच्च पलेइ मुत्तो ।**
**इमे ते जाया पयहंति भोए, तेऽहं कहं नाणुगमिस्समिक्को ।।३४।।**

**व्याख्या—यथा च हे भवति !** (पाठान्तरे-**हे भोगिनि !**) **तनुजां** निर्मोचनीं कञ्चुलिकां **भुजङ्गमो हित्वा पर्येति** समन्ताद् गच्छति (पाठान्तरे-'**पलाई' प्रयाति**) **मुक्तो** निरपेक्षः, एव**मेतौ ते जातौ प्रजहीतो भोगान् । तौ** भोगांस्त्यजन्तौ **अहं कथं नानु-गमिष्यामि** ? व्रतादाने**नैको**ऽद्वितीयः, किं ममाऽसहायस्य गृहवासेन ? ।।३४।।

तथा—

**छिंदित्तु जालं अबलं व रोहिया, मच्छा जहा कामगुणो पहाय ।**
**धौरेयसीला तवसा उयारा, धीरा हु भिक्खायरियां चरंति ।।३५।।**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या–छित्वा** तीक्ष्णपुच्छादिना **जालं, अबलमिव** जीर्णत्वादिना निःसारमिव, बलवन्तो **रोहिता** रोहितजातीया **मत्स्याश्चरन्ति यथा,** तथा जालप्रायान् **कामगुणान् प्रहाय,** धुरं वहन्तीति धौरेयास्तेषामिव शीलं उत्क्षिप्तभारवाहितालक्षणं येषां ते **धौरेयशीलाः, तपसा उदारा धीराः** सत्त्ववन्तो, हुर्यस्मात् **भिक्षाचर्यां** व्रतं **चरन्ति,** अतोऽहमपि व्रतं ग्रहीष्ये ॥३५॥

ततः प्रबुद्धा साह–

**नहेव कोंचा समतिक्कमंता, तयाणि जालाणि दलित्तु हंसा ।**
**पलिंति पुत्ता य पई य मज्झं, तेहं कहं णाणुगमिस्समेक्का ॥३६॥**

**व्याख्या–नभसीव क्रौञ्चाः** पक्षिणः **समतिक्रामन्त**स्तांस्तान् देशानुल्लङ्घयन्तः, **ततानि** विस्तीर्णानि **जालानि** बन्धनान्यात्माऽनर्थहेतून् **दलयित्वा** भित्वा, **च**स्य गम्यत्वात्, **हंसाश्च परियन्ति** समन्ताद् गच्छन्ति, एवं **पुत्रौ च पतिश्च मम** यतन्ते जालोपमं विषयाभिष्वङ्गं छित्वा नभःकल्पे निरुपलेपे संयमाध्वनि, तानि तानि संयमस्थानान्यतिक्रम्य गन्तुं, अत**स्तानहं** कथं **नानुगमिष्याम्येका** ? अनुगमिष्याम्येव । यदि वा जालानि भित्त्वेति हंसानामेव सम्बद्ध्यते, खमतिक्रामन्तः स्वातन्त्र्येण गच्छन्त इति तु क्रौञ्चानां । ततः क्रौञ्चदृष्टान्ततोऽकृतदारादिबन्धनसुतापेक्षः, हंसदृष्टान्तस्तु जातदारसुतपत्यपेक्षः ॥३६॥

एवं चतुर्णां प्रव्रज्याप्रतिपत्तौ–

**पुरोहियं तं ससुयं सदारं, सोच्चाभिणिक्खम्म पहाय भोए ।**
**कुडुंबसारं विउलुत्तमं तं, रायं अभिक्खं समुवाय देवी ॥३७॥**

**व्याख्या–पुरोहितं तं भृगुं ससुतं सदारं श्रुत्वाऽभिनिःक्रम्य** गृहान्निर्गत्य प्रव्रजितं, **प्रहाय** त्यक्त्वा **भोगान् कुटुम्बसारं** धनधान्यादि, **विपुलं** विस्तीर्णतया **उत्तमं,** प्रधानतया विपुलोत्तमं **तत्** पुरोहितसत्कं गृह्णन्तमित्यध्याहार्यं, **राजानं अभीक्ष्णं** पुनः पुनः **समुवाच** सम्यगूचे **देवी** राज्ञी **कमलावती** नाम्नी ॥३७॥

**वंतासी पुरिसो रायं, ण सो होइ पसंसिओ ।**
**माहणेण परिच्चत्तं, धणं आयउमिच्छसि ॥३८॥**

**व्याख्या**–वान्तमशितुं भोक्तुं शीलो **वान्ताशी पुरुषोऽयं राजन् ! स न भवति प्रशंसितो** विद्वद्भिः, कथं वान्ताशीत्याह–**ब्राह्मणेन परित्यक्तं धनमादातुमिच्छसि,** परिहृतं हि धनं यत्तद्वान्तमिव, ततस्तदादातुमिच्छुस्त्वमपि वान्ताशी, न चेदमुचितं भवादृशाम् ॥३८॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

किञ्च–

**सव्वं जगं जइ तुहं, सव्वं वावि धणं भवे ।**
**सव्वं वि ते अपज्जत्तं, णेव ताणाय तं तव ॥३९॥**

**व्याख्या–सर्वं जगत् यदि तव** भवेत्, **सर्वं चापि धनं** स्वर्णादि तव **भवेत्**, एवं **सर्वमपि ते** इच्छापूर्तौ **अपर्याप्तमशक्तं** । आकाशसमत्वेन तस्या अपर्यवसितत्वात् । **न वा त्राणाय** जरामृत्य्वादिनाशाय **तत्**सर्वं जगद्धनं वा **ते भवेत्** ॥३९॥

धनाद्यग्रहणहेतुमनित्यतां चाह–

**मरिहिसि रायं जया तया वा, मणोरमे कामगुणे पहाय ।**
**इक्को हु धम्मो नरदेव ताणं, न विज्जइ अण्णमिहेह किंचि ॥४०॥**

**व्याख्या–हे राजन् ! मरिष्यसि यदा तदा वा** कालेऽवश्यमेव । यतः–

**कश्चित्तावत्त्वया दृष्टः, श्रुतो वा शङ्कितोऽपि वा ।**
**क्षितौ वा यदि वा स्वर्गे, यो जातो न मरिष्यति ॥१॥ [ ]**

सर्वान् भोगान् भुक्त्वैव मरिष्यामीत्यत आह–**मनोरमान् कामगुणान् प्रहाय** तथा एकाक्येव मरिष्यसि, न किञ्चित्त्वया सह यास्यतीति । तत **एक एव धर्मः** सम्यग्दर्शनादिरूपो हे **नरदेव**! हे नृप ! **त्राणं** शरणमापत्परिरक्षणं, **न विद्यतेऽन्यदपरमिहा**स्मिन् लोके मृत्यौ वा त्राणं, धर्म एवैकस्त्राणं मुक्तिहेतुत्वेन, नान्यत्**किञ्चित्तत**ः स एवानुष्ठेयः, इति सूत्रचतुष्टयार्थः ॥४०॥

अतः–

**नाहं रमे पक्खिणि पंजरे वा, संताणछिन्ना चरिस्सामि मोणं ।**
**अकिंचणा उज्जुकडा निरामिसा, परिग्गहारंभनियत्तदोसा ॥४१॥**

**व्याख्या–न रतिमाप्नोमि**, वाशब्द औपम्ये, ततः **पक्षिणीव पञ्जरे**, यथाऽसौ दुःखोत्पादिन पञ्जरे न रतिं लभते, एवमहमपि जरामरणाद्युपद्रवविद्रुते भवपञ्जरे न रमे, **छिन्नसन्ताना** छिन्नस्नेहसन्तति**श्चरिष्यामि मौनं** मुन्यनुष्ठानं, अविद्यमानं किञ्चनं, द्रव्यतो हिरण्यादि, भावतः कषायादिरूपमस्या इत्य**किञ्चना**, ऋजु मायारहितं कृतमनुष्ठानं यस्या इति **ऋजुकृता**, निःक्रान्ता आमिषाद्विषयादे**र्निरामिषा**, परिग्रहारम्भावेव दोषौ, ताभ्यां निवृत्ता **परिग्रहारम्भदोषनिवृत्ता**, सूत्रत्वाद्दोषशब्दव्यत्ययः, यद्वा **परिग्रहारम्भनिवृत्ता** अत एवा**ऽदोषा** निर्विकारा ॥४१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

किञ्च–

**दवग्गिणा जहारण्णे, डज्झमाणेसु जंतुसु ।**
**अन्ने सत्ता पमोयंति, रागद्दोसवसं गया ॥४२॥**

**व्याख्या–दवाग्निना यथाऽरण्ये दह्यमानेषु** भस्मीक्रियमाणेषु **जन्तुषु अन्ये सत्त्वा** अज्ञानाः **प्रमोदन्ते**, वयं निर्भयाः सुखिन एवेति, **रागद्वेषवशं गताः** ॥४२॥

**एवमेवं वयं मूढा, कामभोगेसु मुच्छिया ।**
**डज्झमाणं न बुज्झामो, रागद्दोसग्गिणा जगं ॥४३॥**

**व्याख्या–एवमेव** बिन्दोरलाक्षणिकत्वात्, **वयं मूढा** मोहवशाः, **कामभोगेषु मूर्च्छिताः, दह्यमानं न बुद्ध्यामहे** नावगच्छामः, **रागद्वेषाग्निना जगत्** प्राणिवृन्दं स्वं च, यो हि सविवेकोऽरागी च स्यात् स दह्यमानानन्यसत्त्वानवलोक्यात्मरक्षणोपायपर एव स्यात्, न तु प्रमोदते, ततो वयमपि भोगाऽपरित्यागादज्ञाना एव ॥४३॥

ये त्वेवंविधा न स्युस्ते किं कुर्वन्तीत्याह–

**भोगे भोच्चा वमित्ता य, लहुभूयविहारिणो ।**
**आमोयमाणा गच्छंति, दिया कामकमा इव ॥४४॥**

**व्याख्या–भोगान् भुक्त्वा**, पुनरुत्तरकाले **वान्त्वा च**, लघुर्वायुस्तद्भूतास्तत्समा लघूभूताः सन्तो विहरामः, इत्येवंशीला **लघुभूतविहारिणः**, अप्रतिबद्धविहारिणो वा, **आमोदमाना**स्तथाविधानुष्ठानेन हृष्यन्तो **गच्छन्त्यु**त्तमां गतिं, ग्रामानुग्रामं वा, **द्विजाः** पक्षिण **इव**, यथा ते **कामक्रमाः** स्वेच्छाचारिणो यत्र यत्र रोचन्ते तत्र तत्र मोदमाना भ्रमन्ति । एवं साधवः सङ्गमाऽभावाद्यत्र यत्र संयमनिर्वाहस्तत्र तत्र यान्ति ॥४४॥

पुनर्बाह्यास्थां निराकुरुते–

**इमे य बद्धा फंदंति, मम हत्थऽज्जमागया ।**
**वयं च सत्ता कामेसु, भविस्सामो जहा इमे ॥४५॥**

**व्याख्या–इमे** प्रत्यक्षाः शब्दाद्याः, चः निश्चये, **बद्धा** नियन्त्रिता वीणादिस्नाना-द्यारामादिभोगादिदुकूलशय्याद्यनेकधोपायै रक्षिताः **स्पन्दन्ते**, अस्थितधर्मतया कम्पन्ते, **मम** च तव च **हस्ते हे आर्य ! आगताः** स्ववशा इत्यर्थः, **वयं** पुनरीदृशेष्वपि **कामेषु सक्ता** निस्पन्दामहे, आयुषश्चलतया परलोकगमननिश्चयेऽपि, अतो **भविष्यामो यथेमे** पुरोहिताद्याः, यथैभिश्चलत्वं ज्ञात्वा भोगास्त्यक्तास्तथा वयमपि तांस्त्यक्षामः ॥४५॥

Jain Education International 2010_02   For Private & Personal Use Only   www.jainelibrary.org

ननु कामाऽस्थिरत्वेऽपि सुखहेतुत्वात् किममी त्यज्यन्ते ? इत्याह–

**सामिसं कुललं दिस्सा, बज्झमाणं निरामिसं ।**
**आमिसं सव्वमुज्झित्ता, विहरिस्सामो निरामिसा ॥४६॥**

**व्याख्या**–सहामिषेण वर्त्तते इति **सामिषं कुललं** गृद्ध्रं शकुनिकां वा **दृष्ट्वा बाध्यमानं** पीड्यमानं पक्ष्यन्तरैः, **निरामिषं** च निर्भयं दृष्ट्वा, **आमिषं** सङ्गहेतुं धनधान्यादि**सर्वमुज्झित्वा विहरिष्यामः** अप्रतिबद्धविहारितया **निरामिषा** त्यक्तरागहेतवो वयम् ॥४६॥

उक्तानुवादेनोपदिशति–

**गिद्धोवमे उ नच्चा णं, कामे संसारवद्धणे ।**
**उरगो सुवण्णपासि व, संकमाणो तणुं चरे ॥४७॥**

**व्याख्या**–सामिष**गृद्ध्रोपमान्, तुः** समुच्चये विषयामिषवतो लोकान् **कामांश्च संसारवर्द्धकान् ज्ञात्वा, उरग इव सौपर्णेयपार्श्वे शङ्कमानो** भयत्रस्तः, **तन्विति** स्तोकं, यथा तद्गमनं गरुडो न वेत्तीति, यतनया **चरेः** क्रियासु प्रवर्त्तस्व ? यथा गरुडोपमैर्विषयैस्त्वं न हन्यसे तथा संयमं कुर्वित्यर्थः ॥४७॥

**नागो व बंधणं छित्ता, अप्पणो वसहिं वये ।**
**एयं पत्थं महारायं, उसुयारे त्ति मे सुयं ॥४८॥**

**व्याख्या–नागो** गज **इव बन्धनं छित्वाऽऽत्मनो वसतिं व्रजेः** ! यथायं वरत्रां छित्वात्मनो वसतिं विन्ध्याटवीं याति, एवं त्वं कर्मबन्धनं छित्वा शुद्धजीवस्य वसतिमाश्रयं मुक्तिं व्रजेः, एवं दीक्षायाः फलमुक्तं, उपदिश्य निगमयति–**एतद्यन्मयोक्तं पथ्यं** हितं, **हे महाराज ! इषुकारनामन् !** न तत्स्वधियोच्यते, किन्त्व**तीत्ये**तन्**मया श्रुतं** साधुभ्य इति सूत्रार्थः ॥४८॥

एवं तद्गिरा नृपः प्रबुद्धः–

**चइत्ता विउलं रट्ठं ( रज्जं ), कामभोगे य दुज्जए ।**
**णिव्विसया णिरामिसा णिण्णेहा णिपरिग्गहा ॥४९॥**

**व्याख्या**–राजा राज्ञी च **त्यक्त्वा विपुलं राष्ट्रं** (पाठान्तरे-राज्यं) **कामभोगांश्च दुस्त्यजान्, निर्विषयावत** एव **निरामिषौ**, यद्वा **विषयो** देश**स्तेन रहितौ**, तत्त्यागे कामभोगत्यागे च **निरामिषौ** सङ्गहेतुमुक्तौ **निःस्नेहौ** निःप्रतिबन्धौ **निःपरिग्रहौ** ॥४९॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**सम्मं धम्मं वियाणित्ता, चिच्चा कामगुणे वरे ।**
**तवं पगिज्झ जहक्खायं, घोरं घोरपरक्कमा ॥५०॥**

**व्याख्या–सम्यग्धर्मं** श्रुतचारित्रात्मकं **विज्ञाय, त्यक्त्वा कामगुणान् वरान्,** पुनः कामगुणोक्तिरतिशयज्ञप्त्यै, **तपः प्रगृह्य**ादृत्य, **यथाख्यातं** यथार्हद्भिरुक्तं **घोरं** अत्यन्त-दुरनुचरं, घोरः पराक्रमो धर्मानुष्ठानविषयो ययोस्तौ **घोरपराक्रमौ,** एवंविधौ राज्ञीनृपौ प्राव्रजताम् ॥५०॥

निगमयति–

**एवं ते कमसो बुद्धा, सव्वे धम्मपरायणा ।**
**जम्ममच्चुभयुव्विग्गा, दुक्खस्संतगवेसिणो ॥५१॥**

**व्याख्या–एवम**मुना प्रकारेण **ते** षडपि **क्रमशो**ऽभिहितपरिपाट्या **बुद्धाः सर्वे धर्मपरायणाः** (पाठान्तरे-['**धम्मपरंपर**'त्ति]परम्परया धर्मो येषां ते **परम्पराधर्माः**) परम्पराशब्दस्य व्यत्ययः, साधुदर्शनात् कुमारयोः, तद्वचसः पित्रोः, तद्दर्शनाद्देव्याः, ततो राज्ञः, इति परम्परया धर्माप्तिः, **जन्ममृत्युभयोद्विग्ना, दुःखस्यान्तं गवेषकाः** ॥५१॥

**सासणे विगयमोहाणं, पुव्विं भावणभाविया ।**
**अचिरेणेव कालेणं, दुक्खस्संतमुवागया ॥५२॥**

**व्याख्या–शासने विगतमोहानां** अर्हतां, **पूर्वम**न्यजन्मनि **भावनया** शुभकर्मा-भ्यासेन **भाविताः,** पूर्वोत्तरनिपातस्याऽतन्त्रत्वात्, **अचिरेणै**वाल्पेनैव **कालेन दुःक्ख-स्यान्तं** मोक्षमुपागताः ॥५२॥

मन्दमतिस्मरणायाध्ययनार्थमुपसंहर्त्तुमाह–

**राया सह देवीए, माहणो य पुरोहिओ ।**
**माहणी दारगा चेव, सव्वे ते परिनिव्वुडे ॥५३॥ त्ति बेमि**

**व्याख्या–राजा** इषुकारः **सह देव्या कमलवत्या, ब्राह्मणश्च पुरोहितो** भृगुर्द्विजः, तत्**पत्नी यशा, दारकौ** तत्पुत्रौ, **चैव** पूर्त्तौ, **सर्वे ते परिनिर्वृत्ताः,** कर्माग्न्युपशामत् शीतीभूता मुक्तिं गताः, **इति ब्रवीमी**ति पूर्ववत् ॥५३॥

**इत्यनिदाने चतुर्दशमिषुकारीयाध्ययनमुक्तम् ॥१४॥**

• • •

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

# पञ्चदशं सभिक्षुकमध्ययनम् ॥

अनिदानता च भिक्षोः स्यादिति पञ्चदशं **सभिक्षु**रित्यध्ययनमाह– तत्र भिनत्ति क्षुधं, आर्षत्वात्, भिक्षुरिति निपातः । क्षुधाः इमाः–

**रागद्दोसा दंडा जोगा तह गारवा य कसाया य ।**
**विगहाओ सन्नाओ खुहं सल्ला पमाया य ॥१॥** [ उत्त. नि./गा.३७८ ]

योगा अशुभे कृतकारितानुमतयः, कषायाश्चत्वारो, नोकषायाश्च नव, शेषं स्पष्टम् । एतत्क्षुत्प्रमुक्तो भिक्षुः ॥

अथ सूत्रम्–

**मोणं चरिस्सामि समिच्च धम्मं, सहिए उज्जुकडे नियाणछिन्ने ।**
**संथवं जहेज्ज अकामकामे, अन्नायएसी परिव्वए स भिक्खू ॥१॥**

**व्याख्या–मौनं** श्रामण्यं **चरिष्यामी**त्यभिप्रायेण **समेत्य** प्राप्य **धर्मं** दीक्षां, **सहितो**ऽन्यसाधुभिः, न त्वेकाकी, एकाकित्वस्यागमे निषिद्धत्वात् । उक्तं च–

**एगाणियस्स दोसा, इत्थीसाणे तहेव पडिणीए ।**
**भिक्खविसोहि महव्वय, तम्हाओ सबियए गमणं ॥१॥** [ ओ. नि./गा.४१२ ]

**ऋजुकृतो**ऽशठाशयः, निदानं विषयेच्छात्मकं तच्छिन्नं येन स **छिन्ननिदानः, संस्तवं** पूर्वपश्चात्संस्तविभिस्तैर्मात्राद्यैः परिचयं **जह्यात् । अकामकामो** न कामाभिलाषी, अज्ञातनिजतपस्वितादिगुणेभ्यः कुलेभ्य एषयते ग्रासादिकमित्येवंशीलो **अज्ञातैषी, परिव्रजेद**नियतं विहरेत् । य एवंविधः स **भिक्षुः**, एवं सिंहत्वेन निःक्रम्य सिंहतयैव भिक्षुत्वमुक्तम् ॥१॥

तच्च यथा स्यात्तथाह–

**राओवरयं चरेज्ज लाढे, विरए वेयवियाप्परक्खिए ।**
**पण्णे अभिभूय सव्वदंसी, जे कम्हि वि ण मुच्छिए स भिक्खू ॥२॥**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या**—राग उपरतो निवृत्तो यस्मिंस्तद्**रागोपरतं** यथा भवत्येवं विहरेत्, क्तान्तस्य परनिपातः, अनेन मैथुननिवृत्तिरुक्ता रागाऽविनाभावित्वात्तस्य, यद्वा 'राऊवरयं' **रात्र्युपचरितं** चरेत् भक्षयेत्, इत्यनेन रात्रिभोजननिवृत्तिरुक्ता । **लाढः** सदनुष्ठानतया प्रधानः, **विरतो**ऽसंयमात् निवृत्तः, अनेन असंयमस्याक्षेपात् प्राणातिपातनिवृत्तिः, सा च सावद्यवाग्निवृत्तिरूपत्वाद्वाक्संयमेन मृषावादनिवृत्तिरप्युक्ता । वेदः सिद्धान्तस्तस्य वेदनं, तेनात्मा रक्षितो दुर्गतेरनेनेति **वेदविदात्मरक्षितः, प्राज्ञो** हेयोपादेयबुद्धिमान्, **अभिभूय** परीषहोपसर्गान्, सर्वं प्राणिगणं पश्यत्यात्मवत् प्रेक्षते इत्येवंशीलः, अथवा अभिभूय रागद्वेषौ सर्वं वस्तु समतया पश्यतीत्येवंशीलः **सर्वदर्शी**, यद्वा सर्वं दशति भक्षयतीत्येवंशीलः **सर्वदर्शी** उक्तं हि—"**पडिग्गहं संलिहित्ताणं**" [द.५-२।१] इत्यादि । पुनर्यः कश्चित् (कस्मिंश्चित्) सचित्तादिवस्तुनि **न मूर्च्छितः**, एतेन परिग्रहनिवृत्तिरुक्ता । तद्वांश्च कथमाददीतेति अदत्तादाननिवृत्तिरुक्ता । य एवं मूलगुणान्वितः **स भिक्षुः** स्यादिति ॥२॥

अन्यच्च—

**अक्कोसवहं विइतु धीरे, मुणी चरे लाढे नियमायगुत्ते ।**
**अव्वग्गमणे असंपहिट्ठे, जे कसिणं अहियासए स भिक्खू ॥३॥**

**व्याख्या**—समाहारद्वन्द्वे **आक्रोशवधं विदित्वा**, स्वकर्मफलमेतदिति मत्वा **धीरो**ऽक्षोभ्यः सम्यक्सोढेत्यर्थः, **मुनिश्चरेत्** अप्रतिबद्धविहारेण, **लाढः** क्रियापरो **नित्यं** सदा, गुप्तो रक्षितोऽसंयमस्थानेभ्य आत्मा येन स **आत्मगुप्तः**, यद्वा न करपादादिविक्षेपकृत्, अव्यग्रमसंमजसचिन्तोपरतं मनोऽस्येत्य**व्यग्रमनाः, असंप्रहृष्ट** आक्रोशदानादिषु न प्रहर्षवान्, एवंविधो यः **कृत्स्नमा**क्रोशवध**मध्यास्ते** सहते **स भिक्षुः** ॥३॥

किञ्च—

**पंतं सयणासणं भइत्ता, सीउण्हं विविहं च दंसमसगं ।**
**अव्वग्गमणे असंपहिट्ठे, जे कसिणं अहियासए स भिक्खू ॥४॥**

**व्याख्या**—**प्रान्तं** अवमं **शयनासनं** अन्नं वस्त्रादि च **भुक्त्वा** सेवित्वा, शीतं चोष्णं सेवित्वा, **विविधं च दंशमशकं** मत्कुणाद्यं च प्राप्येत्यध्याहार्यं । **अव्यग्रमनाः** स्थिरचित्तः, **असंप्रहृष्टश्च** पूर्ववत्, **यः कृत्स्नमध्यास्ते स भिक्षुः** ॥४॥

**नो सक्कियमिच्छइ न पूयं, णो वि य वंदणगं कुओ पसंसं ।**
**से संजए सुव्वए तवस्सी, सहिए आयगवेसए स भिक्खू ॥५॥**

Jain Education International 2010_02          For Private & Personal Use Only          www.jainelibrary.org

**व्याख्या**–नो **संस्कृतं** अभ्युत्थानाऽनुगमनादिक**मिच्छति, न पूजां** वस्त्राद्यैः, **नापि च वन्दनकं** द्वादशावर्त्तादि, तर्हि **कुतः प्रशंसां** ? निजगुणोत्कीर्त्तनं नैवेच्छतीत्याशयः, **स** एवंविधः, सम्यग् यतते सदनुष्ठानं प्रतीति **संयतः**, अत एव **सुव्रतः** सुव्रतत्वाच्च **तपस्वी** प्रशस्यतपाः, **सहितः** सम्यग्ज्ञानक्रियाभ्यां, यद्वा सह हितेन आयतिपथ्येनाऽनुष्ठानेन वर्त्तते इति **सहितः**, तत एवात्मानं कर्मविगमात् शुद्धं गवेषयति यः स **आत्मगवेषकः**, यद्वा आयः सम्यग्दर्शनादिलाभः, सूत्रत्वादायतो वा मोक्षस्तं गवेषयतीत्**यायगवेषकः, आयत-गवेषको** वा यः **स भिक्षुः** ॥५॥

तथा–

**जेण पुण जहाइ जीवियं, मोहं वा कसिणं णियच्छई ।**
**नरनारिं पजहे सया तवस्सी, न य कोऊहलं उवेइ स भिक्खू ॥६॥**

**व्याख्या–येन** हेतुना, **पुनः**शब्दोऽस्य सर्वथा संयमघातित्वविशेषद्योतकः, **जहाति** त्यजति **जीवितं** संयमजीवितं, **मोहं** मोहनीयं **वा** कषायनोकषायादिरूपं **कृत्स्नं** समस्तं, कृष्णं वाऽशुद्धाशयं, हन्तृतया, **नियच्छति** बध्नाति, तदेवंविधं नरं च नारीं च **नरनारीं प्रजह्यात्**, यः **सदा तपस्वी न च** स **कुतूहलं**, अभुक्तभोगितायां स्त्र्यादिविषयं, उपलक्षणात् भुक्तभोगायां स्मृतिं चोपैति, **स भिक्षुः** ॥६॥

पिण्डविशुद्ध्या सभिक्षुत्वमाह–

**छिण्णं सरं भोममंतलिक्खं, सुमिणं लक्खणदंडवत्थुविज्जं ।**
**अंगवियारं सरस्स विजयं, जो विज्जाहिं ण जीवइ स भिक्खू ॥७॥**

**व्याख्या**–छेदनं छिन्नं, वस्त्रदन्तदार्वादीनां, तद्विषयशुभाशुभनिरूपिका विद्यापि **छिन्नमि**त्युक्ता । एवं सर्वत्र । "**देवेसु उत्तमो लाहो**" इत्यादि कर्दमाञ्जनाद्यैः । तथा स्वरः–

**सज्जं रवइ मयूरो, कुक्कुडो रिसहं सरं ।**
**हंसो रवइ गंधारं, मज्झिमं तु गवेलए ॥१॥** [ ] इत्यादि । तथा–

**सज्जेण लहइ वित्तिं, कयं च ण विणस्सई ।**
**गावो पुत्ता य मित्ता य, नाणीणं होइ वल्लहो ॥२॥** [ ]

**रिसहेण उ ईसरियं, सेणावच्चं धणाणि य ।** [ ] इत्यादि ।

तथा भूमौ भवं **भौमं**, भूकम्पादिलक्षणं, यथा–

**शब्देन महता भूमि-र्यदा रसति कम्पते ।**
**सेनापतिरमात्यश्च, राजा राष्ट्रं च पीड्यते ॥१॥** [ ]

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तथान्तरिक्षमाकाशं, तत्र भव**मान्तरिक्षं**, गन्धर्वपुरादिलक्षणं, यथा–

**कपिलं शस्यघाताय, माञ्जिष्टं हरणं गवां ।**
**अव्यक्तवर्णं कुरुते, बलक्षोभं न संशयः ॥१॥** [ ]

**गन्धर्वनगरं स्निग्धं, प्रासादं च सतोरणं ।**
**सौम्यां दिशं समाश्रित्य, राज्ञस्तद्विजयकरम् ॥२॥** [ ] इत्यादि ।

**स्वप्नगतं** शुभाशुभोक्तिर्यथा–

**गायने रोदनं ब्रूया-न्नर्त्तने वधबन्धनं ।**
**हसने शोचनं ब्रूयात्, पठने कलहं तथा ॥१॥** [ ] इत्यादि ।

**लक्षणं** स्त्रीपुरुषयोर्गजादीनां यथा–

**चक्खुसिणेहे सुहओ, दंतसिणेहे य भोयणं मिट्ठं ।**
**नयणसिणेहे सुक्खं, नहनेहे होइ परमधणं ॥१॥** इत्यादि ।

**दण्डो** यष्टिस्तत्स्वरूपं–"**एगपव्वं पसंसंति**" इत्यादि । **वास्तुविद्या** प्रासादादि-लक्षणवाचिशास्त्रं **अङ्गविकारः** शिरःस्फुरणादिः, "**सिरप्फुरणे किर रज्जं**" इत्यादि । **स्वरस्य** दुर्गाशिवादिकृतस्य **विजयः** शुभाशुभनिरूपणाभ्यासः, यथा–

**गतिस्त्वरा स्वरो वामो, दुर्गायाः शुभदः स्मृतः ।**
**विपरीतः प्रवेशे तु, स एवाभिष्टदायकः ॥१॥** [ ] इत्यादि ।

**दुर्गास्वरत्रयं स्याद्, ज्ञातव्यं शाकुनेन नैपुण्यात् ।**
**चिलिचिलिशब्दः सफलः, सुर्मध्यश्चलचलो विफलः ॥१॥** [ ]

इत्यादिभि**र्विद्याभिर्न जीवति,** नैता एवाजीविकाः प्रकल्प्य **यः** प्राणान् धारयति **स भिक्षुः**, अनेन निमित्तलक्षणोत्पादनादोषपरिहार उक्तः ॥७॥

अथ मन्त्रादि तद्दोषत्यागायाह–

**मंतं मूलं विविहं विज्जचिंतं, वमणविरेयणधूमणेत्तसिणाणं ।**
**आतुरे सरणं तिगिच्छियं च, तं परिण्णाय परिव्वए स भिक्खू ॥८॥**

**व्याख्या–मन्त्रं** ॐकारादि स्वाहापर्यन्तं ह्रींकारादिवर्णात्मकं, **मूलं** सहदेवी-कल्पादि, तत्तच्छास्त्रकृतं मूलकर्म वा विविधं, **वैद्यचिन्तां** वर्जयेत्, विदलं शूलीत्यादि । **वमनं** उद्गीरणं, **विरेचनं** कोष्ठशुद्धिरूपं, **धूमं** मनःशीलादिसम्बन्धि, **नेत्र**शब्देन नेत्रौषधं सुवीराञ्जनादि, **स्नानमन्या**र्थं मन्त्रौषधसंस्कृतजलैः सुब्व्यत्ययाद**आतुरस्य** रोगादिपीडितस्य हा

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

मातारित्यादिस्मरणं, **चिकित्सितं चा**त्मनो रोगप्रतीकाररूपं । **त**दिति यदनन्तरमुक्तं मन्त्राद्युभयपरिज्ञया निजपरपरिज्ञया परिज्ञाय ज्ञपरिज्ञया ज्ञात्वा, प्रत्याख्यानपरिज्ञया च प्रत्याख्याय **परिव्रजेत्** संयमाध्वनि यो यायात् **स भिक्षु**रिति ॥८॥

अन्यच्च—

**खत्तियगण उग्गरायपुत्ता, माहणभोइय विविहा य सिप्पिणो ।**
**नो तेसिं वयइ सिलोगपूइयं, तं परिण्णाय परिव्वए स भिक्खू ॥९॥**

**व्याख्या—क्षत्रियगणा उग्रराजपुत्रा** इति । क्षत्रिया राजानः, गणा मल्लादिसमूहाः, उग्रा आरक्षकाद्याः, राज्ञः पुत्रा राजपुत्राः, **माहनभोगिकाः**, माहना ब्राह्मणाः, भोगेन विशिष्टनेपथ्यादिना चरन्तीति भोगिका नृपामात्याद्याः, उभयत्र सुपो लोपः, **विविधाश्च शिल्पिनः** शतपत्याद्याः, **नैव तेषां वदति श्लोकपूजे** कीर्त्तिपूजने, यथैते भव्या इति तेषां कीर्त्तिः, यथैतान् पूजयतेति तत्पूजोपदेशः, एवमुभयत्र पापानुमत्यादिदोषोत्पत्तेः, एवं **तत्** श्लोकपूजादिकं दूषणात्मकं द्विधापि **परिज्ञाय** परिव्रजेत् यः, **स भिक्षुः**, एवं वनीपकत्व-त्याग उक्तः ॥९॥

अथ संस्तवत्यागः—

**गिहिणो जे पव्वइएण दिट्ठा, अप्पव्वइएण व संथुया हविज्ज ।**
**तेसिं इहलोइयफलट्ठयाए, जो संथवं न करेइ स भिक्खू ॥१०॥**

**व्याख्या—ये गृहिणः प्रव्रजितेन दृष्टाः** परिचिताश्च, अप्रव्रजितेन वा गृहस्थावस्थेन वा **संस्तुताः** परिचिता **भवेयुः**, 'तेसिं'त्ति **तैः सहेहलौकिकफलार्थं** वस्त्रादिलाभार्थं **यः संस्तवं** परिचयं **न करोति स भिक्षुः** ॥१०॥

तथा—

**सयणासणपाणभोयणं, विविहं खाइमसाइमं परेसिं ।**
**अदए पडिसेहिए नियंठे, जे तत्थ न पदूसई स भिक्खू ॥११॥**

**व्याख्या—शयनासनपानभोजनं**, द्वन्द्वः, विविधं खादिमं स्वादिमं, **परै**र्गृहस्था-दिभिः, 'अदए'त्ति **अदद्भिः प्रतिषिद्धो** निराकृतः स **निर्ग्रन्थो** मुक्तद्रव्यभावग्रन्थो **यस्तत्रा-**ऽदाने **न प्रदुष्यति**, पुनर्दास्यतीतिवाचि**क्षपकर्**षिवद्यो द्वेषं न कुर्यात्, **स भिक्षु**रिति । अनेन क्रोधपिण्डत्याग उक्तः, एवं शेषभिक्षादोषत्यागो ज्ञेयः ॥११॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अथ ग्रासैषणादोषत्यागमाह–

**जं किंचि आहारपाणं विविहं, खाइमसाइमं परेसिं लद्धुं ।**
**जो तं तिविहेण णाणुकंपे, मणवयकायसुसंवुडे स भिक्खू ॥१२॥**

**व्याख्या–यत्किञ्चिदल्पमप्याहारपानं** अशनं पानीयं **विविधं खाद्यं स्वाद्यं परेभ्यो लब्ध्वा** यतन्ते, **तेना**हारादिना **त्रिविधेन** मनोवाक्कायै**र्नानुकम्पयेत्** , बालग्लानादीन्नोपकुरुते, न स भिक्षुः, **यस्तु** संवृता वा मनोवाक्काया यस्य स **संवृतमनोवाक्कायः** स बालादीननुकम्पते **स भिक्षुः** ॥१२॥

अत्राङ्गारदोषत्याग उक्तः, धूमत्यागमाह–

**आयामगं चेव जवोदणं च, सीयं सोवीरजवोदगं च ।**
**नो हीलए पिंडं नीरसं तु, पंतकुलाणि परिव्वए स भिक्खू ॥१३॥**

**व्याख्या–आयामकं** अवस्रावणं, **चः** समुच्चये, **एव** पूर्त्तौ, **यवोदनं** यवभक्तं, **शीतं** अन्तप्रान्तं, **सौवीरं** च काञ्जिकं, **यवोदकं** यवधावनं, तच्च **नो हीलयेत्** धिगिदं किमनेनाऽनिष्टेनेति। पिण्डयते गृहिभ्यः प्राप्य मील्यत इति **पिण्डं,** आयामकाद्येव, **नीरसं, तुः** एवार्थे, अत एव **प्रान्तकुलानि** तुच्छाशयगृहाणि दरिद्रगृहाणि वा यः **परिव्रजेत् स भिक्षुः** ॥१३॥

अन्यच्च–

**सद्दा विविहा भवंति लोए, देवा माणुस्सगा तहा तिरिच्छा ।**
**भीमा भयभेरवा उराला, जे सोच्चा ण विहज्जइ स भिक्खू ॥१४॥**

**व्याख्या–शब्दा विविधा** विमर्शप्रद्वेषादिबहुभेदजन्यत्वात् , **भवन्ति लोके, दिव्या** दैवताः, **मानुष्यका** मनुष्यकृतास्तथा **तैरश्चा**स्तिर्यक्कृताः, **भीमा** रौद्रा **भयेन भैरवा** अत्यन्तभयङ्कराः, **उदारा** महान्तः, एवंविधान् शब्दान् **श्रुत्वा यो न व्यथते** न बिभेति, धर्मध्यानान्न चलति वा, **स भिक्षुः** अनेनोपसर्गसहिष्णुत्वं सिंहविहारिताया निमित्तमुक्तम् ॥१४॥

अथ सर्वधर्ममूलसम्यक्त्वस्थैर्यमाह–

**वायं विविहं समेच्च लोए, सहिए खेयाणुगए य कोवियप्पा ।**
**पण्णे अभिभूय सव्वदंसी, उवसंते अविहेडए स भिक्खू ॥१५॥**

**व्याख्या–वादं,** यथा–

मुण्डस्य भवति धर्म-स्तथा जटाभिः सवाससां धर्मः ।
गृहवासेऽपि च धर्मो, वनेऽपि वसतां भवति धर्मः ॥१॥ [ ]

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

स्वस्वदर्शनवाग्भि**र्विविधं समेत्य** ज्ञात्वा, **लोके सहितो** रत्नत्रयेण, खेदयति कर्माननेति खेदः संयमस्तेनानुगतो युक्तः **खेदानुगतः, चः** पूर्त्तौ, कोविदो लब्धशास्त्रतत्त्वतः आत्माऽस्येति **कोविदात्मा 'पण्णे अभिभूय सव्वदंसी'** ति प्राग्वत् । **उपशान्तो अवहेठको** न कस्यचिद्बाधको यः **स भिक्षुः** ॥१५॥

**असिप्पजीवी अगिहे अमित्ते, जिइंदिए सव्वओ विप्पमुक्के ।**
**अणुक्कसाई लहुअप्पभक्खी, चिच्चा गिहं एक्कचरे स भिक्खू ॥१६॥ त्ति बेमि**

**व्याख्या–अशिल्पजीवी** चित्रपत्रच्छेदादिविज्ञानाजीविकारहितः, **अगृहो** गृहस्थ-प्रसङ्गहीनः, **अमित्रोऽ**शत्रुः, **जितेन्द्रियः सर्वतो** बाह्यादभ्यन्तराद्ग्रन्थाद्वि**प्रमुक्तः**, अणवः स्वल्पाः सञ्ज्वलाख्याः कषाया अस्येति **अणुकषायी**, यद्वा**ऽनुकषायो**ऽप्रबलकषायी, अल्पानि लघूनि निःसारतया, निष्पावादीनि भक्षितुं शीलमस्येति **अल्पलघुभक्षी**, सूत्रत्वाद्व्यत्ययः, **त्यक्त्वा** गृहं द्रव्यभावभेदभिन्नं, एको नीरागी असहायो वा चरती-**त्येकचरो** यः **स भिक्षुः**, अनेनैकाकिविहारोऽनुज्ञातः इति समाप्तौ ब्रवीमीति प्राग्वत् ॥१६॥

**इति पञ्चदशं सभिक्षुकमध्ययनमुक्तम् ॥१५॥**

• • •

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

# षोडशं ब्रह्मचर्यसमाधिस्थानाध्ययनम् ॥

भिक्षवो ब्रह्मचर्यस्थाः स्युरतो ब्रह्मगुप्तिज्ञप्त्यै षोडशं **ब्रह्मचर्यसमाधिस्थाना**ध्ययन-माह—ब्रह्मणश्चर्यं सेवनं तेन समाधिश्चित्तस्वास्थ्यं, तस्य स्थानानि निवासहेतवः, तेषा-मध्ययनम्। अत्र निर्युक्तिलेशः—

**बंभंमि (उ) चउक्कं, ठवणाबंभंमि बंभणुप्पत्ती ।**
**दव्वम्मि बत्थिनिग्गहो, अन्नाणीणं मुणेयव्वो ॥१॥** [उत्त. नि./गा.३८१]

ब्रह्मणि नामादिचतुष्कनिक्षेपः स्थापना ब्रह्मणि ब्राह्मणोत्पत्तिः श्री**ऋषभ**कृता वाच्या, **आचाराङ्गनिर्युक्ति**युक्त्या द्रव्य ब्रह्मबस्तिनिग्रहः उपस्थनिरोधमात्रं, अज्ञानिनां मिथ्यादृशां मुणितव्यो ज्ञातव्यः ॥

**भावे (उ) वत्थिनिग्गहो, नायव्वो तस्स रक्खणट्ठाए ।**
**ठाणाणि ताणि वज्जिजज्ज, जाणि भणियाणि अज्झयणे ॥२॥** [उत्त. नि./गा.३८२]

भावे ब्रह्मज्ञानिनां बस्तिनिग्रहो ज्ञातव्यस्तस्य रक्षणाय च स्त्र्यादियुक्तवसत्यादीनि तानि स्थानानि वर्जयेत्, यानि अध्ययने भणितानि ।

अथ सूत्रम्—

**सुअं मे आउसं तेणं भगवया एवमक्खायं, इह खलु थेरेहिं भगवंतेहिं दसबंभचेरसमाहिठाणा पन्नत्ता ॥**

**व्याख्या—सुधर्मा जम्बूमाह—श्रुतं मया आयुष्मन्! तेन भगवता एवमाख्यातं,** ब्रह्मचर्यं त**थेह** प्रवचने **खलु स्थविरै**र्गणधराद्यै**र्भगवद्भिर्दश ब्रह्मचर्यगुप्तिस्थानानि प्रज्ञप्तानि** । कोऽर्थः? नैषामियं स्वबुद्धिः, किं त्वर्हतः पार्श्वे श्रुत्वा सूत्रतो बद्धानि तान्येव विशिनष्टि ॥१॥

**जे भिक्खू सोच्चा णिसम्म संजमबहुले संवरबहुले समाहिबहुले गुत्ते गुत्तिंदिए गुत्तबंभयारी सया अप्पमत्ते विहरेज्जा ॥**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या–यानि भिक्षुः श्रुत्वा** शब्दतो, **निशम्या**वधार्यार्थतः, बहुलः प्रभूत उत्तरोत्तरस्थानाप्त्या संयमोऽस्येति, सूत्रत्वा**द्बहुलसंयमः**, संवर आश्रवनिरोधस्तद्बहुलो **बहुलसंवरः**, तत एव बहुला समाधिश्चित्तस्वास्थ्यं यस्य स **बहुलसमाधिः, गुप्तो** मनोवाक्कायैः, तत एव गुप्तानि विषयप्रवृत्तितो रक्षितानीन्द्रियाणि येन स **गुप्तेन्द्रियः**, तत एव गुप्तं नवगुप्तिसेवनात् ब्रह्मेति ब्रह्मचर्यं चरितुं शीलमस्येति **गुप्तब्रह्मचारी, सदा** सर्वकालं **अप्रमत्तो विहरेत्** अप्रतिबद्धविहारितया चरेत् । एतेन संयमबहुलत्वादि-दशब्रह्मसमाधिस्थानफलमुक्तं, गुप्तीर्विना संयमाऽभावात् ॥

**कयरे खलु थेरेहिं भगवंतेहिं दस बंभचेरसमाहिठाणा पण्णत्ता ? जे भिक्खू सोच्चा निसम्म संजमबहुले संवरबहुले समाहिबहुले गुत्ते गुत्तिंदिए गुत्तबंभयारी सया अप्पमत्ते विहरेज्जा ? इमे खलु ते थेरेहिं भगवंतेहिं दस-बंभचेरसमाहिठाणा पण्णत्ता, जे भिक्खू सोच्चा निसम्म संजमबहुले संवर-बहुले समाहिबहुले गुत्ते गुत्तिंदिए गुत्तबंभयारी सया अप्पमत्ते विहरेज्जा ॥**

**व्याख्या–जम्बूः** पृच्छति **कतराणि** खलु **इमानि** ? शेषं पूर्ववत् । **सुधर्माह–इमानि खलु** इत्यादि यावत् **सदाऽप्रमत्तो भिक्षुर्विहरे**दिति पूर्ववत् ॥

**तं जहा–विवित्ताइं सयणासणाइं सेविज्जा से निग्गंथे, नो इत्थी-पसुपंडगसंसत्ताइं सयणासणाइं सेवित्ता हवइ से निग्गंथे । तं कहमिति चे आयरियाह ॥**

**व्याख्या–तद् यथे**त्युपन्यासे, **विविक्तानि** स्त्रीपशुपण्डकाद्यनाकीर्णानि **शयनासनानि** स्थानानि च **सेवते,** शयनानि फलकसंस्तारकादीनि, आसनानि पीठपादपुञ्छनादीनि, यः **स निर्ग्रन्थो** भवति । इत्थमन्वयेनोक्त्वा निश्चयार्थममुमर्थं व्यतिरेकेणाह–स्त्रियश्च दिव्या मानुष्या वा, पशवश्चाजैडकादयः, पण्डकाश्च क्लीवानि स्त्रीपशुपण्डकास्तैः संसक्तानि आकीर्णानि **स्त्रीपशुपण्डकसंसक्तानि सेविता**पभोक्ता **भवति स निर्ग्रन्थो न** भवेत् । अथ शिष्य**स्त**दनन्तरोक्तं **कथं ?** कुतो हेतोः ? **इति चेत्** पृच्छेत् तदाऽत्रा**चार्य आह** ॥

**निग्गंथस्स खलु इत्थिपसुपंडगसंसत्ताइं सयणासणाइं सेवमाणस्स बंभयारिस्स बंभचेरे संका वा कंखा वा वितिगिच्छा वा समुप्पज्जेज्जा, भेदं वा लभिज्जा, उम्मायं वा पाउणिज्जा, दीहकालियं वा रोगायंकं भविज्जा,**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**केवलिपण्णत्ताओ धम्माओ भंसिज्जा । तम्हा नो इत्थिपसुपंडगसंसत्ताइं सयणासणाइं सेवित्ता हवइ से निग्गंथे ॥१॥**

**व्याख्या–निग्रन्थस्य खलु स्त्रीपशुपण्डकसंसक्तानि शयनासनानि सेवमानस्य,** अपेर्गम्यत्वात् **ब्रह्मचारिणोऽपि** सततस्तस्य **ब्रह्मचर्ये शङ्का,** किमेताः सेवे उत न ? अथवाऽन्येषां शङ्का स्यात्, यथा किमसावेवं शयनासनसेवी ब्रह्मचारी उत न ? यद्वा स्वस्य स्त्र्याद्यैर्गाढासक्तचित्ततया मिथ्यात्वोदयादेतत्सेवने जिनैर्यो दोष उक्तः स किं भविष्यतीत्येव संशयः **शङ्का, काङ्क्षा** स्त्र्यादीच्छा, **विचिकित्सा** किमेतत्कष्टफलं भावि न वा ? तद्वरमेतदासेवा । **भेदं वा** विनाशं चारित्रस्य **लभेत, उन्मादं वा** कामग्रहं **प्राप्नुयात्, दीर्घकालिकं वा** प्रभूतकालभाविरोगदाहज्वरादयस्तैरातन्कश्चाशुघाती शूलादिः, एवंविधं **रोगातङ्कं भवेत्**, स्त्र्यादीच्छाधिक्यादरोचकत्वं, ततश्च ज्वरादिः स्यात् । **केवलिप्रज्ञप्ताद्धर्मात्** श्रुतचारित्रात् समस्ताद् भ्रस्येत् कर्मोदयात् । यत एवं **तस्मा**दित्यादिनिगमनवाक्यं, **नो स्त्रीपशुपण्डकसंसक्तानि शयनासनानि सेवेते**ति सूत्रार्थः, इत्युक्तं प्रथमं समाधिस्थानम् ॥१॥

अथ द्वितीयमाह–

**नो निग्गंथे इत्थीणं कहं कहित्ता हवइ, से निग्गंथे, तं कहमिति चे आयरियाह–निग्गंथस्स खलु इत्थीणं कहं कहेमाणस्स बंभयारिस्स बंभचेरे संका वा कंखा वा वितिगिच्छा वा समुप्पज्जेज्जा, भेदं वा लभिज्जा, उम्मायं वा पाउणिज्जा, दीहकालियं वा रोगायंकं भविज्जा, केवलिपण्णत्ताओ धम्माओ भंसिज्जा, तम्हा खलु निग्गंथे नो इत्थीणं कहं कहेज्जा ॥२॥**

**व्याख्या–नो स्त्रीणामे**काकिनीनां **कथां** वाक्यप्रबन्धं, यद्वा **स्त्रीणां कथा**, यथा–"**कार्णाटी सुरतोपचारचतुरा लाटी विदग्धा प्रिया**" । इत्याद्या, अथवा जातिकुलरूपनेपथ्यभेदाच्चतुर्द्धा, जातिर्ब्राह्मण्यादि, कुलमुग्रादिः, रूपं महाराष्ट्रिकादिसंस्थानं, नेपथ्यं तत्तद्देशप्रसिद्धं । न तां **कथयिता भवति** यः **स निर्ग्रन्थो,** न त्वन्यः, **तत्कथमिति चेन्निर्ग्रन्थस्य खलु** निश्चयेन **स्त्रीणां कथां कथयतो ब्रह्मचारिणो ब्रह्मचर्ये शङ्का,** इत्यादि प्राग्वत् । तस्मान्न **स्त्रीणां कथां कथयेत्** । उक्तं द्वितीयं स्थानम् ॥२॥

अथ तृतीयमाह–

**नो निग्गंथे इत्थीहिं सद्धिं संनिसिज्जागए विहरेज्जा तं कहमिति, निग्गंथस्स खलु इत्थीहिं सद्धिं संनिसिज्जागयस्स विहरमाणस्स बंभचेरे**

Jain Education International 2010_02                    For Private & Personal Use Only                    www.jainelibrary.org

**संका वा जाव भंसेज्जा, तम्हा खलु नो निग्गंथे इत्थीहिं सद्धिं संनिसिज्जागए विहरिज्जा ॥३॥**

**व्याख्या–नो निर्ग्रन्थः स्त्रीभिः सार्द्धं सन्निषद्या** पीठाद्यासनं, **तद्गतः** स्थितः सन् **विहर्त्ता** अवस्थाता भवति । कोऽर्थः ? स्त्रीभिः सहैकासने नोपविशेत् । उत्थितासु तासु मुहूर्त्तं तत्र नोपविशेत् । शीलवती नारी उत्थिते पुंसि तत्रासने त्रीन् यामान् नोपविशेत्। य एवंविधः **स निर्ग्रन्थः, तत्कथमिति चेदाह**–**निर्ग्रन्थस्य खलु स्त्रीभिः सार्द्धं सन्निषद्यागतस्य विहरतस्तिष्ठतो ब्रह्मचारिण** इत्यादि पूर्ववत् । **अतो नो निर्ग्रन्थः स्त्रीभिः सार्द्धं सन्निषद्यागत** एकासनस्थो **विहरेत्** ॥३॥

अथ तुर्यमाह–

**नो निग्गंथे इत्थीणं इंदियाइं मणोहराइं मणोरमाइं आलोइत्ता निज्झाइत्ता भवइ से निग्गंथे । तं कहमिति चे, निग्गंथस्स खलु इत्थीणं इंदियाइं मणोहराइं जाव निज्झायमाणस्स बंभयारिस्स बंभचेरे जाव भंसिज्जा, तम्हा खलु नो निग्गंथे इत्थीणं जाव निज्झाएज्जा ॥४॥**

**व्याख्या–नो स्त्रीणां** नयनेन्द्रियादीनि, मनोहराणि, मनो हरन्ति दृष्टमात्राणि आक्षिपन्तीति **मनोहराणि,** तथा मनो रमयन्त्यनुचिन्त्यमानान्याह्लादयन्तीति **मनोरमाणि, आलोकिता** सम्मताद् दृष्ट्या, **निर्ध्याता** दर्शनान्तरमतिशयेन चिन्तयिता, यथाऽहो सलवणिमत्वं लोचनयोः, ऋजुत्वं नाशाया इत्यादि । यद्वा आ इषदर्थे, तत **आलोकिता** इषद्दृष्ट्या, **निर्ध्याता** गाढं निरीक्षिता **भवति** यः **स निर्ग्रन्थः** । **तत्कथमिति निर्ग्रन्थस्य खलु स्त्रीणामिन्द्रियाणि** यावत् **सन्निर्ध्यायतः** पश्यतो **ब्रह्मचारिण** इत्यादि प्राग्वत् । **तस्मात् खलु निर्ग्रन्थो नो स्त्रीणां इन्द्रियाणि निर्ध्यायेत्** ॥४॥

अथ पञ्चमसमाधिस्थानमाह–

**नो निग्गंथे इत्थीणं कुडंतरंसि वा, दूसंतरंसि वा, भित्तिंतरंसि वा, कूइयसद्दं वा, रुइयसद्दं वा, गीयसद्दं वा, हसियसद्दं वा, थणियसद्दं वा, कंदियसद्दं वा, विलवियसद्दं वा, सुणेमाणे विहरिज्जा, तं कहमिति आह–निग्गंथस्स खलु इत्थीणं कुडंतरंसि वा जाव कंदितसद्दं वा सुणमाणस्स बंभयारिस्स बंभचेरे संका वा कंखा वा जाव भंसेज्जा, तम्हा खलु नो निग्गंथे इत्थीणं कुडंतरंसि जाव सुणेमाणो विहरेज्जा ॥५॥**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या**–**नो स्त्रीणां** कुड्यं लेष्टुकादिरचितं, तेनान्तरं व्यवधानं **कुड्यान्तरं तस्मिन्**, वा **दुष्यान्तरे** यवनिकान्तरे, **भित्तिः** पक्वेष्टिकादिरचिता, **तदन्तरे,** स्थित्वेति शेषः, **कूजितशब्दं** स्त्रियो रतसमये कोकिलादिपक्षिरवतुल्यं ध्वनिं, **रुदितशब्दं** रतिकलहादिषु, गीतशब्दं पञ्चमादिहुङ्कृति, **हसितशब्दं** कहकहादिकं, **स्तनितशब्दं** रतसमये कृतं, क्रन्दितशब्दं प्रोषितभर्तृकादिकृतं, **विलपितशब्दं** विलापशब्दं गुणै रुदितं। **वा** सर्वत्र विकल्पार्थः, **शृण्वन् विहरेत्** तिष्ठेत् यः **स निर्ग्रन्थः । तत्कथमिति चेन्निर्ग्रन्थस्य स्त्रीणां कुड्यान्तरादौ** शब्दं **शृण्वतो ब्रह्मचारिणः**, शेषं प्राग्वत् । **तस्मान्निर्ग्रन्थः स्त्रीणां कुड्यान्तरे यावत्** कुजितादि **शृण्वन् न विहरेत्** ॥५॥

अथ षष्ठमाह–

**नो निग्गंथे इत्थीणं पुव्वरयं पुव्वकीलियं अणुसरित्ता भवइ, तं कहमिति चे, निग्गंथस्स खलु इत्थीणं पुव्वरयं पुव्वकीलियं अणुसरमाणस्स जाव भंसेज्जा, तम्हा खलु निग्गंथेण इत्थीणं पुव्वरयं पुव्वकीलियं वा जाव नो अणुसरिज्जा ॥६॥**

**व्याख्या**–**नो निर्ग्रन्थः पूर्वं** गृहस्थत्वे **रतं** स्त्र्याद्यैः सह विषयानुभवनं, **पूर्वक्रीडितं** ताभिरेव द्यूतादि वाऽ**नुस्मर्त्ता**ऽनुचिन्तयिता **भवेत** । **तत्कथं** ? आचार्यः प्राह–**निर्ग्रन्थस्य खलु स्त्रीणां पूर्वरतादि स्मरत** इत्यादि प्राग्वत् । **तस्मान्नो निर्ग्रन्थः स्त्रीणां पूर्वं** गृहस्थत्वे **रतं पूर्वक्रीडितं स्मरेत्** ॥६॥

अथ सप्तममाह–

**नो पणीयं आहारं आहरित्ता भवइ से निग्गंथे, तं कहमिति चे, पणीयं पाणभोयणं आहारेमाणस्स बंभचारिस्स बंभचेरे तहेव निक्खेवो, तम्हा खलु नो निग्गंथे पणीयं आहारं आहरेज्जा ॥७॥**

**व्याख्या**–**नो** नैव **प्रणीतं** गलत्स्नेहबिन्दुमन्यमप्यत्यन्तधातूद्रेककारिणम्- [**आहारम्**]आहारयिता **भवति** यः **स निर्ग्रन्थः**, तत्कथं ? आचार्यः प्राह–**निर्ग्रन्थस्य प्रणीतमाहारमाहारयितुर्ब्रह्मचारिणः**, शेषं स्पष्टं प्राग्वच्च, **तस्मात् खलु नो निर्ग्रन्थः प्रणीतमाहारमाहरेत्** ॥७॥

अथाष्टममाह–

**नो अइमायाए पाणभोयणं आहारित्ता हवइ से निग्गंथे, तं कहमिति**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**चे, अइमायाए पाणभोयणं आहारेमाणस्स बंभयारिस्स बंभचेरे तहेव निक्खेवो, तम्हा नो निग्गंथे अइमायाए पाणभोयणं भुंजिज्जा ॥८॥**

**व्याख्या—नो अतिमात्रया,** द्वात्रिंशत्कवला नराणां, अष्टाविंशतिः स्त्रीणामित्यागमोक्त**मात्रातिक्रमेण पानभोजनमाहारयिता** भवति यः **स निर्ग्रन्थः । तत्कथं** ? आचार्यः प्राह—**अतिमात्रया पानभोजनमाहारयितुर्ब्रह्मचारिणः**, शेषं स्पष्टं प्राग्वच्च । **तस्मान्नो निर्ग्रन्थोऽतिमात्रया पानभोजनं भुञ्जीत** ॥८॥

अथ नवममाह—

**नो विभूसाणुवाइ भवइ से निग्गंथे, तं कहमिति चे, विभूसावत्तिए विभूसियसरीरे इत्थीजणस्स अहिलसणिज्जो भवइ, तओ णं तस्स इत्थीजणेण अहिलसिज्जमाणस्स बंभयारिस्स बंभचेरसंका, जाव तम्हा खलु नो निग्गंथे विभूसावत्तिए भविज्जा ॥९॥**

**व्याख्या—नो** निर्ग्रन्थो **विभूषणानुवादी** शरीरोपकरणादिषु स्नानधावनादिभिः संस्कारकर्त्ता **भवति, तत्कथं** ? आचार्य प्राह—विभूषां विर्त्तयितुं शीलमस्येति **विभूषावर्त्तिको** भवेदित्यादि, स एव **विभूषितशरीरः** स्नानाद्यलङ्कृततनुः **स्त्रीजनस्याभिलषणीयः** प्रार्थनीयो **भवति, ततस्तस्य स्त्रीभिरभिलषणीयस्य ब्रह्मचारिण** इत्यादि स्पष्टं प्राग्वच्च । **तस्मान्न निर्ग्रन्थो विभूषावर्त्तिको भवेदिति** ॥९॥

अथ दशममाह—

**नो निग्गंथे सद्दाणुवाई, रूवाणुवाई, गंधाणुवाई, रसाणुवाई, फासाणुवाई भविज्जा, तं कहमिति चे, निग्गंथस्स खलु सद्दाणुवाईयस्स जाव तम्हा खलु नो निग्गंथे सद्दाणुवाई जाव फासाणुवाई हविज्जा ॥१०॥**

**व्याख्या—**नैव, **शब्दो** मन्मनभाषितादिः, **रूपं** कटाक्षनिरीक्षणादि चित्रादिगतं वा स्त्र्यादिसम्बन्धि, **गन्धः** सुरभिः, **रसो** मधुरादिः, **स्पर्शो**ऽनुकूलः कोमलमृणालादेः, एतानभिष्वङ्गहेतून् अनुपतति मनोवाक्कायैराश्रयतीत्येवंशीलः **शब्दरूपगन्धरसस्पर्शानुपाती भवेत् । तत्कथमिति चेद् निग्रन्थस्य शब्दानुपातिनो ब्रह्मचारिण** इत्यादि स्पष्टं प्राग्वच्च । **तस्मान्नो निर्ग्रन्थः शब्दानुपातीत्यादि भवेत्** ॥१०॥

**दसिमे बंभचेरसमाहिठाणा भवंति, इत्थ सिलोगो ॥ तं जहा—**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या**–इमानि पूर्वोक्तानि **दश ब्रह्मचर्यसमाधिस्थानानि** भवन्ति। अथात्र तेषां सर्वेषां दशानां समाधिस्थानानां सङ्ग्रह**श्लोकान्** पद्यरूपानाह–**तद्यथा**–

**जं विवित्तमणाईण्णं, रहियं इत्थीजणेण य।**
**बंभचेरस्स रक्खट्ठा, आलयं तु निसेवए ॥१॥**

**व्याख्या**–'जं'ति प्राकृतत्वात् **यो विविक्तो** रहसि स्थितस्तत्रैव, वास्तव्यस्त्र्याद्यभावात्। **अनाकीर्णः** कार्यागतस्त्र्याद्यसङ्कुलः, **रहितो**ऽकालचारिणा वन्दनश्रवणादिनिमित्तागतेन **स्त्रीजनेन, चात्** पण्डकषिङ्गाद्यै रहितः, कालाकालचारित्वविभागः श्रमणीराश्रित्यायं–

**अट्ठमीपक्खिए मोत्तुं, वायणाकालमेव।**
**सेसकालमइंतीओ, नेयाओ अकालचारिओ ॥१॥** [ पा. स./गा.३५ ]

**ब्रह्मचर्यस्य रक्षणार्थमालयो** 'लिङ्गव्यत्ययः प्राकृतत्वात्' **तुः** पूर्त्तौ, साधुस्तमनन्तरोक्तमालयं **निषेवते** ॥१॥

**मणपल्हायजणणीं, कामरागविवड्ढणीं।**
**बंभचेररओ भिक्खू, थीकहं तु परिवज्जए ॥२॥**

**व्याख्या–मनःप्रह्लादजननीं, कामरागस्य** विषयरागस्य **विवर्द्धनीं**, एवंविधां **स्त्रीकथां** यथा "**तद्वक्तुं यदि मुद्रिता शशिकथा**" इत्यादिकां **ब्रह्मचर्यरतो भिक्षुर्विवर्जयेत्** ॥२॥

**समं च संथवं थीहिं संकहं च अभिक्खणं।**
**बंभचेररओ भिक्खू निच्चं सो परिवज्जए ॥३॥**

**व्याख्या–स्त्रीभिः समं** सह **संस्तवं** परिचयं, निषद्यया एकासनगभोगेन, सङ्कथां स्त्रीभिः समं सन्ततभाषणं **अभीक्ष्णं** पुनः पुनः, **ब्रह्मचर्यरतो भिक्षुर्नित्यं परिवर्जयेत्** ॥३॥

**अंगपच्चंगसंठाणं चारुल्लवियपेहियं।**
**बंभचेररओ थीणं, चक्खुगिज्झं विवज्जए ॥४॥**

**व्याख्या–अङ्गानि** शिरःप्रभृतीनि, **प्रत्यङ्गानि** कुचकक्षादीनि, **संस्थानं** कटीनिविष्टकरादिसन्निवेशं, चारु उल्लपितं मन्मनभाषितादि, प्रेक्षितमर्द्धकटाक्षादि, इति **चारूल्लपितप्रेक्षितं, ब्रह्मचर्यरतो** मुनिः **स्त्रीणां चक्षुर्ग्राह्यं** सदपि **विवर्जयेत्**। कोऽर्थः ? चक्षुषि सति रूपग्रहणमवश्यं भावि, परं न रागवशतः पुनः पुनरस्तदवेक्ष्यं, उक्तं च–

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

असक्को रूवमद्दट्ठुं, चक्खुगोयरमागयं ।
रागदोसे य जे तत्थ, ते बुहो परिवज्जए ॥१॥ [ श्रा.प्र./गा.१६ वृ. ] ॥४॥

**कूइयं रुइयं गीयं, हसियं थणिय कंदियं ।**
**बंभचेररओ थीणं, सोयगिज्झं विवज्जए ॥५॥**

**व्याख्या–कूजितादि** प्राग् व्याख्यातं, स्त्रीणां कृतं विवर्जयेत्, कुड्यान्तरादिषु जायमानं **श्रोत्रग्राह्यं** सत्, तत्र ध्यानाऽकरणेन **ब्रह्मचर्यरतो विवर्जयेत्** ॥५॥

**हासं किड्डं रइं दप्पं, सहसा वित्तासियाणि य ।**
**बंभचेररओ थीणं, नाणुचिंते कयाइ वि ॥६॥**

**व्याख्या–हास्यं, क्रीडां** द्यूतरमणात्मिकां, **रतिं** कान्ताङ्गसङ्गजां प्रीतिं, **दर्पं** मानिनीमानदलनोत्थं गर्वं, **सहसा वित्रासितानि च,** पराङ्मुखभार्यादेः सपदि त्रासोत्पादकानि अक्षिस्थगनमर्मघट्टनादीनि । (पाठान्तरे–**हस्सं दप्पं रइं किड्डं । सह भुत्तासियाणि य** अत्र **स्त्रीभिः सार्द्धं भुक्तानि** भोजनानि, **आसितानि** स्थितानि) **ब्रह्मचर्यरतः स्त्रीणां** तानि पूर्वकृतानि **नाऽनुचिन्तयेत् कदाचिदपि** ॥६॥

**पणीयं भत्तपाणं तु, खिप्पं मयविवड्ढणं ।**
**बंभचेररओ भिक्खू णिच्चसो परिवज्जए ॥७॥**

**व्याख्या–प्रणीतं भक्तं पानं क्षिप्रं मदस्य** कामोद्रेकस्य **विवर्द्धनं,** शेषं प्राग्वत् ॥७॥

**धम्मं लद्धं मियं काले, जत्तट्ठा पणिहाणवं ।**
**नाइमत्तं तु भुंजिज्जा, बंभचेररओ सया ॥८॥**

**व्याख्या**–धर्मादनपेतं **धर्म्यं** एषणीयमित्यर्थः, **लब्धं** गृहिभ्यः, न तु स्वयमेवोपस्कृतं (पाठान्तरे–'**धम्मलद्धं**'ति–धर्मेण हेतुना धर्मलाभेन वा न तु सुकुलादिकारणेन लब्धं **धर्मलब्धं**) (पाठान्तरे–'**धम्मं लद्धुं**'–**धर्मं** क्षमाद्यं **लब्धुं** प्राप्तुं) कथं ममायं निरतिचारः स्यादिति । **मितं,**

अद्धमसणस्स सवंजणस्स, कुज्जा दव्वस्स दो भाए ।
वायपवियारणट्ठा, छब्भागं ऊणगं कुज्जा ॥१॥ [ प्र.सा./गा.८६७ ]

इत्यागमोक्तमानान्वितमाहरं **काले** प्रस्तावे, **यात्रार्थं** संयमनिर्वाहार्थं, न तु रूपाद्यर्थं, **प्रणिधानवां**श्चित्तस्वास्थ्योपेतो, न तु रागद्वेषवशतो भुञ्जीत, **तुः** एवार्थे, **नातिमात्रं** मात्रातिक्रान्तं **भुञ्जीत, ब्रह्मचर्यरतः सदा** कदाचित् कारणतोऽतिमात्राहारोऽप्यदुष्टः ॥८॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**विभूसं परिवज्जिजज्जा, सरीरपरिमंडणं ।**
**बंभचेररओ भिक्खू, सिंगारत्थं न धारए ॥९॥**

**व्याख्या**–**विभूषां** उपकरणगतामुत्कृष्टवस्त्राद्यां **परिवर्जयेत्**, **शरीरपरिमण्डनं** नखकेशश्मश्रुसमारचनादि **ब्रह्मचर्यरतो भिक्षुः शृङ्गारार्थं** विलासार्थं **न धारयेन्न** कुर्यात् ॥९॥

**सद्दे रूवे य गंधे य, रसे फासे तहेव य ।**
**पंचविहे कामगुणे णिच्चसो परिवज्जए ॥१०॥**

**व्याख्या**–**शब्दा रूपाणि गन्धा रसाः स्पर्शाः, तथैव च पञ्चविधाः** कामस्य गुणाः साधनभूताः **कामगुणास्तान् नित्यं परिवर्जयेत्** ॥१०॥

यत् प्राक् प्रत्येकमुक्तं, शङ्का वा स्यादित्यादि तद् दृष्टान्ततः स्पष्टयति–

**आलओ थीजणाइन्नो, थीकहा य मणोरमा ।**
**संथवो चेव नारीणं, तासिं इंदियदरिसणं ॥११॥**

**कूइयं रुइयं गीयं, हसियं भुत्तासियाणि य ।**
**पणीयं भत्तपाणं च, अइमायं पाणभोयणं ॥१२॥**

**गत्तभूसणमिट्ठं च, कामभोगा य दुज्जया ।**
**नरस्सऽत्तगवेसिस्स, विसं तालपुडं जहा ॥१३॥**

**व्याख्या**–**आलयः स्त्रीजनाकीर्णः, संस्तवः** परिचयः, स चेहाप्येकासनभोगेन, **कूजितादीनि हसितपर्यन्तानि** कुड्यान्तरादिस्थितस्त्रीणां, **भुक्तासितानि** स्मृतानि, तत्र पूर्वभुक्तानि भोगरूपाणि, आसितानि स्त्र्याद्यैः सहाऽवस्थितानि, हास्यादीनि च, **गात्रभूषणं, इष्टं** ध्यातं, आस्तां कृतं, **कामाः** शब्दरूपाणि, **भोगा** गन्धाद्याः, **कामभोगा** अपीष्टा **दुर्जयाः, नरस्य** स्त्र्यादेश्च**आत्मगवेषिणः, विषं तालपुटं** सद्योघातीति, यत्रौष्ठपुटान्तर्वर्त्तिनि तालमात्रकालविलम्बतो मृत्युर्जायते । **यथैत**द्विपाकदारुणं, तथा स्त्रीजनाकीर्णालयाद्यपि, शङ्कादिकरणात्, संयमजीवितस्यायुषश्च नाशहेतुत्वात् ॥११॥१२॥१३॥

उपदेशे पुनरुक्तत्वात् सर्वहितं उपदिशति–

**दुज्जए कामभोगे य, निच्चसो परिवज्जए ।**
**संकाट्ठाणाणि सव्वाणि, वज्जिजज्जा पणिहाणवं ॥१४॥**

**व्याख्या**–**दुर्जयान् कामभोगान् नित्यं परिवर्जयेत्, शङ्कास्थानानि** चानन्तरो-

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

क्तानि **सर्वाणि** दशापि **वर्जयेत्**, अन्यथाऽनवस्थामिथ्यात्वविराधनादोषसम्भवः, **प्रणिधानवाने**काग्रमनाः ॥१४॥

**धम्मारामे चरे भिक्खू, धितिमं धम्मसारही ।**
**धम्मारामरए दंते, बंभचेरसमाहिए ॥१५॥**

**व्याख्या**—धर्म आराम इव दुःखसन्तापतप्तानां निर्वृतिहेतुतयेष्टफलदानतश्च **धर्मारामस्तस्मिंश्चरेत्**, यद्वा धर्मे आ सम्मताद् रमते इति **धर्मारामः**, स **चरेत्** संयमाध्वनि यायाद् **भिक्षुः**, धृतिश्चित्तस्वास्थ्यं **तद्वान्**, स चैवं **धर्मसारथि**धर्मे प्रवर्त्तयिता, धर्मे आरमन्ते इति धर्मारामाः सुसाधवस्तेषु रतो, नत्वेकाकित्वे, **धर्मारामरतो**, **दान्त** उपशान्तः, **ब्रह्मचर्ये समाहितः** समाधानवान् ॥१५॥

अथ ब्रह्ममाहात्म्यमाह—

**देवदाणवगंधव्वा, जक्खरक्खसकिन्नरा ।**
**बंभयारिं नमंसंति, दुक्करं जे करिंति तं ॥१६॥**

**व्याख्या**—**देवा** ज्योतिष्कवैमानिकाः, **दानवा** भवनपतयः, **गन्धर्वा यक्षराक्षस-किन्नरा** व्यन्तराद्या भूतपिशाचमहोरगकिंपुरुषा अपि **ब्रह्मचारिणं** यतिं श्राद्धं च **नमस्यन्ति**, **दुष्करं** कातरजनदुरनुचरं **यः करोति तद्** ब्रह्मचर्यम् ॥१६॥

**एस धम्मे धुवे निअए, सासए जिणदेसिए ।**
**सिद्धा सिज्झंति चाणेणं, सिज्झिसंति तहावरे ॥१७॥ त्ति बेमि**

**व्याख्या**—**एषो**ऽनन्तरोक्तो **धर्मो** ब्रह्मचर्याख्यो **ध्रुवः** स्थिरः परवादिभिरकम्प्यः प्रमाणप्रतिष्ठितः, **नित्य**स्त्रिकालसम्भवात्, **शाश्वतो**ऽनवरतभवनात्, एकार्थिकान्येतानि नानादेशजविनेयानुग्रहार्थमुक्तानि, **जिनैर्देशितः**, **सिद्धाः** पुरा अनन्ता उत्सर्पिण्यवसर्पिणीषु, **सिद्ध्यन्ति** च, **चः** समुच्चये, **महाविदेहे** इहापि, तत्कालापेक्षया**ऽनेन** ब्रह्मचर्येण **सेत्स्यन्ति**, **तथा परे**ऽन्येऽनन्तायामनागताद्धायां । **इति** समाप्तौ, **ब्रवीमी**ति प्राग्वत् ॥१७॥

**इति षोडशं ब्रह्मचर्यसमाधिस्थानाध्ययनमुक्तम् ॥१६॥**

• • •

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

# सप्तदशं पापश्रमणीयाध्ययनम् ॥

ब्रह्मचर्यगुप्तयः पापस्थानवर्जनात् सेव्यन्ते इति **पापश्रमणा**ख्यं सप्तदशाध्ययनं पापस्थानज्ञापि, तद्वर्जनायाह–

**जे केइ उ पव्वइए नियंठे, धम्मं सुणित्ता विणओववन्ने ।**
**सुदुल्लहं लहिउं बोहिलाभं, विहरिज्ज पच्छा य जहासुहं तु ॥१॥**

**व्याख्या**–यः **कश्चित्**, तुः पूर्त्तौ, **प्रव्रजितो निर्ग्रन्थः**, कथं पुनः प्रव्रजितः ? इत्याह–**धर्मं** श्रुतचारित्ररूपं **श्रुत्वा**, **विनयेन** ज्ञानदर्शनाचरित्रोपचाराख्ये**नोपपन्नो** युक्तः सन्, **सुदुर्लभं लब्ध्वा बोधिलाभं** जैनधर्माप्तिं, एवं भावप्रतिपत्त्याऽसौ दीक्षितः सन् **विहरेत्**, पश्चाद्दीक्षोत्तरकाले, **च** पुनः सिंहवृत्त्या प्रव्रज्य **पश्चात्** तुरेवार्थे, **यथा सुख**मेव निद्राविकथाद्यैः शृगालवृत्त्या विहरेत् ॥१॥

स गुर्वादिनाऽध्ययनाय प्रेरितो यद्वक्ति तदाह–

**सिज्जा दढा पाउरणंमि अत्थि, उप्पज्जई भोत्तु तहेव पाउं ।**
**जाणामि जं वट्टइ आउसो त्ति, किं नाम काहामि सुएण भंते ॥२॥**

**व्याख्या**–**शय्या** वसतिर्**दृढा**, न वातातपजलाद्युपद्रुता, तथा **प्रावरणं** वर्षाकल्पादि **मेऽस्ति, उत्पद्यते** जायते **भोक्तुमन्नं तथैव पातुं** पानं च । तथा **जानामि यद्वर्त्तते** जीवाजीवादि, ततो **हे आयुष्मन्निति** प्रेरयितुरामन्त्रणं, तत्तस्माद्धेतोः **किं नाम करिष्यामि श्रुतेना**ऽधीतेन ? **भदन्ते**त्यामन्त्रणं । कोऽर्थः ? ये भवन्तोऽधीयन्ते, तेषामपि नाऽतीन्द्रियार्थज्ञानं, तत्किं गलतालुशोषेणेत्याशयः स पापश्रमण इतीहापि सिंहावलोकितन्यायेन गम्यम् ॥२॥

किञ्च–

**जे केइ पव्वइए, निद्दासीले पगामसो भोच्चा ।**
**पेच्चा सुहं सुयइ, पावसमणे त्ति वुच्चइ ॥३॥**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या**—**यः कश्चित् प्रव्रजितो निद्राशीलो** निद्रालुः, **प्रकामशो** बहुशो **भुक्त्वा** दध्योदनादि, **पीत्वा** तक्रादि, **सुखं** यथास्यादेवं सर्वक्रियानिरपेक्षः **स्वपिति** स **पापश्रमण इत्युच्यते** ॥३॥

तथा—

**आयरियउवज्झाएहिं, सुयं विणयं च गाहिए ।**
**ते चेव खिंसइ बाले, पावसमणे त्ति वुच्चइ ॥४॥**

**व्याख्या**—**आचार्योपाध्यायैः**, **श्रुत**मर्थतः शब्दतश्चान्य**द्विनयं ग्राहितः** शिक्षितो यैस्ता**नेवा**चार्यादीन् **खिंसति** निन्दति, एवंविधो **बालो** विवेकविकलो यः स **पापश्रमण इत्युच्यते** ॥४॥

ज्ञानविषयं पापश्रमणमुक्त्वा दर्शनविषयमाह—

**आयरियउवज्झायाणं, सम्मं नो पडितप्पई ।**
**अप्पडिपूयए थद्धे, पावसमणे त्ति वुच्चइ ॥५॥**

**व्याख्या**—**आचार्योपाध्यायानां सम्यग**ऽवैपरीत्येन **न परितृप्यति** न प्रीणयति, **अप्रतिपूजको**ऽर्हदादिषु प्रतिपत्तिविमुखः, अथवोपकृतेऽपि न प्रत्युपकारकारी, **स्तब्धो** गर्वाध्मात आत्मानमेव बहुमन्यते यः स **पापश्रमण इत्युच्यते** ॥५॥

अथ चारित्रविषयं पापश्रमणं नवगाथाभिराह—

**सम्मद्दमाणे पाणाणि, बीयाणि हरियाणि य ।**
**असंजए संजयमन्नमाणो, पावसमणे त्ति वुच्चइ ॥६॥**

**व्याख्या**—**सम्मर्द्दयन्**, प्राणयोगात् **प्राणिनो** द्वीन्द्रियादीन्, **बीजानि** शाल्यादीनि, **हरितानि च** दूर्वादीनि, सर्वैकेन्द्रियोपलक्षणं चैतत् । **असंयतो**ऽपि **संयतो**ऽहमिति **मन्यमानः**, अनेन तस्य संविग्नपाक्षिकत्वमपि नास्तीत्युक्तं । स **पापश्रमण इत्युच्यते** ॥६॥

**संथारं फलगं पीढं, निसिज्जं पायकंबलं ।**
**अप्पमज्जिय आरुहई, पावसमणे त्ति वुच्चइ ॥७॥**

**व्याख्या**—**संस्तारं** कम्बलादि, **फलकं** चम्पकपट्टादि, **पीठमासनं**, **निषद्यां** स्वाध्यायभूम्यादिकां, **पादकम्बलं** पादपुञ्छनं, **अप्रमृज्य** रजोहरणादिना अप्रत्युपेक्ष्य **चारोहते** स **पापश्रमणः** ॥७॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**दवदवस्स चरई, पमत्ते य अभिक्खणं ।**
**उल्लंघणे य चंडे य, पावसमणे त्ति वुच्चइ ॥८॥**

**व्याख्या**–'दवदव'त्ति **द्रुतं द्रुतं चरति,** तथाविधालम्बनं विनापि भिक्षाचर्यादिषु पर्यटति, **प्रमतश्च** स्यात् **अभीक्ष्णं** वारंवार, यद्वा इर्यासमितावनुपयुक्त:, **उल्लङ्घनश्च** बलादीनां यथोचितप्रतिपत्त्यकरणतोऽध:कर्त्ता, अश्ववत् सडिम्भादीनां वा, **चण्ड:** क्रोधेन आरभटवृत्त्या-श्रयाद्वा, स **पापश्रमण:** ॥८॥

**पडिलेहेइ पमत्ते, अवउज्झइ पायकंबलं ।**
**पडिलेहाअणाउत्तो, पावसमणे त्ति वुच्चइ ॥९॥**

**व्याख्या–प्रतिलेखयति प्रमत्तो**ऽनुपयुक्त: सन्, **अपोज्झति** यत्र तत्र मुञ्चति **पादकम्बलं** पादप्रोञ्छनादि, **पात्रकम्बलं** वा, सर्वोपधिप्रतिलेखनाऽनुपयुक्त: **प्रत्युपेक्षा-ऽनुपयुक्त:** स **पापश्रमण:** ॥९॥

**पडिलेहेइ पमत्ते, से किंचि हु निसामिया ।**
**गुरुपरिभासए निच्चं, पावसमणे त्ति वुच्चइ ॥१०॥**

**व्याख्या**–यदा **प्रतिलेखयति** तदा **प्रमत्त:, हु:** अप्यर्थे, **स किञ्चिदपि** विकथादि **निशम्य,** तत्राक्षिप्तचित्ततया तत्करोति । तथा नित्यं गुरून् प्रतिभाषते विवदते इति **गुरुप्रतिभाषक:,** (पाठान्तरे-**गुरुपरिभावक:** गुरुपरिभवकृत्) वितथाचरणेन गुरुभिरुदिते सति वक्ति, स्वयमेव तर्हि तत् कुरुध्वं ? युष्माभिर्वयमित्थं शिक्षितास्ततो वो दोष इत्यादि वदन् स **पापश्रमण उच्यते** ॥१०॥

**बहुमाई पमुहरी, थद्धे लुद्धे अणिग्गहे ।**
**असंविभागी अवियत्ते, पावसमणे त्ति वुच्चइ ॥११॥**

**व्याख्या–बहुमायी** प्रभूतवञ्चनाप्रयोगवान्, प्रकर्षेण मुखर: **प्रमुखर:, स्तब्धो, लुब्ध:, अनिग्रहो**ऽनिग्रहितेन्द्रियद्रियनोइन्द्रिय:, **असंविभागी** गुरुग्लानादीनामपि य आहारादि न यच्छति, 'अवियत्ते'त्ति, गुर्वादिष्व**प्यप्रतीतिमान्**, स **पापश्रमण उच्यते** ॥११॥

**विवायं च उईरेई, अहम्मे अत्तपन्नहे ।**
**वुग्गहे कलहे रत्ते, पावसमणे त्ति वुच्चइ ॥१२॥**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या—विवादं** वाक्कलहं, **चः** पूर्त्तौ, **उदीरयति,** कथञ्चिदुपशान्तमपि मर्म-भाषादिना वृद्धिं नयति, **अधर्मो**ऽसदाचारः, आत्मनि प्रश्न आत्मप्रश्नस्तं हन्ती**त्यात्मप्रश्नहा,** चेत् कश्चित् पृच्छेत् किं भवान्तरयायी अयमात्मा ? इति तमेव प्रश्नं हन्ति, यथा नास्त्यात्मा, प्रत्यक्षादिप्रमाणैरनुपलभ्यत्वात् । यद्वा आप्तां सद्बोधेन हितां प्रज्ञां आत्मनोऽन्येषां वा बुद्धिं, कुतर्कव्याकुलीकरणतो हन्ति यः स **आप्तप्रज्ञहा, व्युद्ग्रहे** दण्डादिघातजे, कलहे वाचिके **रक्तः** स **पापश्रमण उच्यते** ॥१२॥

**अथिरासणे कुक्कुइए, जत्थ तत्थ निसीयइ ।**
**आसणंमि अणाउत्ते, पावसमणे त्ति वुच्चइ ॥१३॥**

**व्याख्या—अस्थिरासनः, कुत्कुचः,** हास्यविकथाचापल्यवान्, **यत्र तत्र** संसक्त-रजस्कादावपि **नीषीदति, आसने अनायुक्तो**ऽनुपयुक्तः, स **पापश्रमणः** ॥१३॥

**ससरक्खपाओ सुयई, सिज्जं न पडिलेहइ ।**
**संथारए अणाउत्ते, पावसमणे त्ति वुच्चइ ॥१४॥**

**व्याख्या—सरजस्कपादः स्वपिति,** कोऽर्थः ? संयमविराधनाया अभीरुः पादाव-प्रमृज्यैव शेते, कारणाद्दिवा रात्रौ वा, **शय्यां** वसतिं **न प्रतिलेखयति,** न च प्रमार्जयति, **संस्तारके** सुप्तोऽ**नायुक्तः,** **"कुक्कुडिपायपसारे, जह आगासे पुणो वि आउंटे"** [ ] इत्याद्यागमार्थाऽनुपयुक्तो भवति स **पापश्रमणः** ॥१४॥

एवं चारित्रविषयं पापश्रमणत्वमुक्त्वा तपोविषयमाह—

**दुद्धदही विगईओ, आहारेइ अभिक्खणं ।**
**अरए य तवोकम्मे, पावसमणे त्ति वुच्चइ ॥१५॥**

**व्याख्या—दधिदुग्धे विकृती**र्घृताद्यशेषविकृती**राहारयति अभीक्ष्णं** वारंवारं, तथा-विधपुष्टालम्बनं विनापि । अत **एवारतो**ऽप्रीतिमांश्च **तपःकर्मण्य**नशनादौ स **पापश्रमणः** ॥१५॥

तथा—

**अत्थंतंमि य सूरंमि, आहारेइ अभिक्खणं ।**
**चोइओ पडिचोएइ पावसमणे त्ति वुच्चइ ॥१६॥**

**व्याख्या—अस्तमयति** यावत्, **चः** पूर्त्तौ, **सूर्ये** उदयादारभ्य प्रातरारभ्य सन्ध्यां यावदभीक्ष्णं [**आहारयति**] भुङ्क्ते, यद्वाऽ**स्तमयति** सूर्ये भुङ्क्ते । किमेकदैव ? इत्याह—

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**अभीक्ष्णं** दिने दिने इति । यदि चासौ केनचिद् गीतार्थसाधुना चोद्यते, यथायुष्मन् ! किमेवं त्वयाऽऽहारयतैव स्थीयते ? दुर्लभेयं नृत्वादिचतुरङ्गी, तपस्येवोद्यतुमर्हः, एवं **नोदितः** स प्रतिनोदयति, यथा ज्ञस्त्वमुपदेशदाने, न तु स्वयं क्रियायां, यत्त्वं विकृष्टं तपो न करोषीति ॥१६॥

**आयरियपरिच्चाइ परपासंडसेवए ।**

**गाणंगणिए दुब्भुए, पावसमणे त्ति वुच्चइ ॥१७॥**

**व्याख्या–आचार्यपरित्यागी,** आहारलोभेन, यथा आचार्या ग्लानादिभ्योऽन्नादि दापयन्ति, मां च तपः कारयन्तीत्यादि दुर्धिया । परपाखण्डान् "**मृद्वी शय्या प्रातः**" [ ] इत्यादिवादिनो **बौद्धा**दीनत्यन्ताहारान् सेवते इति **परपाखण्डसेवकः**, गणाद् गणं षण्मासाभ्यन्तरे सङ्क्रामतीति **गाणङ्गणिकः** । अत एव **दुर्भूतो** दुराचारतया निन्द्यो जातः, स **पापश्रमण उच्यते** ॥१७॥

अथ वीर्याचारविषयमाह–

**सयं गेहं परिवज्ज, परगेहंसि वावडे ।**

**निमित्तेण य ववहरइ, पावसमणे त्ति वुच्चइ ॥१८॥**

**व्याख्या–स्वकं गृहं परित्यज्य** प्रव्रज्याङ्गीकारात्, **परगेहे व्याप्रियते,** पिण्डार्थी सन् तत्कृत्यानि कुर्यात् । **निमित्तेन** शुभाशुभकथनेन **व्यवहरति,** द्रव्यार्जनं कुरुते, गृहिनिमित्तेन वा क्रयविक्रयव्यवहारं करोति, **स पापश्रमणः** ॥१८॥

तथा–

**सन्नाइपिंडं जेमेइ, नेच्छइ सामुदाणियं ।**

**गिहिनिसिज्जं च वाहेइ, पावसमणे त्ति वुच्चइ ॥१९॥**

**व्याख्या**–स्वज्ञातिभिर्निजबन्धुभिः स्नेहाद्दत्तं [**स्वज्ञातिपिण्डं**] **जेमति** भुङ्क्ते, **नेच्छति सामुदानिकं** भैक्ष्यं गृहसत्कमज्ञातोञ्छं, **गृहिनिषद्यां** पर्यङ्कादिकां **वाहयत्या**रोहति, स **पापश्रमणः** ॥१९॥

अध्ययनार्थमुपसंहरन्नुक्तरूपदोषसेवात्यागयोः फलमाह–

**एयारिसे पंचकुसीलसंवुडे, रूवंधरे मुणिपवराण हिट्ठिमे ।**

**अयंसि लोए विसमेव गरहिए, ण से इहं णेव परत्थ लोए ॥२०॥**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या–एतादृश** उक्तस्वरूपः, पार्श्वस्थाद्या ये पञ्च कुशीला ज्ञानाचारादि-विराधकास्तद्वदसंवृतोऽनिरुद्धाश्रवः स **पञ्चकुशीलाऽसंवृतः,** रजोहरणादिवेषं धारयतीति **रूपधरः,** प्राकृतत्वाद्बिन्दुः, **मुनिप्रवराणां हिट्ठिमो**ऽधस्ताद्वर्त्ती, वेषाग्रहाज्जघन्यसंयम-स्थानवर्त्तितया, **अस्मिन् लोके विषमिव गर्हितो** भ्रष्टप्रतिज्ञो जनैर्निन्द्यते धिगेवमिति, अत एव **न स इहे**ति इह लोके, **नापि परत्र लोके,** कोऽर्थः ? तस्य यतिश्राद्धत्वयोर-प्रवेशात् ॥२०॥

**जे वज्जए एए सया उ दोसं, स सुव्वए होइ मुणीण मज्झे ।**
**अयंसि लोए अमयं व पूइए, आराहए लोगमिणं तहा परं ॥२१॥ त्ति बेमि**

**व्याख्या–यो वर्जयत्येतान् सदैव दोषान्** स्वेच्छासुखविहारादिपापाचारान् **स सुव्रतो भवति मुनीनां मध्ये** भावमुनित्वेनासौ गण्यते, **अस्मिन् लोकेऽमृतमिव पूजित आराधयति,** शुभगुणसुगत्याप्त्या द्विविधमिहपरलोकभेदेन **लोकमिमं** प्रत्यक्षं, [**तथा परं** परलोकमिति ।] **इति** समाप्तौ। **ब्रवीमी**ति प्राग्वत् ॥२१॥

**इति पापस्थानवर्जनाय सप्तदशं पापश्रमणीयाध्ययनमुक्तम् ॥१७॥**

• • •

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

# अष्टादशं संयतीयाध्ययनम् ॥

तत्पापस्थानवर्जनं सञ्जयनृप इव भोगत्यागतः कार्यं, ततोऽष्टादशं **सञ्जया-ध्ययनमाह**–

अत्र निर्युक्तिः–

**कांपिल्लपुरवरंमि अ, नामेणं संजओ नरवरिंदो ।**
**सो सेणाए सहिओ, नासीरं निग्गओ कयाइ ॥१॥** [ उ. नि./गा.३९५ ]

नासीरं सैन्यात् पुरः

**हयमारूढो राया, मिए छुहित्ताण केसरुज्जाणे ।**
**ते तत्थ उ उत्तत्थे, वहेइ रसमुच्छिओ संतो ॥२॥** [ उ. नि./गा.३९६ ]

मृगान् छुहित्ता क्षिप्त्वा प्रेर्य

**कंपिल्ले नयरे राया, उइन्नबलवाहणे ।**
**नामेणं संजए नाम, मिगव्वमुवनिग्गए ॥१॥**

**व्याख्या–काम्पील्ये नगरे राजा, उदीर्णमु**दयप्राप्तं **बलं** चतुरङ्गं, **वाहनं** च गिल्लिथिल्यादिरूपं यस्य सः, यद्वा **बलं** शरीरसामर्थ्यं, **वाहनं** गजाश्वादि, **नाम्ना सञ्जयः, नामे**ति प्राकाश्ये, **मृगव्यां** आखेटक**मुपनिर्गतो** निर्यातः पुरात् ॥१॥

कथमित्याह–

**हयाणीए गयाणीए, रहाणीए तहेव य ।**
**पायत्ताणीए महया, सव्वओ परिवारिए ॥२॥**

**व्याख्या–हयानीकेन, गजानीकेन, रथानीकेन, तथैव** पदातीनां समूहः पादान्तं, तस्यानीकं **पादातानीकं तेन,** सुब्व्यत्ययोऽत्र पूर्वेष्वपि, **महता सर्वतः परिवारितः** ॥२॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**मिए छुहित्ता हयगए, कंपिलुज्जाणकेसरे ।**
**भिए संते मिए तत्थ, वहेइ रसमुच्छिए ॥३॥**

**व्याख्या—मृगान् क्षिप्त्वा** प्रेरयित्वा **हयगतो**ऽश्वारूढः **काम्पील्यस्य केसराख्ये उद्याने, भीतांस्त्र**स्तान् 'सतः' **श्रान्तान् मितान्** परिमितांस्**तत्र** तेषु मृगेषु मध्ये 'वहेइ' **विद्धयति हन्ति** वा शरैः, **रसस्त**न्मांसास्वाद**स्तत्र मूर्छितो** गृद्धः ॥३॥

**अह केसरंमि उज्जाणे, अणगारे तवोधणे ।**
**सज्झायज्झाणसंजुत्ते, धम्मज्झाणं झियायइ ॥४॥**

**व्याख्या—अथ केसरे उद्यानेऽनगारस्तपोधनः, स्वाध्यायो**ऽनुप्रेक्षणादिः, **ध्यानं** धर्मध्यानादिः, ताभ्यां **संयुक्तो** यथाकालं तदासेवनात्, अत एव **धर्मध्यानमा**ज्ञाविचयादि स **ध्यायति** ॥४॥

**अप्फोवमंडवंमी, झायती खवियासवे ।**
**तस्सागए मिए पासं, वहेइ से नराहिवे ॥५॥**

**व्याख्या—**'अप्फोव' इति वृक्षाद्याकीर्णः, स चासौ मण्डपश्च **अप्फोवमण्डपो** नागवल्ल्यादिसम्बन्धी, **तस्मिन् ध्यायति** धर्मध्यानं, पुनरभिधानमतिशयख्यापकं, **क्षपिता-श्रवः** स मुनिः । **तस्य** साधोः **पार्श्वमागतान् मृगान् वहइ** हन्ति **स नराधिपः** ॥५॥

ततश्च—

**अह आसगए राया, खिप्पमागम्म सो तहिं ।**
**हए मिए उ पासित्ता, अणगारं तत्थ पासइ ॥६॥**

**व्याख्या—अथ राजाऽश्वगतो** हयारूढः **क्षिप्रं तत्रागत्य** ['**सो**' इति **सञ्जय**नामा] **मृगान् हतान् दृष्ट्वा तत्रा**ऽदूरदेशे**ऽनगारं** साधुं **पश्यति** ॥६॥

पुनश्च—

**अह राया तत्थ संभंतो, अणगारो मणाहओ ।**
**मए उ मंदपुण्णेण, रसगिद्धेण घंतुणा ॥७॥**

**व्याख्या—अथ राजा तत्र सम्भ्रान्तो** भीतो, यथा **अनगारो मना**गिति स्तोके**नाहतो** न मारितः, तदासन्नमृगहननादित्याशयः, **मया तु मन्दपुण्येन रसगृद्धेन** 'घंतुण'ति **घातकेन** हननशीलेन ॥७॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**आसं विसज्जइत्ताणं, अणगारस्स सो निवो ।**
**विणएण वंदए पाए, भगवं एत्थ मे खमे ॥८॥**

**व्याख्या–अश्वं विसृज्य** विमुच्य **अनगारस्य स नृपः सञ्जयो विनयेन वन्दते पादौ,** वक्ति च यथा हे **भगवन् ! अत्र** मृगवधे **मे**ऽपराधं **क्षमस्व** ! ॥८॥

**अह मोणेण सो भगवं, अणगारे झाणमस्सिओ ।**
**रायाणं न पडिमंतेइ, तओ राया भयद्दुओ ॥९॥**

**व्याख्या–अथे**त्यनन्तरं **मौनेन स गर्द्दभालि**नामाऽ**नगारो ध्यानं** धर्मध्यान**माश्रितः** स्थितो **राजानं न प्रतिमन्त्रयति,** न प्रतिवक्ति, यथाहं क्षमिष्ये न वेति । **ततो राजा भयद्रुतो** यथा न ज्ञायते किमेष क्रुद्धः कर्त्ता ! ॥९॥

उक्तवांश्च–

**संजओ अहमस्सीति, भयवं वाहराहि मे ।**
**कुद्धे तेएण अणगारे, दहिज्ज नरकोडिओ ॥१०॥**

**व्याख्या–सञ्जयो** राजाह**मस्मि,** मा भून्नीचोऽयं कोऽपीत्यस्य कोप इत्येतत्कथनं । **इति** हेतो**र्हे भगवन् ! व्याहर** 'मे' **मां** जल्पय ! सुब्व्यत्ययान्मां, **क्रुद्धस्तेजसा** तपोमाहात्म्यतेजोलेश्यादिना**ऽनगारो दहन्नरकोटी**रतोऽत्यन्तं भीतोऽहम् ॥१०॥

इत्थं तेनोक्ते मुनिराह–

**अभयं पत्थिवा तुब्भं, अभयदाया भवाहि य ।**
**अणिच्चे जीवलोगंमि, किं हिंसाए पसज्जसि ॥११॥**

**व्याख्या–हे पार्थिव ! अभयं तुभ्यं, अभयदाता च भव** ! यथा भवतो मृत्युभयं तथान्येषामपि । अमुमेवार्थं व्यतिरेकेणाह–**अनित्ये जीवलोके** प्राणिगणे **किं हिंसायां प्रसजसि** ? जीवलोकस्याऽनित्यत्वे भवानप्यनित्यस्तत्किमल्पदिनकृते नरकहेतुरियं कर्त्तुं योग्या ? ॥११॥

अन्यच्च–

**जया सव्वं परिच्चज्ज, गंतव्व अवसस्स ते ।**
**अणिच्चे जीवलोगंमि, किं रज्जंमि पसज्जसि ॥१२॥**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या**—यदा **सर्वं** कोशान्तःपुरादि **परित्यज्य गन्तव्यं** भवान्तरमिति, **अवशस्या**ऽस्वतन्त्रस्य ते, तदा **अनित्ये जीवलोके किं राज्ये प्रसजसि** ? ॥१२॥

अनित्यत्वं दर्शयति—

**जीवियं चेव रूवं वा, विज्जुसंपायचंचलं ।**
**जत्थ तं मुज्झसी रायं, पच्चत्थं नावबुज्झसि ॥१३॥**

**व्याख्या**—**जीवितं चैव रूपं च**, विद्युत्सम्पातो विद्युच्चलनं तद्वच्चञ्चलं **विद्युत्सम्पातचञ्चलं**, **यत्र** जीविते रूपे च **त्वं मुह्यसे हे राजन्**! परं **प्रेत्यार्थं** परलोकार्थं **नावबुद्ध्यसे**, जानास्यपि न, किं पुनस्तत्करणम् ? ॥१३॥

**दाराणि य सुया चेव, मित्ता य तह बंधवा ।**
**जीवंतमणुजीवंति, मयं नाणुव्वयंति य ॥१४॥**

**व्याख्या**—**दाराश्चैव सुताश्चैव मित्राणि च तथा बान्धवा जीवन्तमनुजीवन्ति**, तदुपार्जितवित्ताद्युपभोगेनोपजीवन्ति, **मृतं नानुव्रजन्त्यपि**, **च**स्य अप्यर्थत्वात् । अतः कथं ते सहायाः स्युः ? इत्यतः कृतघ्नेषु नास्था कार्येति भावः ॥१४॥

पुनस्तद्रागवारणायाह—

**नीहरंति मयं पुत्ता, पियरं परमदुक्खिया ।**
**पितरो वि तहा पुत्ते, बंधू रायं तवं चरे ॥१५॥**

**व्याख्या**—**निस्सारयन्ति मृतं पुत्राः पितरं परमदुःखिता** अपि, **पितरोऽपि तथा पुत्रान्**, **बन्धवश्च** बन्धून्, ततो **हे राजन् ! तपश्चरे**रासेवस्व ! ॥१५॥

**तओ तेणज्जिए दव्वे, दारे य परिरक्खिए ।**
**कीलंतण्णे नरा राया, हट्ठतुट्ठमलंकिया ॥१६॥**

**व्याख्या**—**ततो** निस्सारणानन्तरं **तेनैव** पित्रादि**नार्जिते द्रव्ये**, **दारेषु च परिरक्षितेषु**, तेनैव द्रव्येण दारैश्च **अन्ये नरा हृष्टतुष्टालङ्कृताः**, हृष्टा बहिः पुलकादिना, तुष्टा अन्तःप्रीत्या, अलङ्कृता विभूषिताः सन्तो **हे राजन् ! क्रीडन्ति** । यत ईदृशी भवस्थिति-स्ततो राजन्स्तपश्चरेरिति सम्बन्धः ॥१६॥

मृते युक्तिमाह—

**तेणावि जं कयं कम्मं, सुहं वा जइ वा दुहं ।**
**कम्मुणा तेण संजुत्तो, गच्छइ उ परं भवं ॥१७॥**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या–तेनापि** मृतेन **यत्कृतं कर्म शुभं वा यदि** वेत्यथा**ऽशुभं, तेनैव कर्मणा,** न तु दुःखरक्षितेन धनादिना, **संयुक्तो गच्छति परं भवं** । ततः शुभहेतुतप एव चरेदिति भावः ॥१७॥ इति सूत्रसप्तकार्थः ॥

ततः–

**सोऊण तस्स सो धम्मं, अणगारस्स अंतिए ।**
**महया संवेगनिव्वेयं, समावण्णो नराहिवो ॥१८॥**

**व्याख्या–श्रुत्वा तस्याऽनगारस्यान्ते स** राजा **धर्मं**, सुब्व्यत्ययान्**महत्संवेगनिर्वेदं** मोक्षेच्छाभावोद्विग्नतारूपं **समापन्नो नराधिपः** ॥१८॥

**संजओ चइउ रज्जं, निक्खंतो जिणसासणे ।**
**गद्दभालिस्स भगवओ, अणगारस्स अंतिए ॥१९॥**

**व्याख्या–सञ्जयो** राजा **त्यक्त्वा राज्यं निष्क्रान्तः** प्रव्रजितो **जिनशासने गर्दभालेर्भगवतोऽनगारस्यान्तिके** ॥१९॥

स प्रव्रज्य गीतार्थो भूत्वा दशधा समाचारीज्ञो गुरावादेशादेकत्वं प्रपन्नोऽनियतं विहरन् कश्चित् सन्निवेशमागात्, तत्र–

**चिच्चा रट्ठं पव्वइओ, खत्तिओ परिभासई ।**
**जहा ते दीसइ रूवं, पसन्नं ते तहा मणो ॥२०॥**

**व्याख्या–त्यक्त्वा राष्ट्रं** ग्रामादिसमुदायं, **प्रव्रजितो** निष्क्रान्तः कश्चित् **क्षत्रियः** क्षत्रियजातिरनिर्दिष्टनामा स्वश्च्युतो जातजातिस्मृतिः परिभाषते तं **सञ्जय**मुनिं प्रति । स हि क्षत्रियः पूर्वभवे वैमानिक आसीत्ततश्च्युतः क्षत्रियकुले जातः, तत्र च कुतश्चिन्निमित्तात् स्मृतपूर्वजन्मा, तत एवोत्पन्नवैराग्यः प्रव्रज्यां गृहीत्वा विहरंश्च **सञ्जय**मुनिं दृष्ट्वा तत्परीक्षार्थमिदं जगौ । **यथा दृश्यते तव रूपं प्रसन्नं** विकाररहितं, **तथा ते मनो**ऽपि प्रसन्नं सम्भवति, यतोऽन्तःकालुष्ये हि बहिरेवं प्रसन्नत्वाऽसम्भवात् ॥२०॥

**किं नामे किं गुत्ते, कस्सट्ठा एव माहणे ।**
**कहं पडियरसी बुद्धे, कहं विणीए त्ति वुच्चसि ॥२१॥**

**व्याख्या**–तथा ते **किं नाम ? किं गोत्रं ? कस्मै चार्थाय माहनः** प्रव्रजितः ? **कथं** केन प्रकारेण **प्रतिचरसि** सेवसे **बुधाना**चार्यादीन् ? **कथं विनीतो** दक्ष इत्युच्यसे ? ॥२१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सञ्जयमुनिराह–

**संजओ नाम नामेणं, तहा गुत्तेण गोयमो ।**
**गद्दभाली ममायरिया, विज्जाचरणपारगा ॥२२॥**

**व्याख्या–सञ्जयो नामा नाम्ना, तथा गोत्रेण गौतमो**ऽहं, **गर्द्दभालयो** ममाचार्याः, **विद्या** श्रुतज्ञानं, **चरणं** चारित्रं, **तयोः पारगाः** सर्वश्रुतसर्वक्रियावन्त इत्यर्थः, तैश्चाचार्यैरहं जीवघातान्निवर्त्तितः, तन्निवृत्तौ च मुक्तिफलमुक्तं, तदर्थं चाहं माहनोऽस्मि, तथा तदुपदेशं गुरूंश्च प्रतिचरामि, तदुपदेशाच्च विनीतो जातोऽस्मि ॥२२॥

अथ तद्गुणाकृष्टचेता अपृष्टोऽपि क्षत्रियमुनिराह–

**किरियं अकिरियं विणयं, अन्नाणं च महामुणी ।**
**एतेहिं चउहिं ठाणेहिं, मेयन्ने किं पभासई ॥२३॥**

**व्याख्या–क्रिया**ऽस्तीत्येवंरूपा, प्राकृतत्वान्नपुंस्त्वं सर्वत्र, **अक्रिया** तद्विपरीता, **विनयो** नमस्कारादिः, **अज्ञानं** तत्त्वाऽनवगमः, चः समुच्चये, **हे महामुने ! एतैः** क्रियादिभि**श्चतुर्भिः स्थानै**र्मिथ्यास्थानैर्मिथ्याध्यवसायाधारैः, 'मेयन्ने' मेयं जीवादिवस्तु, तज्जानन्तीति **मेयज्ञाः,** एतैर्वस्तुतत्त्वपरिच्छेदिन इत्यर्थः, कुतीर्थ्याः **किमि**ति कुत्सितं **प्रभाषन्ते,** विचाराऽक्षमत्वादे-कान्तवादस्य । तथाहि–ये **क्रियावादिन**स्तेऽस्तिक्रियाविशिष्टमात्मानं मन्यमाना अपि विभुरविभुः, कर्त्ताऽकर्त्ता, मूर्त्तोऽमूर्त्त इत्येवमाद्याग्रहोपहतप्रीतयस्तेऽस्ति माता पितास्ति न कुशलाऽकुशल-कर्मवैफल्यं, [न] सन्ति गतयः, इत्येवं प्रतिज्ञाश्च । इह च विभुत्वं तदात्मनो न घटते, देह इव तल्लिङ्गभूतचैतन्योपलब्धेः, न च वक्तव्यमात्मनोऽव्यापित्वे "**सुखदुःखबुद्धीच्छाद्वेषप्रयत्नधर्मा-धर्मसंस्कारा नवात्मगुणा**" [ ] इति वचनात्, गुणयोर्धर्माधर्मयोरप्यव्यापित्वं, न च वाच्यं द्वीपान्तरागतदेवदत्ताऽदृष्टाकृष्टमणिमुक्तादीनामिहागमनं स्यादिति । विभिन्नदेशस्याप्यस्कान्तादेरयः-प्रभृतिवस्त्वाकर्षणशक्तिदर्शनात्, धर्माधर्मयोरपि शरीरमात्रव्यापित्वे तद्वत् विप्रकृष्ट-वस्त्वाकर्षत्वादिति न विभुरात्मा युज्यते । तथा विभुरप्यङ्गुष्ठपर्वाद्यधिष्ठानो यैरिष्यते तेषां सर्वदेह-स्यापि चैतन्याऽसत्त्वं, तदसत्वाच्च शेषाङ्गावयवेषु शस्त्रादिभेदादौ वेदनाननुभवो, न चैतद् दृष्टमिष्टं वा, एवं सदा कर्तृत्वादिकमपि यथा न युज्यते तथा स्वधिया वाच्यम् ।

ये **त्वक्रियावादिन**स्तेऽस्तीतिक्रियाविशिष्टमात्मानं नेच्छन्त्येव, अस्तित्वे वा शरीरेण सहैकत्वाऽन्यत्वाभ्यामवक्तव्यमिच्छन्ति, एकत्वे ह्यविनष्टशरीरावस्थितौ न कदाचिन्मरण-प्रसक्तिरात्मनः शरीरानन्यत्वेनावस्थितत्वात्, तथा मुक्त्यभावादनेकदोषापत्तिश्च । शरीरान्यत्वे तु शरीरच्छेदादौ तस्य वेदनाऽभावप्रसङ्गः, तस्मादवक्तव्य एवेति, अक्रियावादित्वं चैषां

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

कथञ्चिद्भेदाभेदलक्षणप्रकारान्तराभावेन तदभावस्यैव शिक्ष्यमाणत्वात् । येऽप्युत्पत्त्यनन्तरमेवात्मनः प्रलयमिच्छन्ति तेषामपि तदस्तित्वाभ्युपगमेऽप्यनुचरितपरलोकाद्यसम्भवात्तत्वतस्तदसत्त्वमेव, इत्यक्रियावादित्वमुक्तं हि **वाचकैः**—

**"ये पुनरिहाऽक्रियावादिनस्तेषामात्मैव नास्ति, न चावक्तव्यः, शरीरेण सहैकत्वान्यत्वे प्रति उत्पत्त्यनन्तरप्रलयस्वभावको वा तस्मिन्ननिर्णीते च कर्तृत्वादिविशेषमूढा एव"** [ ] इति, अमीषां तु विचाराऽक्षमत्वमात्मास्तित्वस्य योगिप्रत्यक्षचैतन्यानुमानलक्षणद्वयगम्यत्वं, तस्य च शरीराद्भिन्नाभिन्नरूपतया व्यक्तत्वं । क्षणिकपक्षस्तु सामुच्छेदिकनिह्नववादे एवोन्मूलितत्वादिति ।

**विनयवादिनो** विनयादेव मुक्तिमिच्छन्ति । यत उक्तं—**"वैनयिकवादिनो नाम येषां सुरासुरनृपतपस्विकरितुरगहरिणगोमहिष्यजाविकश्वशृगालजलचरकपोतकाकोलूकचटकप्रभृतिभ्यो नमस्कारकरणात् क्लेशनाशोऽभिप्रेतो, विनयात् श्रेयो भवति नान्यथेत्यधिवासिताः"** [ ] तेऽपि न विचारसहाः, न हि विनयमात्रादिहापि विशिष्टानुष्ठानविकलादिष्टार्थाप्तिरीक्ष्यते, नापि चैषां विनयार्हत्वं येन पारलौकिकाश्रयो हेतुता भवेत्, तथाहि—लोकसमयवेदेषु गुणाभ्याधिकस्यैव विनयार्हत्वमिति प्रसिद्धिः, गुणास्तु तत्त्वतो ज्ञानध्यानानुष्ठानात्मका एव, न च सुरादीनामज्ञानाश्रवाऽविरमणादिदोषदूषितानामेतेष्वन्यतरस्यापि गुणस्य सम्भव इति कथं यदृच्छया विधीयमानस्य तस्याश्रयो हेतुतेति ।

**अज्ञानवादिनस्त्वाहुः**—यथेदं जगत् ब्रह्मादिविवर्त्त इष्यते, अन्यैः प्रकृतिपुरुषात्मकं, अपरैर्द्रव्यादिषट्भेदं, तदपरैश्चतुरार्यसत्यात्मकं, इतरैर्विज्ञानमयमन्यैस्तु शून्यमेवेत्यनेकधा भिन्नाः पन्थानः, तथात्मापि नित्यानित्यादिभेदतोऽनेकधोच्यते, तत् को ह्येतद्वेद ? किं वाऽनेन ज्ञातेन ? अपवर्गं प्रत्यनुपयोगित्वात् ज्ञानस्य, केवलं कष्टं तप एवानुष्ठेयं, न हि कष्टं विनेष्टसिद्धिः तत्राऽज्ञानवादिनां विचाराऽसहत्वं, विज्ञानरहितस्य महतोऽपि कष्टस्य तिर्यग्नारकादीनामिवापवर्गस्य प्रत्ययहेतुत्वात्, तदन्तरेण व्रततपोऽपवर्गादीनामपि स्वरूपाऽज्ञानात् क्वचित् प्रवृत्त्यसम्भवादिति, एतेषां च क्रियावादिनामुत्तरोत्तरभेदतोऽनेकविधत्वं, तत्र शतमशीतिः क्रियावादिनः, अक्रियावादिनश्चतुरशीतिः, अज्ञानिकाः सप्तषष्टिविधाः, वैनयिकवादिनो द्वात्रिंशत्, एवं त्रिषष्ट्यधिकशतत्रयं । सर्वेऽप्यमी कुत्सितं प्रभाषन्त इति ॥२३॥

न चैतत्स्वाभिप्रायेणोच्यते, किन्तु—

**इइ पाउकरे बुद्धे, नायए परिनिव्वुए ।**
**विज्जाचरणसंपन्ने, सच्चे सच्चपरक्कमे ॥२४॥**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या—इत्येतत्** क्रियावादिनः कुत्सितं प्रभाषन्ते इत्येवंरूपं **प्रादुरकार्षीत् बुद्धः** सन् **ज्ञातको महावीरः परिनिर्वृतः** कषायाग्न्यभावाच्छीतीभूतो न तु सिद्धः, ततो राजर्ष्यभावात् **विद्याचरणाभ्यां** क्षायिकज्ञानचारित्राभ्यां **सम्पन्नः** सहितोऽत एव **सत्यः** सत्यवाक्, **सत्यपराक्रमः** सत्यवीर्यः ॥२४॥

तेषां फलमाह—

**पडंति नरए घोरे, जे नरा पावकारिणो ।**
**दिव्वं च गइं गच्छंति, चरित्ता धम्ममारियं ॥२५॥**

**व्याख्या—पतन्ति नरके घोरे ये नराः** स्त्र्यादयोऽपि, पापं असत्प्ररूपणैव तत्कर्त्तुं शीलमेषां ते **पापकारिणः**, ये त्वेवंविधा न स्युस्ते **दिव्यां च** पुन**र्गतिं गच्छन्ति, चरित्वा धर्म**मिह सत्प्ररूपणारूप**मार्यं** । अतः सत्प्ररूपणापरेणैव भवता भाव्यमिति भावः ॥२५॥

कथममी पापकारिण इत्याह—

**मायावुइयमेयं तु, मुसाभासा निरत्थिया ।**
**संजममाणो वि अहं, वसामि इरियामि य ॥२६॥**

**व्याख्या**—मायया शाठ्येनोक्तं **माययोक्तमेवैतत्** क्रियत्वाद्युक्तं, **तुः** एवार्थे, ततश्चै-तन्**मृषा** [**भाषा**] **निरर्थका** सत्यार्थशून्या, ततः, **अपिः** एवार्थे, **संयमच्छन्ने**वोपरमन्नेव निवर्त्तयन्नेव तदुक्त्याकर्णनात्, **अह**मित्यात्मनिर्देशो विशेषतस्तत्स्थिरीकरणार्थं "**ठियओ ठावए परं**" इति **वसामि** तिष्ठाम्युपाश्रये, **ईर्ये गच्छामि** गौचरादौ ॥२६॥

यतः—

**सव्वे ते वेइया मज्झं, मिच्छादिट्ठी अणारिया ।**
**विज्जमाणे परे लोए, सम्मं जाणामि अप्पगं ॥२७॥**

**व्याख्या—सर्वे ते** क्रियावादिनो **विदिता मम**, यथामी **मिथ्यादृष्टयः**, तत एवा**ऽनार्या** अनार्यकर्मप्रवृत्ताः, यतो **विद्यमाने परे लोके**ऽन्यजन्मनि सति **सम्यगात्मानं जानाम्य**न्यजन्मत आगतं, ततः परलोकात्मनोः सम्यग्वेदनान्ममैते वेदितास्ते, ततोऽहं तदुक्त्या तान्मिथ्यात्विनोऽपाकुर्वे ॥२७॥

कथमित्याह—

**अहमासि महापाणे, जुइमं वाससओवमे ।**
**जा सा पाली महापाली, दिव्वा वरिससओवमा ॥२८॥**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या–अहमभूवं महाप्राणे** ब्रह्मलोकविमाने **द्युतिमान्** वर्षशतजीवितोपमा यस्यासौ **वर्षशतोपमः**, कोऽर्थः ? यथेह वर्षशतजीवीदानीं पूर्णायुरुच्यते, एवमहमपि तत्र परिपूर्णायुरभूवं । तथा **या सा पालि**रिव पालिर्जीवितजलधारणात् भवस्थितिः, सा चेह पल्यमाना, **महापाली** तु सागरोपममाना, दिवि भवा **दिव्या, वर्षशतैः** केशोद्धार-हेतुभिरुपमा पल्यविषया यस्याः सा **वर्षशतोपमा,** तत्र महापाली दिव्या भवस्थिति-र्दशाब्ध्युपमासीत् ॥२८॥

**से चुए बंभलोगाओ, माणुसं भवमागए ।**
**अप्पणो य परेसिं च, आउं जाणे जहा तहा ॥२९॥**

**व्याख्या–सो**ऽहं **च्युतो ब्रह्मलोकान्मानुष्यं भवमागतः**, इत्थमात्मनो जाति-स्मरणाशयमुक्त्वाऽतिशयान्तरमाह–**आत्मनश्च परेषां चायुर्जाने, यथा** येन प्रकारेण स्यात्त**त्तथै**व नत्वन्यथा ॥२९॥

इत्थं प्रसङ्गतोऽपृष्टमपि स्ववृत्तमुक्त्वोपदिशति–

**नाणारुइं च छंदं च, परिवज्जिज्ज संजए ।**
**अणट्ठा जे य सव्वत्था, इइ विज्जामणुसंचरे ॥३०॥**

**व्याख्या–नानारुचिं** क्रियावाद्यादिमतविषयामिच्छां, **छंदश्चा**शयं, इहापि नानेति-सम्बन्धादनेकविधं **परिवर्जयेत् संयतः**, तथा **अनर्था** अनर्थहेतवो **ये च सर्वार्था** हिंसा-दयस्तान् वर्जयेत्, यद्वा 'सव्वत्था' इति आकारस्याऽलाक्षणिकत्वात् **सर्वत्र** क्षेत्रादा**वनर्था** निःप्रयोजना ये व्यापारास्तान् वर्जयेत् । **इत्येवं**रूपां **विद्यां** सत्याम**नुलक्षीकृत्य सञ्चरेत्** स्वयं संयमाध्वनि ॥३०॥

अन्यच्च–

**पडिक्कमामि पसिणाणं, परमंतेहिं वा पुणो ।**
**अहो उट्ठिए अहोरायं, इइ विज्जा तवं चरे ॥३१॥**

**व्याख्या–प्रतिक्रमामि** प्रतिनिवर्त्ते, सुब्व्यत्ययात् **प्रश्नेभ्यः** शुभाशुभसूचकेभ्योऽ-गुष्ठप्रश्नादिभ्यः, परे गृहस्थास्तेषां मन्त्राः **परमन्त्रा** गृहिकार्यालोचास्**तेभ्यः, वा** समुच्चये, **पुनर्वि**शेषेणेति सावद्यत्वं तेषां विशिनष्टि । **अहो** इति विस्मये **उत्थितो** धर्मं प्रत्युद्यतः कश्चिदेव हि महात्मैवंविधः स्यादहोरात्रमित्येतदनन्तरोक्तं **विद्वान्** जानंस्**तप** एव, न तु प्रश्नादि **चरेत्** ॥३१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अथ **सञ्जय**मुनिनोक्तं कथमायुर्वेत्सीति पृष्टोऽसावाह–

**जं च मे पुच्छसी काले, सम्मं सुद्धेण चेयसा ।**
**ताइं पाउकरे बुद्धे, तं नाणं जिणसासणे ॥३२॥**

**व्याख्या–यच्च** 'मे' इति **मां पृच्छसि काले** कालविषयमायुर्विषयं **सम्यक् शुद्धेन चेतसा**, 'ताइं'ति **तत्प्रादुष्करोम्यहं बुद्धः** सर्वज्ञः श्रुतादिज्ञानी, ततश्च यत्किञ्चिदिह प्रचरति **ज्ञानं तज्जिनशासने**ऽस्ति, न त्वन्यस्मिन् **सुगता**दिशासने, ततोऽहं तत्र स्थितस्तत्प्रसादाद्बुद्धोऽभूवं, यच्च त्वं पृच्छसि तदहं प्रतिक्रान्तप्रश्नादिरपि वच्मि, पृच्छ यथेच्छम् ! एवं संयतेनायुःपृष्टस्तदुत्तरं दत्वा क्षत्रिय ऊचे, यथाहं जानामि तथा त्वमपि जानीषेऽर्हन्मतात्, तस्माज्जैनमते एव यत्नः कार्यः ॥३२॥

पुनरुपदिशति–

**किरियं च रोयए धीरे, अकिरियं परिवज्जए ।**
**दिट्ठिए दिट्ठिसंपन्नो, धम्मं चर सुदुच्चरं ॥३३॥**

**व्याख्या–क्रिया चा**स्ति जीव इत्यादिकां, सदनुष्ठानाद्यां वा **रोचयेद्धीरो**ऽक्षोभ्यः, **अक्रियां** नास्त्यात्मेत्याद्यां मिथ्यादृक्कल्पिततत्तदनुष्ठानं वा **परिवर्जयेत्** । **दृष्ट्या** सम्यग्दर्शनेन युता **दृष्टिर्बुद्धिः** सम्यग्ज्ञानं, **तया सम्पन्न** एवं सम्यग्दर्शनज्ञानान्वितः सन् **धर्मं** चारित्रधर्मं **चर ! सुदुश्चरम**त्यन्तदुरनुष्ठेयम् ॥३३॥

पुनः **क्षत्रियमुनिः सञ्जय**मुनिं महापुरुषदृष्टान्तैः स्थिरीकरोति–

**एयं पुण्णपयं सोच्चा, अत्थधम्मोवसोहियं ।**
**भरहो वि भारहं वासं, चिच्चा कामाइं पव्वए ॥३४॥**

**व्याख्या**–एतदनन्तरोक्तं पुण्यहेतुत्वात् पुण्यं [तच्च तत्] पद्यतेऽनेनार्थ इति **पदं** [च **पुण्यपदं**,] क्रियावादिनानारुचिवर्जनाद्यावेदकं शब्दसन्दर्भं **श्रुत्वा**, **अर्थो**ऽर्थ्यमानतया स्वर्गमोक्षादिः, **धर्म**स्तदुपायभूतः श्रुतधर्मादिः, **ताभ्यामुपशोभितं । भरत**चक्र्यपि **भारतं वर्षं** क्षेत्रं **त्यक्त्वा कामांश्च**, सूत्रत्वात् क्लीबत्वं, **प्राव्राजीत्**, अत्र **भरत**दृष्टान्तो वाच्यः । अत्र निर्युक्तिः–

**आयंसघरपवेसो, भरहे पडणं च अंगुलीयस्स ।**
**सेसाणं उम्मुयणं, संवेगो नाण दिक्खा य ॥१॥** [ आ. नि./गा.४३६ ]

केवलादनु इन्द्रो ज्ञानेनैत्य तेनात्ते च लिङ्गे तस्मै अनमत् । दशनृपसहस्रैः सह दीक्षा, केवलित्वे विहारो**ऽष्टापदे** मासानशनान्मुक्तिः ॥३४॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**सगरो वि सागरंतं, भरहवासं नराहिवो ।**
**इस्सरियं केवलं हिच्चा, दयाए परिनिव्वुओ ॥३५॥**

**व्याख्या–सगरोऽपि सागरान्तं** अब्धिप्रान्तं दिग्विजये औदिच्यां हिमवदन्तं **भरत-वर्षं, चैश्वर्यं केवलं** परिपूर्णं **हित्वा नराधिपो दयया** संयमेन **परिनिर्वृतो** मुक्तः ॥

यथाऽ**योध्यायां ईक्ष्वाकु**वंशे **जितशत्रु**राजाभूत्, तस्या भ्राता **सुमित्रविजयो** युवराजः, **विजयायशोमत्यौ** तयोर्भार्ये, **विजया**याश्चतुर्दशस्वप्नैः सूचितः श्री**अजित**स्तीर्थ-कृत्सुतः, **यशोम**त्याश्च **सगर**चक्री सुतः, तौ यौवने राट्कन्याः परिणीतौ, कालेऽ**जितं** राज्ये, **सगरं** च युवराजे संस्थाप्य **जितशत्रुसुमित्रविजयौ** दीक्षितौ सिद्धौ च । श्री**अजितः सगरं** राज्येऽभिषिच्य प्रव्रज्य केवलीभूय सिद्धः । अत्र निर्युक्तिः–

**अजियस्स कुमारत्तं, अट्ठारसपुव्वसयसहस्साइं ।**
**तेवन्नं पुव्वंगं, रज्जे पुव्वंगऊणलक्खवयं ॥१॥** [ आ. नि./गा.२७८ ]

**सागरः** पूर्वाङ्गाधिक७१पूर्वलक्षैरुत्पन्नचतुर्दशरत्नो जितषट्खण्डो **भारत**राज्यं चक्रे । जातास्तस्य षष्टिसहस्राणि सुताः, तेषु ज्येष्ठो **जह्नुकुमारो** राज्ञोऽनुमत्या समस्तबन्धुयुक् पृथ्वीं पश्य**न्नष्टापदं** प्राप्य तदधः सैन्यं निवेश्य सुरसान्निध्यात्तच्छिरोऽधिरुह्य **भरत**कारितचतुर्विंशतिजिनबिम्बानि नत्वा स्तूपादींश्च दृष्ट्वा मन्त्रिमुखात् स्वपूर्वजकारितं च तद् ज्ञात्वोचे भो वीक्षध्वमेतत्सममन्याद्रिं, ततो राजनरैः सर्वां क्ष्मां निभाल्योचे स्वामिन्नास्तीदृशोऽद्रिः, ततोऽस्यैव राक्षां कुर्म इति सर्वे चक्रिपुत्रा **जह्नुमुख्या दण्ड-**रत्ने**नाष्टापदे** परितः परिखां चक्रुः, तदा दण्डरत्नं सहस्रयोजनानि दर्भवद्धुवम्भित्वाऽधो व्यन्तरभवनान्यगात्, भिन्नानि च तद्भवनानि । तदद्भुतं दृष्ट्वा भीता **नागाः** शरणाय **ज्वलनप्रभ**व्यन्तरेन्द्रं गताः, उक्तः स्वोदन्तः, इन्द्रः **सगर**सुतानेत्योचे, भो ! व्यन्तरलोकः सोपद्रवो भवति, किमेतदारब्धमनात्मज्ञैर्भवद्भिः ? ततो **जह्नुना** मृदूचे भो इन्द्र ! **अष्टापद**तीर्थरक्षणार्थं परिखा कृता, नाऽथ कुर्म इदृक्, कुरु प्रसादं ! क्षमस्व मन्तुं ! सोऽकोपो गतः स्थानं, अथ **जह्न्वा**दिभिः परिखा जलपूर्णास्त्विवति **दण्ड**रत्नेन **गङ्गा** वालयित्वानीता, जलैः पूर्णा परिखा, मृज्जलपूरो गतो भवनेषु, त्रस्तो व्यन्तरलोकः, **ज्वलनप्रभो**ऽवधिना तज्**जह्न्वा**दिकृतं ज्ञात्वा क्रुद्धा दृग्विषा**न्नागकुमारान्** स्वसङ्गति-कांस्तत्र प्रैषीत् । तैर्ज्वलन्नैत्रैरीक्षिता **जह्नु**मुखाः सर्वे भस्मीभूताः, मन्त्रिसामन्ताः ससैन्याः प्रस्थिता **अयोध्यां** प्राप्ता मन्त्रयन्ति स्म, कुमारान् मुक्त्वैता राज्ञः किं मुखं दर्शयामो वह्नावेव प्रविशाम इति ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अत्रान्तरे देवः कोऽपि द्विजरूपः समेत्य वह्निप्रविशतस्तान्निषिध्योवाच युष्माभी राज्ञोऽन्ते समेतव्यं, न च भेतव्यमित्युक्त्वाऽनाथमृतकमेकमादाय मुष्टोऽस्मि मुष्टोऽस्मीति भणन् राजद्वारे ययौ । राज्ञा ज्ञात्वा स स्वपार्श्वमानीतः, पृष्टोऽवक् देव ममैष एकः सुतः, स चाऽहिनाद्य दष्टस्ततोऽमुं जीवय ! तदा राज्ञा कुरु निर्विषमेनमिति वैद्य आज्ञप्तः, सोऽपि ज्ञातनृपसुतमृतिरूचे, देव यद्गोत्रे कोऽपि कदापि न मृतस्तद्गृहाद्रक्षामानाय्यतां, यथेमं जीवयामि, ततो राज्ञज्ञप्तो द्विजो गत्वागत्योचे तद्गृहं नास्ति, यत्र न कोऽपि मृतः, तदा राज्ञोचे तर्हि हे द्विज ! सर्वसाधारणे मरणे त्वं मा शोचीः, विप्रोऽवक् देव एवं जाने, परं पुत्राद्दतेऽधुनैवं मे कुलक्षयोऽभूत्, तज्जीवयैनं ममैकं सुतं ! राजोवाच भद्र ! अशक्य-प्रतिकारा भवितव्यता, अतस्त्यज शोकं ! कुरु च परत्रहितं ! अज्ञः कुर्याच्छोकं । विप्रोऽवक् तर्हि हे राजन् ! त्वमपि तं मा कार्षीः, ततो राज्ञा पृच्छता षष्टिसहस्रसुतमृतिः श्रुता, तदैव सार्थलोका अपि रुदन्तस्तत्रैयुः, राजा वज्राहत इव सिंहासनान्मूर्छितो भूमौ पतितो विविधं विलपन् विप्रेणोक्तो राजन् मामेवमुपदिशन् ज्ञोऽपि किं शोचसे ? ततोऽमात्यादिभिर्बोधितोऽसौ तत्प्रेतकार्याणि चक्रे । अत्रान्तरे**ऽष्टापदा**सन्नवासिजना एत्य भूपं व्यजिज्ञपन् स्वामिन् **गङ्गा**प्रवाहो **जह्नुना**नीतः परिखां प्रपूर्य ग्रामादीन् प्लावयन्निवार्यः, ततो राज्ञा पौत्रो **भगीरथो**ऽभाणि, वत्सेन्द्रानुमत्या **दण्ड**रत्नेन **गङ्गां** पूर्वाब्धौ नय ! सो**ऽप्यष्टा-पद**पार्श्वं गत्वाऽष्टमाराधितव्यन्तरेन्द्रप्रत्यक्षादेशाद् **गङ्गां दण्ड**रत्नखातभूमार्गेण पूर्वाब्धौ निन्ये। तत्राऽनेकमुखवहनाद् **गङ्गा** सहस्रमुख्यभूत् । यत्र चाब्धौ पतिता, तत्र **गङ्गा**सागरं तीर्थं जातं। **गङ्गा जह्नु**नानीतेति **जाह्नवी, भगीरथे**न विनीतेति **भागीरथी**त्युक्ता, **सगरस्य** समुद्रयायि**गङ्गा**कारितत्वात् **सागरी** कीर्त्तिर्जाता, **भगीरथ** इन्द्र मिलित्वा**ऽयोध्यां** गतः, **सगरेण** च स राज्येऽस्थापि । **सगरः** श्री**अजित**पार्श्वे प्रव्रज्य ७२लक्षपूर्वायुः सिद्धः । **भगीरथ**राज्ञाऽन्यदा ज्ञानी पृष्टो भगवन् **जह्न्वा**दीनां समकालं मृतिः कथं ? तेनोक्तं **सम्मेताद्रिं** सङ्घश्चैत्यनत्यै प्रस्थितः क्वापि ग्रामे प्राप्तः, तत्र षष्टिसहस्राऽनार्यलोकैरेकस्मिन् **भद्रके** कुम्भकारे बहु वारयत्यपि स समृद्धित्वान्मुष्टः, अन्यदा तन्निवासिनैकेन राजधान्यां चौर्यं कृतं, पदानुगामिभिर्नृपनरैस्तद्ग्रामद्वारं पिधाय पाकप्राप्तसङ्घलुण्टनपापादग्निदानेन तानि षष्टिसहस्राण्यदाह्यन्त । कुम्भकृत्तदा स्वजनकार्यार्थमन्यग्रामगतो जीवितः, अथ ते सर्वे मृत्वा मातृवाहका जाताः, हस्तिपादान्मृत्वा बहुयोनिषु भ्रान्त्वा कस्मादपि शुभकर्मणः **सगर**सुता जाताः, कुम्भकारश्चायुःक्षये मृत्वा क्वापि ग्रामे धनी वणिग्जातः, कृतसुकृतो मृत्वा भूपो जातः, प्रव्रज्य सुरो भूत्वा त्वं **जह्नु**सुतो **भगीरथो**ऽभूः, स तत् श्रुत्वा संविज्ञो धर्मं प्रपेदे ॥३५॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**चइत्ता भारहं वासं, चक्कवट्टी महिड्ढीओ ।**
**पव्वज्जामब्भुवगओ मघवं नाम महायसो ॥३६॥**

**व्याख्या–त्यक्त्वा भारतं वर्षं चक्रवर्ती महर्द्धिकः प्रव्रज्यामभ्युपगतो मघवा-नामा महायशाः ॥**

**तत्कथा चेत्थं–भरते श्रावस्त्यां समुद्रविजयस्य** राज्ञो **भद्रा**देव्या चतुर्दशस्वप्न-सूचितो **मघवां**स्तृतीयश्चक्री जातः, यौवनस्थो लब्धराज्यः साधित**भरतः** सुचिरं चक्रित्व-मुपभुज्य संवेगमाप्य सुतदत्तराज्यः प्रव्रजितस्तपांसि कृत् स्वर्ययौ ॥३६॥

**सणंकुमारो मणुस्सिंदो, चक्कवट्टी महिड्ढीओ ।**
**पुत्तं रज्जे ठवित्ताणं, सो वि राया तवं चरे ॥३७॥**

**व्याख्या–सनत्कुमारो मनुष्येन्द्रश्चक्री महर्द्धिकः पुत्रं राज्ये स्थापयित्वा सोऽपि राजा तपोऽचरत् ।**

**तच्चरित्रं प्रसिद्धं**–शक्रः सभायां **सनत्कुमर**चक्रिरूपमस्तौत् । अश्रद्धया द्वौ देवौ विप्रौ भूत्वाऽभुक्ते **सनत्कुमारे** तद्रूपं समीक्ष्य विस्मितौ, राज्ञाऽऽगमनहेतुं पृष्टावूचतुः, तव रूपदर्शनायावां समागतौ । सोऽवक् सदस्यागम्यं । गतौ देवौ । कृतस्नानाद्यलङ्कारे सपरिवारे सभोपविष्टे नृपे तावागतौ । चक्रिरूपं दृष्ट्वा सखेदौ जातावधोमुखौ । चक्र्याह किमेतत् ? तावाहतुर्भवत्स्वरूपमेवं कथं ? ततोऽनन्तगुणहीनं तवाधुना रूपं जातं । ततो राज्ञा पृष्टौ ताववधिना तच्छरीरं रोगाभिभूतं निवेद्य स्वर्गतौ । तदा **सनत्कुमार**स्तृणाऽसारं देहं ज्ञात्वा तृणवद्राज्यं त्यक्त्वा प्राव्राजीत् । सप्तसहस्रवर्षाण्यष्टादशरोगानधिसह्य त्रिवर्षलक्षायुः सुचारित्रो देवकृतपरीक्ष एकावतारी **सनत्कुमारो** बभूव ॥३७॥

**चइत्ता भारहं वासं, चक्कवट्टी महड्ढीओ ।**
**संती संतिकरो लोए, पत्तो गइमणुत्तरं ॥३८॥**

**व्याख्या–त्यक्त्वा भारतं वर्षं** चक्रवर्ती महर्द्धिकः **शान्ति**नामा तीर्थकृत् **शान्ति-करो लोके प्राप्तो** गतिमनुत्तराम् ॥ **शान्ति**वृत्तान्तः प्रसिद्ध एव ॥३८॥

**इक्खागरायवसहो, कुंथुनाम नरेसरो ।**
**विक्खायकित्ती भयवं, पत्तो गइमणुत्तरं ॥३९॥**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या—इक्ष्वाकु**वंशजा **राजानस्तेषु वृषभः** प्रधानः **कुन्थुनामा नरेश्वरः, विख्यातकीर्तिर्भगवान् प्राप्तो गतिमनुत्तराम्** ॥

**तद्वृत्तान्तस्तु—गजपुरे सूरराजश्रीदेव्यो**रर्हन् पुत्रोऽभूत् । जन्ममहादनु स्वप्ने मात्रा रत्नस्तूपः कुस्थो दृष्टः, शत्रवश्च गर्भस्थेऽर्हति कुन्थुप्राया जाताः, ततस्तस्य **कुन्थु**रिति नाम दत्तं । यौवने राट्कन्या विवाहितोऽसौ राज्येऽस्थापि, **सूर**राजा प्राव्राजीत्, **कुन्थु**रर्हन् चक्रादिरत्नोत्पत्तौ जित**भारत**वर्षश्चक्रिभोगान् भुक्त्वा निष्क्रम्य षोडश वर्षाणि छद्मस्थोग्रविहारात् केवलमासादितवान् । देवैः समवसरणं कृतं । गणधरादिस्थापना । काले च **सम्मेता**द्रौ स मोक्षं गतः । कुमारत्वे माण्डलिकत्वे चक्रित्वे श्रामण्ये च त्रयोविंशतिवर्षसहस्राणि सार्द्धसप्तशतानि च वर्षाणां प्रत्येकमासन्नस्यार्हतः ॥३९॥

**सागरंतं परिच्चज्ज (चइत्ताणं), भरहं नरवरीसरो ।**
**अरो य अरयं पत्तो, पत्तो गइमणुत्तरं ॥४०॥**

**व्याख्या—सागरान्तं भरतं त्यक्त्वा नरवरेश्वरो**, रजसः कर्मणोऽभावरूपं प्राप्तः सन् प्राप्तो गतिमनुत्तरामिति ॥

तथाहि—**गजपुरे सुदर्शन**राट्**देव्योः** पुत्रोऽभूत्, जन्मोत्सवादन्वम्बा स्वप्ने रत्नारमपश्यदिति क्लृप्**तार**नामा तारुण्ये पितृदत्तराज्यश्चक्रित्वं प्राप्तवान् । राज्यं त्यक्त्वा श्रामण्ये वर्षत्रयेण तस्य केवलं जातं । प्रवर्त्तिततीर्थोऽसौ **सम्मेता**द्रौ मुक्तः, कौमारत्वे माण्डलिकत्वे चक्रिरत्वे श्रामण्ये चैकविंशतिवर्षसहस्राणि प्रत्येकमस्य ॥४०॥

**चइत्ता भारहं वासं, चक्कवट्टी महड्ढीओ ।**
**चइत्ता उत्तमे भोए, महापउमो तवं चरे ॥४१॥**

**व्याख्या**—स्पष्टं, नवरं **त्यक्त्वोत्तमान् भोगान् महापद्म**श्चक्री **तपोऽचरत्** ॥४१॥

यथा—**कुरुक्षेत्रे गजपुरे** श्री**ऋषभ**वंश्यः **पद्मोत्तरो** राजा, तस्य **ज्वाला**देव्यां सुश्राविकायां सिंहस्वप्नसूचितो । **विष्णुकुमाराख्यः** सुतः, तथा द्वितीयश्चतुर्दशस्वप्नसूचितो **महापद्म**नामा सुतोऽभूत् । द्वावपि तारुण्योपेतौ जातौ, अथ **विष्णुकुमारो** राज्ञा युवराजः कृतः । इतो**ऽवन्त्यां श्रीवर्म**राज्ञो **नमुचि**नामा मन्त्री बभूव । तत्र श्री**मुनिसुव्रता**र्हतः शिष्याः श्री**सुव्रता**चार्याः समवसृताः, तन्नत्यै सर्वर्द्ध्या लोकान् यातो दृष्ट्वा नृपः समन्त्री तान्नन्तुं गतः, तत्र **नमुचि**र्जैनाऽरुचिराचार्यैः समं वितण्डां तन्वन् क्षुल्लेनैकेन राज्ञः समक्षं निरुत्तरीकृतो लोकैर्हसितो गतोऽन्तर्वैरं वहन् साधुषु, निशि मुनीन् हन्तुं प्राप्तः, सुर्या च

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सोऽस्तम्भि । प्रातस्तं तथास्थं दृष्ट्वा राट् पौरलोकश्चार्हद्धर्मं प्राप्ताः, **नमुचि**र्जनैर्निन्द्यमानो विलक्षो **गजपुरे** गत्वा **महापद्म**कुमारस्य मन्त्री जातः । राजादेशान्**नमुचि**र्विषमं दुर्गं भङ्क्त्वा **सिंहबलं** पल्लीशं देशमोषकं बद्ध्वागात् । **महापद्मेन** तुष्टेन वरं वृण्वित्युक्तोऽवसरे याचिष्ये इति स जगौ ।

अन्यदा **महापद्म**मात्रा **ज्वाला**देव्या जिनभवने रथोऽकारि, तदीर्ष्यया **लक्ष्मी**नामान्यया राज्ञ्या **महापद्म**विमात्रा मिथ्यात्विन्या ब्रह्मरथोऽकारि । अथ **लक्ष्म्या** राज्ञे प्रोक्तं हे प्रिय ! पूर्वं ब्रह्मरथः पुरे भ्रमतु, पश्चाच्च जैनरथः, तत् श्रुत्वा **ज्वाला**देव्या राज्ञोऽग्रे प्रतिज्ञातं चेज्जैनरथयात्रा पूर्वं न स्यात्तदा ममान्नपाने परभवे । तदा राज्ञा द्वावपि रथौ निषिद्धौ । **महापद्मः** स्वमातृ रथयात्रामनोरथं पूरयितुमशक्तः खेदान्निःसृतोऽटव्यां भ्रमंस्तापसाश्रमं ययौ, तापसाग्रहाच्च स तत्र तस्थौ । तदा **चम्पायां जनमेजय**नामा राजा **काला**ख्यवैरिणा रुद्धः, पौरजनो नष्टः, तस्यान्तःपुरेऽपि यत्र तत्र नश्यति, राज्ञः पट्टराज्ञी **नागवती मदनावली**पुत्र्या सह नश्यन्ती तत्रैव तापसाश्रमे समेता । कुलपतिनापि सा तत्रास्थापि । इतस्तत्र **महापद्ममदनावल्यो**रन्योऽन्यालोकादनुरागोऽजनि । कुलपतिना तद् ज्ञात्वा **नागवत्यै** उक्तं । तया **मदनावल्यु**क्ता, यथा पुत्रि ! त्वं किं न स्मरसि नैमित्तिकोक्तं ? यत्त्वं **महापद्म**स्य चक्रिणः स्त्रीरत्नं भवति, तत्किं यत्र तत्रानुरज्यसे ? अथ कुलपतिनापि विसृष्टः स कुमारो नूनमेतां प्राप्याहं चक्री भूत्वा जिनमन्दिरमण्डितां महीं करिष्ये, इति मनोरथाकुलो **मदनावली**मेवान्तर्ध्यायन् गतः **सिन्धुनन्दनं** पुरं, तस्योद्याने मधूत्सवे तदा पौरीषु क्रीडन्तीषु **महासेन**राज्ञः पट्टेभो मत्तो भ्रमन्नाययौ । ता नंष्टुमशक्ता भयत्रस्ताः कोऽप्यस्ति योऽस्मान् रक्षतीतिपुत्कुर्वतीर्दृष्ट्वा **महापद्मो** वेगादेत्य भूपादिभिर्निवार्यमाणोऽपि तमिभं वशीकृत्यालानेऽबन्धयत् । राज्ञा तत्कलाचमत्कृतेन तस्मै राजकन्याशतं परिणायितं । ताभिः सह स रमे । एकदा निशि काचित् खेचरी तत्रागत्य **महापद्म**कुमारं प्रति कथयामास हे कुमार ! **वैताढ्याद्रौ सूरोदय**पुरे **इन्द्रधनु**खेचरेन्द्रस्य **श्रीकान्ता**राज्ञ्यां **जयचन्द्रा**ख्या सुता जज्ञे । सा नरद्वेषिणी वरं नैच्छत्, पित्रा भारता नृपाः सर्वे पट्टिकायां लिखित्वा दर्शिताः, परं नैकोऽप्यस्या रुरुचे ।

अन्यदा तव रूपे दृष्टे सा त्वयि रक्ता मामूचे हे हले ! **महापद्मं** विनाऽग्निं विशामि । ततो मयैतत्तन्मातृपितृणामुक्तं, तैश्चाहं त्वामानेतुं प्रहिता, अहमपि यदीमं नानये तदाग्नौ विशामीति तामुक्त्वैतास्मि, अतस्त्वं तत्रागच्छ ! अन्यथा मया मर्त्तव्यं । अथ राजानुमत्या तया स तत्र नीतो **जयचन्द्रां** च विवाहितः, ततो **जयचन्द्रा**मातृपक्षीया

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**गङ्गाहरमहीहरा**द्याखेटकुमारा महाबला **महापद्मो**ढां तां श्रुत्वा योद्धुमागुः, **महापद्म**श्च तानजैषीत् । तदा कुमारस्य स्त्रीरत्नवर्जं सर्वरत्नानि निधयश्च प्रादुरासन् । सर्वसुरखेटनरेशैः सेव्योऽसौ गजादिबलवान् नवमश्चक्र्यभूत् । अथ स तदप्यैश्वर्यं **मदनावलीं** विना नीरसमिव मन्वानो गतस्तापसाश्रमं । तत्रागतश्च स **जनमेजय**नृपेण तापसैश्च सत्कृत्य परिणायितो **मदनावलीं,** स्त्रीरत्नं च साभूत् । एवं महद्ध्या चक्री **गजपुरं** प्राप्तो मातृपितृभ्रातृन्ननाम । अथ स एव श्री**सुव्रत**सूरिस्तत्र समवासरत्, **पद्मोत्तरा**द्यास्तं नन्तुं गताः, तद्देशनया निर्विण्णो राड् ज्येष्ठं सुतं **विष्णुकुमारं** राज्याय न्यमन्त्रयत्, तस्मिन्ननिच्छति **महापद्म**स्य महाराज्याभिषेकं कृत्वा स **विष्णुकुमारेण** सह प्राव्रजीत् । ततो **महापद्म**चक्रिणा निजमातुर्जिनरथयात्रामनोरथोऽपूरि, कृता च जिनमन्दिरमण्डिता मही । **पद्मोत्तर**मुनिः क्षपितकर्मा लब्धकेवलः शिवं ययौ । **विष्णुकुमारर्षे**श्चोग्रतपसा खचारित्ववैक्रियाद्या बहुलब्धय उत्पन्नाः, अत्र निर्युक्तिः—

**मेरु व्व तुंगदेहो, वच्चइ गयणंमि पक्खिनाहो व्व ।**
**मयणो व्व रूववंतो, बहुरूवो होइ तियसो व्व ॥१॥** [ ]

अन्यदा बहुतन्त्राः श्री**सुव्रता**चार्या **गजपुरो**द्याने एता वर्षारात्रिस्थित्यै । ज्ञाताश्च ते पूर्वविरुद्धेन **नमुचिना**, ततोऽवसरमाप्य तेन चक्री व्यज्ञपि, स्वामिन् यज्ञं कर्त्तास्म्यहं ततो ममोक्तवरे राज्यं देहि ! राज्ञा स राज्येऽभिषिक्तः, स्वयं चान्तःपुरेऽस्थात्, **नमुचिः** पुरान्निःसृत्य यज्ञार्थं यज्ञपाटकमेत्य यज्ञदीक्षितोऽभूत् । तद्वर्द्धापनार्थं च सर्वे लोका लिङ्गिनश्चैताः, अथ तेन छलान्वेषिणा **सुव्रता**चार्या आकार्योक्ताः, अहो सर्वे वर्णा लिङ्गिनश्च मां वर्द्धापयितुमेताः, न यूयं, अहं नेष्ट इति नैताः, पुनर्मन्निन्दां च कुरुथ, अतो मद्देशं त्यक्त्वाऽन्यत्र यात ! गुरुणोचे मन्त्रिन् वर्षासु जीवविराधनभावतो विहारो नास्मत्कल्पः, न च वयं कञ्चिन्निन्दामः, समभावा एवं वयं । सोऽवक् सप्ताहोद्ध्वं चेदेकं मुनिमत्र दक्ष्यामि तदाऽवश्यं हनिष्यामि, तत् श्रुत्वा गुरव उद्याने गताः, सङ्घः साधवश्च मिलिताश्चिन्तयामासुः किमथ कार्यं ? तदैकेन साधुनोचे **महापद्म**भ्राता **विष्णुकुमार**र्षिर्महालब्धिपात्रं सम्प्रति मेरौ तिष्ठति, स चेदेति तदा तद्वाचा **नमुचि**रुपशाम्यति, गुरुणोचे स कोऽपि लब्धिमानस्ति यस्तत्र याति । एकेन यतिनोचेऽहं यामि शक्त्या, नाऽगन्तुमलं । गुरुणोचेऽग्रतश्चिन्ता **विष्णोः,** अथ स मुनिर्लब्ध्या व्योम्न्युत्पत्य **मेरौ** ययौ, **विष्णुः** सर्वं तन्मुखादुन्तं ज्ञात्वा तमादाय तदैव गुरूपान्तमेत्य गुरून्नत्वा साधुसङ्घयुगतो **नमुचि**सभां । नमुचिं विना सर्वैरपि नतोऽसौ भूपैः, स धर्मोपदेशपूर्वं **नमुचि**मूचे मन्त्रिन्ननुमन्यस्व यथात्र गुरवो वर्षारात्रं तिष्ठन्ति, तेन विशेषाज्जातामर्षेणोचे पञ्चदिनोद्ध्वं साधुं दृष्टं हन्म्येव ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**विष्णु**रुत्पन्नरोषोऽवक् त्रयाणां पदानां स्थानं देहि ! सोऽवक् दत्तं, परं पदत्रयाद्बहिःस्थं मारयिष्यामि । रुष्टो **विष्णुर्वै**क्रियलब्ध्या योजनलक्षमानाङ्गोऽभूत् । अत्र निर्युक्तिः—

**कयनाणाविहरूवो, वड्ढंतो सो कमेण मेरुसमो ।**
**जाओ जोयणलक्खं, अप्फालियफारफुक्कारो ॥१॥** [ ]

**कमदद्दरं करिंतो, गामागरनगरकव्वडाइन्नं ।**
**कंपावइ महीवीढं, ढालइ सिहरीण सिहराइं ॥२॥** [ ]

**नमुचिं** पृथ्व्यां प्रपात्य पूर्वापराब्धिजगत्योरंह्री दत्वोचे देहि तृतीयांह्रिस्थानं ! तद् ज्ञात्वा **पद्मश्चक्री** तत्रागात्, तेन सकलसुरासुरनरसङ्घैश्च **विष्णु**रुपशामि, इन्द्रप्रहिताप्सरोभिस्तत्कर्णयोः प्रविश्य शान्तरसो गीतः, तत् श्रुत्वा स शान्तः, तत्प्रभृति **विष्णुस्त्रिविक्रम** इति प्रसिद्धिमाप, सङ्घानुरोधाच्च **नमुचिं** मुमोच स महामुनिः, तं मन्त्रिपांशुनं सद्यः **पद्म**स्तु निरवासयत्, **विष्णु**रालोच्य प्रतिक्रान्तः शुद्धोऽभूत् । यतः—

**आयरिए गच्छंमि य, कुलगणसंघे य चेइयविणासे ।**
**आलोइया पडिक्कंतो, सुद्धो जं निज्जरा विउला ॥१॥** [ गा.स./गा.४७६ ]

षट्वर्षसहस्राणि श्रामण्यं प्रपाल्य केवली भूत्वा सिद्धो **विष्णुः, महापद्म**चक्र्यपि देवगुरुभक्त्या शासनमुद्भाव्य प्रव्रज्य सिद्धः, विंशतिधन्वोच्छ्रितौ त्रिंशद्वर्षसहस्रायुषौ विष्णुचक्रिणौ ॥ इति ॥४१॥

**एगच्छत्तं पसाहित्ता, महीं माणनिसूरणो ।**
**हरिसेणो मणुस्सिंदो, पत्तो गइमणुत्तरं ॥४२॥**

**व्याख्या—एकच्छन्नां प्रसाध्य महीं**, 'माननिसूरणो' **माननिषूदनो** दृप्तारिदर्पदलनो **हरिषेणो मनुष्येन्द्रश्चक्री प्राप्तो गतिमनुत्तराम्** ॥

तथाहि—**काम्पिल्ये** पुरे **महाहरे** राज्ञो **मेरा**राज्यां चतुर्दशस्वप्नसूचितो **हरिषेण**श्चक्री जातः, पित्रा दत्तराज्यश्चक्रित्वमाप्य भोगान् भुङ्क्त्वा सुतं राज्ये संस्थाप्य निष्क्रान्तः, केवली भूत्वा सिद्धः, स पञ्चदशधन्वोच्चश्चतुर्दशवर्षसहस्रायुः ॥४२॥

**अण्णिओ रायसहस्सेहिं, सुपरिच्चाइ दमं( धम्मं ) चरे ।**
**जयणामो जिणक्खायं, पत्तो गइमणुत्तरं ॥४३॥**

**व्याख्या—अन्वितो राजसहस्रैः**, सुष्ठु राज्यादित्यजनशीलः **सुपरित्यागी जिनाख्यातं** जिनोक्तं **धर्मं चरित्वा जयनामा** चक्री प्राप्तो गतिमनुत्तराम् ॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**राजगृहे समुद्रविजय**राट्, तस्य **वप्रा**ख्यदेव्यां चतुर्दशस्वप्रसूचितो **जय**नामा चक्री सुतो जातः, क्रमेण साधित**भरतो** वैराग्यतः प्रव्रज्य सिद्धः, स द्वादशधन्वोच्चस्त्रि-सहस्त्रवर्षायुरभूत् ॥४३॥

**दसन्नरज्जं मुइयं, चइत्ताण मुणी चरे ।**
**दसन्नभद्दो निक्खंतो, सक्खं सक्केण चोइओ ॥४४॥**

**व्याख्या—दशार्णो** देशः, **तद्राज्यं** मुदितं सर्वकष्टाऽभावात्, तत् **त्यक्त्वा मुनि-रचरत्** अप्रतिबद्धविहारी विजह्रे, **दशार्णभद्रो निष्क्रान्तः, साक्षाच्छक्रेण चोदितो-**ऽधिकर्धिदर्शनाद् धर्मं प्रति प्रेरितः ॥

**तद्वृत्तान्तस्त्वित्थं—दशार्णपुरे दशार्णभद्रो** राट्, अश्वहृतो वनं गतः, तत्रैकं नरम-श्वाग्रयायिनं नित्यं च स्वपार्श्वे स्थायिनं कालाकालमहासेवापरं दृष्ट्वा राजा तं निजसेवाहेतुं पप्रच्छ । सोऽवक् अहं शिवभक्तो **विराट**विषये **धान्यपुर**वासी महत्तरसुतोऽस्मि ।

एकदा मम भुञ्जानस्य सत **उमाहरौ** मम गृहान्निर्यातौ, मद्भार्ययोक्तं त्वं न्यायेन बहुद्रव्यमर्जयि**त्वोमाहरौ** महापूजयाऽर्चय ! यथा तौ पुनरस्मद्गृहे समागच्छतः, ततोऽहमत्र **दशार्ण**देशे समागत्य कृष्यादिभिः कियद्धनमर्जितवान् । अथ च बहुस्वाय त्वां सेवे । राज्ञा ज्ञातं नूनमस्य भार्या कुशीला, नरनारीवेषौ नरावेव तदा तद्गृहे भवेतां, मुग्धोऽयं तया कुलटया भ्रामितः, परं कियत्यस्य स्वदेवपूजाश्रद्धाऽशक्तस्यापि ! मम तु सविशेषा युक्तेति स यावच्चिन्तयति तावत्तत्र श्री**वीरा**गमनं जातं । तदा राज्ञा तस्मै महत्तरायान्येभ्यश्च बहुदानं दत्तं, चिन्तितं च तेन प्रातरहं तथा सर्वोत्कृष्टर्द्ध्या श्री**वीरं** वन्दिष्ये, यथा पूर्वं केनापि न वन्दितः, इति विचिन्त्य द्वितीयाह्ने स कृतप्रातःकृत्यः स्नातलिप्तालङ्कृत सर्वोत्कृष्टर्द्धियुतः सुरूपपञ्चदशशतराज्ञीपरिवृतः ससैन्यो महत्तरसुतयुतो गतोऽर्हत्पार्श्वं, तदेन्द्रोऽपि लाभं दृष्ट्वा महर्द्ध्या जिनं ननाम । इन्द्रर्द्धिं दृष्ट्वा **दशार्णभद्रो** दध्यौ, अहोऽहं तुच्छर्द्धिरल्पपुण्यत्वात्, अयं तु महापुण्यकः, इति विचार्य स प्रव्रजितः ॥४४॥

**णमी णमेइ अप्पाणं, सक्खं सक्केण चोइओ ।**
**चइऊण गेहं वैदेही, सामण्णे पज्जुवट्ठिओ ॥४५॥**

**व्याख्या**—पुनर्हे मुने **विदेहदेश**नृपति**र्नमि**नामा **नमेइ** नये स्थापय**त्यात्मानं, साक्षात् शक्रेणेन्द्रेण चोदितो**ऽपि ज्ञानचर्यायां परीक्षितोऽपि **गृहं त्यक्त्वा श्रामण्ये पर्युपस्थित**श्चारित्रयोग्यानुष्ठाने प्रत्युद्यतोऽभवत् ॥४५॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**करकंडू कलिंगेसु, पंचालेसु य दुम्मुहो ।**
**णमी राया विदेहेसु गंधारेसु य णिग्गई ॥४६॥**

**व्याख्या–कलिङ्गेषु** देशेषु **करकण्डुराट्, पञ्चालेषु** च **द्विमुखः, नमिः** राजा **विदेहेषु, गन्धारेषु** च **निर्गति**नामा राट् ॥४६॥

**एए णरिंदवसहा, णिक्खंता जिणसासणे ।**
**पुत्तं रज्जे ठवित्ताणं, सामण्णे पज्जुवट्ठिया ॥४७॥**

**व्याख्या–एते नरेन्द्रेषु वृषभाः** श्रेष्ठा बहुराट्सेव्याः **पुत्रं राज्ये स्थापयित्वा जिनशासने, निःक्रान्ताः** ॥

**एतच्चरितानि सङ्क्षेपेणैवं–चम्पायां दधिवाहनस्य चेटक**जा **पद्मावती** राज्ञी, तस्या दोहदो जातो यथाहं राजवेषा वनानि भ्राम्यामीति । ततः सा लज्जयाऽवदमाना कृशदेहा राज्ञा पृष्टा । ज्ञाते तस्या दोहदे राज्ञा सा पट्टेभोपर्यारोपिता, राजा च तत्पृष्ट-स्थस्तदुपरि छत्रं दधौ । एवं स गत उद्याने । तत्र प्रथममेघवृष्टौ जलार्द्रीभूतमृद्गन्धे-नोच्छलितमदमत्तोऽसौ गन्धेभो वनं प्रति नृपराज्ञीयुतो धावितः, नृपसैन्यं च पश्चात् पतितं । अटव्यां प्राप्तेन राज्ञा देव्युक्ता, हे प्रिय दृश्यमानवटशाखायं मया त्वया च विलग्यं, तया तत् श्रुतं, परं विह्वलीभूता सा तां वटशाखां गृहीतुं नाशकत्, राजा तु शाखायां विलग्नः, इभस्तु राज्ञीयुतस्तथैव वनान्तर्दधावे । अथ राजा वटादुत्तीर्य राज्ञीविरहशोकाकुल**श्चम्पा**यां गतः, गजोऽपि कानेन भ्रमंस्तृषितः सर एकं प्रविष्टः, तत्र तस्मिन् क्रीडति राज्ञी शनैरुत्तीर्य जलं तीर्त्वा भूमौ समागता । अत सा भयाकुला साकाराऽनशनं प्रत्याख्यायैकस्यां दिशि चलिता । दूरे गतैकं तापसं दृष्ट्वा तत्पार्श्वे समेत्य सा ननाम । तापसेन पृष्टं मातस्त्वं कुतोऽत्र समेता ? तया निजवृत्तान्तो विश्वोऽपि निवेदितः, तदा **चेटक**राजमित्रेण तेन तापसेन मा भैरिति साश्वासिता। ततो वनफलानि तस्यै दत्वैकदिशि स तामरण्यान्नि-ष्कास्योचे, वयं तपस्विनो हलकृष्टां भुवं नाक्रमामः, इत एषो **दन्तपुर**विषयस्तस्य **दन्तवक्र**श्च राट्, अतस्तत्र त्वं गच्छ! ततः सा **दन्तपुरे** समागत्य साध्वीसमीपे जगाम, साध्वीदत्तोपदेशतः प्रतिबुद्धा सा दीक्षां ललौ । दीक्षाविघ्नभयात्तया महत्तरायै स्वगर्भोदन्तो न निवेदितः, क्रमेण तदुदरवृद्धौ महत्तरयोक्तं भो महाभागे ! किमेतद्विहितं त्वया शासनोड्डाहकृत् ? तयोक्तं भगवति ! क्षमस्व! मम दीक्षायाः प्रागेव गर्भसम्भवोऽभूत्, परं मया चारित्रविघ्नं ध्यायन्त्या भवदग्रे तदुदन्तो न प्रकाशितः, तत् श्रुत्वा महत्तरया शासनोड्डाहभीरुतया सैकान्ते गुप्तस्थाने निवेशिता ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तत्र तया पुत्रः प्रसूतस्तदा सा तज्जनकनाममुद्रायुतं तं बालं रत्नकम्बले संवेष्ट्य स्मशाने मुमोच । स्मशानपालकेन स निजपत्न्यै दत्तः, अवकीर्णित इति च तस्याभिधानं कृतं, रहःस्थितया **पद्मावती**साध्व्या तत्सर्वोदन्तो ज्ञातः, महत्तरया पृष्टा सा जगौ मया स मृतगर्भस्त्यक्तः, अथोत्पतन्पुत्रमोहा सा **पद्मावती** स्मशानपालकभार्यया सह प्रीतिं चकार, भिक्षाप्राप्तमोदकादि च तस्मै बालाय दत्वा तमप्रीणयत्, सोऽपि च तां साध्वीं विनयादिभिः सत्कारयामास । अथ स बालस्तस्य चाण्डालस्य गृहे वृद्धिं प्राप्नुवन् बालैः सह क्रीडन् राजतेजसा भासुरस्तान् बालानवक्, अहोऽहं वो राट् मां करं दत्त ! स रुक्षकण्डवा व्याप्तस्तानूचे भो मां कण्डूयध्वं ! ततस्तस्य **करण्डूवा**ख्या बभूव । क्रमेण स प्रवृद्धः स्मशानरक्षको जातः, इतो द्वौ यती केनापि हेतुना तत्र स्मशाने समागतौ, तत्र कुडङ्गे प्ररूढमेकं वंशदण्डं दृष्ट्वा तयोरेको वंशदण्डलक्षणज्ञोऽवक् मूलाच्चतुरङ्गुलत एतद्दण्डाऽदाता राट् स्यात् ।

तद्वचनं तेन मातङ्गसुतेनैकेन द्विजेन च तत्रस्थेनाश्रावि । ततोऽसौ द्विजो विजने चतुरङ्गुलं खात्वा तं दण्डमलात्, तदा स मातङ्गबालेन तद् दृष्ट्वा स दण्डस्तस्मादाच्छिन्नः, ततो द्विजस्तं बालं तलारक्षपार्श्वे नीत्वोवाच देहि मे दण्डं ! सोऽवक् मत्स्मशानजातं दण्डं तुभ्यं नैव दास्ये । द्विजोऽवगनेन मे कार्यं त्वमन्यं लाहि ! तथाप्यदद्दारकस्तलारक्षेण पृष्टः किं न दत्से ? स ऊचेऽहमेतेन दण्डेन राजा भविष्यामि । तद्बालवाचं श्रुत्वा जातहास्येन तलारक्षेणोक्तं भो बाल ! यदा त्वं राजा भवेस्तदाऽस्य द्विजस्य त्वयैको ग्रामो देयः तेनापि तत् प्रतिपन्नं । अथ स बालस्तं दण्डमादाय स्वगृहं गतः, लुब्धोऽसौ द्विजोऽन्यद्विजानाहूय तं बालं हन्तुं विचारं कृतवान् । तदा तमुदन्तं श्रुत्वा तत्पिता भार्यासुतयुतस्ततो निःसृत्य **काञ्चनपुरमागात्** ।

तत्र तन्नगरनृपे मृते मन्त्रिभिरधिवासितोऽश्वो बहिःसुप्तस्य तस्य **करकण्डोः** पार्श्वे समागत्य तं प्रदक्षिणय्य हेषारवं कृतवान् । अथ तं सुलक्षणोपेतं दृष्ट्वा नागरैर्जयजयारावः कृतः, परं ब्राह्मणा अयं मातङ्ग इति तं प्रवेष्टुं नाऽदुः, तदा **करकण्डु**ना सा वंशदण्डो निजकरे धृतो ज्वलितुं लग्नः, तदा भीतास्ते ततः पलायिताः, ततो **करकण्डु**ना **तद्वाटधानक**ग्रामस्थाश्चाण्डाला द्विजीकृताः, उक्तं च–

**दधिवाहनपुत्रेण, राज्ञा च करकण्डुना ।**
**वाटधानकवास्तव्या-श्चाण्डाला ब्राह्मणीकृताः** ॥१॥ [ ]

इतस्तं प्राप्तराज्यं श्रुत्वा स ब्राह्मणस्तत्रागत्योवाच देहि मे ग्रामं ! **करकण्डुनोक्तं** ते रुचितं

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

ग्रामं त्वं सुखेन मार्गयस्व ! द्विजनेनोचे मे **चम्पायां** गृहम्, अतस्तत्पार्श्वस्थमेकं ग्रामं देहि ! तदा **करकण्डुना** **चम्पा**धीश**दधिवाहनायै**कं पत्रमलेखि यद्युष्माभिरस्मै द्विजायैको ग्राम**श्चम्पा**निकटस्थो देयस्तत्स्थानेऽहं च युष्मभ्यं युष्मदिष्टं ग्रामं दास्यामि । तत्पत्रं वाचयित्वा रुष्टो **दधिवाहनो** जगौ अरे दुष्ट मातङ्ग ! तवैकमपि ग्राममहं नैव दास्ये । क्रुद्धः **करकण्डु**र्निजसैन्येन **चम्पां** रुरोध । ज्ञातोऽयं वृत्तान्तः **पद्मावती**साध्व्या, तदा जनक्षय-भयात्तया **करकण्डु**पार्श्वे समागत्य रहस्युक्तमेष तव पितास्ति । तदा विस्मितेन **करकण्डुना** मातङ्गपितरौ पृष्टौ, ताभ्यामपि यथास्थं प्रोक्तम्, परं स मानान्नाऽपासरत् । तदा सा साध्वी **चम्पायां** नृपवेशमागात्, दास्यस्तामुपलक्ष्य तच्चरणयोः पतिताः, राजापि तत् श्रुत्वा तत्रागत्य तां नत्वाऽऽसने स्थापयित्वा गर्भप्रवृत्तिमपृच्छत् । तन्मुखात् सर्वमुदन्तं ज्ञात्वा हृष्टो राजा स्वयं **करकण्डु**पार्श्वे गत्वा मिलितः, **करकण्डु**रपि निजशीर्षेण पितुश्चरणार-विन्दयोर्ननाम ।

अथ राजा तस्मै राज्यं दत्वा प्राव्राजीत् । **करकण्डु**र्महाशासनोऽभूत्, तस्य गोकुलानीष्टानि जातानि । तन्मध्ये शरद्येकं वत्सं पुष्टं श्वेतं दृष्ट्वा स गोपालानूचेऽस्य माता मा दुह्यतां ! अन्यगवामपि दुग्धमस्मै पाय्यं, गोपैस्तथा कृतम्, तेन स वृषभो वृत्तशृङ्गः क्रमेण महाबलः सुशोभितोऽभूत् । कियद्वर्षानन्तरं **करकण्डु**स्तं वृषभं विलोकयितुं गोकुले समागतः, तदा तं सुपोष्यमाणमपि वृषभं जराजर्जरं अस्थिपिञ्जरमात्रमन्यवृषभैश्च पट्टकैस्ताड्यमानं दृष्ट्वा गोपानूचे, क्व स वृषभः ? तैस्तस्मिन्नेवोक्ते विषण्णः **करकण्डु**र-नित्यत्वं ध्यायन् सम्बुद्धः ।

**सेयं सुजायं सुविभत्तसिंगं, जो पासिया वसभं गोट्ठमज्झे ।**
**रिद्धिं अरिद्धिं समुपेहिया णं, कलिंगराया वि समिक्ख धम्मं ॥१॥** [ उत्त. नि. गा.२७१ ]

**गोट्ठंगणस्स मज्झे, ढंकियसद्देण जस्स भज्जं ति ।**
**दत्तावदरिय वसभा, सुतिक्खसिंगा समत्था वि ॥२॥** [ उत्त. नि. गा.२७१ वृ. ]

**पोराणयगयदप्पो, गलंतनयणो चलंतदसणोट्ठो ।**
**सो चेव दरियवसभो, पट्टगए परिघट्टणं सहइ ॥३॥** [ उत्त. नि. गा.२७१ वृ. ]

**द्विमुखचरितं यथा–पञ्चालेषु काम्पिल्यपुरे हरिवंशो यवो** राट्, तस्य **गुणमाला** प्रिया, एकदा स सभायामूचे किं मे नास्ति ? दूतैरूचे स्वामिन् ! चित्रसभा नास्ति, राज्ञा सूत्रभृद्भिः सा कारिता, तस्यां निष्पद्यमानायां पञ्चमेऽह्नि भूखनने मुकुटरत्नं महातेजः कर्मकरैर्लब्धं, तत्सुमहे राजा परिधाय चित्रसभायां निविष्टः, तत्प्रभावात् स **द्विमुखो**ऽभूत्, तदा जनै राज्ञो

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**द्विमुखा**ख्या कृता, क्रमेण तस्य सप्त पुत्रा जाताः, न तु पुत्री, तत्कृते राज्ञी दुःखं दधती यक्षस्योपासनं चक्रे, क्रमेण तया रात्रौ स्वप्ने आम्रमञ्जरी दृष्टा, जाता चैका तस्याः सुता, कृतं च तस्या **मदनमञ्जरी**त्यभिधानम् । क्रमेण सा यौवनवती जाता । अथा**वन्त्या**धिपति**श्चण्डप्रद्योतो** मुकुटात्तं द्विमुखीभूतं श्रुत्वा तन्मुकुटग्रहणार्थं निजदूतं तत्र प्रैषीत् । दूतेनागत्य मुकुटो **द्विमुखा**न्मार्गितः, **द्विमुखे**ने क्रुद्धेनोक्तं हे दूत ! त्वं ते स्वामिनं गत्वा कथय ! यत्तवपट्टराज्ञीं **शिवादेवीं**, **अनिलवेग**गजं, **अग्निभीरु**नामरथम्, **लोहजङ्घ**नामानं दूतं चात्र मम प्रेषय ! यथा तेऽहं मुकुटं प्रेषयामि ।

अथ **चण्डप्रद्योतो** दूतमुखात्तन्निशम्य क्रुद्धः सप्तकोटीपदातियुतो महासैन्येन चलितः शीघ्रं **काम्पिल्य**देशसन्धिं प्राप्नः, **द्विमुखो**ऽपि निजसैन्ययुतः सम्मुखमागतः, द्वयोः सैन्ययोर्गरुडादिव्यूहैर्युद्धे जायमाने मुकुटप्रभावाद् **द्विमुखेन चण्डप्रद्योतो** भग्नो बद्धश्च जनै**र्द्विमुख**पादाग्रे मुक्तो निगडितः, **द्विमुख**स्तं निर्बन्धनीकृत्य निजावासे सन्मानपुरस्सरं ररक्षम् । अथैकदा तत्र **चण्डप्रद्योतो मदनमञ्जरी** दृष्ट्वा कामविवशोऽभूत्, **द्विमुखे**न तं विह्वलं विज्ञाय कारणं पृष्टोऽसौ जगौ–

**जइ इच्छसि मम कुसलं, पयच्छ तो मयणमंजरीं एयं ।**
**नियधूयं मे नरवर, न दासि पविसामि जलणं तु ॥१॥** [ ]

तदा **द्विमुखेन** सुमुहूर्ते तया सह स उद्वाहितः, सन्मानित**श्चावन्त्यां** प्रेषितः, अथान्यदा **द्विमुख**राज्ञा इन्द्रमहे समादिष्टा जना इन्द्रध्वजं महानान्दीरवैरुद्ध्वीकृत्य दुकूलान् परिधाप्य मणिमालाभूषणसुपुष्पचन्दनकर्पूरकेसरादिभिः परिपूज्य ध्वजसहस्रयुतं च कृत्वा सप्ताहपर्यन्तं तं विविधनाट्यदिभिरर्चयामासुः, अथ तस्मिन् महे विसर्जिते पूर्णिमायां राजा राजपाटिकां बहिर्गतः, तत्र तमेवेन्द्रस्तम्भं भूमौ पतितं विण्मूत्रलिप्तं जनैश्च हील्यमानं दृष्ट्वा सम्बुद्धः ।

**जो इंदकेओ सुअलंकियं तु, दट्ठुं पडंतं पविलुप्पमाणं ।**
**रिद्धिं अरिद्धिं समुपेहियाणं, पंचालराया वि समिक्ख धम्मं ॥४॥** [ उत्त. नि. गा.२७२ ]

प्रविलुप्यमानं लोकैर्वस्त्रग्रहणेन इतस्ततः क्षिप्यमाणम्

**वुड्ढिं च हाणिं च ससिस्स दट्ठुं, पूरावरेगं च महानदीणं**
**अहो अणिच्चं अधुवं च नच्चा, पंचालराया वि समिक्ख धम्मं ॥२॥** [ उत्त. नि. गा.२७३ ]

पूरं [पूर्णतां], अवरेकं रिक्ततां च ॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**नमेः** कथा पूर्वमुक्ता ।

**बहुयाण सद्दयं सोच्चा, एगस्स य असद्दयं ।**
**वलयाणं नमीराया, निक्खंतो महिलावई ॥१॥** [ उत्त. नि. गा.२७४ ]

**नगतिचरित्रं यथा–**गन्धारदेशे **पाण्डुरवर्द्धन**पुरे **सिंहरथो** राट्, एकदा स **उत्तरापथा**गत-तुरगयोः परीक्षार्थं ससुत आरुह्य बहिर्गतः, विपरीतशिक्षिततदश्वारूढोऽसावेकादशयोजना-टवीमुल्लङ्घितः, श्रान्तेन तेन ततो यावद्वल्गा हस्ततो निर्मुक्ता, तावदश्वोऽपि स्थिरीभूतः, तदासौ हयत उत्तीर्य जलं पीत्वाऽश्वं च पाययित्वा फलैर्वृत्तिं चकार । निशि शयनार्थं स्थानं पश्यन् स गिरिशृङ्गे गतः, तत्र सप्तभूमिकं सौधं दृष्ट्वा स प्रविष्टः, तत्रस्थयैकया कन्ययोत्थाय तस्मै आसनं दत्तम्, राजापि तत्र निविष्टः, परस्परं विलोकनतो रागो बभूव । अथ राज्ञा सा पृष्टा, त्वमस्मिन्नरण्ये कुतः समागता ? तयोक्तं प्रथमं त्वमत्र वेदिकायां मामुद्वह ? पश्चाद्वृत्तान्तं कथयिष्यामि । अथ स तत्र चैत्येऽर्हन्तं नत्वा तां परिणीतवान् । तदा सा तेन सार्धमासने निविष्टा निजोदन्तमुवाच । इहैव **भरतक्षेत्रे क्षितिप्रतिष्ठित**पुरे **जितशत्रू** राट् चित्रसभां कारयामास । तेन सर्वेषां चित्रकृतां तुल्या भूर्विभज्य चित्रयाऽर्पिता । तेष्वेको वृद्धचित्रकृन्निजभूविभागं चित्रयति । तत्सुता **कनकसुन्दरी** तस्यार्थं सर्वदा भक्तं तत्रानयति। तस्यां च तत्रैतायां स चित्रकारोऽनिशं देहचिन्तार्थं बहिर्याति । अन्यदा सा भक्तमादाय पथि यान्ती केनचिदश्ववारेण धावता त्रासिता दूरीभूय चित्रसभामेता, तत्रस्थया तया कुट्टिमभुवि मयूरपिच्छं चित्रितम्, इतस्तत्र नृपस्तां चित्रसभां वीक्षितुं समागात्, चित्रितमयूरपिच्छं सत्यं मन्यमानोऽसौ गृहीतु लग्नः, परं तत्करे तन्न चटितं, प्रत्युत तन्नखा भग्नाः, तद् दृष्ट्वा तं राजानमजानती सा चित्रकारसुता हसिता, राज्ञोक्तं किं त्वया हसितं ? तयोक्तं मूर्खतापर्यङ्के तुर्योंह्स्त्वं मया दृष्टः, विस्मितेन राज्ञोक्तमन्ये त्रयः के ? तयोक्तमेकोऽद्य मया जनाकीर्णे पथि वाजिखेलको दृष्टः, द्वितीयो मत्पिता यः समागते भक्ते देहचिन्तार्थं सर्वदा बहिर्याति। तृतीयो राजा, येनैकाकिनो वृद्धस्यापि मे पितुश्चित्रकृते सर्वसमानभूर्दत्ता । तुर्यस्त्वं योऽक्षेत्रे मयूरपिच्छग्राही। तच्चातुर्यविस्मितो राजा तस्या-मनुरक्तीभूय तां परिणीतवान् । सापि विविधाश्चर्यजनककथाभिर्नृपं प्रीणयन्ती षण्मासान् यावन्निजावासेऽरक्षयत्, अथ राजानं तस्यामेवानुरक्तं विलोक्यान्या राज्यो हृदि दूयमाना-स्तस्या मारणाय छलान्यन्वेषषन् । सा चित्रकारसुता विनयपरा कदापि गर्वं न करोति, निजापवरककपाटौ विधाय सर्वदा निजपूर्वचित्रकारसामान्यजीर्णवेषं परिधाय हे आत्मन् ! त्वया पूर्वपुण्यानुसारत ईदृगृद्धियुतं नृपपत्नीत्वं प्राप्तमस्ति, को जानात्यागामिनि काले किं

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

भविष्यति ? अतस्त्वया गर्वो न कार्यः, इत्यादि स्वात्मानं निन्दन्ती तिष्ठति । तन्मिषं लब्ध्वान्याभी राज्ञीभिर्नृपायोक्तं स्वामिन्नेषा दुर्मन्त्रसाधनपरा कार्मणं कुरुते । तदा गुप्तस्थितेन राज्ञा तत्सर्वं दृष्टम् । तन्मनोनैर्मल्यतः सोऽत्यन्तं तुष्टो निजपट्टराज्ञीं तां चकार । प्रान्ते राजाराज्यौ **विमला**चार्यान्ते प्रव्रज्य **महाशुक्रे पुष्पोत्तर**विमाने जग्मतुः, राज्ञीपिता च वृद्धचित्रकारोऽपि श्राद्धीभूय सुतादत्तपञ्चपरमेष्ठिध्यानपरो मृत्वा **वानमन्तरा**ख्यो वैमानिको महर्द्धिदेवोऽभूत् । चित्रकृत्पुत्र्यहं ततश्च्युत्वा **वैताढ्ये तोरणपुरे दृढशक्ते** राज्ञः सुताऽभूवं **कनकमाला**ख्या । मद्रूपमोहितेन **वासवा**ख्यखेटेन हृत्वाहमत्र सौधं कृत्वाऽस्थापि, मदुद्वाहाय च तेनेयं वेदिका कृता ।

इतो मज्ज्येष्ठभ्राता **कनकतेजा** मत्पृष्ठौ समागत्य **वासवे**न सह युद्धं चकार । तस्मिन् युद्धे च तौ द्वावपि मृत्तौ । अहं तु विलप्यात्रैव स्थिता । इतो मे प्राग्भवपिता **वानमन्तर**देवोऽत्र समेतः, मामुपलक्ष्य चात्रैवास्थापयत् । इतो मे पिता **दृढशक्ति**-रीक्षणार्थमत्रायातः, तदा तेन सुरेण मद्रूपमाच्छाद्य त्रयाणामपि मृतकरूपाणि मत्पित्रे दर्शितानि । तद् दृष्ट्वा युद्धे त्रीनपि मृतान् ज्ञात्वा स वैराग्याद्दीक्षां जग्राह । अथ देवेन स्वकृतां मायां संहृत्य मया सह स मत्पितृमुनिर्नतः, तेनोक्तं मया त्रीणि रूपाणि कथं दृष्टानि ? देवो निजकृतां मायां जगौ। साधुरूचे ध्रुवं त्वं ममोपकारी, यत्त्वयाऽहं राज्यं त्याजितो दीक्षां च ग्राहितः, अथ **कनकमाला**पि सुरोक्त्या जातिं सस्मार, पूर्वपतिं प्रति चादृताभूत् । सुरोऽवक् वत्से स **जितशत्रु**राट् देवो भूत्वा **दृढसिंह**राट्सुतः **सिंहरथो** जातोऽस्ति, स चात्रैव तव भर्त्ता भावी, अतस्त्वमत्रैव तिष्ठ ! इति स मामत्रैव स्थापयित्वा स्वयं चैत्यनत्यै गतोऽस्ति । एवं यावत् सा कथयति तावत् स सुरस्तत्र समेतः, राजानं दृष्ट्वा हृष्टः सुरस्तं तत्र मासैकं यावद्दीव्याहारैः प्रीणयन्नरक्षयत् । अथ राजा वैरितो निजनगररक्षणकृते तत्र गमनोत्सुकोऽभूत्। तदा सुरेण तस्मै **प्रज्ञप्ती** विद्या दत्ता, तेन स आकाशमार्गेण प्रत्येकपञ्चमेऽह्नि **कनकमाला**पार्श्वे सविमानः समायाति, ततो लोकेन तस्य **नग्गतिः ( निर्गतिः )** नाम कृतम्। कालान्तरे सुरोक्त्या तेन तत्र **पुरुषपुरा**ख्यं नगरं स्थापितम् ।

अथैकदा स राजा कार्त्तिकीराकायां राजपाटिकायां गतः सदाफलाम्रद्रुममेकं मञ्जर्यादियुतं दृष्ट्वा तन्मञ्जरीगुच्छमेकमत्रोटयत् । पृष्ठस्थतत्परिवारेणापि गतानुगतिको लोकः। इति न्यायात्तद्वृक्षस्य पत्रादिसर्वग्रहणपूर्वकं स केवलं काष्ठावशेषीकृतः । इतः प्रत्यावृत्तो नृपः परिवारमपृच्छत् क्व स चूततरुः ? तदा मन्त्रिणा स काष्ठावशेषीभूतो वृक्षो

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

राज्ञे दर्शितः, विस्मितेन राज्ञा तत्कारणं पृष्टो मन्त्री जगौ स्वामिन् ! युष्माभिरेका मञ्जरी गृहीता, ततः सर्वैरपि तत्सर्वस्वग्रहणतः स केवलं काष्ठावशेषीभूतः, तत् श्रुत्वा राजा दध्यौ अहो राज्यश्रीरप्येवंविधैवानित्या ततोऽलमेतया ।

**जो चूयरुक्खं सुमणाभिरामं, समंजरीपल्लवपुप्फचित्तं ।**
**रिद्धिं अरिद्धिं समुपेहिया णं, गंधाररायां वि समिक्ख धम्मं ॥१॥** [ उत्त. नि. गा.२७५ ]

धर्मं समीक्षते, चारित्रधर्मं स्वीकुरुते, समैक्षिष्ट सुकृतं वा । तथा—

**वसभे य १ इंदकेऊ २, वलए ३ अंबे य पुप्फिए ४ बोही ।**
**करकंडु दुम्मुहस्स य, नमिस्स गंधाररन्नो य ॥२॥** [ उ. नि./गा.२६५ ]

अथ ते चत्वारोऽपि विरहन्तः **क्षितिप्रतिष्ठित**पुरे चतुर्द्वारदेवकुले प्राप्ताः, पूर्वेण **करकण्डुः** प्राप्तः,दक्षिणेन **नमि**रेवं **निर्गतिद्विमुखा**वपि तत्र प्राप्तौ, तत्रस्थो यक्षोऽपि कथं साधोर्विमुखो भवेयमिति ध्यात्वा चतुर्मुखो बभूव । अथ तत्राजन्मकण्डुव्याधिना पीडितेन **करकण्डु**ना स्वकर्णस्थकण्डुयिनी शलाका तत्रैकत्राऽगोपि । तद् दृष्ट्वा **द्विमुखो**ऽवक्—

**जया रज्जं च रट्ठं च, पुरं अंतेउरं तहा ।**
**सव्वमेयं परिच्चज्जं, संचयं किं करेसिमं ॥१॥** [ उत्त. नि. गा.२७६ ]

तदा **नमिर्द्विमुख**माह—

**जया ते पेइए रज्जे, कया किच्चकरा बहू ।**
**तेसिं किच्चं परिच्चज्ज, अज्ज किच्चकरो भव ॥२॥** [ उत्त. नि. गा.२७७ ]

पैत्रिके राज्ये यदा त्वया कृत्यकरा बहवः कृताश्चासन्, तेषां कृत्यं परित्यज्य, गृहीतव्रतोऽद्य कृत्यकरो नियुक्तकोऽन्यदोषचिन्तया कुतो भवसि ? ततो **गान्धारो नमिं** प्राह—

**जया सव्वं परिच्चज्ज, मोक्खाय घडसी भवं ।**
**परं गरीहसी केणं, अत्तनीसेसकारए ॥३॥** [ उत्त. नि. गा.२७८ ]

मोक्षाय घटसे चेष्टसे, आत्मनो निःशेषाभावं कर्म तत्कारकः सर्वकर्मक्षयकृत्, आत्मनो निःश्रेयसो मोक्षस्तत्कारको वा । ततः **करकण्डुर्द्विमुखा**दीनामाह—

**मोक्खमग्गं पवन्नेसु, साहूसु बंभयारिसु ।**
**अहियत्थं निवारंतो, न दोसं वत्तुमरिहसि ॥४॥** [ उत्त. नि. गा.२७९ ]

अहियत्थं अहितार्थं निवारयतो दोषं परनिन्देयं तवेति वक्तुं नार्हसि, यथा त्वमहिता-न्निवारयन्तं किमु गर्हसि ? तथा **नमि**रद्य कृत्यकर इति, **द्विमुखः** सञ्चयं किं

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

करोषीत्यहितार्थनिव सर्वे निवारयन्ति, अतो दोषं परापवादाख्यं वक्तुं न युक्तम् । यद्वा अहितार्थं निवारयन्तं प्रति दोषं निन्दाख्यं वक्तुं नार्हसि, यतः–

**रूसओ वा परो मा वा, विसं वा परियत्तउ ॥**
**भासियव्वा हिया भासा, सपक्खगुणकारिया ॥१॥** [ उत्त. नि. गा.२७९वृ. ]

ततः **करकण्डुः** कण्डूयनीं मुमोच, ततो विहृताः सर्वे ।

**पुप्फुत्तराओ चवणं, पव्वज्जा होइ एगसमएणं ।**
**पत्तेयबुद्धकेवलि, सिद्धिगया एगसमएणं ॥५॥** [ उत्त. नि. गा.२७९वृ. ]

तेषां **महाशुक्रपुष्पोत्तर**विमानाच्च्यवनं एकसमये, प्रव्रज्या भवत्येकसमयेन, प्रत्येकमेकैकं हेतुमाश्रित्य बुद्धा ज्ञाततत्वाः प्रत्येकबुद्धाः केवलिनः सिद्धाश्चैकसमये चत्वारोऽपि, त्रयाणां शब्दानां कर्मधारयः कार्यः ॥४७॥

तथा–

**सोवीररायवसहो, चिच्चाणं मुणी चरे ।**
**उद्दायणो पव्वइओ, पत्तो गइमणुत्तरं ॥४८॥**

**व्याख्या–सौवीरो** देशः, **सौवीरराजवृषभ**स्त्यक्त्वा राज्यमिति, **मुनि**र्वाचंयमीभूतोऽचारीद् व्रतम् **उदायन**नामा **प्रव्रजितः** सन् **प्राप्तो गतिमनुत्तराम्** ॥

**तच्चरित्तमित्थं–सौवीर**देशे **वीतभय**पुरे **उदायन**राट्, तस्य **प्रभावती** राज्ञी, सा **चेटक**सुता श्राविका । तयोर्ज्येष्ठपुत्रोऽ**भिचि**नामाऽभूत्, भागिनेयश्च तस्य **केशी**नामाऽभूत् । स **उदायन**नृपः **सिन्धुसौवीर**प्रमुखषोडशजनपदानां **वीतभय**प्रमुखत्रिशतत्रिषष्टिनगराणां दशराज्ञां बद्धमुकुटानां, छत्राणां चामराणां चैश्वर्यं पालयन्नस्ति । इत**श्चम्पा**यां नगर्यां **कुमारनन्दि**नामा स्वर्णकारोऽस्ति । स च स्त्रीलम्पटो यत्र यत्र सुरूपां दारिकां पश्यति जानाति वा, तत्र तत्र पञ्चशतसुवर्णानि दत्वा तां परिणयति । एवं च तेन पञ्चशतकन्याः परिणीताः, एकस्तम्भं प्रासादं च कारयित्वा तस्मिंस्ताभिः सह क्रीडति । तस्य च मित्रं **नागिल**नामैकः श्रावकोऽस्ति । अन्यदा **पञ्चशैल**द्वीपवास्तव्य**हासाप्रहासा**ख्यव्यन्तर्योर्भर्त्ता **विद्युन्मालि**नामा देवश्च्युतः, तदा ताभ्यां चिन्तितमथावां कमपि व्युद्ग्राहयावः, य आवयोर्भर्त्ता भवेत् ।

अथ स्वयोग्यपुरुषगवेषणायेतस्ततो व्रजन्तीभ्यां ताभ्यां **चम्पा**नगर्यां **कुमारनन्दी** स्वर्णकारः पञ्चशतस्त्रीपरिवृतो दृष्टः, ताभ्यां चिन्तितमेनं स्त्रीलम्पटं सुखेन व्युद्ग्राहयिष्यावः,

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

ततस्ताभ्यां तस्मै निजयौवनादिगुणोपेतमनोहरं रूपं दर्शितम् । तदा **कुमारनन्द्य**वक् के भवन्त्यौ ? कुतश्च समायाते ? ते आहतुरावां **हासाप्रहासाख्य**देव्यौ स्वः, तद्रूपमोहितः **कुमारनन्दी** स्वर्णकारस्ते देव्यौ भोगार्थं प्रार्थितवान् । ताभ्यां भणितं यद्यस्मद्भोगकार्यं तदा त्वं **पञ्चशैल**द्वीपे समागच्छेः, इत्युक्त्वा ते देव्यौ गगनाध्वन्युत्पत्य गते स्वस्थानम् । अथ तेन सुवर्णकारेण धनदानपूर्वकं राज्ञ आज्ञामादाय नगरे पटहोद्घोषणा कारिता, यत्**कुमार-नन्दि**स्वर्णकारं यः **पञ्चशैल**द्वीपं नयति तस्मै स धनकोटिं ददाति, तदैकेन स्थविरनाविकेन स पटहः स्पृष्टः, **कुमारनन्दि**नामपि तस्मै कोटिधनं दत्तं, स स्थविरोऽपि तद्धनं पुत्रेभ्यो दत्वा **कुमारनन्दि**ना सह यानपात्रमारूढः समुद्रमध्ये प्रविष्टः, यावद्दूरे गतस्तावदेकं वटवृक्षं स दृष्टवान् । अथ स्थविर उवाच तस्य वटस्याध इदं प्रहवणं गमिष्यति, तत्र च जलावर्त्तोऽस्ति, अतः प्रवहणमिदं भङ्क्ष्यति, त्वं त्वेतद्वटवृक्षशाखामश्रयेः, वटेऽत्र **पञ्चशैल**द्वीपाद्भारण्डपक्षिणः सन्ध्यायां समायास्यन्ति, तच्चरणेषु स्वं वपुस्त्वं वस्त्रेण दृढं बध्नीयाः, ते च प्रभाते इत उड्डीनाः **पञ्चशैलं** यास्यन्ति, एवं त्वमपि तैः समं **पञ्चशैले** गच्छेः, स्थविरो यावदेवं कथयति तावत् प्रवहणं तद्वटाधो गतम्, **कुमारनन्दि**ना तद्वट-शाखालम्बनं विहितम्, प्रवहणं च भग्नम्, कुमारनन्दी च भारण्डपक्षिचरणावलम्बेन **पञ्चशैले** गतः, तत्र च ताभ्यां **हासाप्रहासा**भ्यां स दृष्टः, उक्तं च ताभ्यां तवैतेन शरीरेण नाऽऽवाभ्यां सह भोगो विधीयते । अतः स्वनगरे गत्वा त्वमङ्गुष्ठत आरभ्य मस्तकं यावज्ज्वालनेन स्वशरीरं दाहय ! यथा **पञ्चशैला**धीशो भूत्वा त्वमस्मद्भोगेहां पूर्णीकुरु ! तेनोक्तं तत्राहमथ कथं यामि ? तदा ताभ्यां स करतले समुत्पाट्य तन्नगरोद्याने मुक्तः, तत्र लोकस्तं पृच्छति, किं त्वया तत्राश्चर्यं दृष्टम् ? स भणति दृष्टः श्रुतोऽनुभूतः **पञ्चशैलो** द्वीपो मया, यत्र **हासाप्रहासा**भिधे देव्यौ स्तः, अथात्र **कुमारनन्दि**ना स्वाङ्गुष्ठेऽग्निं मोचयित्वा मस्तकं यावत् स्वशरीरं ज्वालयितुमारब्धम्, तदा पूर्वोक्तच्छ्रावकमित्रेणासौ वारितो भो मित्र ! तवेदं कापुरुषजनोचितं चेष्टितं न युक्तम्, हे महानुभाव ! दुर्लभं मनुष्यजन्म त्वं मा हारय ! तुच्छमिदं भोगसुखमस्ति । किञ्च यद्यपि त्वं भोगार्थी तथापि सद्धर्मानुष्ठानमेव कुरु ! यत उक्तम्—

**धणओ धणत्थियाणं, कामत्थीणं च सव्वकामकरो ।**
**सग्गापवग्गसंगम-हेऊ जिणदेसिओ धम्मो ॥१॥** [ र. स./गा.१३ ]

इत्यादिशिक्षावादैर्मित्रेण वार्यमाणोऽपि स इङ्गिनीमरणेन मृतः **पञ्चशैला**धिपतिर्जातः, तन्मित्रस्य तस्य श्रावकस्य तु महान् खेदो जातः, अहो भोगकार्ये जना इत्थं क्लिश्यन्ति,

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अहो जानन्तोऽपि वयं किमत्र गार्हस्थ्ये स्थिताः स्मः ? इति विचिन्त्य स श्रावकः प्रव्रजितः, क्रमेण च कालं कृत्वा सोऽ**च्युत**देवलोके समुत्पन्नः, तत्रावधिना स स्ववृत्तान्तं जानाति स्म ।

अथान्यदा **नन्दीश्वर**यात्रार्थं सर्वे देवेन्द्रा देवेन्द्राश्चलिताः तदा स श्रावकदेवोऽप्य**च्युतेन्द्रे**ण सह चलितः, तदा **पञ्चशैला**धिपतेस्तस्य **विद्युन्मालि**नाम्नो देवस्य गले पटहो लग्नः, उत्तारितो नोत्तरति, तदा **हासाप्रहासा**भ्यामुक्तं इयं **पञ्चशैल**द्वीपवासिनः स्थितिरस्ति, य**न्नन्दीश्वर**द्वीपयात्रार्थं चलितानां देवेन्द्राणां पुरः पटहं वादयन् **विद्युन्मालि-देव**स्तत्र याति, ततस्त्वं खेदं मा कुरु ! गललग्नमिमं पटहं वादय ! गीतानि गायन्तीभ्यामावाभ्यां सह **नन्दीश्वर**द्वीपे याहि ! ततः स तथा कुर्व**न्नन्दीश्वर**द्वीपोद्देशेन चलितः, अथ स श्रावकदेवस्तं सखेदं पटहं वादयन्तं दृष्ट्वपयोगेनोपलक्षितवान्, भणति च भो त्वं मां जानासि ? स भणति कः शक्रादिदेवान्न जानाति, ततस्तं स श्रावकदेवस्तस्य स्वप्राग्भवरूपं दर्शयति स्म, सर्वं पूर्ववृत्तान्तं चाख्याति स्म । ततः संवेगमापन्नः स देवो भणति अधुनाहं किं करोमि ? तेनोक्तं श्री**वर्द्धमान**स्वामिनः प्रतिमां कुरु ! यथा तव सम्यक्त्वं सुस्थिरं भवति । यत उक्तम्—

**जो कारवेइ जिणपडिमं, जिणाण जियरागदोसमोहाणं ।**
**सो पावेइ अन्नभवे, सुहजणणं धम्मवररयणं ॥१॥ [ ]**

अन्यच्च—

**दारिद्दं दोहग्गं, कुजाइकुसरीरकुगइकुमईओ ।**
**अवमाणरोयसोआ, न हुन्ति जिणबिम्बकारीणं ॥२॥ [ ]**

ततः स **विद्युन्माली** महाहिमवच्छिखराद् गोशीर्षचन्दनदारु छेदयित्वा तेन श्री**वर्द्धमान**स्वामिप्रतिमां निर्मापितवान् । कियन्तं कालं तेन सा प्रतिमा पूजिता । ततो निजच्यवनकालं निकटं विज्ञाय स तां प्रतिमामेकायां मञ्जूषायां निक्षिप्तवान् ।

अथ तस्मिन्नवसरे स देवः समुद्रमध्ये षण्मासान् यावदितस्ततो भ्रमदेकं प्रवहणं वायुभिरास्फाल्यमानं विलोकितवान्, तत्र गत्वाऽसौ तमुत्पातमुपशामितवान्, सांयात्रिकाणां च तां मञ्जूषां दत्वा स भणति यद्देवाधिदेवप्रतिमात्राऽस्ति, यत्र चेयं विशेषपूजामाप्नोति तत्रेयं देया, किं च देवाधिदेवनाम्नैवेयं मञ्जूषोद्घटिष्यति भवत्प्रवहणेऽस्यां स्थितायां न कोऽप्युपद्रवो भविष्यति । ततस्तां लात्वा सांयत्रिका **वीतभय**पत्तनं प्राप्ताः, तत्रो**दायन**राजा तापसभक्तस्तस्य सा मञ्जूषा दत्ता, कथितं च सुरवचनम् । मिलिताश्च तत्र द्विजादिबहवो

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

लोकाः, तै**र्विष्णुशङ्करब्रह्मा**दिनामग्रहणपुरस्सरं तामुद्घाटयितुं भुरिप्रयत्नो विहितः, परं सा नोद्घटिता । इतस्तत्रो**दायन**राजपट्टराज्ञी **चेटक**राजपुत्री **प्रभावत्य**भिधाना परमश्राविका तत्रायाता। तया मञ्जूषायाः पूजां कृत्वोक्तम्—

**गयरायदोसमोहो, सव्वनू अट्ठपाडिहेरसञ्जुत्तो ।**
**देवाहिदेवगुरुओ, अइरा मे दंसणं देउ ॥१॥ [   ]**

तत्क्षणमेव सा मञ्जूषोद्घटिता, निःसृता च ततोऽम्लानपुष्पमालालङ्कृता श्री**वर्द्धमान**-स्वामिप्रतिमा, जाता च श्रीजिनशासनोन्नतिः, अथ **प्रभावत्या** अन्तःपुरमध्ये चैत्यगृहं कारितं, स्थापिता च तत्रेयं प्रतिमा । स्वयं च सर्वदा पवित्रीभूय तां त्रिकालमर्चयति । अन्यदा **प्रभावती** तत्प्रतिमायाः पुरो नृत्यति, राजा च वीणां वादयति । तदा तां शिरोरहितां दृष्ट्वा विषण्णस्य राज्ञो हस्ताद्वीणा स्खलिता । तदा **प्रभावत्या** तत्कारणं पृष्टो नृपो यथास्थं जगौ । राज्ञ्या ज्ञातं नूनमथ ममायुः स्वल्पमस्ति । कियद्दिवसानन्तरं प्रतिमापूजार्थं स्नाता सा पूजार्हवस्त्रानयनकृते निजचेटीमादिशत् ।

सा पूजार्हश्वेतवस्त्राण्यानीय तस्यै दातुं लग्ना, परं **प्रभावत्या** दृष्टिभ्रमेण तान्येव वस्त्राणि रक्तवर्णोपेतानि दृष्टानि । तेन क्रुद्धया तया दास्यादर्शेन ताडिता, मर्मप्रहारतः सा मृता । तदैव तान्येव वस्त्राणि श्वेतानि दृष्ट्वा पश्चात्तापपरा **प्रभावती** चिन्तयितुं लग्ना, हा मयाधमया मनुष्यहिंसा कृता ! भग्नं च मे व्रतं, अथ जीवितेनालम्, ततस्तया राज्ञे ज्ञापितं स्वामिन्नथाहं भक्तं प्रत्याख्यामि देहि ममाज्ञां ! राज्ञोक्तं यदि त्वं देवीभूय मां प्रतिबोधयसि तदा तवाज्ञां यच्छामि । राज्ञ्यपि तदङ्गीकृतम् । अथ सा भक्तं प्रत्याख्याय समाधिना मृत्वा देवलोके देवोऽभूत् । अथ तां प्रतिमां **देवदत्ता**भिधानैका कुब्जा दासी नित्यं त्रिकालं पूजयति । **प्रभावती**देवो विविधैरुपायै**रुदायनं** राजानं प्रतिबोधयति परं स प्रतिबोधं न प्राप्नोति । राजा तु तापसभक्तोऽतः स देवस्तापसरूपं कृत्वाऽमृतफलानि राज्ञे समर्पयत् । राजा तानि फलान्यास्वाद्य तत्फलरसलोलुपस्तं तापसं प्रति जगौ, भो तापस ! क्वैतानि फलानि विद्यन्ते ? तापसेनोक्तमस्मदाश्रमे बहव एतानि फलानि सन्ति । तदा राजा तेन सममेकाक्येव चलितः, देवेन तादृक्फलोपेतवृक्षवृन्दसमन्वितं वनं विकुर्वितम्, यावद्राजा तानि फलानि त्रोटयति, तावद्देवविकुर्विततापसा दण्डपाणयस्तं हन्तुं धाविताः, राजा भयविह्वलस्ततो नष्टो दूरे कतिचिज्जैनसाधून् ददर्श । तत्पार्श्वे समागत्य तेषां शरणमाश्रितः, तैरपि त्वं भयं मा कुर्वित्याश्वासितः, देवविकुर्विततापसा अपि पश्चान्निवृत्ताः, साधुभिश्च तस्मै नृपतये एवं धर्म उपदिष्टः—

Jain Education International 2010_02    For Private & Personal Use Only    www.jainelibrary.org

**धम्मो चेवेत्थ सत्ताणं, सरणं भवसायरे ।**
**देवं धम्मं गुरुं चेव, धम्मत्थी य परिक्खए ॥१॥ [ ]**
**दसअट्ठदोसरहिओ देवो, धम्मो वि निउणदयसहिओ ।**
**सुगुरु य बंभयारी, आरंभपरिग्गहा विरओ ॥२॥ [ सं स./गा.३ ]**

इत्यादिकोपदेशेन स राजा प्रतिबोधं प्राप्तः, प्रतिपन्नश्च तेन जिनधर्मः, अथ **प्रभावती**देवः प्रकटीभूय राजानं च स्थिरीकृत्य स्वस्थाने गतः, एवं स **उदायन**राजा श्रावको जातः ।

इतश्चैको **गन्धार**देशवास्तव्यः **सत्य**नामा श्रावकः सर्वत्र जिनजन्मभूम्यादितीर्थानि वन्दमानो **वैताढ्यं** यावद् गतः, तत्र च शाश्वतप्रतिमावन्दनार्थं स उपवासत्रयं कृतवान् । तत्तपस्तुष्टया तदधिष्ठातृदेव्या तस्मै शाश्वतजिनप्रतिमा दर्शिताः, तेनापि ता वन्दिताः, अथ तया देव्या तस्मै श्रावकाय कामितदा गुटिका दत्ताः, ततः स निवृत्तो **वीतभय**पत्तने जीवन्तस्वामिप्रतिमां वन्दितुमायातः, गोशीर्षचन्दनमयीं तां प्रतिमां सोऽवन्दत । दैवात्तत्र तस्याऽतिसाररोग उत्पन्नः, कुब्जया दास्या च तस्य परिचर्या कृता, जातश्च स नीरुक् । ततस्तुष्टेन तेन तस्यै ताः कामगुटिका दत्ताः, कथितश्च तासां चिन्तितार्थसाधकः प्रभावः, अथान्यदा सा दासी अहं सुवर्णवर्णदेहा भवामीति विचिन्त्यैकां गुटिकां भक्षयामास । तत्क्षणमेव सा सुवर्णवर्णदेहा जाता, ततश्च तस्य **सुवर्णगुलिके**ति नाम जातम् , अन्यदा सा चिन्तयति यद्भोगसुखमनुभवामि, एष **उदायन**राजा तु मम पितृतुल्य इति सा **चण्डप्रद्योत**मेव मनसि कृत्वा गुटिकामेकां भक्षयामास । तदैव स्वप्नमध्ये देवकथनतोऽसौ **चण्डप्रद्योतः सुवर्णगुलिका**नयनार्थं दूतं प्रेषितवान् । दूतेनागत्य तस्यै **चण्डप्रद्योता**भिलाषः कथितः, तयोक्तं प्रथममत्र **चण्डप्रद्योतः** समायातु तं सम्यग् निरीक्ष्याहं तेन सहागमिष्यामि ।

अथ दूतकथनत**श्चण्डप्रद्योतोऽनिलवेग**गजमारुह्य रात्रौ **सुवर्णगुलिका**समीपे समायातः, तयोक्तमस्या जिनप्रतिमायाः सदृशीमेकां प्रतिमां त्वमत्रानय ? यथा तां प्रतिमामिहैव स्थापयित्वेमां च मूलप्रतिमामादाय त्वया सहागच्छामि । **चण्डप्रद्योतः** पश्चाद्वलित्वा निजनगरे समागत्य चपलमेव तादृशीं प्रतिमां कारयित्वा तामादाय पुनः **सुवर्णगुलिका**समीपे समायातः, तदा सा दास्यपि मूलजिनप्रतिमास्थाने तां नवीनप्रतिमां स्थापयित्वा जीर्णां च समादाय **चण्डप्रद्योतेन सहोज्जयिन्यां** प्राप्ता । प्रभाते तं वृत्तान्तं विज्ञा**योदायनेन चण्डप्रद्योतं** प्रति दूतं प्रेषयित्वा प्रतिमा मार्गिता । परं **चण्डप्रद्योतेन** नार्पिता । तदा क्रुद्धो **उदायनो** निजसैन्यं मेलयित्**वोज्जयिनीं** प्रति चलितः, तत्र च द्वयोः सैन्ययोर्युद्धं जातं, **उदायनेन चण्डप्रद्योतं** विजित्य बद्ध्वा च

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तस्य ललाटेऽयं मम दासीपतिरित्यक्षराणि लिखितानि । ततस्तं काष्ठपञ्जरे निक्षिप्योदायनो निजनगरं प्रति चलितः, मार्गे वर्षाकालः समायातः, ततस्तेन निजसैन्यं तत्रैव स्थापितम् । **उदायनः** सर्वदा **चण्डप्रद्योतं** भोजनसमये स्वपार्श्वे समानीय स्वतुल्यमेव भोजनं भोजयति । इतस्तत्र पर्युषणापर्व समागतं, त**दोदायने**नोपवासः कृतः, सूपकारै**श्चण्डप्रद्योतः** पृथग्भोजनार्थं पृष्टो ध्यायति नूनमद्य मां भोजनान्तर्विषदानेनासौ मारयिष्यतीति विचार्य तेन तेभ्यः पृष्टं किमद्याहं पृथग्भोजनाय पृष्टः ? तैरुक्तमद्य पर्युषणापर्वास्ति, ते**नोदायन**नृपेणोपवासः कृतोऽस्ति । तत् श्रुत्वा **चण्डप्रद्योते**नोक्तं ममाप्यद्योपवासोऽस्ति, प्रथमं न ज्ञातं मयाद्य पर्युषणादिनम् । सूपकारैः स उदन्त **उदायना**य निवेदितः, त**दोदायने**न चिन्तितं, जानामि यदयं धूर्त्तसाधर्मिकीभूतोऽस्ति, तथाप्यस्मिन् बद्धे मम पर्युषणा न शुद्ध्यति, इति ध्यात्वा तेन **चण्डप्रद्योतो** बन्धनमुक्तः कृतः, क्षामितश्च तद्भाललिखिताक्षरावलिच्छादनार्थं च तस्य मूर्ध्नि रत्नपट्टो बद्धः, प्रेषितश्च सन्मानपुरस्सरं स तस्य देशे । **उदायन**नृपोऽपि निजनगरे समायातः, अथैकदा स पौषधशालायां पौषधं प्रतिपालयन् रात्रौ चिन्तयति धन्यानि तानि ग्रामाकरनगराणि यत्र श्रमणो भगवान् श्री**महावीरो** विहरति, धन्याश्च ते **राजगृहे**श्वरप्रभृतयो नृपा ये श्रमणस्य भगवतः श्री**महावीर**स्यान्तिके केवलिप्रज्ञप्तं धर्मं शृण्वन्ति, पञ्चाणुव्रतिकं सप्तशिक्षाव्रतकं द्वादशविधं श्रावकधर्मं च प्रतिपद्यन्ते, तथैवाऽनगारितां च प्राप्नुवन्ति ।

ततः श्रमणो भगवान् श्री**महावीर**श्चेदत्र समागच्छेत्तदाहमपि भगवदन्तिके प्रव्रजामि । अ**थोदायन**स्यायमध्यवसायो भगवता ज्ञातस्तदा स प्रात**श्चम्पातो** विहृत्य **वीतभय**पत्तनस्य **मृगवनो**द्याने समवसृतः, तत्र पर्षन्मिलिता, **उदायनो**ऽपि तत्र समायातः, भगवदन्तिके धर्मं श्रुत्वा हृष्टश्चैवमवादीत्, स्वामिन् भवदन्तिकेऽहं प्रव्रजिष्यामि, परं राज्यं कस्मैचिद्द-त्वागमिष्यामीत्युक्त्वा भगवन्तं वन्दित्वा स स्वगृहाभिमुखं चलितः, भगवतापि प्रतिबन्धं मा कार्षीरित्युक्तम् । अथ पथि तेन चिन्तितं यदि मम पुत्रा**याभिचि**कुमाराय राज्यं दास्यामि तदासौ कामभोगेषु मूर्छितोऽनन्तसंसारकान्तारं भ्रमिष्यति, ततः श्रेयः खलु मम भागिनेय-**केशि**कुमाराय राज्यार्पणम् । ततो द्रुतं गृहे समागत्य मन्त्र्यादीनाहूय तेन **केशि**कुमारस्य राज्याभिषेकः कृतः, ततस्तत्कृतनिष्क्रमणमहोत्सव **उदायन**नृपो भगवन्दतिके दीक्षां जग्राह । बहूनि षष्ठाष्टमदशमद्वादशममासार्द्धमासक्षपणादीनि तपःकर्माणि कुर्वाणः स विहरति । अथान्यदा त**स्योदायन**राजर्षैरन्तप्रान्ताद्याहारेण शरीरे महान् व्याधिरुत्पन्नः, वैद्यैरुक्तं दध्यौषधं कुरु ! अथ स भगवदाज्ञयैकाकी विहरति । अन्यदा स विहरन् **वीतभय**पत्तने गतः, तत्र तस्य भागिनेयः **केशि**कुमारराजा मन्त्र्यादिभिरिति भणितः, स्वामिन्नेष **उदायन**-राजर्षिः परीषहादिपराभूतः प्रव्रज्यां मोक्तुकाम एकाक्येवेहायातस्तव राज्यं मार्गयिष्यति, स

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

प्राह दास्यामि, तैर्दुष्टैरुक्तं नैष राजधर्मः । स प्राह तर्हि किं क्रियते ? ते प्राहुरस्य विषं देयम्, राज्ञोक्तं यथेच्छं कुरुत ! ततस्तैरेकस्याः पशुपाल्या गृद्धे विषमिश्रितं दधि कारितम्, तेषां शिक्षया च तया तत्तस्मै राजर्षये दात्तम्, **उदायन**भक्तया देवतया च तदपहृतम्, कथितं च तया तस्मै हे मुने ! सम्प्रति त्वं दध्यौषधं पहर ! मुनिनापि तद्वाक्यात्तत्परिहृतम्, ततस्तस्य रोगो वर्द्धितुं लग्नः, तदा तेन पुनर्दध्यौषधं कर्त्तुमारब्धम्, पुनरपि तदन्तर्विषं देवतयाऽपहृतम्, एवं वारत्रयं जातम्, अन्यदा सा देवतापि प्रमत्ता जाता, तदा विषप्रयोगत **उदायन**राजार्षिर्बहूनि वर्षाणि श्रामण्यपर्यायं पालयित्वा मासिक्या संलेखनया च केवलज्ञानमासाद्य सिद्धः, कुपितया देवतया च **वीतभय**पत्तनं पांशुवृष्टिभिराच्छादितम्, यदद्यापि तथैवास्ति ॥ इत्यु**दायन**नृपवृत्तान्तः ॥४८॥

**तहेव कासीराया, सेओसच्चपरक्कमो ।**
**कामभोगे परिच्चज्ज, पहणे कम्ममहावणं ॥४९॥**

**व्याख्या–तथैव काशीराजा काशी**देशपतिर्**नन्दना**ख्यः सप्तमबलः, श्रेयसि सत्ये संयमे पराक्रमो यस्यासौ **श्रेयःसत्यपराक्रमः कामभोगान् परित्यज्य प्राहन् कर्म-महावनम**तिगहनम् ॥

यथा **काश्यामग्निशिखो** राजा, तस्य **जयन्ती**देवीकुक्षिभूः सप्तमबलदेवो **नन्दनाह्वः**, अनुजश्च **शेषवती**सुतो **दत्ता**ख्यो हरिः, स च **दत्तः** पितृदत्तराज्यो जित**भरतार्द्धो** षट्पञ्चाशद्वर्षसहस्रायुर्मृत्वा पञ्चमनरकं गतः, **नन्दन**स्तु प्रव्रज्य पञ्चषष्टिवर्षसहस्रायुः सिद्धः ॥ इति ॥४९॥

**तहेव विजओ राया, अणट्ठाकित्ति पव्वए ।**
**रज्जं तु गुणसमिद्धं, पयहित्तु महायसो ॥५०॥**

**व्याख्या–तथैव विजयो राजा** द्वितीयो बलः, आर्षत्वा**दनार्त्त** आर्त्तध्यानहीनः **कीर्त्त्यो**पलक्षितः सन्, यद्वा आ नष्टा सामस्त्येनाऽपगताऽकीर्त्तिरश्लाघा यस्यासौ **आनष्टाऽकीर्त्तिः**, यद्वा आज्ञा अर्थो हेतुरस्याः सा **आज्ञार्थकृति**र्मुनिवेषास्तिक्यं यत्र तदाज्ञार्थ-कृतिर्यथा स्यादेवं **प्राव्राजीत्, राज्यं गुणै**र्न्यायाद्यैः कामगुणैः शब्दाद्यैर्वा **समृद्धं प्रहाय महायशाः** ॥

**द्वारिकायां ब्रह्म**राजस्य **सुभद्रायां विजया**ख्यो बलदेवः पुत्रोऽभूत्, स निजलघु-भ्रातृ**द्विपृष्ठा**ख्यवासुदेवस्य मरणानन्तरं प्रव्रज्य मुक्तिं गतः ॥५०॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**तहेव उग्गं तवं किच्चा, अव्वखित्तेण चेयसा ।**
**महाब्बलो रायरिसी, आदाय सिरसा सिरिं ॥५१॥**

**व्याख्या–तथैवोग्रतपः कृत्वाऽव्याक्षिप्तेन चेतसा महाबलो राजर्षिरादाय** शिरसेव **शिरसा** शिरःप्रदानेनैव जीवितनिरपेक्षमित्यर्थः, **श्रियं** संयमश्रियम्, तृतीयभवे च सिद्धः ॥

यथा **गजपुरे बलराजप्रभावत्योः** सिंहस्वप्नान्**महाबलः** सुतोऽभूत्, अत्र स्वप्नपाठकजन्मादिमहाश्चक्रिवज्जाताः, स तारुण्ये सुरूपा अष्टौ राट्कन्याः पितृभ्यां विवाहितः, अष्टभौमं च भवनं तस्मै दत्तम् । कन्यापितृभिरष्टौ हिरण्यकोट्योऽष्टौ स्वर्णकोट्यो मुकुटकुण्डलहारार्द्धहारकटकादयोऽप्यष्टावष्टौ, दशसहस्रात्मकान्यष्टौ गोकुलानि, हस्तिवाजिरथयानद्वात्रिंशद्बद्धनाटकान्यप्यष्टौ, दशकुलसहस्रात्मका अष्टौ ग्रामाः, कर्मकरदासदासीस्थालकच्चोलकादीनि सर्ववस्तून्यष्टावष्टौ दत्तानि । एवं स देवोपमान् भोगान् भुनक्ति । एकदा तत्र **धर्मघोष**मुनिमेतं श्रुत्वा **महाबलो** नन्तुं गतः, धर्मं श्रुत्वा संवेगात् पित्रोः प्रव्रज्यानुमतिं ययाचे । तत् श्रुत्वा तौ मूर्च्छितौ भूमौ पतितौ, शीतोपचारैश्च सचेतनीभूतौ । महाग्रहाच्च तौ तस्मै कतिचित् प्रश्नोत्तरानन्ततरं प्रव्रज्यानुमतिं ददतुः, ततोऽसौ **धर्मघोष**गुर्वन्तिके प्रव्रज्य षष्ठाष्टमादिभिर्द्वादशवर्षाणि श्रामण्यं प्रपाल्य मासिक्या संलेखनया **ब्रह्मलोके** दशसागरायुःसुरोऽभूत्, ततो **वाणिज्य**ग्रामे श्रेष्ठिकुले **सुदर्शना**भिधो जातः, श्रीवीरपार्श्वे च प्रव्रज्य सिद्धः ॥५१॥ इति सप्तदशसूत्रार्थः ॥

इत्थं महापुरुषदृष्टान्तैर्ज्ञानपूर्वं क्रियाफलमुक्त्वोपदिशति–

**कहिं धीरो अहेऊहिं, उम्मत्तो व्व महिं चरे ।**
**एए विसेसमायाय, सूरा दढपरक्कमा ॥५२॥**

**व्याख्या–कथं धीरोऽहेतुभिः** क्रियावाद्यादिकुहेतुभि**रुन्मत्त** इति भूतात्त **इव** तात्त्विकवस्त्वपलपेनालजालभाषितया **महीं चरेत्** ? नैव चरेदित्यर्थः, **एते भरताद्या विशेषं** विशिष्टतां मिथ्यामतेभ्यो जिनमतस्**यादाय** मनसि निश्चित्य **शूरा दृढपराक्रमा** एतदाश्रिताः, अतस्त्वयापि धीरेण सताऽत्रैव चेतः स्थिरीकर्त्तव्यम् ॥५२॥

**अच्चंतणियाणखम्मा, सच्चा मे भासिया वई ।**
**अतरिंसु तरंतेगे, तरिस्संति अणागया ॥५३॥**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या—अत्यन्तं निदानं** कर्ममलशोधनम्, तत्र **क्षमाः** समर्थाः, एवंविधा जनाः, **सत्या** 'मे' **मया भाषिता** 'वई' **वाग्**, जिनमतमेवाश्रयेतिरूपा । अनया अङ्गी-कृतया वाचा ते पूर्वोक्ता जना **अतार्षुः, तरन्त्येके** क्षेत्रापेक्षया, **तरिष्यन्त्यथ** [**अनागताः**] भाविनो जीवा भवम् ॥५३॥

अतः—

**कहं धीरे अहेऊहिं, आयाणं परियावसे ।**
**सव्वसंगविणिमुक्के, सिद्धे भवइ नीरए ॥५४॥ त्ति बेमि**

**व्याख्या—कथं धीरोऽहेतुभिरात्मानं पर्यावासयेत्** ? कुत्सितहेतूनामावासरूपं कथं कुर्यात् ? अत्र फलमाह—**सर्वे सङ्गा** द्रव्यतो धनाद्याः, भावतश्च मिथ्यात्वरूपा एते क्रियावादास्तै**र्विनिर्मुक्तः** सन् **सिद्धो भवति नीरजाः**, अहेतुत्यागस्य सम्यग्ज्ञानहेतुत्वेन सिद्धिः फलम् ।

इत्थं तमनुशास्य गतो विहारं क्षत्रियः, **सञ्जयो**दन्तमाह निर्युक्तिकृत्—

**काऊण तवच्चरणं, बहूणि वासाणि सो धुयकिलेसो ।**
**निव्वाणं संपत्तो, जं संपत्ता न सोयंति ॥१॥** [ उत्त. नि./गा.४०४ ]

**सञ्जयः** सिद्धिं गत इत्यर्थः, **इति** समाप्तौ, **ब्रवीमी**ति प्राग्वत् ॥५४॥

**इति भोगर्द्धित्यागे अष्टादशं संयतीयाध्ययनमुक्तम् ॥१८॥**

• • •

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

# एकोनविंशं मृगापुत्रीयाध्ययनम् ॥

भोगर्द्धित्यागश्चाऽप्रतिकर्मतया सम्यक् स्यादित्यप्रतिकर्मतायामेकोनविंशं **मृगापुत्र**-राजसुतदृष्टान्तेन **मृगापुत्रीया**ध्ययनमाह–

**सुग्गीवे नयरे रम्मे, काणणुज्जाणसोहिए ।**
**राया बलभद्दो त्ति, मिया तस्सग्गमाहिसी ॥१॥**

**व्याख्या–सुग्रीवे सुग्रीव**नाम्नि **नगरे रम्ये, कानन**नैर्बृहद्वृक्षाश्रयैः वनै**रुद्यानै**रारामैः क्रीडावनैर्वा **शोभिते, राजा बलभद्र इति** नाम्ना, मृगेति च नाम्नी **तस्याग्रमहिषी** प्रधानपत्नी बभूव ॥१॥

**तेसिं पुत्ते बलसिरी, मियापुत्ते त्ति विस्सुए ।**
**अम्मापिऊण दइए, जुवराया दमीसरे ॥२॥**

**व्याख्या–तयोः पुत्रो बलश्री**नामा, मातृपितृकृतनाम्ना, लोके च **मृगापुत्र इति विश्रुतः, अम्बापित्रोर्दयितो** वल्लभो **युवराजा,** तथा दमिनामीश्वरो **दमीश्वरो** भाविकाले भावी ॥२॥

**नंदणे सो उ पासाए, कीलए सह इत्थिहिं ।**
**देवो दोगुंदुगो चेव, निच्चं मुइयमाणसो ॥३॥**

**व्याख्या–नन्दने** सल्लक्षणसमृद्धिकरे, **स मृगापुत्रः, तुः** पूर्तौ, **प्रासादे क्रीडति सह स्त्रीभिः**, क इव ? [देवः सुरः] **दोगुन्दग इव, चः** पूर्त्तौ, दोगुन्दगास्त्रायस्त्रिंशा **नित्यं** भोगपरायणाः स्युः, स इवायमपि नित्यं स्त्रीक्रीडाभि**र्मुदितमानसो**ऽस्ति ॥३॥

**मणिरयणकुट्टिमतले, पासायालोयणे ठिओ ।**
**आलोएइ नगरस्स, चउक्कतियचच्चरे ॥४॥**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या**–**मणिरत्नकुट्टिमतले प्रासादे, आलोकने** सर्वोपरि चतुरिकारूपे गवाक्षे **स्थित आलोकते नगरस्य सुग्रीवस्य चतुष्कत्रिकचत्वराणि** ॥४॥ इति सूत्रचतुष्कार्थः ॥

ततः–

**अह तत्थ अइच्छंतं, पासई समणसंजयं ।**
**तवनियमसंजमधरं, सीलड्ढं गुणआगरं ॥५॥**

**व्याख्या**–**अथ तेषु** त्रिकादिषु **अतिक्रामन्तं पश्यति, श्रमणं संयतं,** श्रमणस्य **शाक्या**देरपि भावात् संयतग्रहणम्, तपोऽनशनादि, नियमा द्रव्याद्यभिग्रहाः, संयमः सप्तदशधा, तान् धारयतीति **तपोनियमसंयमधरस्तम्**, अत एव **शीलम**ष्टादशसहस्र-शीलाङ्गरूपम्, **तेनाढ्यं, गुणा** ज्ञानाद्यास्**तेषामाकरम्** ॥५॥

**तं पेहई मियापुत्ते, दिट्ठीए अणिमिसाए उ ।**
**कहिं मण्णेरिसं रूवं, दिट्ठपुव्वं मए पुरा ॥६॥**

**व्याख्या**–**तमे**तं श्रमणं **पश्यति मृगापुत्रो दृष्ट्या, तुः** एवार्थे, **अनिमिषयैव, क्व मन्ये** जाने **ईदृशं रूपं दृष्टपूर्वं मया, पुरा** प्राग्जन्मनीति ॥६॥

**साहुस्स दरिसणे तस्स, अज्झवसाणंमि सोहणे ।**
**मोहं गतस्स संतस्स, जाईसरणं समुप्पन्नं ॥७॥**

**व्याख्या**–**तस्य** मृगापुत्रस्य **साधोर्दर्शनेऽध्यवसानेऽन्तः**करणपरिणामे **शोभने** क्षायोपशामिकभावे वर्त्तिनि सति, **मोहम्, क्वेदं** मया दृष्टमिति चित्तोत्थमूर्च्छां **गतस्य** प्राप्तस्य **सतो जातिस्मरणं समुत्पन्नम्** ॥७॥

किं तज्जातिस्मरणं ? तदाह–

**देवलोगचुओ संतो, माणुस्सं भवमागओ ।**
**सन्निनाणे समुप्पन्ने, जाईसरणं पुराणयं ॥८॥**

**व्याख्या**–अहं **देवलोकाच्च्युतः सन् मानुष्यं भवमागतः**, इति **सङ्ज्ञिज्ञाने समुत्पन्ने** सति **पुराणकं** प्राचीनं **जातिस्मरणं** तस्याभूत्, सङ्ज्ञिनो गर्भजपञ्चेन्द्रियस्य ज्ञानं सङ्ज्ञिज्ञानम्, तस्मिन् सङ्ज्ञिज्ञाने समुत्पन्ने सतीति बोध्यम् ॥८॥

पाठान्तरगाथा– **( जाईसरणे समुप्पने, मियापुत्ते महड्ढिए ।**
**सरई पोराणियं जाइं, सामन्नं च पुराकयं ॥९॥ )**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या**—मृगापुत्रो **महर्द्धिको** राज्यलक्ष्मीयुक्तः **पौराणिकीं** प्राचीनां **जातिं स्मरति**, किं स्मरति ? मया **श्रामण्यं [च]** चारित्रं **पुराकृतं** पूर्वं पालितमभूत्, क्व सति ? **जातिस्मरणे** ज्ञाने **समुत्पन्ने** सति, सञ्जाते सतीति ॥९॥

**विसएहिं अरज्जंतो, रज्जंतो संजमंमि य ।**
**अम्मापिउरं उवागम्म, इमं वयणमव्ववी ॥१०॥**

**व्याख्या**—**विषयेष्वरज्यन्, रज्यन् च** पुनः **संयमे**, स **अम्बापितरावुपागम्येदं वचनमब्रवीत्** ॥१०॥

**सुयाणि मे पंच महव्वयाणि, नरएसु दुक्खं च तिरिक्खजोणिसु ।**
**निविन्नकामो मि महन्नवाओ, अणुजाणह पव्वइस्सामि अम्मो ॥११॥**

**व्याख्या**—**श्रुतानि** 'मे' **मया**ऽन्यजन्मनि **पञ्चमहाव्रतानि, नरकेषु दुःखं च** पुनस्**तिर्यग्योनिषु**, उपलक्षणाद्देवनृभवयोश्च दुःखमनुभूतमस्तीति शेषः, ततोऽहं **निर्विण्णकामो** निवृत्तेच्छोऽस्मि, **महार्णवाद्**भवसागरात्, अतो हे **पितरौ** ! **मामनुजानीथाः**, अहं **प्रव्रजिष्यामि**, बहुदुःखवारणाय दीक्षां लास्यामि ॥११॥

अथ तयोर्भोगनिमन्त्रणां स्वयं निषेधयति—

**अम्मताय मए भोगा, भुत्ता विसफलोवमा ।**
**पच्छा कडुयविवागा, अणुबंधदुहावहा ॥१२॥**

**व्याख्या**—हे **पितरौ** ! मया पूर्वं **भोगा भुक्ताः**, कीदृशा भोगाः ? **विषफलोपमाः**, विषमिति विषवृक्षस्तत्फलं तदुपमाः, **पश्चात् कटुकविपाकाः** पश्चात् कटुको विपाको येषां ते तथा, पूर्वं मधुरा इत्यर्थः, पुनः कथम्भूताः ? **अनुबन्धदुःखावहा** नित्यं दुःखकरा इत्यर्थः ॥१२॥

किञ्च कामाः स्पर्शप्रधानाः, स्पर्शश्च देहाश्रयः, देहश्चेदृग् यथा—

**इमं सरीरं अणिच्चं, असुइ असुइसंभवं ।**
**असासयावासमिणं, दुक्खकेसाण भायणं ॥१३॥**

**व्याख्या**—हे पितरौ ! **इदं शरीरमनित्यम्, अशुचि** स्वभावात्, **अशुचिसम्भवं** शुक्रशोणितोपन्नम्, अशाश्वत आवासो जीवस्यावस्थानं यस्मिंस्त**दशाश्वतावासम्**, पुनरिदमित्यभिधानमतीवाऽसारत्वसूचकम्, **दुःखहेतवः क्लेशा** रोगास्तेषां च **भाजनम्** ॥१३॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**असासए सरीरंमि, रइं णोवलभामिहं ।**
**पच्छा पुरा य चइयव्वे, फेणबुब्बुयसंनिभे ॥१४॥**

**व्याख्या**—**आशाश्वते शरीरे रतिं** चित्तस्वास्थ्यं **नोपलभेऽहं** भोगेषु सत्स्वपि, कीदृशे **पश्चाद्भुक्त**भोगितायाम्, **पुराऽ**भुक्तभोगितायां **वा, त्यक्तव्ये** शरीरे **फेनबुद्बुदसन्निभे** ॥१४॥

भोगनिमन्त्रणत्यागमुक्त्वा भवनिर्वेदस्य हेतुमाह—

**माणुसत्ते असारंमि, वाहीरोगाण आलए ।**
**जरामरण घत्थंमि, खणं पि न रमामहं ॥१५॥**

**व्याख्या**—हे पितरौ ! **असारे मनुष्यत्वे**ऽहं क्षणमपि न रमामि, न हर्षं भजामि, कीदृशे मनुष्यत्वे ? **व्याधिरोगाणामालये,** व्याधयोऽतीवबाधाहेतवः कुष्ठाद्या रोगा ज्वराद्यास्तेषामालये, **जरामरणग्रस्ते** च **क्षणमपि न रमेऽहमिति** ॥१५॥

**जम्मं दुक्खं जरा दुक्खं, रोगा य मरणाणि य ।**
**अहो दुक्खो हु संसारो, जत्थ कीसंति जंतुणो ॥१६॥**

**व्याख्या**—हे पितरौ ! **हु** इति निश्चयेन **संसारो दुःखं** दुःखहेतुर्वर्त्तते, **अहो** इत्याश्चर्ये, **यत्र** संसारे **जीवाः क्लिश्यन्ति,** किं किं संसारे दुःखमस्तीत्याह—**जन्म दुःखं, जरा दुःखं,** पुना **रोगाः** शिरोऽर्त्तिप्रमुखास्तथैव **मरणानि,** एतानि सर्वाणि दुःखान्येव सन्ति ॥१६॥

**खित्तं वत्थु हिरण्णं च, पुत्तदारं च बंधवा (नायओ) ।**
**चइत्ताणं इमं देहं, गंतव्वमवसस्स मे ॥१७॥**

**व्याख्या**—हे पितरौ ! मम **अवश्यमरणस्य** सतः परभवे **गन्तव्यमेव,** किं किं कृत्वा ? **क्षेत्रं** ग्रामोद्यानादिकम्, **वास्तु** गृहम्, **हिरण्यं** रूप्यं स्वर्णं वा, **पुत्रदारं** पुत्रकलत्रम्, च पुन**र्बान्धवान् स्वज्ञातीन्, इमान्** सर्वान् **त्वक्त्वा,** तथैवेदं देहं शरीरमपि त्यक्त्वेत्यर्थः ॥१७॥

**जहा किंपाकफलाणं, परिणामो न सुंदरो ।**
**एवं भुत्ताण भोगाणं, परिणामो न सुंदरो ॥१८॥**

**व्याख्या**—हे पितरौ ! **यथा किम्पाकफलानां परिणामो** भक्षणानन्तरं परिणति-समयः **सुन्दरो न तथा भुक्तानां भोगानां परिणामो**ऽपि **सुन्दरो न** भवतीति ॥१८॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

इत्थं निर्वेदहेतुमुक्त्वा दृष्टान्तोपन्यासतः स्वाशयं प्रकटयति—

**अद्धाणं जो महंतं तु, अपाहेज्जो पवज्जइ ।**
**गच्छंतो से दुही होइ, छुहातण्हाइपीडिओ ॥१९॥**

**व्याख्या—यः** पुरुषो **महान्तमध्वानं** दीर्घं मार्ग**मपाथेयः** सम्बलरहितः सन् **प्रव्रजति, स** पुमान् **गच्छन् क्षुधा तृष्णया पीडितः** सन् **दुःखी भवति** ॥१९॥

**एवं धम्मं अकाऊणं, जो गच्छइ परं भवं ।**
**गच्छंतो से दुही होइ, वाहीरोगेहिं पीडिओ ॥२०॥**

**व्याख्या—एवम**मुना प्रकारेण असम्बलपुरुषदृष्टान्तेन **यः** पुरुषो **धर्ममकृत्वा परभवं गच्छति स गच्छन् दुःखी भवति,** कीदृशः सः ? **व्याधिरोगैः पीडितः** ॥२०॥

**अद्धाणं जो महंतं तु, सपाहेज्जो पवज्जइ ।**
**गच्छंतो से सुही होइ, छुहातण्हाविवज्जिओ ॥२१॥**

**व्याख्या—यः** पुरुषो **महान्तमध्वानं** दीर्घं मार्गं प्रति **सपाथेयः** सम्बलसहितः सन् **प्रव्रजति, स** पुरुषः **क्षुधातृष्णाभ्यां विवर्जितः** सन् मार्गं **गच्छन् सुखी भवति** ॥२१॥

**एवं धम्मं पि काऊणं, जो गच्छइ परं भवं ।**
**गच्छंतो से सुही होइ, अप्पकम्मे अवेयणे ॥२२॥**

**व्याख्या—एवम**मुना प्रकारेण अनेन सम्बलसहितनरदृष्टान्तेन **यो** मनुष्यो **धर्मं कृत्वा** परं **भवं परं** लोकं **गच्छति स** धर्माराधकः पुरुषः **सुखी भवति,** कीदृशः सः ? **अल्पकर्मा** लघुकर्मा, पुन**रवेदनो**ऽल्पवेदनो वेदनारहितो वा अल्पपापकर्मा अल्पाऽसातावेदन इत्यर्थः ॥२२॥

**जहा गेहे पलित्तंमि, तस्स गेहस्स जो पहू ।**
**सारभंडाणि नीणेइ, असारं उज्झइ ॥२३॥**

**व्याख्या—यथा गृहे**ऽग्निना **प्रदीप्ते** प्रज्वलिते सति **तस्य गृहस्य यः स्वामी** स **सार-भाण्डानि** सारपदार्थानाजीविकाहेतून् गृहाद्बहि**र्निष्कासयति, असारं** च भाण्डं **त्यजतीति** ॥२३॥

**एवं लोए पलित्तंमि, जराए मरणेण य ।**
**अप्पाणं तारयिस्सामि, तुब्भेहिं अणुमन्निओ ॥२४॥**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या**–**एवम**मुना दृष्टान्तेन **लोके जरया मरणेन च प्रदीप्ते** सति अहं सारभाण्डतुल्य**मात्मानं तारयिष्यामि**, कीदृशोऽहं ? **युष्माभिरनुमतो** भवद्भिर्दत्ताज्ञः, तस्मान्मह्यं प्रवज्याकृते आज्ञा देयेत्यर्थः ॥२४॥

**तं बिंतऽम्मापियरो, सामन्नं पुत्त दुच्चरं ।**
**गुणाणं तु सहस्साइं, धारेयव्वाइं भिक्खुणो ॥२५॥**

**व्याख्या**–अथ **मातापितरौ तं मृगापुत्रं** प्रति **ब्रूतः**, **हे पुत्र ! श्रामण्यं दुश्चर**मस्ति, **तु पुनर्गुणानां** श्रामण्योपकारकाणां शीलाङ्गरूपाणां **सहस्राणि भिक्षोर्धारितव्यानि** सन्तीति ॥२५॥

**समया सव्वभूएसु, सत्तुमित्तेसु वा जगे ।**
**पाणाइवायविरई, जावज्जीवाय दुक्करं ॥२६॥**

**व्याख्या**–पुनर्हे पुत्र ! **सर्वभूतेषु समता** रागद्वेषाऽविधानतस्तुल्यता कर्त्तव्या, **अथवा** 'जगे' इति **जगति शत्रुमित्रेषु** समता कर्त्तव्या, पुन**र्यावज्जीवं प्राणातिपातविरतिस्तु दुष्कर**ास्ति, अनेन सामायिकमुक्तम् ॥२६॥

**निच्चकालप्पमत्तेणं, मुसावायविवज्जणं ।**
**भासियव्वं हियं सच्चं, निच्चाउत्तेण दुक्करं ॥२७॥**

**व्याख्या**–पुन**र्नित्यकालं** सर्वदाऽ**प्रमादित्वेन मृषावादस्य विवर्जनं** कर्त्तव्यम्, पुन**र्हितं** हितकारकं **सत्यं वक्तव्यं**, पुन**र्नित्यायुक्तेन** सदोपयुक्तेन स्थातव्यं, तदपि **दुष्कर**मस्ति। नित्यकालमप्रमत्तेन च नित्यायुक्तेनेति यच्चान्वयव्यतिरेकाभ्यामेकस्यैवार्थस्याभिधानं तत्स्पष्टनार्थमदुष्टमेव ॥२७॥

**दंतसोहणमाइस्स, अदत्तस्स विवज्जणं ।**
**अणवज्जेसणिज्जस्स, गिण्हणा अविदुक्करं ॥२८॥**

**व्याख्या**–पुनर्हे पुत्र ! मुनिधर्मे **दन्तशोधनप्रमुखस्या**पि, मकारोऽलाक्षणिकः, **अदत्तवस्तुनो विवर्जनम्**, शलाकामात्रमप्यदत्तं वस्तु नैव गृहीतव्यं, तथैव अनवद्यं च तदेषणीयं च **अनवद्यैषणीयं**, एवंविधस्य पिण्डादे**र्ग्रहणमपि दुष्करम्** ॥२८॥

**विरई अबंभचेरस्स, कामभोगरसन्नुणा ।**
**उग्गं महव्वयं बंभं, धारेयव्वं सुदुक्करं ॥२९॥**

Jain Education International 2010_02	For Private & Personal Use Only	www.jainelibrary.org

**व्याख्या**—हे पुत्र ! अब्रह्मचर्यस्य मैथुनस्य **विरतिः** कर्त्तव्या, सापि **दुष्करास्ति**, **कामभोगरसज्ञेन** जनेन **उग्रं** घोरं **ब्रह्मचर्यं महाव्रतं धर्त्तव्यम्** । लब्धभोगसुखास्वादस्य भोगेभ्यो निवृत्तिरत्यन्दुष्करेति ॥२९॥

**धणधन्नपेसवग्गेसु, परिग्गहविवज्जणं ।**
**सव्वारंभपरिच्चाओ, निम्ममत्तं सुदुक्करं ॥३०॥**

**व्याख्या**—**धनधान्यप्रेष्यवर्गेषु परिग्रहविवर्जनं** कर्त्तव्यम्, पुनः **सर्वारम्भ-परित्यागोऽपि** कर्त्तव्यः, **निर्ममत्वं**, न मे कश्चिदस्ति, अहमपि कस्यापि नास्मीति चिन्तनमपि **दुष्करमेव**, एवं व्रतपञ्चकदुष्करतोक्ता ॥३०॥

**चउव्विहे वि आहारे, राईभोयणवज्जणा ।**
**संनिहीसंचओ चेव, वज्जेयव्वो सुदुक्करं ॥३१॥**

**व्याख्या**—पुनः श्रामण्ये **चतुर्विधेऽप्याहारे रात्रिभोजनस्य वर्जना** कार्या च पुनः सन्निधिर्घृतगुडादेरुचितकालातिक्रमेण स्थापनं, ततः सन्निधिश्चासौ सञ्चयश्च **सन्निधिसञ्चयो** निश्चयेन **वर्जितव्यः** सोऽपि **दुष्करः** ॥३१॥

**छुहा तण्हा य सीउण्हे, दंसमसगवेयणा ।**
**अक्कोसा दुक्खसिज्जा य, तणफासाजल्लमेव य ॥३२॥**

**व्याख्या**—पुनः **क्षुधा** सहनीयेति, **तृष्णा** च सोढव्या, **शीतोष्णं** सहनीयं **दंशमशकानां वेदना** सहनीया, **पुनराक्रोशा** दुर्वचनानि सहनीयानि, **दुःखशय्या** उपाश्रयसम्बन्धिदुःखं सहनीयं, संस्तारके **तृणस्पर्शदुः**खमपि सहनीयं, पुनर्**जल्लं** मलपरीषहोऽपि सोढव्यः साधुनेति ॥३२॥

**तालणा तज्जणा चेव, वहबंधपरीसहा ।**
**दुक्खं भिक्खायरिया, जायणा य अलाभया ॥३३॥**

**व्याख्या**—पुनस्**ताडना** कराद्यैस्**तर्जना** अङ्गुलिभ्रमणाद्यैः, पुन**र्वधबन्धपरीषहा** अपि सहनीयाः, तत्र वधो यष्ट्यादिभिर्हननं, बन्धनं रज्ज्वादिवा बन्धः, पुन**र्भिक्षाचर्याया दुःखम्**, याञ्चाकरणोद्भवं दुःखम्, **च**कारोऽनुक्ताऽशेषपरीषहसमुच्चयार्थः, दुःखशब्दश्चेह प्रत्येकं योज्यः, तत्रापि **याचनायां** कृतायां **अलाभता** अप्राप्तिरपि भवेत्, तदापि दुःखं न कर्त्तव्यमिति ॥३३॥

Jain Education International 2010_02          For Private & Personal Use Only          www.jainelibrary.org

**कावोया जा इमा वित्ती, केसलोओ य दारुणो ।**
**दुक्खं बंभवयं घोरं, धारेयव्व महप्पणो ॥३४॥**

**व्याख्या**—कपोतानां पक्षिणां **येयं वृत्तिः** सा **कापोतिका** वृत्तिः, यथाहि ते नित्यं शङ्किताः कणकीटादिग्रहणे प्रवर्त्तन्ते, भक्षयित्वा च ते सार्थे किमपि न गृह्णन्ति । एवं भिक्षुरप्येषणादोषं शङ्कमान एव भिक्षादौ प्रवर्त्तते, न च सार्थे किमपि सञ्चयं करोति । पुनः साधोः **केशलोचोऽपि दारुणो** भयदोऽस्ति । पुन**र्महात्मना** साधुना **ब्रह्मव्रतं धारयितव्यं दुःख**मिति दुष्करं, कीदृशं ब्रह्मव्रतं ? **घोरं,** अन्येषामल्पसत्त्वानां भयदायकं, ब्रह्मव्रतस्य दुर्द्धरत्वोक्तिरतिदुष्करत्वज्ञप्त्यै ॥३४॥

अथोपसंहरति—

**सुहोईओ तुमं पुत्ता, सुकुमालो समुज्जओ ।**
**ण हुसी पभू तुमं पुत्ता, सामण्णमणुपालिया ॥३५॥**

**व्याख्या—हे पुत्र ! त्वं सुखोचितः सुकुमालः,** समुद्यतश्चारित्रग्रहणाय **सम्यक् उद्यतो**ऽसि (पाठान्तरे—'सुमज्जिओ त्ति' **सुष्ठु स्नापितः**) सर्वनेपथ्यादिभिर्लालितोऽसि, अतस्**त्वं श्रामण्यं** साधुत्व**मनुपालयितुं समर्थो न भविष्यसी**ति ॥३५॥

अथाऽप्रभुत्वं दृष्टान्तैर्दर्शयति—

**जावज्जीवमविस्सामो, गुणाणं तु महब्भरो ।**
**गरुओ लोहभारु व्व जो पुत्ता होइ दुव्वहो ॥३६॥**

**व्याख्या—हे पुत्र ! गुणानां** चारित्रस्य मूलोत्तरगुणानां **महाभारः,** स च लोहभार इव **गुरुर्ग**रिष्ठो दुर्वहो भवति, कीदृशोऽसौ महाभारः ? **यावज्जीवमविश्रामो** विश्राम-रहितः, **यश्च दुर्वहो** दुःखेन सोढुं शक्योऽस्ति ॥३६॥

**आगासे गंगसोउ व्व, पडिसोउ व्व दुत्तरो ।**
**बाहाहिं सागरो चेव, तरियव्वो गुणोयही ॥३७॥**

**व्याख्या—आकाशे हिमवत्पतद्गङ्गास्त्रोतोवद् दुस्तरो** गुणाब्धिः, लोकरूढ्या-चैतदुक्तं, तथा **प्रतिश्रोतोवत्** , यथाऽशेषनद्यादौ प्रतीपजलप्रवाहो **दुस्तरः,** तथा **बाहुभ्यां सागर इव** दुस्तरो यस्**तरितव्यः, गुणाश्च** ज्ञानादयस्त एवात्रो**दधिर्ज्ञे**यः ॥३७॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**वालुयाकवले चेव, निरस्साए उ संजमे ।**
**असिधारागमणं चेव, दुक्करं चरिउं तवो ॥३८॥**

**व्याख्या–वालुकाकवलो** यथा **निःस्वादस्**तथा **संयमोऽपि निःस्वादो** लूक्ष एवास्ति। पुन**रसिधारायां गमनं** खड्गधारोपरि चलनं यथा दुष्करं तथा **तपश्चरि**तुमपि **दुष्कर**मेव ॥३८॥

**अहीवेगंतदिट्ठीए, चरित्ते पुत्त दुच्चरे ।**
**जवा लोहमया चेव, चावेयव्वा सुदुक्करं ॥३९॥**

**व्याख्या–अहिरिवै**कान्तो निश्चयो यस्याः सा एकान्तदृष्टिस्तया **एकान्तदृष्ट्या** अनन्याक्षिप्तया, यथा सर्प एकाग्रदृष्ट्या चलति, इतस्ततश्च न विलोकयति, तथा **हे पुत्र** ! साधु**श्चारित्रे** श्रामण्ये मोक्षमार्गप्रत्येव दृष्टिं विधाय चरेत् । कीदृशे चारित्रे ? **दुश्चरे,** यथा **लोहमया यवाश्चर्वितव्या दुष्करा**स्तथा चारित्रमपि चरितुं दुष्करमेव ॥३९॥

**जहा अग्गिसिहा दित्ता, पाउ होइ सुदुक्करं ।**
**तह दुक्करं करेउं जे, तारुण्णे समणत्तणं ॥४०॥**

**व्याख्या**–हे पुत्र ! **यथाऽग्निशिखा दीप्ता** सती **पातुं** पानं कर्त्तुं **सुतरां दुष्करा**स्ति, **तथा तारुण्ये** यौवने **श्रमणत्वं कर्त्तुं** पालयितुं दुष्करमस्ति ॥४०॥

**जहा दुक्खं भरेउं जे, होइ वायस्स कोत्थलो ।**
**तहा दुक्खं करेउं जे, कीवेणं समणत्तणं ॥४१॥**

**व्याख्या**–हे पुत्र ! **यथा वायो**रिति वायुना **भरितुं** पूरयितुं **कोस्थलो** वस्त्रादिमय-श्चमर्मयो वा **दुष्करं, तथा क्लीबेन** हीनसत्वेन **श्रामण्यं कर्त्तुं दुष्कर**मस्तीति ॥४१॥

**जहा तुलाए तोलेउं, दुक्करं मंदरो गिरि ।**
**तहा निहुयं निस्संकं, दुक्करं समणत्तणं ॥४२॥**

**व्याख्या–यथा मन्दरो गिरिर्मेरु**पर्वत**स्तुलया तोलितुं दुष्करस्तथा निभृतं** निश्चलं वा, तथा **निःशङ्कं** शङ्कारहितं शरीरादिनिरपेक्षं यथास्यात्तथा **श्रमणत्वं** शरीरेण धर्त्तुं **दुष्करम्** ॥४२॥

**जहा भुयाहिं तरिउं, दुक्करं रयणायरो ।**
**तहा अणुवसंतेणं, दुक्करं दमसायरो ॥४३॥**

Jain Education International 2010_02   For Private & Personal Use Only   www.jainelibrary.org

**व्याख्या—यथा रत्नाकरः** समुद्रो **भुजाभ्यां तरितुं दुष्करस्**तथाऽनुपशान्तेनोत्कट-कषायोदयिना मनुष्येण **दमसागरस्तरितुं दुष्करः** इह केवलमुपशमस्य समुद्रोपमोक्ता, पूर्वत्र तु गुणोदधिरित्यनेन निःशेषगुणानामिति नैवात्र पौनरुक्त्यं भावनीयमिति ॥४३॥

यतश्चैवं तारुण्ये दुष्करा प्रव्रज्या, अतो भोगान् भुङ्क्ष्वेत्यादिना कृत्योपदेशं पितरौ ब्रूतः—

**भुंज माणुस्सए भोए, पंचलक्खणए तुमं ।**
**भुत्तभोगी तओ जाया, पच्छा धम्मं चरिस्ससि ॥४४॥**

**व्याख्या—हे जात** ! हे पुत्र ! **मानुष्यकान्** मनुष्यसम्बन्धिनः **पञ्चलक्षणान्** शब्दादि-पञ्चलक्षणसंयुतान् **भोगान् त्वं भुङ्क्ष्व** ? **ततः पश्चाद्भुक्तभोगीभूय धर्मं** श्रामण्यं **चरिष्यस्य**-ङ्गीकरिष्यसि । इदानीं तव भोगानुभवनसमयोऽस्तीति भावः ॥४४॥

**मृगापुत्र** आह—

**सो वि तम्हा पियरो, एवमेयं जहा फुडं ।**
**इह लोए निप्पिवासस्स, णत्थि किंचि वि दुक्करं ॥४५॥**

**व्याख्या—ततः स** ब्रूते **हे पितरौ** ! **एव**मिति **यथा** भवद्भ्यामुक्तं तत्तथैव प्रव्रज्या-दुष्करत्वं स्फुटं प्रकटमेवास्ति । तथा**पीह लोके निष्पिपासस्य** निःस्पृहपुरुषस्य किञ्चि-दतिकष्टमपि शुभानुष्ठानं **न दुष्करं, अपि** सम्भावने ॥४५॥

**सारीरमाणसा चेव, वेयणाओ अणंतसो ।**
**मए सोढाओ भीमाओ, असइं दुक्खभयाणि य ॥४६॥**

**व्याख्या**—हे पितरौ ! **मया शारीरा मानस्यश्च भीमा** भयङ्करा **वेदना अनन्तशो**-ऽनन्तवारान् **सोढा** अनुभूताः, **चैव** पूर्त्तौ, पुनर**सकृ**द्वारंवारं **दुःखानि भयानि च** राज-विड्वरादीनि सोढानि ॥४६॥

**जरामरणकंतारे, चाउरंते भयागरे ।**
**मए सोढाणि भीमाइं, जम्माणि मरणाणि य ॥४७॥**

**व्याख्या**—पुनश्चा**तुरन्ते** संसारे भीमानि **भयदानि जन्मानि च पुनर्मरणानि मया सोढानि**, देवादिरूपा चतुर्भवा अन्ता अवयवा यस्य स चतुरन्तः, स एव **चातुरन्त-स्तस्मिन्**। कीदृशे चातुरन्ते ? **जरामरणकान्तारे** जरामरणाभ्यामतिगहनतया कान्तारं वनरूपं तस्मिन् ॥४७॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**जहा इहं अगणी उण्हो, इत्तो अणंतगुणो तहिं ।**
**नरएसु वेयणा उण्हा, असाया वेइया मए ॥४८॥**

**व्याख्या**—हे पितरौ ! येषु नरकेष्वहमुत्पन्नस्तेषु **नरकेषु मया उष्णाः** स्पर्शनेन्द्रिय-दुःखदा **असातावेदना वेदिता** भुक्ताः, कीदृशास्ता उष्णा ? **यथा इह** मनुष्यलोके**ऽग्निरुष्णो** वर्त्तते, **ततोऽप्यनन्तगुणो**ऽग्निस्पर्शस्त**त्रा**स्ति, तत्र च बादराग्नेरभावात् पृथिव्या एव तथाविधो **मेरु**गिरिगालनक्षमः स्पर्शोऽस्तीति ॥४८॥

**जहा इह इमं सीयं, इत्तोऽणंतगुणो तहिं ।**
**नरएसु वेयणा सीया, अस्साया वेइया मए ॥४९॥**

**व्याख्या—यथा इह** मनुष्यलोके **इदं** प्रत्यक्षं माघादिभवं **शीतं** वर्त्तते, **इतः** शीताद**प्यनन्तगुणं शीतं नरकेषु** वर्त्तते तत्र **मया** स्पर्शनेन्द्रियदुःखरूपा **असाता** वेदना **अनुभूता**स्ति ॥४९॥

**कंदंतो कंदुकुंभीसु, उड्ढपाओ अहोसिरो ।**
**हुयासणे जलंतंमि पक्कपुव्वो अणंतसो ॥५०॥**

**व्याख्या**—हे पितरौ ! अहं **कन्दुकुम्भीषु** पाकभाजनविशेषासु लोहमयीषु **ज्वलति हुताशने** देवमायाकृते वह्नौ **अनन्तशो** बहून् वारान्, **ऊर्ध्वपाद** ऊर्ध्वचरणश्च पुन**रधः-शिरा** अधोमस्तकः **क्रन्दन्** पूत्कृतिं कुर्वन् **पक्वपूर्वो**ऽस्मि ॥५०

**महादवग्गिसंकासे, मरुम्मि वयरवालुए ।**
**कलंबवालुयाए व, दड्ढपुव्वो अणंतसो ॥५१॥**

**व्याख्या**—हे पितरौ ! **कलम्बवालुकाया** नद्या **मरुम्मि** वालुकानिवहे **अनन्तशो** वारं वारमहं **दग्धपूर्वः**, कलम्बवालुका नरकनदी, तस्याः पुलीनधूल्यां भ्रष्टपूर्वः, यथात्र चणकादिधान्यानि भ्राष्ट्रे भुञ्ज्यन्ते तथाहमपि बहुशो दग्धः, कथम्भूते **मरौ** ? **महादवा-ग्निसङ्काशे** महादवानलसदृशे दाहकशक्तियुक्ते, पुनः कीदृशे ? वज्रवालुके वज्र इव वालुका यस्मिंस्तस्मिन् **वज्रवालुके** ॥५१॥

**रसंतो कंदुकुंभीसु, उड्ढं बद्धो अबंधवो ।**
**करवत्तकरवयाईहिं, छिन्नपुव्वो अणंतसो ॥५२॥**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या**—हे पितरौ ! पुनरहं कन्दुकुम्भीषु लोहमयपाचनभाण्डविशेषेषु **ऊर्द्ध्वं** वृक्षशाखादौ **बद्धः** सन् **परमाधार्मिक**देवैरिति । [अबान्धव इति च तत्राशरणतामाह,] **करपत्रैः क्रकचैश्च अनन्तशो** बहुवारं **छिन्नपूर्वो** द्विधाकृतोऽस्मि, यथा काष्ठं बद्ध्वा करपत्रैश्छिद्यते तथाहं छिन्नोऽस्मि ॥५२॥

**अइतिक्खकंटयाइन्ने, तुंगे सिंबलिपायवे ।**
**खेवियं पासबद्धेणं, कड्ढाकड्ढाहि दुक्करं ॥५३॥**

**व्याख्या**—हे पितरौ ! **अतितीक्ष्णकण्टकाकीर्णे तुङ्गे** उच्चे **शम्बलपादपे कड्ढाकड्ढैः** कर्षापकर्षणैः परमाधार्मिककृतैः **क्षेपितं** पूर्वोपार्जितं कर्म अनुभूतं, मया यानि कर्माण्युपार्जितानि तानि भुक्तानीति शेषः, कीदृशेन मया ? **पाशबद्धेन** रज्ज्वासञ्जितेन, इदमपि **दुष्करं** कष्टं भुक्तमिति शेषः ॥५३॥

**महाजंतेसु उच्छू वा, आरसंतो सुभेरवं ।**
**पीलिओ मि सकम्मेहिं, पावकम्मो अणंतसो ॥५४॥**

**व्याख्या**—हे पितरौ ! पुनरहं **पापकर्मा**, पापं कर्म यस्य स पापकर्मा, एवंविधोऽहं **अनन्तशो** बहुवारं **स्वकर्मभिर्महायन्त्रेषु पीडितोऽस्मि**, क इव ? **इक्षुरिव**, यथा इक्षुर्महायन्त्रेषु पील्यते तथा, किं कुर्वन्नहं ? **सुभैरवं** सुतरामत्यन्तं भैरवं भयानकं शब्द**मारसन्****ाक्रन्दं कुर्वन्नित्यर्थः** ॥५४॥

**कूयंतो कोलसुणएहिं, सामेहिं सबलेहि य ।**
**पाडिओ फालिओ छिन्नो, विफुरंतो अणेगसो ॥५५॥**

**व्याख्या**—हे पितरौ ! **अनेकशो**ऽनेकवारं **श्यामैः** श्यामाभिधानैः, च पुनः **शबलैः** शबलाभिधानैः परमाधार्मिकदेवैः भूमौ पृथिव्यामहं **पातितः**, कीदृशैस्तैः ? **कोलशून-कैर्**वराहकुर्कुररूपधारिभिर्देवैः पुनरहं **स्फाटितः**, पुरातनवस्त्रवद्विदारितः, पुनरहं तैर्दन्ष्ट्राभिश्च वृक्षवच्**छिन्नः**, एवंविधोऽहं कूजन् अव्यक्तं शब्दं कुर्वन् **विस्फुरन्** सन् स्थितः ॥५५॥

**असीहिं अयसिवन्नाहिं, भल्लिहिं पट्टिसेहि य ।**
**छिन्नो भिन्नो विभिन्नो य, उइण्णो पावकम्मुणा ॥५६॥**

**व्याख्या**—हे पितरौ ! पुनरहं पापकर्मणा उदीर्णः प्रेरितः सन् नरकेषु **असिभिः** खड्गैः, पुन**र्भल्लीभिः** कुन्तैस्त्रिशूलैर्वा, **च** पुनः **पट्टिशैः** प्रहरणविशेषैश्**छिन्नो** द्विधाकृतः,

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**भिन्नो** विदारितः च पुन**र्विभिन्नो** विशेषेण सूक्ष्मखण्डीकृतः, कथम्भूतैरसि**भिरत-सीकुसुमवर्णैः** श्यामवर्णैरित्यर्थः ॥५६॥

**अवसो लोहरहे जुत्ते, जलंते समिलाजुए ।**
**चोइओ तोत्तजुत्तेहिं, रोज्झो वा जह पाडिओ ॥५७॥**

**व्याख्या**–हे पितरौ ! पुनरहं नरके **लोहरथेऽवशः** परवशः सन् परमाधार्मिक-देवै**र्ज्वलति** अग्निना जाज्वल्यमानेन **समिलायुगे युक्तो** योत्रितः, समिला युगरन्ध्र क्षेपणीयकीलिका, युगस्तु जूसरः, उभयोरपि वह्निना प्रदीप्तत्वं कथितं, तत्राग्निना ज्वलमाने रथेऽहं योत्रितः, **तोत्रयोक्त्रैर्नोदितः** प्रेरितः, तोत्राणि प्राजनकानि पुराणकादीनि, योक्त्राणि नासाप्रोतबद्धरज्जुबन्धनानि, तैः प्रेरितः, पुनरहं 'रोज्झो वा' इति **गवयाख्य**पशुविशेष **इव पातितः**, यष्टिमुष्ट्यादिना हत्वा पातितः, **वाशब्दः** पादपूरणे, **यथा** शब्द इवार्थे ॥५७॥

**हुयासणे जलंतंमि, चियासु महिसो विव ।**
**दड्ढो पक्को अवसो, पावकम्मेहि पावओ ॥५८॥**

**व्याख्या**–हे पितरौ ! **पापकर्मभि**रहं **प्रावृतो** वेष्टितः सन् ज्वलति **हुताशने जाज्वल्यमाने**ऽग्नौ **दग्धो** भस्मसात् कृतः, पुनरहं **पक्वो** वृन्ताकादिवद्भटित्रीकृतः, कीदृशोऽहं? **अवशः** परवश**श्चितासु** अग्निषु **महिष इव**, यथात्र महापापिजना महिषं बद्ध्वाऽग्नौ प्रज्वाल्य भटित्रीकुर्वन्ति, तथा तत्राहं परमाधार्मिकैर्देवैर्विकुर्विताग्नौ दग्धः पक्वश्च ॥५८॥

**बला संडासतुंडेहिं, लोहतुंडेहिं पक्खिहिं ।**
**विलुत्तो विलवंतोऽहं, ढंकगिद्धेहिं अणंतसो ॥५९॥**

**व्याख्या**–हे पितरौ ! अह**मनन्तशो** बहुवारं **ढङ्कगृध्रै**स्तन्नामविकुर्वितपक्षि-भि**र्बलाद्विलुप्तो** विविधप्रकारेण छिन्नोऽहं नासानेत्रान्त्रकालेयादिषु चुण्टित इत्यर्थः, कथं भूतैस्तैः ? संदंशाकारं तुण्डं येषां ते **संदंशतुण्डास्तैः**, पुनर्लोहन्तुण्डैर्लोहवत्कठोरमुखैः, किं कुर्यन्न**हं** विलपन् विलापं कुर्वन्नित्यर्थः ॥५९॥

**तण्हाकिलंतो धावंतो, पत्तो वेतरणिं नइं ।**
**जलं पाहं ति चिंततो, खुरधाराहिं विवाईओ ॥६०॥**

**व्याख्या**–हे पितरौ ! पुनरहं **तृषाक्रान्तो धावन् वैतरणीं प्राप्तः** सन्, **जलं**

Jain Education International 2010_02          For Private & Personal Use Only          www.jainelibrary.org

**पिबामीति चिन्तयन् क्षुरधाराभिर्व्यापादितः**, कोऽर्थः ? यावदहं तृषाक्रान्तो जलं पिबामीति ध्यायन् वैतरणीं नदीं प्राप्तस्तावत्तन्नदीकल्लोलैरहं हतो, यतस्तज्जलं क्षुरधाराप्रायं गलच्छेदकमस्तीति भावः ॥६०॥

**उण्हाभितत्तो संपत्तो, असिपत्तं महावणं ।**
**असिपत्तेहिं पडंतेहिं, छिन्नपुव्वो अणंतसो ॥६१॥**

**व्याख्या**—पुनरह**मुष्णाभितप्त** आतपपीडितश्छायार्थी सन् **असिपत्रं महावनं** खड्गवत्तीक्ष्णधारोपेतपत्रव्याप्तवृक्षवेष्टितं काननं (सं)**प्राप्त**स्तदा **पतद्भिस्तैरसिपत्रैरनन्तशो**-ऽनेकवारं **छिन्नपूर्वो** द्विधाकृतः ॥६१॥

**मुग्गरेहिं मुसंढीहिं, सूलेहिं मुसलेहि य ।**
**गयाहिं संभग्गगत्तेहिं, पत्तं दुक्खमणंतसो ॥६२॥**

**व्याख्या**—हे पितरौ ! अहं **मुद्गरै**र्लोहमयैरायुधविशेषैश्च पुन**र्मुसण्ढीभिः** शस्त्र-विशेषैः, तथा **शूलै**स्त्रिशूलैश्च पुन**र्मुसलैः**, तथा **गदाभि**र्लोहमयीभिर्यष्टिभिरनन्तशो **दुःखं** प्राप्तं, कीदृशैस्तैः शस्त्रैः ? **सम्भग्नगात्रै**श्चूर्णितशरीरैः ॥६२॥

**खुरेहिं तिक्खधाराहिं, छुरियाहिं कप्पणीहि य ।**
**कप्पिओ फालियो छिन्नो, उक्कित्तो व अणेगसो ॥६३॥**

**व्याख्या**—पुनरहं **क्षुरै** रोममुण्डनसाधनैस्**तीक्ष्णधाराभिः क्षुरिकाभिः, कल्पनीभिः** कर्त्तरीभिरहं **कल्पितो** वस्त्रवत् खण्डितः, पुनः **स्फाटितो** वस्त्रवदूर्ध्वं विदारितः, पुन**श्छिन्नः** क्षुरिकाभिः कर्कटीव खण्डितः, पुन**रुत्कृत**स्त्वगपनयनेन, एव**मनन्तशो** वारंवारं कदर्थितः ॥६३॥

**पासहिं कूडजालेहिं, मिओ वा अवसो अहं ।**
**वाहिओ बद्धरुद्धो य, बहुसो चेव विवाइओ ॥६४॥**

**व्याख्या**—पुनर्हे पितरौ ! अहं **बहुशो** वारंवारं **पाशै**र्बन्धनैस्तथा **कूटजालैः** कूटवागुरादिभि**र्मृग इव** 'वाहिओ'त्ति **विप्रलुब्धः**, तथा **बद्धो रुद्धश्च** बाह्यप्रचारा-न्निषिद्धः, यथा मृगं वञ्चयित्वा पाशे निक्षिपन्ति, तथाहमपि वञ्चितो बद्धो रुद्धश्च । **च पुनरेव** निश्चयेनाऽवशः परवशेऽहं **व्यापादितो** मारित इति ॥६४॥

**गलेहिं मगरजालेहिं, मच्छो वा अवसो अहं ।**
**उल्लिओ फालिओ गहिओ, मारिओ य अणंतसो ॥६५॥**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**व्याख्या**—पुनः [**अवशो**] अहं **गलैर्म**त्स्यानां पाशै**र्मकरजालै**र्मत्स्यजालै**र्मत्स्य इव** विद्धगलोऽभूवं, पुनर्गृहीतो मकररूपधारिभिः परमाधार्मिकैर्बलादुपात्तः, पुनः 'उल्लिओ' इति **उल्लिखित**श्चीरितः, पुनः **स्फाटितः** काष्टवद्विदारितः, पुन**रनन्तशो मारितो** पशुरिव कुट्टितः ॥६५॥

**विदंसएहिं जालेहिं, लेप्पाहिं सउणो विव ।**
**गहिओ लग्गो य बद्धो य, मारिओ य अणंतसो ॥६६॥**

**व्याख्या**—पुनरहं **शकुनिरिव** पक्षीव, विशेषेण दंशन्तीति **विदंशकाः** श्येनादय**स्तैर्जालै**स्तादृग्बन्धनैः पक्षिबन्धनविशेषैर्बलाद् **गृहीतः**, पुन**र्लेप्याभि**र्वज्रलेपादिभिः श्लेषद्रव्यै**र्लग्नः** शिलष्टः, पुनरहं **बद्धो** दवरकादिना चरणग्रीवादौ नियन्त्रितः, पुन**र्मारितोऽनन्तशो** बहुवारान् प्राणैर्विहीनः कृतः ॥६६॥

**कुहाडपरशुमाईहिं, वड्ढइहिं दुमो इव ।**
**कुट्टिओ फाडिओ छिन्नो, तच्छिओ य अणंतसो ॥६७॥**

**व्याख्या**—पुनरहं **कुठारैः पर्श्वादिकैः** काष्ठसंस्करणसाधनप्रहरणै**र्वर्द्धकिभिर्द्रुम इव कुट्टितः स्फाटितश्छिन्नश्च तक्षित**स्त्वगपनयनेना**ऽनन्तश** इति ॥६७॥

**चवेडमुट्ठिमाईहिं, कुमारेहिं अयं पिव ।**
**ताडिओ कुट्टिओ भिन्नो, चुण्णिओ य अणंतसो ॥६८॥**

**व्याख्या**—हे पितरौ ! पुनरहं परमाधार्मिकैर्देवै**श्चपेटाभि**र्हस्ततालैः पुन**र्मुष्ट्यादि**भिर्बद्धहस्तैः, आदिशब्दाल्लत्ताजानुकूर्परादिप्रहारै**स्ताडितः कुट्टितः, भिन्नो** भेदं प्रापित**श्चूर्णितश्च**, कैः कमिव ? **कुमारै**र्लोहकारै**रय** इव लोह इव, यथा लोहकारेण लोहः कुट्यते भेद्यते चूर्ण्यते श्लक्ष्णीक्रियते तथा ॥६८॥

**तत्ताइं तंबलोहाइं, तउयाइं सीसगाणि य ।**
**पाइओ कलकलंताइं, आरसंतो सुभेरवं ॥६९॥**

**व्याख्या**—हे पितरौ ! पुनरहं परमाधार्मिकै**स्तप्तानि** गालितानि **ताम्रलोहादीनि** वैक्रियाणि **त्रपुकानि सीसकानि** चाहं **पायितः**, कीदृशानि तानि ? **कलकलन्तानि** कलकलशब्दं कुर्वन्ति, अत्यन्तमुत्कालितानीति अव्यक्तं शब्दं कुर्वन्ति, कीदृशोऽहं ? सुभैरवमतिभीषणं शब्दं **रसन्** विलपन् ॥६९॥

Jain Education International 2010_02  For Private & Personal Use Only  www.jainelibrary.org

**तुहं प्पियाइं मंसाइं, खंडाइं सोलगाणि य ।**
**खाविओ मि समंसाई, अग्गिवण्णाइं णेगसो ॥७०॥**

**व्याख्या**—हे पितरौ ! पुनः परमाधार्मिकैरिति स्मारयित्वा **स्वमांसानि अहं खादितः** स्वमांसानि भोजितः, कीदृशानि स्वमांसानि ? **खण्डानि** खण्डरूपाणि, पुनः **सोल्लकानि** भटित्रीकृतानि, पुन**रग्निवर्णानि** जाज्वल्यमानानि, तान्यप्यनेकवारं **खादितानि**, किं स्मारयित्वा ? इत्याह—रे नारक ! **तव** प्राग्भवे **मांसानि प्रियाण्या**सनिति ॥७०॥

**तुहं पिया सुरा सीहू, मेरई य महूणि य ।**
**पाइओ मि जलंतीओ, वसाओ रुहिराणि य ॥७१॥**

**व्याख्या**—पुनस्तैः परमाधार्मिकैरहं **ज्वलन्तीर्वसा** अस्थितगतरसान् च पुना **रुधिराणि पायितोऽस्मि**, इति स्मारयित्वेत्यध्याहारः, रे नारक ! तव प्राग्भवे **सुरा** चन्द्रहासाभिधं मद्यं, **सीधुस्**तालवृक्षदुग्धोद्भवा, **मैरेयी** पिष्टोद्भवा शाटितोप्पन्नान्नरसा, पुन**र्मधूनि** पुष्पोद्भवानि मद्यानि प्रियाण्यासन्, इति निर्भर्त्सनापूर्वकं पायित इत्यर्थः ॥७१॥

**निच्चं भीएण तत्थेण, दुहिएण वहिएण य ।**
**परमा दुहसंबद्धा, वेयणा वेईया मए ॥७२॥**

**व्याख्या**—हे पितरौ ! **मया परमा** उत्कृष्टा वक्तुमशक्या **दुःखसम्बद्धाः**, एतादृश्यो **वेदना वेदिता** भुक्ता इत्यर्थः, कथम्भूतेन मया ? **नित्यं भीतेन** पुन**स्त्रस्तेनो**द्विग्नेन, पुनस्त्रासवशादेव दुःखितेन, पुन**र्व्यथितेन**, कम्पमानसर्वाङ्गोपाङ्गेन ॥७२॥

**तिव्वचंडप्पगाढाओ, घोराओ अइदुस्सहा ।**
**महाभयाओ भीमाओ, नरएसु वेइया मए ॥७३॥**

**व्याख्या**—पुनर्मया **नरकेषु वेदना वेदिता**, असाता अनुभूताः, कथम्भूता वेदनाः ? **तीव्रचण्डप्रगाढास्**तीव्ररसानुभवाधिक्यात् चण्डा उत्कटा वक्तुमशक्याः, गाढा बहुल-स्थितिकाः, **घोरा** भयदाः, **अतिदुस्सहा** अत्यन्तं दुरध्यासाः, **भीमाः** श्रूयमाणा अपि भयप्रदाः, एकार्थिकाश्चैते शब्दा वेदनाधिक्यसूचकाः ॥७३॥

**जारिसा माणुसे लोए, ताया ! संति वेयणा ।**
**इत्तोऽणंतगुणिया, नरएसु दुक्खवेयणा ॥७४॥**

**व्याख्या**—हे तात ! **मनुष्यलोके यादृश्यः** शीतोष्णादिका **वेदना** दृश्यन्ते, **ताभ्योऽ**पि **नरकेषु अनन्तगुणा दुःखवेदना** वर्त्तन्ते ॥७४॥

**सव्वभवेसु असाया-वेयणा वेइया मए ।**
**निमिसंतरमित्तं पि, जं साया नत्थि वेयणा ॥७५॥**

**व्याख्या**–हे पितस्तथैव **सर्वभवेष्वसातावेदना वेदिता मया, निमेषस्यान्तरं,** यावता कालेनासौ निमेषो भूत्वा पुनर्भवति **तन्मात्रमपि** कालं **यद्यस्मात् साता [वेदना] नास्ति** । वैषयिकसुखस्यापि ईर्ष्याद्यनेकदुःखानुबद्धत्वेन विपाकदारुणत्वेन चाऽसुखत्वात् । सर्वस्यास्य गाथावृन्दस्यायमाशयो, येन मयैवं दुःखान्यनुभूतानि सोऽहं कथं सुखोचितः सुकुमारो वेति ? कथं वास्य दुष्करा दीक्षा ? अतो ग्राह्यैव मया ॥७५॥

**तं बिंतम्मापियरो, छंदेण पुत्त पव्वया ।**
**नवरं पुण सामन्ने, दुक्खं निःपडिकम्मया ॥७६॥**

**व्याख्या**–अथ **पितरौ [तं] मृगापुत्रं ब्रूतः, हे ! पुत्र छंदसा** स्वीयेनाभिप्रायेण, यदि तवेच्छा तदा **प्रव्रज** ! **नवरं** परमयं विशेषोऽस्ति, **पुनः श्रामण्ये** चारित्रे एतद् **दुःखं** वर्त्तते, यद् **निःप्रतिकर्मता**स्ति, रोगोत्पत्तौ प्रतीकारो न विधेयः, अर्थात् सावद्यवैद्यकं न कारयितव्यमिति ॥७६॥

**सो बिंतम्मापियरं, एवमेयं जहा फुडं ।**
**पडिकम्मं को कुणई, अरण्णे मियपक्खिणं ॥७७॥**

**व्याख्या**–ततोऽनन्तरं **मातापितरौ** प्रति **स मृगापुत्र**कुमारो **ब्रूते, एतद्भ**वद्भ्यामुक्त**मेवं यथास्फुटम**वितथं, भवदुक्तं सत्यमित्यर्थः, परं हे पितरौ ! **अरण्ये मृगाणां पक्षिणां** च **कः परिकर्मणां** चिकित्सां **कुरुते** ? न कोऽपीत्यर्थः, तेऽपि च जीवन्ति चरन्ति च, ततः किमस्या दीक्षायाः दुष्करत्वम् ? ॥७७॥

**एगभूओ अरण्णे वा, जहा उ चरई मिए ।**
**एवं धम्मं चरिस्सामि, संजमेण तवेण य ॥७८॥**

**व्याख्या–एकभूत** एकत्वं प्राप्तो**ऽरण्ये, वा** पूर्त्तौ, 'जहा उ' **यथैव चरति मृगः एवमि**त्येकभूतोऽहमपि **संयमेन तपसा धर्मं** श्रीवीतरागप्रणीतं **चरिष्यामीति** ॥७८॥

**जया मियस्स आयंको, महरण्णंमि जायइ ।**
**अच्छंतं रुक्खमूलंमि, को णं ताहे तिगिच्छइ ॥७९॥**

**व्याख्या–यदा मृगस्यातङ्क** आशुघाती रोगो **महारण्ये जायते** तदा शुष्कवृक्षमूले

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**अच्छन्तं** तिष्ठन्तं, तथाविधावासो वासाऽभावज्ञप्त्यै, 'को णं'ति **क एनं** 'ताहे' **तदा चिकित्सत्यौ**षधाद्युपदेशेन । महाशब्देन महान् कोऽपि कदापि तथाविधं व्याध्युपद्रुतं प्राणिनं दृष्ट्वा चिकित्सेदपि, उद्घुष्यच्चक्षुर्व्याघ्रवत् ॥७९॥

**को वा से ओसहं देइ, को वा से पुच्छई सुहं ।**
**को वा से भत्तपाणं च, आहरित्ता पणामए ॥८०॥**

**व्याख्या**–हे पितरौ ! **तस्य** रोगग्रस्तस्य मृगस्य **क औषधं ददाति** ? 'वा' **अथवा तस्य** मृगस्य **क** आगत्य **सुखसातां पृच्छति** ? 'वा' **अथवा** तस्य मृगस्य **भक्तपानमाहृत्या**नीय **कः प्रणामयेद**र्पयेत् ? न कोऽपीत्यर्थः ॥८०॥

**जया य से सुही होइ, तया गच्छइ गोयरं ।**
**भत्तपाणस्स अट्ठाए, वल्लराणि सराणि य ॥८१॥**

**व्याख्या**–**यदा च स** मृगः **सुखी भवति**, स्वभावेनैव रोगमुक्तो भवति, **तदा गोचरं** गच्छति, भक्ष्यस्थाने व्रजति, तत्र च **भक्तपानस्यार्थं वल्लराणि** हरिततृणस्थलानि, च पुनः **सरांसि** जलस्थानानि विलोकयतीत्यर्थः ॥८१॥

**खाइत्ता पाणियं पाउं, वल्लरेहिं सरेहि च ।**
**मिगचारियं चरित्ताणं, गच्छइ मिगचारियं ॥८२॥**

**व्याख्या**–हे पितरौ ! स नीरोगो मृगो **मृगचर्यया** मृगभोजनपानविधिना **चरित्वा वल्लरेभ्यो** हरिततृणप्रदेशेभ्यः **खादित्वा** मितं निजभक्ष्यं भुक्त्वा, तथा **सरोभ्य**स्तटाकेभ्यः **पानीयं पीत्वा** मृगो **मृगचर्यां गच्छति**, इतस्तत उत्प्लवनात्मिकां गतिं प्राप्नोतीत्यर्थः ॥८२॥

**एवं समुट्ठिओ भिक्खू, एवमेव अणेगओ ।**
**मिगचारियं चरित्ताणं उड्ढं पक्कमइ दिसं ॥८३॥**

**व्याख्या**–**एवं** मृगवत् **समुपस्थितः** संयमानुष्ठानं प्रति, तथाविधातङ्कोत्पत्तावपि न चिकित्साभिमुखो **भिक्षुः**, **एव**मेव मृगवदे**वानेकगो**, यथासौ वृक्षमूले नैकत्रैवास्ते, किं तु कदाचित् क्वचिदेव, एवमेषोऽप्यनियतस्थानस्थ एव (पाठान्तरे-'**अणिएयणे**'त्ति **अनिकेतनो**ऽगृहः) स चैवं **मृगचर्यां चरित्वा** अपगताऽशेषकर्मांशः, **ऊर्ध्वं प्रकामति दिशं**, च चोपरिस्थानस्थो भवति स्यात्, एवं निर्वृत्तिरेवात्र मृगचर्योपमार्थत उक्ता, तत्र मृगोपमाश्च मुनयः, ते हि अनियततया विहृत्य गच्छन्तीति ॥८३॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

मृगचर्यामेव स्पष्टयति–

**जहा मिए एगे अणेगचारी, अणेगवासे धुवगोयरे य ।**

**एवं मुणी गोयरियं पविट्ठो, नो हीलए नो वि य खिंसइज्जा ॥८४॥**

**व्याख्या–यथा मृग एकोऽद्वितीयोऽनेकचारी** नैकत्र भक्तपानचरणशीलः, नैकत्र वासोऽस्याऽस्तीत्य**नेकवासः**, **ध्रुवगोचरश्च**, सदा गोचरलब्धमेवाहारयतीति, एवं मृगवद्विशेषणविशिष्टो **मुनिर्गोचर्यां** भिक्षाटनं **प्रविष्टो न हीलयेत्** कदन्नादि, न 'खिंसइज्ज'त्ति **न निन्देदर्हा**ऽप्राप्तौ स्वं परं वा । इति सूत्राष्टकार्थः ॥८४॥

एवं मृगचर्यास्वरूपमुक्त्वा यत्तेनोक्तं, यच्च पितृभ्यां, ततश्च यदसौ कृतवांस्तदाह–

**मियचारियं चरिस्सामि, एवं पुत्ता जहासुहं ।**

**अम्मापिऊहिं अणुन्नाओ, जहाइ उवहिं तओ ॥८५॥**

**व्याख्या**–यदा **मृगापुत्रे**ण पितरौ प्रतीत्युक्तं यदहं **मृगचर्यां चरिष्यामी**ति, तदा तौ ब्रूतः–**हे पुत्र** ! **यद्येवं** तदा **यथा** तव **सुखं** स्यात्तथा भव ! अस्माकमाज्ञास्ति, **ततो मातापितृभ्यामनुज्ञातो मृगापुत्र**कुमार **उपधिं** परिग्रहं सचित्ताचित्तरूपं **परित्यजति** ॥८५॥

उक्तमर्थं स विस्तारयति–

**मिगचारियं चरिस्सामि, सव्वदुक्खविमुक्खणिं ।**

**तुब्भेहिं अणुण्णाओ, गच्छ पुत्त जहासुहं ॥८६॥**

**व्याख्या**–सर्वपरिग्रहं त्यक्त्वा पुन**र्मृगापुत्रो** वदति, हे पितरौ ! अहं **भवद्भ्यामनुज्ञातो मृगचर्यामङ्गीकरिष्यामि**, कीदृशीं तां ? **सर्वदुःखविमोक्षणीं** सर्वापद्भ्यो विमोचिनीं । तदा तौ वदतः हे पुत्र ! **यथा** सुखं गच्छ ? दीक्षां गृहाणेति ।

किञ्च हे पुत्र ! **सीहत्ता निक्खमिओ, सीहत्ताए विहरसु पुत्ता ।**

**जह नवरि धम्मकामा, विरत्तकामा य विहरंति ॥१॥ [ ऋषि./प्र.२८ ]**

**नाणेण दंसणेण य, चरित्ततवनियमगुणेहिं ।**

**खंतीए मुत्तीए, होउ तुमं वड्ढमाणमई ॥२॥** ॥८६॥

**एवं सो अम्मापियरो, अणुमाणित्ताण बहुविहं ।**

**ममत्तं छिंदए ( मुंचई ) ताहे, महानागो व्व कंचुकं ॥८७॥**

**व्याख्या**–एवममुना प्रकारेण **स मृगापुत्रो मातापित्रोरनुज्ञां प्राप्य बहुविधं ममत्वं**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**छिनत्ति** त्यजतीति । कः कमिव ? **महानागो** महासर्पः **कञ्चुकमिव**, यथा महासर्पश्चिर-प्ररूढमपि निर्मोकं त्यजति, तथाऽयमनादिभवाभ्यस्तं ममत्वं मायादींश्च मुञ्चति ।

**संवेगजणियहासो, मोक्खगमणबद्धचित्तसन्नाहो ।**

**अम्मापिऊण वयणं, सो पंजलीओ पडिच्छेइ** ॥१॥ [ आरा. २/गा.१७६ ] ॥८७॥

एवमान्तरोपधित्याग उक्तः, बहिरुपधित्यागं पूर्वोक्तमपि विशेषादाह—

**इड्ढी वित्तं च मित्ते य, पुत्ते दारं च नायओ ।**

**रेणुयं व पडे लग्गं, णिद्धुणित्ताण निग्गओ ॥८८॥**

**व्याख्या—ऋद्धिं** हस्त्यादीनां, **वित्तं** धनं, **मित्राणि, पुत्रान्, दारान् ज्ञातीन्, पटे लग्नं** रेणुमिव **निर्धूय** त्यक्त्वा स **निर्गतो** गृहात्, प्रव्रजित इति ॥८८॥

क्रियामाह—

**पंचमहव्वयजुत्तो, पंचसमिओ तिगुत्तिगुत्तो य ।**

**सब्भिंतरबाहिरए, तवोकम्मंमि उज्जुओ ॥८९॥**

**व्याख्या**—तदा स **मृगापुत्रः पञ्चमहाव्रतयुक्तः**, पञ्चसमितियुक्तः, **त्रिगुप्तिगुप्तः, साभ्यन्तरबाह्यतपःकर्मणि उद्यतो** जातः, तत्राभ्यन्तरं तपः प्रायश्चित्तादि, बाह्यं चानशनादि ज्ञेयम् ॥८९॥

**निम्ममो निरहंकारो, निस्संगो चत्तगारवो ।**

**समो य सव्वभूएसु, तसेसु थावरेसु य ॥९०॥**

**व्याख्या—निर्ममो** ममत्वमुक्तः, [**निरहङ्कारो**ऽहङ्काररहितः] **निस्सङ्गो** धनादि-त्यागात्, **त्यक्तगौरवः** सातादिगौरवाऽभावात्, **त्रसेषु स्थावरेषु च**, एवं **सर्वेषु भूतेषु समो** रागद्वेषपरिहारात् ॥९०॥

समतां स्पष्टयति—

**लाभालाभे सुहे दुक्खे, जीविए मरणे तहा ।**

**समो णिंदापसंसासु, तहा माणावमाणओ ॥९१॥**

**व्याख्या**—पुनः स **लाभे** आहारादीनां प्राप्तौ, **अलाभे** तदप्राप्तौ, **सुखे दुःखे**, तथा **जीविते मरणे** च **समः** समानवृत्तिः, **तथैव निन्दासु प्रशंसासु** च, **माने** च **अपमाने** च समवृत्तिर्जातः ॥९१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

**गारवेसु कसायेसु, दंडसल्लभयेसु य ।**
**नियत्तो हाससोगाओ, अनियाणो अबंधणो ॥९२॥**

**व्याख्या**—अत्र गारवादीनि पदानि सुब्व्यत्ययात् पञ्चम्यन्तानि व्याख्येयानि । निवृत्त इति च सर्वत्र योज्यम् । स **मृगापुत्रो** गारेवेभ्यः, क्रोधादि**कषायेभ्यो, दण्डशल्यभयेभ्यः,** तत्र दण्डो मनोवाक्कायानामसद्व्यापारः, शल्यं मायानिदानमिथ्यात्वरूपं, भयानीहलोक-भयादिसप्तभयानि, तेभ्यो **निवृत्तः, हास्यशोकाभ्यां निवृत्तः, अनिदानो** निदानरहितः, **अबन्धनो** रागद्वेषबन्धनरहितश्च जातः ॥९२॥

**अणिस्सिओ इहं लोए, परलोए अणिस्सिओ ।**
**वासीचंदणकप्पो य, असणे अणसणे तहा ॥९३॥**

**व्याख्या—अनिश्रितः, नेहलोकार्थं परलोकार्थं** वा **अनुष्ठानवान्** , कस्यापि साहाय्यं वा न वाञ्छते, पुनः **वासीचन्दनकल्पः,** यदा कश्चिद्वास्या पर्शुना शरीरं छिनत्ति, कश्चिच्च चन्दनेन शरीमर्चयति, तदा तयोर्द्वयोरप्युपरि समानभावो द्वेषरागरहित इत्यर्थः, **तथैवाऽशने** आहारे, **अनशने** अनाहारे चापि सदृशस्तुल्यपरिणामवान् , एवंविधः स **मृगापुत्रो** जातः ॥९३॥

**अपसत्थेहिं दारेहिं, सव्वओ पिहियासवे ।**
**अज्झप्पज्झाणजोगेहिं, पसत्थदमसासणो ॥९४॥**

**व्याख्या—अप्रशस्तेभ्यो द्वारेभ्यः** कर्मोपार्जनाऽपायेभ्यो हिंसादिभ्यः **सर्वतः** सर्वेभ्यो निवृत्तः, अत एव **पिहितो** निरुद्ध **आश्रवः** कर्मसङ्कलनात्मको **येन स** तथा **अध्यात्मध्यानयोगाः** शुभध्यानव्यापारा**स्तैः,** प्रशस्तो दमः शमः, शासनं च सर्वज्ञागमरूपं च यस्य च **प्रशस्तदमशासनः,** एवंविधो **मृगापुत्रो** जातः ॥९४॥

अतः फलमाह—

**एवं नाणेण चरणेण, दंसणेण तवेण य ।**
**भावणाहि य सुद्धाहिं, सम्मं भावित्तु अप्पयं ॥९५॥**

**बहुयाणि य वासाणि, सामन्नमणुपालिया ।**
**मासिएण उ भत्तेणं, सिद्धिं पत्तो अणुत्तरं ॥९६॥**

**व्याख्या**—तु पुनर्**मृगापुत्रो** मुनि**र्मासिकेन भक्तेन सिद्धिं प्राप्तो** मोक्षं गतः, मासेन भवं मासिकं तेन मासिकेन भक्तेन मासोपवासेनेत्यर्थः, अथ कथम्भूतां सिद्धिं ? **अनुत्तरां**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सर्वस्थानप्रधानां जन्माद्यभावात् । किं कृत्वा ? एवममुना प्रकारेण **ज्ञानेन** मतिश्रुतादिकेन, **चरणेन** यथाख्यातेन, **दर्शनेन** शुद्धश्रद्धारूपेण, **तपसा** द्वादशविधेन, **भावनाभि**र्महाव्रत-सम्बन्धिनीभिरथवाऽनित्यत्वादिविषयाभिः **शुद्धाभि**र्निनिदानादिभि**रात्मानं सम्यक्** प्रकारेण **भावयित्वा बहूनि च वर्षाणि** यावत् **श्रामण्यं** यतिधर्म**मनुपाल्या**ऽऽराध्येति ॥९५॥९६॥

अथ सकलाध्ययनार्थमुपसंहरन्नुपदिशति–

**एवं करंति संबुद्धा, पंडिया पवियक्खणा ।**
**विणियट्टंति भोगेसु, मियापुत्ते जहा मिसी ॥९७॥**

**व्याख्या–सम्बुद्धाः** सम्यग् ज्ञाततत्वाः पुरुषाः, **पण्डिता** हेयोपादेयबुद्धि-समन्विताः, अत एव **प्रकर्षेण विचक्षणा** अवसरज्ञा एवं कुर्वन्ति, **भोगेभ्यो विशेषेण निवर्त्तन्ते,** क इव ? यथा **मृगापुत्रर्षिः, मः** अलाक्षणिकः ॥९७॥

पुनर्भङ्ग्यन्तरेणोपदिशति–

**महप्पभावस्स महाजसस्स, मियाएपुत्तस्स निसम्म भासियं ।**
**तवप्पहाणं चरियं च उत्तमं, गइप्पहाणं च तिलोयविस्सुयं ॥९८॥**

**व्याख्या–महाप्रभावस्य** रोगाद्यभावेन **महायशसः** प्रतिज्ञाया निर्वाहेन, एवं-विधस्य **मृगापुत्रस्य भाषितं** संसाराऽनित्यतोपदेशात्मकं वचनवृन्दं, च पुन**स्तपःप्रधानं** तपोभिरुत्कृष्टं, **उत्तमं** गुणगणैरलङ्कृतम्, **गतिप्रधानं** मोक्षरूपगत्या प्रधानं, च पुन-**स्त्रिलोकविश्रुतं** त्रिलोकप्रसिद्धं, एवंविधं चरित्रं वृत्तान्तं **निशम्य** ॥९८॥

फललिप्सवो हि प्रेक्षावन्तः प्रवर्त्तन्ते, इति धनममताधर्मफलमाह–

**वियाणिया दुक्खविवड्ढणं धणं, ममत्तबंधं च महाभयावहं ।**
**सुहावहं धम्मधुरं अणुत्तरं, धारेह निव्वाणगुणावहं महं ॥९९॥ त्ति बेमि**

**व्याख्या–धनं दुःखविवर्द्धनं विज्ञाय,** तथा **ममत्वबन्धं महाभयावहं** ज्ञात्वा, यतस्तत एव चौरादिमहाभयावाप्तिर्जायते । निर्वाणगुणा अनन्तज्ञानदर्शनवीर्यसुखादयस्तदावहां तत्प्राप्तिकां **सुखावहां** चानुत्तरां प्रधानां **धर्मधुरां धारयत** ! इह **निर्वाणगुणावहत्वं** सुखावह-त्वे हेतुः । 'महं'ति अमितमाहात्म्यतया **महतीं, इति** समाप्तौ **ब्रवीमी**ति प्राग्वत् ॥९९॥

**इति निःप्रतिकर्मत्वे एकोनविंशं मृगापुत्रीयाध्ययनमुक्तम् ॥१९॥**

● ● ●

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

Tejas Printers
AHMEDABAD M. 98253 47620

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org